संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 5

महाकविकालिदासविरचितम्

अभिज्ञानशाकुन्तलं नाम नाटकम्

(पूर्णचन्द्रिकापराख्यया मृत्युञ्जयभूपालीयया व्याख्यया संवलितम्)

(राष्ट्रियसंस्कृतसंस्थानस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्य के नीलकण्ठम्

निदेशकः

सम्पादकौ परियोजना -अनुसन्धातारौ च

डा वि सुब्रह्मण्यम् ,उपनिदेशकः

डा जोशी सन्तोषकुमारः, शोधसहायकः





संस्कृत अकाडमी

(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2020

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 5





महाकविकालिदासविरचितम्

अभिज्ञानशाकुन्तलं नाम नाटकम्

(पूर्णचन्द्रिकापराख्यया मृत्युञ्जयभूपालीयया व्याख्यया संवलितम्)

(राष्ट्रियसंस्कृतसंस्थानस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2020

Abhijñānaśākuntalam Nāma Nāṭakam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
osmania.ac.in\sanskritacademy

Data entry
Smt. M. Hymavathi

Proof reading
Dr.G.Sumedha

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Abhijñānaśākuntalam Nāma Nāṭakam
ISBN – 978-93-80171-50-0

Year	:	2020
Copies	:	500
Pages	:	64+394
Price	:	Rs 500
		$ 50

Sanskrit Academy Shashtyabda Granthamala - 5



Mahākavikālidāsaviracitam

Abhijñānaśākuntalaṃ Nāma Nāṭakam

(Pūrṇacandrikāparākhyayā Mṛtyuñjayabhūpālīyayā Vyākhyayā Saṃvalitam)

(Published under 'Re-printing of rare books project' of Ashtadashi Scheme of Rashtriya Sanskrit Sansthan)

Chief Editor
Prof K Neelakantham
Director

Editors and Project Investigators
Dr. V. Subrahmanyam, Deputy Director
Dr. Joshi Santosh Kumar, Research Assistant

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University Campus, Hyderabad – 500 007
2020

Abhijñānaśākuntalam Nāma Nāṭakam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
osmania.ac.in\sanskritacademy

Data entry
Smt. M. Hymavathi

Proof reading
Dr.G.Sumedha

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Abhijñānaśākuntalam Nāma Nāṭakam
ISBN – 978-93-80171-50-0

Year	:	2020
Copies	:	500
Pages	:	64+394
Price	:	Rs 500
		$ 50

विषयानुक्रमणिका

PREFACE

॥ ओम् ॥

॥ श्री गुरुभ्यो नमः ॥

॥ श्रीशङ्करभगवत्पादाः विजयन्ते ॥

We are very happy to bring out Kalidasa's **AbhijnAna Shakuntalam** a critical edition with the commentary **PurNachandrika** written by Sri Mrutyunjaya Nisshanka BhupAla. This book was originally published first in Telugu script by वर्तमानतरङ्गिणी मुद्राक्षरशाला, चेन्नपुरी (Vartamaanatarangini Mudraksharashala, Chennapuri) in the year 1882.

This Mrutyunjaya Nisshanka BhupAla was said to have belonged to *Sangamavalasa Samsthanam*, (सङ्गमवलससंस्थानम्) which is located near Vishakhapattanam and Parvatipuram of Andhra Pradesh. Mrutyunjaya Nisshanka BhupAla was son of Peddanna Nisshanka and Sanyaasaamba. Mrutyunjaya Nisshanka, with the help of his maternal uncle, went to Vishakhapattanam in his childhood and learnt many Shastras under a revered Scholar Mahamahopadhyaya Sriman Paravastu Venkata Rangacharyulu. He gained mastery over several languages like Sanskrit, Telugu, and English and also mastered the Shastras like Sahitya, Nyaya, Vyakarana in addition to Astrology, Medicine, Architecture, Music and some other arts. (Nisshankacharitam of Sriman Venkata Rangacharyulu, verses No.51, 59, 60)

Mrutyunjaya Nisshanka was a great poet and commentator in both Telugu and Sanskrit. He wrote 10 Kavyas and one drama in Telugu. He has written Sanskrit commentary on all the three dramas of Kalidasa and also composed Neetishasrtasangraha: a Sanskrit poem in hundred slokas. He has shown his great regards for legendary poet Kalidasa by

starting Neetishastrasangraha with a sloka क नीतिशास्त्रविज्ञानं क मतिश्चाल्पसङ्गतिः that is similar to क सूर्यप्रभवो वंशः क चाल्पविषया मतिः of Raghuvamsha. The commentary on three dramas was very famous in that region and scholars used to call them as "Sangamavalasa Vyaakhyaanas".

Mrutyunjaya Nisshanka BhupAla in the beginning of **PurNachandrika** of Shakuntam made it clear that his commentary is to benefit the beginners - "सुखबोधाय बालानां क्रियते पूर्णचन्द्रिका". He says that his commentary is free from any ambiguity and it is written in easy and understandable Sanskrit only to facilitate the learners. Studying carefully the whole commentary we have observed that Mrutyunjaya Nisshanka BhupAla has taken utmost care to explain the graceful language of Mahakvi Kalidasa. He quoted Koshas and Panini's sutras abundantly in the commentary for the convenience of the learners. Sri Akella Venkata Shastry, a versatile scholar opined that the two आक्षेप and समाधान from six fold definitions of Vyaakhyana "पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना। आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम्" are not taken in the commentaries of Mrutyunjaya Nisshanka BhupAla since his aim itself was to write a very simple commentary to the learners of Sanskrit Dramas of Mahakavi Kalidasa.

Mrutyunjaya Nisshanka BhupAla also wrote **Ratnadipika** on Vikramorvasheeya and **Vibudharanjani** on Malavikagnimitram and all these three commentaries he wrote on the advice of David Fremantle Carmichael, honourable member of Madras Legislative Council during 1873 to 1875 in the first provincial legislature for Madras Presidency. (P. No 486, Aandhra Samsthanamulu-Sahityaposhanamu by Tumati Donappa). Basing on this it can be inferred that these commentaries were composed during 1873 to 1875. Appreciating the three Sanskrit commentaries, the president of

Royal Asiatic Society, King Edward VII has honoured Mrutyunjaya Nisshanka BhupAla with a membership in the society (P. No 160, Nisshankacharitamu).

Coming to the publication of this work, I appreciate the sincere efforts of Dr. V. Subrahmanyam, Deputy Director, and Dr. Joshi Santosh Kumar, research assistant of the academy; they have made a thorough study of this अभिज्ञानशाकुन्तलम् with पूर्णचन्द्रिका. Following the decision of research committee of the academy, they have added certain important points like the list of Vrittas along with the names of the tunes in classical music, and also added index of Slokas in this edition. Dr. V. Subrahmanyam and Dr. Joshi Santosh Kumar both are experienced quite well in Sanskrit research and editing of the manuscripts. On the advice of committee they have taken help of three editions Chaukhamba, Motilala Banarsidas and Vavilla Ramaswamy Chennai to add recessions in it. I thank Dr. K. Varalakshmi, Dy. Director and Mr. K. V. Suryaprakash, research assistant in the academy for their encouragement and valuable suggestions at every moment.

I am very much grateful to Prof. Vasanth Kumar Bhat, former Head, Department of Sanskrit, Gujarat Vishwavidyalaya, a great scholar of Various Shastras who has done an exhaustive work on Abhijnana shakuntalam, who gladly sent us a very detailed note on this work within a short time.

My sincere thanks to Prof. P.N. Shastry sir Vice-chancellor and Prof. Subrahmanya Sharma Registrar, Central Sanskrit University, New Delhi (formerly Rashtriya Sanskrit Sansthan) who were kind enough in allotting this project of reprinting of rare books to Sanskrit Academy, It is a pleasure to acknowledge the motivation of Prof. Gopal Reddy, Registrar, Osmania University for his motivation in the publications of Sanskrit Academy.

I, on behalf of Sanskrit Academy, offer my sincere thanks to Smt. Hymavthi who has done D.T.P. work, Dr.G.Sumedha who has done two proof readings and Karshak Art Printers, Vidyanagar, Hyderabad for printing this book elegantly.

We humbly welcome the suggestions if any from the scholars for further improvement of the book.

Prof. K. Neelakantham
Director

मृत्युञ्जय-निश्शंक-भूपाल की "पूर्णचन्द्रिका" व्याख्या के लिए स्वागत-वचन

वसन्तकुमार म. भट्ट
पूर्व-निदेशक, भाषा-साहित्य भवन, गुजरात युनिवर्सिटी, अहमदावाद

[1]

अभिज्ञानशाकुन्तल समग्र संस्कृत काव्यसाहित्य का शिरोमणि है, और विश्व-नाट्य साहित्य में भी उसका स्थान प्रथम पंक्ति में सुनिश्चित है। इसमें काव्य-तत्त्व और नाट्य-तत्त्व का अप्रतीम सुभग समन्वय हुआ है। इस लिए उसकी काव्यशास्त्रीय एवं नाट्यशास्त्रीय समीक्षा भी बार बार होती रही है और उसका पौनःपुन्येन मंचन भी होता रहा है। जिसके कारण, अनेक अज्ञात रंगकर्मीओं ने, असंख्य प्रतिलिपि-कर्ताओं ने तथा कदाचित् टीकाकारों ने भी इस नाटक के मौलिक (कवि-प्रणीत) पाठ को अपनी अपनी रुचि एवं मंचनलक्ष्यी आवश्यकता के अनुसार परिवर्तित भी किया है। अतः, इस नाटक के शीर्षक से लेकर भरत-वाक्य पर्यन्त का कोई भी वाक्य, या एक भी श्लोक ऐसा नहीं हैं कि जिसमें पाठान्तर न हो। देश की विभिन्न लिपिओं में लिखी गई असंख्य पाण्डुलिपिओं में देखा जाय तो इस नाटक के दो नहीं, बल्कि पाँच पाँच रूपान्तरण (Versions) मिलते हैं । जैसे कि, 1. काश्मीरी (= शारदालिपि निबद्ध), 2. मैथिली, 3. बंगाली, 4. दाक्षिणात्य (=तेलुगु, कन्नड, ग्रन्थ, मळयालम, नन्दीनागरी-मोडी-आदि) लिपिनिबद्ध एवं 5. देवनागरी-लिपिनिबद्ध रूपान्तरण। इन पाँचों रूपान्तरणों को दो वाचनाओं (Recensions) में विभक्त किये जा सकते हैं :- (क) शारदा-वाचना, जिसमें केवल काश्मीरी रूपान्तरण है एवं (ख) शारदेतर वाचनाएं, जिसमें अन्य चार रूपान्तरणों का समावेश होता है। [काश्मीरी पाठ में इसका शीर्षक "अभिज्ञानशकुन्तला नाटक" है, मैथिली पाठ एवं बंगाली पाठ में "अभिज्ञानशकुन्तलम्" है, तथा दाक्षिणात्य एवं देवनागरी पाठों में उसको "अभिज्ञानशाकुन्तल" नाम से जाना जाता है। (ग्रन्थ-लिपि-निबद्ध कुछ पाण्डुलिपिओं में "प्रत्यभिज्ञानशाकुन्तलम्" ऐसा चौथा शीर्षक भी प्रयुक्त हुआ

है।) शीर्षकभेद से नाटक में निरूप्यमाण वस्तु का केन्द्र भी बदल जाता है:- अभिज्ञानपुरस्सरा शकुन्तला (यत्र साद्यन्तं निरूप्यते तत्) इति अभिज्ञानशकुन्तला नाटकम्।। अभिज्ञानेन स्मृता या शकुन्तला सा अभिज्ञानशकुन्तला, तामधिकृत्य कृतं नाटकमभिज्ञानशकुन्तलम्।। एवम्, अभिज्ञानेन शकुन्तला शाकुन्तलेयश्च स्मर्येते यत्र, तादृशमिदमभिज्ञानशाकुन्तलं नाटकम्।।]

इन पाँचों रूपान्तरणों में से पहले तीन उत्तर-पूर्वीय भारत में प्रचलित रहे हैं, उन तीनों में बृहत्पाठ संचरित हुआ है। तथा अन्तिम दो (दाक्षिणात्य एवं देवनागरी) रूपान्तरणों में इस नाटक का लघुपाठ (संक्षिप्त एवं संक्षिप्ततर पाठ) संचरित हुआ है। पौर्वापर्य की दृष्टि से देखा जाय तो लघुपाठ परम्परा की अपेक्षा से बृहत्पाठ परम्परा पुरोगामिनी है। इस तरह के पौर्वापर्य को निश्चित करने के लिए 1. इस नाटक के जो श्लोक अलंकारशास्त्रीय ग्रन्थों में उद्धृत हुए हैं उनकी परीक्षा की जाती है । तो सातवीं शताब्दी से लेकर ग्यारहवीं शती तक के वामन, आनन्दवर्धन, अभिनवगुप्तपादाचार्य, भोजराजादि ने अपने ग्रन्थों में इस नाटक के बृहत्पाठ में से ही उद्धरण दिये है । (उसके प्रतिपक्ष में, इतने प्राचीन किसी आलंकारिक ने लघुपाठ में से उद्धरण नहीं दिये हैं।) 2. तथा आन्तरिक सम्भावना की दृष्टि से उपलब्ध पाठान्तरों का परीक्षण करने से भी यही सिद्ध होता है कि लघुपाठ की अपेक्षा से बृहत्पाठ परम्परा के पाठान्तर ही ज्यादा कालिदास के नजदीक है। 3. काश्मीरी-आदि में ही शौरसेनी प्राकृतभाषा के ध्वनिरूपों की सुरक्षा अधिक हुई है, किन्तु दाक्षिणात्य एवं देवनागरी पाठों में पश्चात्कालिक महाराष्ट्री प्राकृत का प्रवेश हुआ है । एवञ्च, 4. लिपिओं के उद्भव-विकास की दृष्टि से देखा जाय तो भी, ब्राह्मीलिपि से निकली अन्यान्य लिपिओं में काश्मीर की शारदा लिपि ही क्रमांक में पहली आती है । इति दिक्।।

[2]

पूर्व-निर्दिष्ट पाँच रूपान्तरणों के पाठों पर जिन टीकाओं की रचना की गई हैं, उन सब का नाम-निर्देश करना भी आवश्यक है:- काश्मीरी पाठ पर

लिखी हो ऐसी एक भी टीका अद्यावधि उपलब्ध नहीं हुई है। मैथिली पाठ पर शंकर ने रसचन्द्रिका टीका लिखी है, तथा नरहरि ने टिप्पण की रचना की है। बंगाली पाठ पर, चन्द्रशेखर चक्रवर्ती की सन्दर्भ-दीपिका एवं न्यायाचार्य की रसिकमनोरमा टीकाएं प्रसिद्ध हैं। देवनागरी पाठ पर राघवभट्ट की अर्थद्योतनिका नामक टीका तथा सेतुमाधव की बालबोधिनी टीका हैं। इनकी तुलना में, दाक्षिणात्य पाठ पर तो अनेकानेक टीकाएं लिखी गई हैं। जैसे कि, 1. काटयवेमभूप की कुमारगिरिराजीया, 2. अभिराम की टीका दिङ्मात्रदर्शिनी है, 3. ध्वनि-प्रस्थान-परमाचार्य श्रीनिवासाचार्य की व्याख्या, 4. अज्ञात-कर्तृक "चर्चा" नामक टीका, 5. घनश्याम की संजीवन-टिप्पण, 6. दक्षिणावर्तनाथ की अप्रकाशित टीका, 7. अप्रकाशित अन्वयबोधिका टीका, 8. गोविन्दब्रह्मानन्दीय अप्रकाशित टीका, 9. मृत्युञ्जयनिश्शंकभूपाल की "पूर्ण-चन्द्रिका" टीका एवं 10. अर्वाचीन काल में राजा श्रीराम वर्मा के सभापण्डित के. रामपिषारकर (1913 ई.स., त्रिपुनितुरा, एरणाकुलम्) ने लिखी सारार्थदीपिका नामक टीका स्मरणीय हैं। इतनी विपुल संख्या में लिखी गई टीकाओं से अनुमान होता है कि इस नाटक का पाठ दक्षिण भारत में सर्वाधिक प्रचलित रहा है एवं अनेक विद्वानों ने उस पर टीकाएं भी निरन्तर लिखी हैं। (इस सन्दर्भ में गवेषणीय बिन्दु यही है कि किस टीकाकार ने ग्रन्थलिपि की पाण्डुलिपिओं के पाठ पर टीका लिखी है ?, किस ने तेलुगु-पाण्डुलिपिओं के पाठ पर टीका लिखी है ? इत्यादि।।)

[3]

सर विलियम जोन्स ने ई.स.1789 में इस नाटक के बंगाली पाठ का सर्वप्रथम अंग्रेजी अनुवाद प्रकाशित किया था । उसके बाद ओटो बोहतलिंग ने ई.स.1842 में देवनागरी पाठ की पहली समीक्षितावृत्ति प्रकाशित की थी। तत्पश्चात् रिचार्ड पिशेल ने बंगाली पाठ की समीक्षित आवृत्ति ई.स. 1876 में निकाली थी। उसी वर्ष में तेलुगु लिपि-निबद्ध अभिज्ञानशाकुन्तल (काटयवेमभूप की कुमारगिरिराजीया टीका के साथ) मद्रास से प्रकाशित हुआ था। तत्पश्चात्

दूसरे क्रमांक पर, ई.स.1882 में मृत्युञ्जयनिश्शंक भूपाल की "पूर्णचन्द्रिका" व्याख्या तेलुगु लिपि में (तरङ्गिणी मुद्रणालय, चेन्नै से) प्रकाशित हुई थी। आन्ध्रप्रदेश के लिए यह गौरवास्पद हकीकत है। आधुनिक विद्या-जगत् से यह बात अद्यावधि तिरोहित सी ही रही है। यद्यपि. वी. राघवन् जी ने इस टीका का निर्देश न्यू केटलॉगस केटलोगरम में किया था। लेकिन, डॉ. सत्यपाल नारंग की "कालिदास बिब्लीऑग्राफी" (प्रकाशक- हेरिटेज पब्लीशर्स, दिल्ली,1976, पृ. 165) में इस टीकाकार या टीका के प्रकाशन का कोई नाम-निर्देश ही नहीं है। आज संस्कृतविद्याजगत् के लिए परम भाग्योदय का दिन है! क्योंकि उस पूर्णचन्द्र टीका का पुनर्मुद्रित एवं पाद-टिप्पणी में रखें (तुलनात्मक सामग्री रूप) देवनागरी-पाठान्तरों के साथ तैयार किया गया, नवीन संस्करण साहित्यप्रेमी पाठकों के करकमल में फिर से विराजमान हो रहा है। यह टीका का प्रथम प्रकाशन तेलुगु लिपि में होने से उसका प्रचार बहुत सीमित रहा था। लेकिन अब उसीका नव संस्करण देवनागरी लिपि में उपलब्ध करवाया जा रहा है। जिससे देश की संस्कृतानुरागी अभ्यासी इस टीका से लाभान्वित होंगे। इस सम्पादनकार्य के लिए संस्कृत अकादेमी, (आदर्श शोध-संस्थान), उस्मानिया युनिवर्सिटी, हैदराबाद अभिनन्दनीय है और दोनों ही विद्यानुरागी एवं शास्त्रज्ञानसम्पन्न सम्पादक श्री डॉ. वि. सुब्रह्मण्य तथा डॉ. जोशी संतोष कुमार साधुवाद के अधिकारी है। दोनों ही सम्पादकों ने परिश्रम एवं निष्ठा के साथ यह नव संस्करण तैयार करके संस्कृतजगत् पर उपकार ही किया है। वृद्धोपसेविन् (यानी अतीत में तिरोहित हुए मृत्युञ्जयनिश्शङ्कभूपाल के व्याख्यान की उपासना करनेवाले) विद्वान् सम्पादकों की विद्या एवं यशः वृद्धिंगत हो ऐसी मैं शुभाशंसा व्यक्त करता हूँ।।

[4]

मृत्युञ्जयनिश्शंक भूपाल की इस व्याख्या का 216 वर्ष के बाद हो रहे पुनर्मुद्रण के अवसर पर, यह कहना प्रासंगिक है कि काश्मीरी-आदि सभी रूपान्तरणों के समीक्षित पाठ-सम्पादन प्रकाशित हुए हैं, लेकिन दाक्षिणात्य

रूपान्तरण का समीक्षित पाठ-सम्पादन (Critical Text-Editing) अद्यावधि नहीं हुआ है। जैसा कि उपरि भाग में कहा गया है, समग्र देश में दक्षिण-भारत ही ऐसा प्रदेश है कि जिसमें इस नाटक के पाठ पर सर्वाधिक टीकाएं लिखी गई हैं और कालानुक्रम की दृष्टि से जो सर्व प्रथम काटयवेम भूप की कुमारगिरिराजीया टीका है, वह भी दक्षिणभारत की है। किन्तु तेलुगु, ग्रन्थ, मळयालम, नन्दीनागरी, मोडी, कन्नड आदि सभी दक्षिण भारतीय लिपिओं में लिखी शताधिक पाण्डुलिपिओं का साकल्येन विनियोग अभी तक नहीं हुआ है।।

[5]

इस नाटक के पाँच उपलब्ध रूपान्तरणों में से काश्मीर की शारदा पाठ-परम्परा ही प्राचीनतम है। उसमें कुछ नये श्लोकों का प्रक्षेप करके, मैथिली पाठ बनाया गया है। (इस मैथिली पाठ का मंचन रसभावविशेष-दीक्षागुरु, "साहसांक" एवं "विक्रमादित्य" बिरुदधारी चन्द्रगुप्त-2 के समय में, चौथी शताब्दी में, हुआ था।) उस मैथिली-पाठ में नये पद्य दाखिल करके, तीसरे पायदान पर, बंगाली पाठ बनाया गया। इन तीनों में, नाटक के पाठ का कलेवर क्रमशः बृहत् से बृहत्तर, तथा बृहत्तर से बृहत्तम बनता गया है। उत्तर-पूर्वीय भारत का यह बृहत्पाठ जब दक्षिण भारत में प्रविष्ट होता है, तब उसमें कटौती करने की आवश्यकता महेसूस हुई होगी। क्योंकि अनुमानतः लगता है कि- प्रक्षेपों से भरा वह बृहत्पाठ शायद अल्प समयावधि में रंगमंच पर अभिनय करवाने के लिए सुयोग्य नहीं रहा था। तथा उन बृहत्पाठों में कुत्रचित् अश्लील श्लोकों का प्रक्षेप भी अरुचिकर था। इस लिए, दक्षिण भारत में उस बृहत्पाठ में "संक्षेपीकरण की प्रक्रिया" शुरू हुई होगी। जिसके कारण दक्षिण भारत की पाण्डुलिपिओं में इस नाटक का पाठ संक्षिप्त कलेवर वाला मिलता है। कालक्रम से संक्षेपीकरण की वह प्रवृत्ति सतत आगे भी बढी है। जिसके फल स्वरूप, पञ्चम क्रमांक पर आनेवाली देवनागरी पाण्डुलिपिओं में इस नाटक का पाठ संक्षिप्ततर मिलता है। दक्षिण भारत की पाण्डुलिपिओं में प्रतिबिम्बित हो रही संक्षेपीकरण की प्रवृत्ति के साथ साथ, यह

भी देखा जा रहा है कि रंगकर्म (अभिनय) से जुडे दक्षिण भारत के नटमण्डलों ने, जब अपनी नयी रंगावृत्ति (Stage version) बनाई तब काश्मीरी, मैथिली एवं बंगाली पाठों में से पृथक् पृथक् पाठभेदों का यथेच्छ ग्रहण भी किया है। अतः दाक्षिणात्य पाठ-परम्परा में संक्षेपीकरण की प्रवृत्ति के साथ साथ "पाठ-संमिश्रण की प्रवृत्ति" भी दिखाई रही है। दाक्षिणात्य टीकाकारों ने जिन भिन्न भिन्न पाठभेदों का स्वीकार करके अपनी अपनी टीकाएं लिखी हैं उनमें यह संमिश्रण प्रकटतया दृश्यमान है। (द्रष्टव्यः- *अभिज्ञानशकुन्तला नाटकस्य पञ्च रङ्गावृत्त्यः।*, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली, 2020)

[6]

अभिज्ञानशाकुन्तल नाम से प्रचलित बना यह नाटक सर्वश्रेष्ठ है- इस अभिप्राय में किसी को विप्रतिपत्ति नहीं हैं। किन्तु उसी के शीर्षक से लेकर भरत-वाक्य पर्यन्त का कोई भी वाक्य लेकर, यदि प्रश्न उठायेंगे कि "क्या अमुक वाक्य या अमुक शब्द कालिदास ने लिखा था?" तो तुरंत विवाद खडा हो जायेगा। मतलब कि इस नाटक के पाठ में प्रायः ऐसा एक भी वाक्य या श्लोक नहीं है कि जिसमें पाठान्तर की प्राप्ति नहीं होगी। अतः इस नाटक का रसास्वाद (Literary Criticism) शुरू करने से पहले, "स्वयं कालिदास ने लिखे हुए मौलिक पाठ" के नजदीक जाने के लिए (=प्राचीन से प्राचीनतर, और प्राचीनतर से प्राचीनतम पाठ का अनुसन्धान करने के लिए) सब से पहले हमें **पाठालोचना (Textual Criticism)** करनी अति आवश्यक है, अनिवार्य है। अन्यथा हो सकता है कि आपके हाथ में जो पाठ आया होगा वह परवर्ती काल में (अनेक पाठ-परिवर्तन के बाद) तैयार हुआ होगा, और आप उस परवर्ती काल के पाठ के आधार पर कालिदास का मूल्यांकन कर रहे होंगे! इस लिए (क) दाक्षिणात्य टीकाकारों के द्वारा स्वीकृत विभिन्न पाठान्तरों में कितना वैविध्य है, तथा उन पाठान्तरों का सम्बन्ध काश्मीरी, मैथिली एवं बंगाली पाठान्तरों के साथ क्या है? यह हमारी प्रथम जिज्ञासा होगी। तथा (ख) मृत्युञ्जयनिश्शंक भूपाल के द्वारा

स्वीकृत पाठ, अन्य दाक्षिणात्य टीकाकारों के पाठ की अपेक्षा से कितना प्राचीनतर या अर्वाचीन है? यह हमारी द्वितीय जिज्ञासा होगी। इन दोनों जिज्ञासाओं का क्रमशः शमन निम्नोक्त परामर्शन में किया जायेगाः-

उपर्युक्त (क) जिज्ञासा के सन्दर्भ में, विभिन्न टीकाकारों के द्वारा स्वीकृत सातों ही अंकों के महत्त्वपूर्ण पाठान्तरों के निदर्शात्मक उदाहरण :--

1. प्रथमांक के पाठ में प्राप्त पाठान्तरों का वैविध्य –

(1.1) नाटक की प्रस्तावना में सूत्रधार की उक्तिः- *अद्य खलु कालिदासग्रथितवस्तुना नवेन अभिज्ञानशकुन्तलाख्येन नाटकेनोपस्थातव्यमस्माभिः।* नटी- *ननु आर्यमिश्रैः प्रथममेवाज्ञप्तम् अभिज्ञानशकुन्तलं नाम अपूर्वं नाटकं प्रयोगेऽधिक्रियताम्।* इन उक्तिओं में मृत्युञ्जयनिश्शंकभूपाल ने इस नाटक का शीर्षक "अभिज्ञान-शकुन्तलम्" स्वीकारा है। यह शीर्षक मैथिली और बंगाली पाठ-परम्परा में प्रचलित था, जिसका मृत्युञ्जयनिश्शंक ने अनुसरण किया है। किन्तु अन्य किसी भी दाक्षिणात्य टीकाकार ने ऐसा शीर्षक नहीं माना है। काटयवेमादि सभी की टीकाओं में, नटी- *नन्वार्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशाकुन्तलं नाम नाटकं प्रयोगेणालंक्रियतामिति।* यही पाठ माना गया है।

(1.2) सूत्रधारः- *तदिदानीं कतमत् प्रकरणमाश्रित्यैनमाराधयामः।* ऐसा (प्रकरणम्) पाठ काटयवेम, श्रीनिवासाचार्य, घनश्याम और मृत्युञ्जयनिश्शंक की टीकाओं में पाया जाता है। किन्तु अभिराम, रामपिषारकर और चर्चा टीकाओं में, *तदिदानीं कतमं प्रयोगमाश्रित्यैनमाराधयामः।* इस तरह का (प्रयोगम्) पाठान्तर ग्राह्य रहा है। इन दोनों में से पहेला पाठान्तर काश्मीरी-पाठ में लिया गया है और दूसरा पाठान्तर मैथिली एवं बंगाली में से लिया गया है।

(1.3) शकुन्तला- *अनसूये, अतिपिनद्धेन वल्केन प्रियंवदया नियन्त्रितास्मि, तच्छिथिलय तावदेनम्।* ऐसा पाठ काश्मीरी, मैथिली एवं बंगाली पाठों में चलता था, जिसका स्वीकार केवल मृत्युञ्जय-निश्शंक ने किया है।

लेकिन अन्यान्य दाक्षिणात्य टीकाओं में दो तरह के परिवर्तन हो जाते हैं। (क) काटयवेम, घनश्याम और श्रीनिवास ने "*अदयपिनद्धेन स्तनवल्कलेन*" पाठान्तर दिया है। (ख) अभिराम, चर्चाकार और रामपिषारकर ने "*आयतपिनद्धेन स्तनवल्कलेन*" ऐसा पाठान्तर मान कर व्याख्या लिखी है।

(1.4) प्रथमांक के अन्त में शकुन्तला रंगभूमि से निकलती है, तब काश्मीरी-पाठ में केवल एक रंगसूचना मिलती है:- "*शकुन्तला सव्याजविलम्बितं कृत्वा परिक्रम्य सखीभ्यां सह निष्क्रान्ता*"। इससे विरुद्ध मैथिली एवं बंगाली पाठों मे शकुन्तला की पूरी एक उक्ति है:- *अनसूये, अभिनवकुश-सूचिपरिक्षतं मम चरणम्, कुरबकशाखापरिलग्नं च मे वल्कलम्। तस्मात् परिपालयत मां यावदेनं मोचयामि*। अब, बृहत्पाठ-परम्परा में प्रचलित रहे इन दो पाठान्तरों का दाक्षिणात्य टीकाकारों में कैसा परिवर्तन होता है? वह द्रष्टव्य है:- काटयवेम, अभिराम, चर्चाकार और रामपिषारकरादि सब ने शकुन्तला को *सव्याजविलम्बितं कृत्वा०* जैसे रंगसूचना से ही रंगमंच से निष्क्रामित किया है। यानी एक भी दाक्षिणात्य टीकाकार ने शकुन्तला के मुख से मैथिली-पाठ जैसी उक्ति उच्चरित नहीं करवाई है। इस सन्दर्भ में, हम मृत्युञ्जयनिश्शंक भूपाल की टीका में देखते हैं तब मालूम होता है कि उन्होंने इस प्रसंग में भी मैथिली पाठ का समादर करते हुए, उसी पाठ का अनुसरण किया है।

2. **द्वितीयांक के पाठ में प्राप्त पाठान्तरों का वैविध्य –**

(2.1) राजा- *भद्र सेनापते, मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन*। (इस उक्ति में *मन्दोत्साहः* एवं *माधव्येन* -ये दो शब्द ध्यानास्पद हैं।) यह पाठ काश्मीरी शारदा-पाण्डुलिपिओं में चलता था। लेकिन बाद में, मैथिली और बंगाली पाठों में "*भग्नोत्साहः*" ऐसा पाठान्तर प्रविष्ट होता है। परन्तु दाक्षिणात्य टीकाओं में पूर्वोक्त दोनों ही पाठान्तरों का यथेच्छ अनुसरण किया है। जैसे कि, काटयवेम, घनश्याम और श्रीनिवास ने *मन्दोत्साहः* एवं *माढव्य* पाठान्तर प्रस्तुत किये हैं। उसके प्रतिपक्ष में, अभिराम, चर्चाकार और रामपिषारकर ने *भग्नोत्साहः*

एवं *माढव्य* पाठान्तर दिये हैं। परन्तु यहाँ मृत्युञ्जयनिश्शंक ने काश्मीरी पाठ का अनुगमन किया है- वह ध्यानास्पद है। क्योंकि दाक्षिणात्य पाठ-परमपरा में केवल उन्होंने ही माधव्य जैसे संस्कृत नाम को (संस्कृत भाषा बोलनेवाले राजा की उक्तिओं में) "माढव्य" जैसे प्राकृत ध्वनिरूप को नहीं रखा है।

(2.2) करभकः- *आगामिनि चतुर्थदिवसे पुत्रपिण्डपालनो नामोपवासो भविष्यति।* इस वाक्य में उपवास का जो नाम है, वह काश्मीरी, मैथिली एवं बंगाली पाठों में बहुशः प्रचलित दिखता है। किन्तु काटयवेम, अभिराम, चर्चाकार, घनश्याम और रामपिषारकर ने *निर्वृत्तपारण उपवासो मे0* ऐसा नया पाठभेद दिया है। इसके प्रतिपक्ष में, देवनागरी पाठ के टीकाकार राघव भट्ट ने यहाँ *प्रवृत्तपारण उपवासो मे0* ऐसा नवीन पाठभेद किया है। किन्तु दाक्षिणात्य टीकाकारों में से केवल मृत्युञ्जयनिश्शंकभूपाल ने अपनी व्याख्या में काश्मीरी-आदि तीन बृहत्पाठों में प्रचलित रहे पाठ को स्वीकारा है।।

(2.3) *आशंसन्ते सुरसमितयस्सक्तवैरा हि दैत्यैरस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे।।2-16* यह पंक्ति काश्मीरी पाठ के अनुसार है। किन्तु उसके पदक्रम को बदल कर, मैथिली एवं बंगाली पाठों में *आशंसन्ते समितिषु सुरास्सक्तवैरा हि दैत्यैरस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे* ।।2-15 ऐसे प्रस्तुत की है। अब दाक्षिणात्य पाठ में हुए परिवर्तनों को देखते हैः- काटयवेम ने *आशंसन्ते सुरयुवतयः त्यक्तभोगा हि दैत्यैः0*। लिखा है। अभिराम ने- *आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यैः0।* पाठभेद दिया है। श्रीनिवास, चर्चाकार एवं रामपिषारकर ने- *आशंसन्ते सुरयुवतयः सक्तवैरा हि दैत्यैः0।* ऐसा तीसरा पाठान्तर दिया। इन दाक्षिणात्य टीकाकारों ने सुरसमितयः शब्द को बदल कर, शृङ्गारिक रंग चढाते हुए सुरयुवतयः ऐसा नवीन पाठान्तर बना लिया है, वह ध्यानास्पद है। किन्तु इन सभी दाक्षिणात्य टीकाकारों से पृथक् होकर, मृत्युञ्जयनिश्शंक ने तो मैथिली पाठानुसार ही पाठ दिया है!

3. तृतीयांक के पाठ में प्राप्त पाठान्तरों का वैविध्य –

(3.1) राजा दुष्यन्त का रंगमंच पर प्रवेश करवाने वाली रंगसूचना है कि- *ततः प्रविशति कामयानावस्थो राजा।* यह पाठ सभी दाक्षिणात्य टीकाकारों ने माना है। केवल मृत्युञ्जयनिश्शंक भूपाल ने *ततः प्रविशति मदनावस्थो राजा।* ऐसा पाठान्तर दिया है। किन्तु यह पाठान्तर मूलतः मैथिली एवं बंगाली पाठ-परम्परा में प्रचलित था, जिसको मृत्युञ्जयनिश्शंक भूपाल ने ग्राह्य माना है।

(3.2) मृत्युञ्जयनिश्शंकभूपाल ने तृतीयांक में *संमीलन्ति न तावद् बन्धनकोशाः0* 3-7 यह श्लोक स्वीकारा है और उस पर व्याख्या भी लिखी है। किन्तु किसी भी अन्य दाक्षिणात्य टीकाकार ने उस श्लोक को ग्राह्य नहीं माना है। यह श्लोक मैथिली पाठ में प्रथम प्रक्षिप्त हुआ था और बंगाली पाठ में उसका अनुगमन हुआ था। इससे ऐसा अनुमान हो रहा है कि हमारे टीकाकार मृत्युञ्जयनिश्शंक भूपाल इस नाटक की विभिन्न पाठ-परम्पराओं का पहले अभ्यास करते हैं और उपलब्ध विविध पाठभेदों में से अपने वैयक्तिक ग्राह्याग्राह्य विवेक के अनुसार अपने पाठ को सम्पादित करते हैं।

(3.3) राजा- *विमर्शच्छेदि वचनम्।* काटयवेम, श्रीनिवास और घनश्याम के द्वारा स्वीकृत पाठ है। इस पाठ के प्रतिपक्ष में, जो दूसरा पाठान्तर है, जैसे कि, *संशयच्छेदि वचनम्।* उसको अभिराम, चर्चाकार और रामपिषारकर ने प्रस्तुत किया है। (देवनागरी पाठ के टीकाकार राघव भट्ट ने भी *संशयच्छेदि वचनम्।* पाठभेद को माना है।) यहाँ दाक्षिणात्य टीकाकारों में स्पष्टतया दो भाग में बटवारा हो गया है। इनको देख कर तुरंत प्रश्न होगा कि हमारे टीकाकार मृत्युञ्जयनिश्शंक ने कौन सा पाठान्तर माना है? तो, उन्होंने काश्मीरी-आदि तीन बृहत्पाठ में प्रचलित रहे (यानी पहले) पाठान्तर का ही अनुसरण किया है ।

(3.4) प्रियंवदा- *हला मदनलेखोऽस्य क्रियताम् । तं सुमनोगोपितं कृत्वा देवताशेषापदेशेन तस्य राज्ञो हस्तं प्रापयिष्यामि।* इस वाक्य में आये "देवताशेषापदेशेन" अथवा "देवशेषापदेशेन" पाठ का स्वीकार अभिराम, चर्चाकार और रामपिषारकर ने किया है। किन्तु काटयवेम और घनश्याम ने यहाँ

पर *देवप्रसादव्यपदेशेन*0 ऐसा पाठान्तर दिया है। इन दोनों पाठान्तरों में से मृत्युञ्जनिश्शंक ने पहलेवाले पाठान्तर को ग्राह्य माना है। पुरोगामी बृहत्पाठ परम्परा में काश्मीरी और बंगाली पाठों में भी उसी पाठान्तर को माना गया है। मैथिली पाठ में *देवतापदेशेन* पाठ चलता था।

(3.5) शकुन्तला ने मदनलेख में लिखा है कि- "*तव न जाने हृदयं मम पुनः कामो दिवापि रात्रिमपि । निर्घृणस्तपति बलीयस्त्वयि युक्तमनोरथान्यंगानि*"।। ऐसा पाठ काटयवेम, श्रीनिवास, घनश्याम, अभिराम, चर्चाकार और रामपिषारकर ने माना है। तथा मृत्युञ्जयनिश्शंक ने भी उसी को माना है। (यद्यपि अभिराम, चर्चाकार और रामपिषारकर ने *कामः* शब्द के स्थान में *मदनः* शब्द को रखा है।) इनके सब के प्रतिपक्ष में, काश्मीरी, मैथिली एवं बंगाली पाठों में *निर्घृण* शब्द के स्थान में *निष्कृप* ऐसा शब्द संबोधन के रूप में प्रयुक्त हुआ है। यहाँ ध्यातव्य है कि पुरोगामी तीनों बृहत्पाठों में शकुन्तला को "मुनिकन्या" के रूप में प्रस्तुत की है। अतः उसके मुख से राजर्षि दुष्यन्त के लिए "निष्कृप" (कृपाविहीन) शब्द का प्रयोग करना उचित था। लेकिन इस नाटक का पाठ जब दक्षिण भारत में प्रविष्ट होता है तो वहाँ पर शकुन्तला को मुनिकन्या में से "राजर्षिकन्या" के रूप में परिवर्तित करके पेश की गई है। इस लिए उसके मुख से राजर्षि दुष्यन्त को "निर्घृण" जैसे शब्द से संबोधित करवाया जाता है। सभी दाक्षिणात्य टीकाकारों ने उस "निर्घृण" पाठ को ही एक समानतया स्वीकारा है।

(3.6) राजा- *परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे। समुद्ररशना चोर्वी सखी च युवयोरियम्।।* इस श्लोक में आये "समुद्ररशना" पाठ को मानने वाले टीकाकार काटयवेम, अभिराम, श्रीनिवास, घनश्याम, और मृत्युञ्जयनिश्शंक है। किन्तु चर्चाकार और रामपिषारकर ने "*समुद्रवसना*" पाठभेद स्वीकारा है । यहाँ पर काश्मीरी पाठ ध्यानास्पद है:- *धर्मेणोल्लिखिता लक्ष्मीः सखी च युवयोरिति।* तथा मैथिली एवं बंगाली पाठों में "*समुद्ररसना*" ऐसा तीसरा पाठभेद दिखाई रहा है। यहाँ लगता है कि "उर्वी" और "सखी" इन दोनों के लिए उपयुक्त हो ऐसा

कौन सा श्लिष्टविशेषण उचित होगा? उसकी विचारणा से संत्रस्त हुई दाक्षिणात्य पाठ-परम्परा ने, अर्थावबोध की दृष्टि से जो सरल हो ऐसा पाठान्तर देने का उपक्रम किया है। और मृत्युञ्जयनिश्शंक ने भी वही मार्ग पसंद किया है।।

(3.7) राजा- *गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः। श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः*।। ऐसा पाठ काटयवेम, अभिराम, श्रीनिवास, घनश्याम और रामपिषारकर ने स्वीकारा है। तथा मृत्युञ्जय-निश्शंक ने भी यही दाक्षिणात्य पाठभेद को माना है। किन्तु मैथिली और बंगाली पाठों में यह श्लोकः- *गान्धर्वेण विवाहेन बह्व्यो हि मुनिकन्यकाः। श्रूयन्ते परिणीतास्ताः पितृभि-श्चानुमोदिताः*।। के रूप में मिलता है। यहाँ ज्ञातव्य बिन्दु यह है कि प्राचीनतम काश्मीरी पाठ में यह श्लोक नहीं था। लेकिन मैथिली पाठ को तैयार करनेवालों ने, उसका प्रक्षेप किया है। तत्पश्चात् उस प्रक्षिप्त श्लोक का स्वीकार दाक्षिणात्य पाठ-परम्परा में भी हुआ। किन्तु दाक्षिणात्य पाठ में शकुन्तला को "मुनिकन्या" (=कण्वदुहिता) में से "राजर्षिकन्या" (=राजर्षि विश्वामित्र की पुत्री) के रूप में परिवर्तित की गई है, इसी लिए प्रस्तुत श्लोक में भी, तदनुसार उन दो पदों में पाठान्तर दाखिल कर दिये हैं।।

4. चतुर्थांक के पाठ में प्राप्त पाठान्तरों का वैविध्य –

(4.1) **नेपथ्ये-** *विचिन्तयन्ती यमनन्यमानसा तपोनिधिं वेत्सि न मामुपस्थितम्*। दुर्वासा की इस शापोक्ति में "तपोनिधिम्" के स्थान पर, "तपोधनम्" ऐसा पाठान्तर भी मिलता है। टीकाकार काटयवेम, अभिराम, चर्चाकार और रामपिषारकर ने "तपोनिधिम्" पाठान्तर को ही ग्राह्य माना है। यही पाठान्तर मैथिली तथा बंगाली पाठ में प्रचलित था। किन्तु मृत्युञ्जयनिश्शंक ने यहां "तपोधनम्" पाठभेद को प्रस्तुत किया है। यह नया पाठान्तर दाक्षिणात्य पाठ परम्परा में कहीं पर नहीं है। (यहाँ ज्ञातव्य है कि- प्राचीनतम काश्मीरी पाठ में, "यतोऽतिथिं वेत्सि न माम् उपस्थितम्" ऐसा पाठ चलता था। तथा इसी पाठ में ही शकुन्तला को शाप देने का उचित कारण संनिहित था। यदि उपर्युक्त *तपोनिधिम्*

अथवा *तपोधनम्* को स्वीकारते हैं तो उनमें दुर्वासा का घमण्ड ही प्रकट हो रहा है। शकुन्तला का अपराध नहीं।)

(4.2) प्रियंवदा अनसूया को कहती हैं कि पिता कण्व आज ही शकुन्तला को ससुराल भेज रहे हैः- *अद्यैव राजर्षिपरिगृहीतां त्वां भर्तुः सकाशं विसर्जयामीति।* यह पाठ काटयवेम और घनश्याम ने दिया है। किन्तु अभिराम और रामपिषारकर ने यहाँ "*ऋषिरक्षितां त्वां0*" एवं "ऋषिपरिगृहीताम्" ऐसे पाठान्तर माने हैं। एवमेव मृत्युञ्जयनिश्शंकभूपाल ने "ऋषिप्रतिरक्षिताम्" पाठ बनाया है। (चर्चाकार एवं श्रीनिवासाचार्य इस पाठान्तर के विषय में मौन रहे हैं।), इस सन्दर्भ में (उपरि 3-5 उदाहरण में) जो कहा है कि दाक्षिणात्य पाठ-परम्परा में शकुन्तला को "मुनिकन्या" से "राजर्षिकन्या" बनाने का उपक्रम किया गया है- उसका प्रतिबिम्ब काटयवेम के पाठ में देखा जा सकता है। क्योंकि काश्मीरी, मैथिली एवं बंगाली पाठों में भी "ऋषिपरिगृहीताम्" पाठ ही प्रचलित था। इससे भी पूर्वोक्त निष्कर्ष का समर्थन हो रहा है।

(4.3) काश्यप- *भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी0*। यह पाठ अभिराम, चर्चाकार और रामपिषारकर ने ग्राह्य रखा है। इसके प्रतिपक्ष में, श्रीनिवासाचार्य ने यहाँ "*भोगेष्वनुत्सेकिनी*" ऐसा पाठान्तर माना है। किन्तु प्रस्तुत प्रकाशन में "*भोग्येष्वनुत्सेकिनी*" पाठ रखा है और उस पंक्ति पर मृत्युञ्जयनिश्शंक भूपाल की व्याख्या में "भाग्येषु सम्पत्सु" ऐसा विवरण दिया है। [हो सकता है कि तेलुगु पाण्डुलिपिओं में "भोग्येषु अनुत्सेकिनी" पाठ रहा होगा।] इस प्रसंग में किस पाठान्तर का औचित्य हो सकता है? वह विचारणीय हैः- कण्व ने जामाता दुष्यन्त के लिए जो संदेश भेजा है उसमें "*भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः0*" में भाग्य शब्द का प्रयोग है, उसको देखते हुए "*भाग्येष्वनुत्सेकिनी*" पाठ अधिक श्रद्धेय लगता है। किन्तु *भोगेषु* पद में भोग शब्द क्रिया-वाचक होने से, अनुचित सिद्ध होता है। इस सन्दर्भ में तो तेलुगु पाण्डुलिपि का *भोग्येषु* पाठ व्याकरण की दृष्टि से सुसम्बद्ध लगता है। अस्तु।।

5. पञ्चमांक के पाठ में प्राप्त पाठान्तरों का वैविध्य –

(5.1) राजा- *रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्, पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः0*। ऐसा पाठ काटयवेम, घनश्याम और श्रीनिवास ने ग्राह्य रखा है। मृत्युञ्जयनिश्शंक भूपाल ने भी इसी पाठ को माना है। इसके सामने अभिराम और चर्चाकार ने जो पाठभेद माना है, उसमें *पर्युत्सकी-भवति यत्सुखितोऽपि जन्तुः0* ऐसा च्वि-प्रत्ययान्त शब्द है। इनमें से पहेला जो पाठान्तर है वह मैथिली एवं बंगाली पाठों में प्रचलित रहा है। किन्तु दूसरा पाठान्तर काश्मीरी पाठ में ग्राह्य रहा है। इस उदाहरण से भी मालूम होता है कि मृत्युञ्जयनिश्शंक ने मैथिली पाठ का अधिक अनुसरण किया है।

(5.2) शार्ङ्गरवः- *किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा।* इस पंक्ति में आये हुए *कृतकार्यद्वेषः* और *कृतावज्ञा* इन शब्दों का स्वीकार काटयवेम, अभिराम, चर्चाकार, घनश्याम, श्रीनिवास और रामपिषारकर ने किया है। लेकिन केवल मृत्युञ्जयनिश्शंक भूपाल ने "किं *कृतकार्यद्वेषाद्* धर्मं प्रति *विमुखतोचिता राज्ञः*" ऐसा दूसरा पाठान्तर पेश किया है। एक ओर दाक्षिणात्य पाठपरम्परा के सभी टीकाकार हैं, तो दूसरी ओर एकाकी मृत्युञ्जयनिश्शंक भूपाल है, जिन्होंने यहाँ *कृतकार्य-द्वेषात्* ऐसा पञ्चम्यन्त पद रखा है तथा द्वितीय चरण भी भिन्न दिया है। इसका कारण यही है कि उन्होंने यहाँ (काश्मीरी, मैथिली और) बंगाली बृहत्पाठ परम्परा का अनुसरण किया है।।

6. षष्ठांक के पाठ में प्राप्त पाठान्तरों का वैविध्य –

(6.1) स्यालः- *जानुक, विस्रगन्धी गोधादी मत्स्यबन्ध एव निःसंशयम्।* इस वाक्यस्थ गोधादी शब्द के स्थान में प्राप्त हो रहे पाठान्तरों का अभ्यास करना जरूरी हैः- अभिराम ने *गोघादी* (प्राकृत में) =*गोखादी* (संस्कृतच्छाया में) पाठान्तर माना है। चर्चाकार ने *गोधाती* पाठ रखा है। किन्तु मृत्युञ्जयनिश्शंक भूपाल ने *गोघाती* पाठ दिया है। (पूर्वापर सन्दर्भ को देखते हुए लगता है कि यह

कोई जलचर प्राणी होगा।) इनके प्रतिपक्ष में, काटयवेम, घनश्याम, ने *घोराकृतिः* पाठान्तर रखा है, जो पाठ को सुबोध बनाने की चेष्टा ही लगती है।

(6.2) स्यालः- *तस्य दर्शनेन कोऽप्यभिमतो जनः भर्त्रा स्मृतः। यन्मुहूर्तं प्रकृतिगंभीरोऽपि पर्युत्सुकमना आसीत्।* इस तरह का पाठ अभिराम और रामपिषारकर ने स्वीकारा है। किन्तु उसके प्रतिपक्ष में काटयवेम, चर्चाकार, घनश्याम ने पर्यश्रुनयन आसीत्- पाठान्तर को ग्राह्य रखा है। दाक्षिणात्य टीकाकारों में इस तरह से पाठान्तरों में द्वैविध्य चलता है। तब प्रश्न होता है कि मृत्युञ्जयनिश्शंक भूपाल ने कौन सा पाठ माना है?। तो उन्होंने यहाँ प्रथम पाठान्तर को ग्राह्य रखा है। क्योंकि वही पाठ काश्मीरी, मैथिली और बंगाली पाठों में स्वीकृत रहा था।

7. सप्तमांक के पाठ में प्राप्त पाठान्तरों का वैविध्य –

(7.1) मातलिः- *साधु दृष्टम्। (सबहुमानमवलोक्य) अहो उदग्ररमणीया पृथिवी।* यह पाठ काटयवेम, अभिराम और रामपिषारकर ने स्वीकारा है। (घनश्याम, चर्चाकार का पाठ अनुपलब्ध है) इसके सामने मृत्युञ्जयनिश्शंक भूपाल ने अहो *उदाररमणीया पृथिवी।* पाठान्तर को ग्राह्य माना है। तथा इस पाठ का अनुसरण देवनागरी पाठ पर टीका लिखनेवाले राघवभट्ट ने भी किया है।

।।इति दिक्।।

[7]

उपरि भाग में कहा है कि- मृत्युञ्जयनिश्शंकभूपाल के द्वारा स्वीकृत पाठ, अन्य दाक्षिणात्य टीकाकारों के पाठ की अपेक्षा से कितना प्राचीनतर या अर्वाचीन है? यह हमारी द्वितीय जिज्ञासा होगी। इस की पूर्व-भूमिका के रूप में हमने उपर्युक्त परामर्श में देखा कि- काटयवेम, अभिरामादि दाक्षिणात्य टीकाकारों ने जिन पाठान्तरों का ग्रहण करके अपनी अपनी टीकाएं लिखी हैं, उनसे प्रायः पृथक् हो कर, मृत्युञ्जयनिश्शंकभूपाल ने भिन्न पाठान्तरों का स्वीकार किया है। अब निम्नोक्त दो-तीन बिन्दुओं के आधार पर यह देखेंगे कि मृत्युञ्जय-निश्शंक-

भूपाल के द्वारा स्वीकृत पाठ-परम्परा की कितनी प्राचीनता हो सकती है? अर्थात् दाक्षिणात्य टीकाकारों के समूह में तेलुगुलिपि की पाण्डुलिपिओं में संचरित हुए जिस पाठ पर मृत्युञ्जयनिश्शंकभूपाल ने टीका लिखी है, उसका स्थान कहाँ है? इस परामर्शन का आनुषंगिक लाभ यह होगा कि दाक्षिणात्य टीकाकारों में इस नाटक के पाठ की परिवर्तन-यात्रा (Journey of various changes in the text of this drama) का स्वरूप कैसा उद्भासित हो रहा है उसका आंशिक अनुमान कर सकेंगेः—

लेकिन पहले, प्रसंगवशात्, काश्मीरी-मैथिली-बंगाली पाठ-परम्पराओं में स्वीकृत श्लोक-संख्या का चित्र देखना बहुत जरूरी हैं। क्योंकि उत्तर-पूर्वीय भारत में इस नाटक का कलेवर कितना था? उसको बिना जाने हम संक्षिप्त की गई दाक्षिणात्य पाठ परम्परा का आकलन ठीक तरह से नहीं कर सकेंगे। अतः पहले, इन तीनों में बृहत्पाठ से बृहत्तर पाठ, और बृहत्तर से बृहत्तम पाठ बनने की परिवर्तन-यात्रा द्रष्टव्य हैः-

अंक↓	काश्मीरी	मैथिली	बंगाली
1	30	33	34
2	19	19	19
3	35	40	41
4	26	26	24
5	33	34	34
6	34	37	38
7	36	36	35
कुल	**213**	**221**	**225**

जैसा कि पहले बताया है, उपर्युक्त काश्मीरी, मैथिली और बंगाली पाठ-परम्पराओं में इस नाटक का कलेवर (सविशेष रूप से तृतीयांक में) विस्तृत हुआ प्रतीत हो रहा है। क्योंकि तीसरे अंक में दुष्यन्त-शकुन्तला के नैसर्गिक प्रेम-सहचार के दो दृश्य अधिक हैः- (क) दुष्यन्त शकुन्तला के हाथ में मृणाल-वलय

पहनाता है, और (ख) तत्पश्चात् शकुन्तला के नेत्र में पुष्प की परागरज गिरती है। जिससे शकुन्तला के नेत्र कलुषित होते हैं, और दुष्यन्त अपने वदनमारुत से शकुन्तला के नेत्र को प्रमार्जित कर देता है। इन दोनों दृश्यों से जुडे 16 श्लोक और उनके आगे पीछे आये गद्य संवाद के कारण इन तीनों पाठों का कलेवर विस्तृत हुआ है। किन्तु ऐसा बृहत्पाठ जब दक्षिण भारत की पाण्डुलिपिओं में संक्रान्त हुआ होगा, तब उसमें से पूर्वोक्त दोनों दृश्यों को निकाल कर, संक्षिप्तीकरण की प्रक्रिया शुरू की गई है। साथ में, उन तीनों के पाठान्तरों का संमिश्रण करने की प्रक्रिया भी शुरू हुई प्रतीत होती है। इसी दृष्टि से ही, इस नाटक की पाठ-परिवर्तन यात्रा को बुद्धिगम्य बनाई जा सकती है। अर्थात् - इस नाटक के शीर्षक से लेकर भरत-वाक्य पर्यन्त अत्र तत्र सर्वत्र फैले पाठान्तरों के विकराल जटाजूट को विवृत करके समझाया जा सकता है।।

दाक्षिणात्य टीकाकारों ने इस नाटक का जो जो पाठ अपने सामने रख कर, उन पर टीकाएं लिखी हैं, उन पाठों का कलेवर कितनी इयत्ता वाला रहा होगा ? उसका अंदाजा लगाने के लिए, इन टीकाकारों ने कितने कितने श्लोकों का स्वीकार करके, उन पर टीकाएं लिखी हैं- उसका निष्कर्ष निम्नोक्त हैः-

अंक ↓	काटयवेम	अभिराम	श्रीनिवास	घनश्याम	रामपिषारकर	मृत्युञ्जय	चर्चाकार	*राघवभट्ट*
1	31	30	30	31	30	34		30
2	18	18	18	18	18	18		18
3	24	24	24	24	24	28		24
4	22	22	22	22	20	22		22
5	31	31	31	31	31	31		31
6	32	32	32	32	31	32		32
7	35	35	34	35	35	35	अनुपलब्ध	34
कुल	**193**	**192**	**191**	**193**	**189**	**200**		**191**

इस कोष्टक में दी गई श्लोकों की कुल संख्या का तुलनात्मक अभ्यास करने से मालूम होता है कि- (1) दाक्षिणात्य पाठ का ग्रथन (दक्षिण की अलग अलग लिपिओं में लिखी गई पाण्डुलिपिओं में) सुनिश्चित नहीं था, अर्थात् एक समान नहीं था। (2) रामपिषारकर ने सब से कम संख्यावाले श्लोकों को ग्राह्य माने हैं और मृत्युञ्जय-निश्शंकभूपाल ने जिन श्लोकों को ग्राह्य माने हैं उनकी ही संख्या सब से अधिक है। (इस ग्रन्थ के प्रकाशन के सन्दर्भ में यह बहुत ध्यानास्पद है।) (3) दाक्षिणात्य पाठ की अपेक्षा से, देवनागरी पाठ, जिस पर राघवभट्ट ने टीका लिखी है उसमें कम संख्यावाले श्लोकों को ग्राह्य माने गये हैं। उससे यह सूचित होता है कि- (काश्मीरी, मैथिली एवं बंगाली की अपेक्षा से) दाक्षिणात्य पाठ संक्षिप्त है, किन्तु दाक्षिणात्य पाठ की अपेक्षा से देवनागरी पाठ संक्षिप्ततर है।।

अब, दाक्षिणात्य टीकाकारों की हारमाला में विराजमान मृत्युञ्जयनिश्शंक भूपाल ने प्रथम एवं तृतीयांक में जिन अधिक तीन एवं चार श्लोकों को ग्राह्य माने हैं, उनमें निरूपणीय प्रसंग क्या है? वह ज्ञातव्य है । प्रथमांक में- (क) भ्रमरबाधा प्रसंग में मृत्युञ्जयनिश्शंकभूपाल ने "सस्पृहं विलोक्य" इस रंगसूचना से *यतो यतः षट्-चरणोऽभिवर्तते ततस्ततः प्रेरितलोललोचना0* (1-23) का अवतार किया है। तथा "अपि च" जैसे समुच्चयार्थक निपातयुग्म के साथ "सासूयम्" रंगसूचना के साथ *चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीम्0* (1-24) श्लोक का अवतार किया है। इस तरह की पाठ-योजना की तुलना जब अन्य दाक्षिणात्य (एवं देवनागरी) टीकाकारों के साथ करते हैं तो मालूम होता है कि- सभी दाक्षिणात्य टीकाकारों ने संक्षेपीकरण के आशय से श्लोक 1-23 को हटा दिया है। तथा उस 1-23 के साथ जुडी "सस्पृहं विलोक्य" जैसे रंगसूचना को *चलापाङ्गां दृष्टिं0* श्लोक के साथ संलग्न कर दी है! इस तरह की नवीन पाठ-योजना दाक्षिणात्य पाठ और देवनागरी पाठों में समान रूप से प्राप्त होती है। किन्तु इस नवीन पाठ-योजना में एक दूषण पैदा हुआ है। जैसा कि, *चलापाङ्गां दृष्टिम्0* श्लोक में तो

दुष्यन्त भ्रमर का प्रतिस्पर्धी बन कर, उसकी असूया कर रहा है। इस श्लोक की अन्तिम पंक्ति में दुष्यन्त ने कहा है कि- "*वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती*"। अतः इस श्लोक के साथ "सस्पृहम्" जैसी रंगसूचना का होना नितान्त विसंगत है। यह बात केवल मृत्युञ्जनिश्शंक भूपाल के ध्यान में आयी है, परन्तु अन्य किसी भी दाक्षिणात्य टीकाकार के ध्यान में नहीं आयी है। एवञ्च, इस तरह की, यानी मूलगामी अखण्ड पाठ की सुरक्षा केवल मैथिली एवं बंगाली पाठों में देखी जाती है। इससे अनुमान होता है कि मृत्युञ्जयनिश्शंक भूपाल ने उक्त प्रसंग की पाठ-योजना मैथिली एवं बंगाली पाठ में से संगृहीत की है।।

(ख) मृत्युञ्जयनिश्शंक भूपाल ने प्रथमांक में *यतो यतः षट्-चरणोऽभिवर्तते0* (1-23) के उपरान्त जिन अन्य तीन श्लोकों पर टीका लिखी हैं, वे 1) *न खलुन खलु बाणः संनिपात्यः0* (1-10), 2) *कुल्याम्भोभिः पवनचपलैः0* (1-15), तथा 3) *इदमुपहितसूक्ष्मग्रन्थिना0* (1-19) ये हैं। इस तरह से कुल मिला कर चार श्लोकों को दाक्षिणात्य टीकाकारों में से किसी ने (काटयवेम, अभिराम, घनश्याम, चर्चाकार और रामपिषारकर ने) नहीं स्वीकारे हैं। इस सन्दर्भ में अनुमान किया जा सकता है कि मृत्युञ्जयनिश्शंक भूपाल ने मैथिली एवं बंगाली बृहत्पाठों का ही सविशेष अनुसरण किया है। तथा उनके पाठ में, अभी संक्षेपीकरण की प्रक्रिया पूर्ण रूप से साकार नहीं हुई थी।।

(ग) मृत्युञ्जयनिश्शंक भूपाल ने इस नाट्यकृति का शीर्षक "अभिज्ञानशकुन्तलम्" स्वीकारा है। इस बिन्दु का साक्ष्य हमें उनकी टीका में दिये गये निम्नोक्त शब्दों से मिलता हैः- 1) सूत्रधारः- *आर्ये, अभिरूपभयिष्ठा परिषदियम्। अद्य खलु कालिदासप्रथितवस्तुना नवेनाभिज्ञानशकुन्तलाख्येन नाटकेनोपस्थातव्यमस्माभिः। तत् प्रतिपात्रमाधीयतां यत्नः।।* (पृ. 3), तथा 2) उसी पंक्ति की व्याख्या लिखते हुए उन्होंने लिखा है कि- *कालिदास-नामक-महाकवि-परिकल्पितकथास्वरूपेण, नवेन नूतनेन, अभिज्ञानशकुन्तलाख्येन तन्नाम्ना नाटकेन0।* (पृ. 4), एवञ्च, 3) नटी की उक्ति पर- "*नन्वार्यमिश्रैः भवद्भिः*

मिश्रशब्दोऽयं देश्यः पूज्यवाचकः। अभिज्ञानशकुन्तलं नाम तन्नाम्ना प्रसिद्धम् अपूर्वं निरूपमानं, नाटकं रूपकं, प्रयोगेण तदभिज्ञाव्यापारेण। (पृ. 8)।। इन प्रमाणों से भी सिद्ध हो रहा है कि हमारे व्याख्याकार ने मैथिली और बंगाली पाठों में प्रचलित बना शीर्षक ही अनुसरणीय माना है।।

(घ) तृतीयांक के पाठ में, मृत्युञ्जयनिश्शंक भूपाल ने जिन चार श्लोक ग्राह्य माने हैं, वे इस तरह के हैः- 1) *अद्यापि नूनं हरकोपवह्निः0* (3-4), 2) *अनिशमपि मकरकेतुर्मनसो0* (3-5), 3) *वृथैव संकल्पशतैरजस्रम्0* (3-6), 4) *सम्मीलन्ति न तावदं बन्दनकोशाः0* (3-7)।। ये चार श्लोक किसी भी अन्य दाक्षिणात्य टीकाकार ने स्वीकारे नहीं हैं। तथा ये चारों ही श्लोक मैथिली एवं बंगाली पाठों में प्रक्षिप्त हुए थे, जिनको मृत्युञ्जयनिश्शंक भूपाल ने ग्राह्य रखे हैं और उन पर अपनी "पूर्णचन्द्रिका" व्याख्या भी लिखी है।।

इन पूर्वोक्त चार प्रमाणों से अब सिद्ध होता है कि इस नाटक के बृहत्पाठ परम्परावाले तीन रूपान्तरण (काश्मीरी, मैथिली एवं बंगाली) एक ओर हैं, तथा दूसरी ओर दाक्षिणात्य पाठ परम्परा का संक्षिप्त किया गया पाठ है। इन दोनों के मध्य में स्थित हो ऐसा (नातिसंक्षिप्त) पाठ मृत्युञ्जयनिश्शकं भूपाल ने स्वीकारा है। क्योंकि उनके पाठ में अन्य टीकाकारों की अपेक्षा से कुल सात श्लोक अधिक हैं।।

यहाँ यह भी कथनीय है कि- लिपिओं के विकास की दृष्टि से सोचा जाय तो ग्रन्थलिपि तेलुगुलिपि से पहले प्रादुर्भूत हुई है। अतः ग्रन्थलिपि की पाण्डुलिपिओं में इस नाटक का पाठ इयत्ता की दृष्टि से कितना है?, अर्थात् ग्रन्थलिपि में लिखी गई पाण्डुलिपिओं में काश्मीरी बृहत्पाठ परम्परा का प्रवेश हुआ है या नहीं?- वह स्वतन्त्र गवेषणा का विषय है। किन्तु मृत्युञ्जयनिश्शंक भूपाल के द्वारा प्रस्तुत किये गये तेलुगु पाठ में इस नाटक का जो नातिसंक्षिप्त पाठ हमारे सामने आज प्रकाशित हो रहा है, उसमें मैथिली एवं बंगाली पाठों का

प्रभाव ज्यादा है, तथा दाक्षिणात्य पाठ-परम्परा में शुरू हुई संक्षिप्तीकरण की प्रक्रिया का प्रथम चरण ही उद्घाटित हो रहा है, ऐसा कहा जा सकता है।।

[8]

काश्मीरी-आदि अन्य चारों पाठ-परम्पराओं में जो पाठभेद कहीं पर नहीं थे और जिनको केवल दाक्षिणात्य पाठ-परम्परा ने ही प्रथम बार नये उद्भावित किये हैं ऐसे पाठान्तर निम्नोक्त हैः-

1. काश्मीरी, मैथिली तथा बंगाली पाठों के तृतीयांक में, कुल श्लोक-संख्या (क्रमशः) 35, 40, 41 है । इन में से करीब 16 श्लोकं को दाक्षिणात्य पाठ तैयार करनेवालों ने, संक्षिप्तीकरण की प्रक्रिया के दौरान निकाल दिये हैं। इसके कारण, दाक्षिणात्य पाठ के तृतीयांक में केवल 24 श्लोकवाला पाठ्यांश ही मिलता है। यद्यपि मृत्युञ्जयनिश्शंक भूपाल ने तृतीयांक में 28 श्लोकवाला पाठ स्वीकारा है और उस पर टीका लिखी है।

2. काश्मीरी-पाठ में नायक का नाम *दुष्ष्यन्त* है, मैथिली में *दुष्मन्त* है, बंगाली में *दुःषन्त* है, किन्तु दाक्षिणात्य में *दुष्यन्त* नाम दिया है, (जिसका देवनागरी में अनुसरण किया गया है)।

3. काश्मीरी, मैथिली एवं बंगाली पाठों में *क्षणचुम्बितानि भ्रमरैःO* ऐसी गाथा नटी-गीत में प्रस्तुत हुई है, लेकिन दाक्षिणात्य पाठ में प्रथमबार परिवर्तन करके, *ईषच्चुम्बितानि भ्रमरैःO* गाथा दी गई है, (जिसका देवनागरी पाठ में अनुसरण किया गया है)।

4. काश्मीरी-आदि तीनों बृहत्पाठानुसारी चतुर्थांक के अन्तिम पद्य में- *अर्थो हि कन्या परकीय एव ... जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा।।* ऐसे लिखा है। किन्तु उसमें परिवर्तन करके, दाक्षिणात्य पाठ में- *अर्थो हि कन्या परकीय एव ..... जातो ममायं विशदः प्रकामं प्रत्यर्पित-न्यास इवान्तरात्मा।।* नया न्यास शब्द प्रस्तावित किया गया है।

5. षष्ठांक में, अप्सरा का नाम (काश्मीरी में) *अक्षमाला* है, मैथिली एवं बंगाली में *मिश्रकेशी* है, किन्तु दाक्षिणात्य पाठ में उसमें परिवर्तन करके *सानुमती* बनाया है, (जिसका देवनागरी पाठ में अनुसरण किया गया है)।

6. षष्ठांक में आनेवाली दो दासियाँ के नाम, काश्मीरी एवं मैथिली में *मेधाविनी* और *पिङ्गलिका* है, उनमें से एक *मेधाविनी* का नाम बदल कर, बंगाली पाठ में उसको "*चतुरिका*" किया गया है। किन्तु दाक्षिणात्य पाठ में दूसरी दासी *पिङ्गलिका* का नाम भी बदल कर, "*तरलिका*" किया गया है, (जिसका देवनागरी ने अनुसरण किया है)। इत्यादि।

[9]

महाकवि कालिदास-प्रणीत अभिज्ञानशाकुन्तल नाटक के काश्मीरी, मैथिली, बंगाली, दाक्षिणात्य एवं देवनागरी जैसे पाँच रूपान्तरणों पर लिखी गई अनेक टीकाओं का विवरण पूर्व में दिया गया है। तथा दाक्षिणात्य रूपान्तरण पर सर्वाधिक टीकाएं लिखी गई हैं- यह बात भी कही गई है। लेकिन उस प्रसंग में हमने बताया है कि इस नाटक के तमाम टीकाकारों में से काटयवेम भूप की कुमारगिरिराजीया टीका ही, कालानुक्रम की दृष्टि से सर्व प्रथम आती है। इस टीका का लेखन-काल 1500 शती बताया जाता है। (तथा मृत्युञ्जयनिश्शंकभूपाल की पूर्णचन्द्रिका टीका, जो 1804 ई.स. में प्रकाशित हुई थी, उसके नाम पर "सब से पहेली प्रकाशित होनेवाली टीका" का गौरव अंकित हुआ है।) यहाँ जिज्ञासा होती है कि इस महान् नाटक पर पंदरहवीं शती से पहले लिखी गई हो ऐसी कोई टीका क्यूं नहीं मिलती है?। अथवा, दूसरे शब्दों में पूछे तो- इतना प्रसिद्ध एवं श्रेष्ठ नाटक होते हुए भी, उस पर टीका लिखने का प्रारम्भ इतना परवर्ती काल में क्यों है?। इस प्रश्न के दो समाधान है:- 1. काटयवेमभूप से भी पहेले शायद किसी ने टीका लिखी होगी, किन्तु अभी तक उसकी पाण्डुलिपि कहीं से मिली नहीं है। अथवा, 2. नाटक जैसी कृतियाँ पर स्वतन्त्र रूप से टीका लिखने का प्रघात भले ही परवर्ती काल में हुआ हो, लेकिन संस्कृत नाटकों पर

टीका लिखने की प्रवृत्ति का आरम्भ परोक्ष रूप से काव्यशास्त्रीय एवं नाट्यशास्त्रीय ग्रन्थों में बहुत पहले हो चुका था। ई.स. 850 में आनन्दवर्धन ने अभिज्ञानशाकुन्तल के "*मुहुरङ्गुलिसंवृताधरोष्ठम् ..... कथमप्युन्नमितं न चुम्बितं तु*"।। (अंक-3) को उद्धृत करके, "तु" निपात की व्यंजकता की चर्चा की है। (द्रष्टव्य- ध्वन्यालोक, 3-16) एवमेव, नाट्यशास्त्र पर टीका लिखनेवाले अभिनवगुप्तपाद ने भी नाट्यशास्त्र की कारिकाओं में बताये सन्धि-सन्ध्यङ्गादि, या रसादि विषयक नियमों को अभिज्ञानशाकुन्तल के अनेक उद्धरणों में चरितार्थ होते हुए वर्णित किये हैं। अर्थात् इन शास्त्रग्रन्थों में बताये हुए लक्षणों का समन्वय नाटक रूप लक्ष्य-स्थानों में कैसे हो रहा है? वह वारं वार बताया है। यह भी एक प्रकार की टीका ही है। यद्यपि "टीका" के परम्परागत लक्षण में कहा है कि- *विषमपदव्याख्यारूपे ग्रन्थभेदे टीकाशब्दः प्रयुज्यते।* अथवा, *टीक्यते गम्यते, अवगम्यते शब्दार्थोऽनयेति टीका।* तथापि अभिज्ञानशाकुन्तल पर लिखी गई पूर्वोक्त टीकाओं में सन्धि-सन्ध्यङ्गादि, प्रवेशक-विष्कम्भक के लक्षण तथा रसादि विषयक विश्लेषण प्राधान्येन प्राप्त होता है। यानी उनको हम शास्त्रीय व्याख्याएं या टीकाएं कहेंगे।

उपर्युक्त चर्चा के अनुसन्धान में जिज्ञासा होगी कि प्रस्तुत टीकाकार मृत्युञ्जयनिश्शंकभूपाल की पूर्णचन्द्रिका का मूल्यांकन किस रूप में करना चाहिए। पूर्वोक्त अनेक टीकाकारों की टीकाओं का परामर्श करने से मालूम होता है कि टीकाकार राघवभट्ट रसवादी व्याख्याकार है, और 64 सन्ध्यङ्गों के साथ पाँचों सन्धियाँ का प्रदर्शन बराबर करते हैं। श्रीनिवासाचार्य को "ध्वनिप्रस्थानपरमाचार्य" माने जाते हैं, इसी लिए उन्होंने अभिज्ञानशाकुन्तल के प्रत्येक श्लोकादि में पदे पदे व्यंजना का स्फोरण किया है। एवमेव, शकुन्तला ने जो मदनलेख (*तव न जाने हृदयम् मम पुनः कामो दिवापि रात्रावपि* 0) लिखा है, उस एक ही श्लोक में उन्होंने 33 व्यभिचारिभाव, अष्ट सात्त्विक भाव, एवं अष्ट स्थायिभावों को मिला कर, रसनिष्पत्ति के लिए उपकारक होनेवाले पूरे 49 भावों

को समुद्घाटित किये हैं। मैथिली पाठ के टीकाकार शंकर अलंकारवादी है और उन्होंने जगह जगह पर अन्यापदेश, हेतु, अनुनय आदि अलंकारों का प्रदर्शन किया है। किन्तु हमारे टीकाकार मृत्युञ्जयनिश्शंकभूपाल जब टीका लिखते हैं तब वे कहीं पर अलंकार की अथवा रसादि की व्यापक चर्चा ही नहीं करते हैं। तथा नाट्यशास्त्रीय बीज-बिन्दु-पताका-प्रकरी जैसी अर्थप्रकृतियाँ, नायक की आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागम जैसी मानसिक अवस्थाओं की एवं पाँच मुख-प्रतिमुखादि सन्धियों की चर्चा नहीं करते हैं। क्योंकि उन्होंने टीका लिखने का ध्येय एक ही रखा है कि कठिन शब्दावली को सुगम, सुबोध बनाया जाय। मतलब कि उनको अपनी "पूर्णचन्द्रिका" टीका का नाम सार्थक सिद्ध करना है! रस-निष्पत्ति या व्यंजना-व्यापार का मार्ग खुलने का पूरा आधार सब से पहले अभिधार्थ की प्राप्ति पर ही निर्भर होता है। प्रेक्षक या पाठक के मन में यदि शब्दार्थ ही सुस्पष्ट नहीं होगा तो व्यंजना-व्यापार का प्रवर्तन ही नहीं होगा। अतः यहाँ सब से पहले ध्यानास्पद बिन्दु यही है कि मृत्यञ्जयनिश्शंकभूपाल ने जिस तरह से अमरकोश, विश्व एवं रत्नमाला जैसे कोशों का विनियोग किया है, वही ध्यानास्पद है। इस तरह से वे प्रत्येक वाक्य एवं श्लोक के अभिधार्थ को सुगम, सुबोध बनाने में पूर्णतया सफल रहे हैं ।।

यद्यपि उन्होंने वाक्यार्थ की प्रतिपत्ति पर ही विशेष ध्यान केन्द्रित किया है, तथापि वे नाट्यशास्त्रीय पारिभाषिक शब्दों के लक्षणों की नितान्त उपेक्षा करते हैं ऐसा भी नहीं है । अनेक स्थानों पर उन्होंने अर्थोपक्षेकादि का प्रयोजन विशद किया है। तथा इस नाटक की कथावस्तु की पुनर्योजना पर भी उनकी दृष्टि जागृत है। उदाहरणतया पञ्चमांक के अन्त में मृत्युञ्जय-निश्शंक भूपाल उस बिन्दु की ओर हमारा ध्यान आकृष्ट करते हैं कि महाभारत की मूल कथा (शकुन्तलोपाख्यान) में तो दुष्यन्त का विस्मरण जिस रूप में वर्णित है- वह हेतु-विहीन है। इस लिए कालिदास ने दुर्वासा के शापवृत्तान्त की नवीन कल्पना की है, जिससे दुष्यन्त के विस्मरण को न्यायिक सिद्ध किया जा सकता है। अन्यथा

नायक की धीरोदात्तता विवादास्पद हो जाती। इस महत्त्वपूर्ण परिवर्तन में हमें कवि-प्रतिभा का दर्शन करना चाहिए। इस बिन्दु की ओर, किसी भी टीकाकार ने कुछ भी नहीं कहा है। इति दिङ्-न्याय से इतना पर्याप्त होगा।।

पूर्वोक्त परामर्श के उपलक्ष्य में, दाक्षिणात्य टीकाकारों की पूरी मण्डली में मृत्युञ्जयनिश्शंक भूपाल की व्याख्या में प्रतिबिम्बित हो रहे पाठ का मूल्य सर्वाधिक सिद्ध होता है। और अभिज्ञानशाकुन्तल नाटक की पाठ-परिवर्तन-यात्रा के विभिन्न स्तरों का निर्णय करने में उसका अनितरसाधारण महत्त्व दिख रहा है। मेरा दृढ विश्वास है कि इस व्याख्या के प्रकाशन से संस्कृतविद्या-जगत् में अनेक नवीन अनुसन्धानों का मार्ग प्रशस्त होगा। अतः इस पूर्णचन्द्रिका व्याख्या के पुनःप्रकाशन का मैं भूयो भूयः सानन्द स्वागत करता हूँ। इस कार्य के लिए डॉ. श्री वि. सुब्रह्मण्य एवं डॉ. श्री संतोषकुमार जोशी दोनों ही कृतभूरिपरिश्रम संनिष्ठ सम्पादक अभिनन्दनीय है।।

।। सरस्वती श्रुतिमहतां महीयताम् ।।

प्रस्तावना

सर्वैः विद्वत्प्रवरैः विदितचरमेवैतद्यत् अभिज्ञानशाकुन्तलं जगद्विश्रुतं नाटकमिति, विश्वसाहित्यस्य अनुपमं रत्नमित्यपि च। तस्य प्रणेता कविकुलसार्वभौमः विश्वप्रलोभमानयशोधाम्ना विमण्डितः महाकविः कालिदासः नाम। इतिहासकारैः इदं व्यवसितं यत् कालिदासेन महाकाव्यद्वयं, खण्डकाव्यद्वयं, नाटकत्रितयं च आहत्य ग्रन्थसप्तकं प्राणायीति। तेषु ग्रन्थेषु अभिज्ञानशाकुन्तलं नामेदम् अद्वितीयमनर्घं नाटकं विराजते।

I. कृतिपरिचयः

अभिज्ञानशाकुन्तलमित्यस्य नाम्नः व्युत्पत्तिः व्याख्याकारैः बहुविधपक्षानाश्रित्य बहुधा व्याख्यायि। तद्यथा

- शकुन्तलायाः पक्षमाश्रित्य 'अभिज्ञानम्, अभिज्ञानभूतं तत् शाकुन्तलमिति अभिज्ञानशकुन्तलम्' इति।
- शकुन्तलाविषयकं विवाहवृत्तान्तं यस्मिन् अभिज्ञानरूपेण अभिहितं स्यात् इति पक्षे 'अभिज्ञानेन स्मृतं शाकुन्तलं शकुन्तलाविषयकं वृत्तं यस्मिन् तत् अभिज्ञानशाकुन्तलम्' इति।
- यस्मिन्नाटके शकुन्तलायाः परिचयेन सह वैवाहिकमितिवृत्तं स्यादिति पक्षे 'अभिज्ञानं परिचयस्वरूपं शाकुन्तलं शकुन्तलासम्बन्धिचरितं यत्र नाटके तत् अभिज्ञाशाकुन्तलम्' इति।
- यस्मिन् नाटके शकुन्तलायाः विवाहादिवृत्तजातम् अभिज्ञानप्रधानं स्यात् इति पक्षे 'अभिज्ञानप्रधानं शाकुन्तलं यस्मिन् नाटके तत् अभिज्ञानशाकुन्तलम्' इति।
- अभिज्ञानं च शकुन्तला च यस्मिन् नाटके निबद्धे वर्तेते तदधिकृत्य कृते ग्रन्थे इति पक्षे 'अभिज्ञानं च शकुन्तला च अभिज्ञानशकुन्तले, ते अधिकृत्य कृतं नाटकिमिति अभिज्ञानशाकुन्तलम्' इति।

- यस्मिन् नाटके अभिज्ञानेन स्मृता शकुन्तला इति विषयमुपलक्ष्य निर्मितं नाटकमिति पक्षे 'अभिज्ञानेन स्मृता शकुन्तला अभिज्ञानशकुन्तला तमधिकृत्य कृतं नाटकमिति अभिज्ञानशाकुन्तलम्' इति।
- यस्मिन् नाटके शकुन्तला एव अभिज्ञानेन स्मृता इति पक्षे 'अभिज्ञानेन स्मृता स्मृतिपथमानीता शकुन्तला अभिज्ञानशकुन्तला यस्मिन् तत् अभिज्ञानशकुन्तलम्' इति।

कालिदासः महाभारतगतं शकुन्तलाविषयकं सङ्क्षिप्तं कथावस्तु गृहीत्वा स्वकृतौ सरसं, विस्तृतं च चकार। रामायणात् अभिज्ञानमिति पदमुद्धृत्य कविना शीर्षकं निरमायीति ऊह्यते। यतः शीर्षकस्थम् अभिज्ञानमिति पदं रामयणस्य सीताहनूमतोः संवादं द्योदयति। तथाहि-

मणिं दत्वा ततः सीता हनूमन्तमथाब्रवीत्।
अभिज्ञानमभिज्ञातमेतद् रामस्य तत्त्वतः।।
मणिं दृष्ट्वा तु रामो वै त्रयाणां संस्मरिष्यति।
वीरो जनन्या मम च राज्ञो दशरथस्य च ।। सुन्दरकाण्डः 39.1,2।।

अस्मिन् श्लोकेऽपि अभिज्ञानेन संस्मरणवृत्तान्त एव प्रतिपादितः वाल्मीकिना।

कालिदासस्य उपमा अनितरसाधारणी एव। कालिदासस्य नाटकीयं सहजसौन्दर्यबोधमवाप्तुं विदुषां पाठकानामपि सहृदयता समुन्मिषितचित्तवृत्तिना सह कविहृदयं चावगन्तुं व्याख्यानतो विशेषप्रतिपत्तिर्भवतीति शास्त्रपङ्क्तिमुररीकृत्य सव्याख्यानमिदं नाटकमत्र प्रकाश्यते।

II. पाठपरिचयः (पाठसमीक्षा)

विश्वविख्यातस्य नाटकस्यास्य बहुशो प्राचीनाः नवीनाश्च टीकाः सम्प्रति उपलभ्यन्ते। 1786 तमे वर्षे विलियं जोन्स् वर्यः आङ्लानुवादेन सह नाटकमिदं

प्रथमवारं प्राकाश्यमनैषीत्। [1]कृष्णदास-अकाडम्याः सुधाकरमालवीयवर्यस्य सम्पादने प्रकाशं नीतस्य संस्करणस्य आमुखेन इदमवगम्यते यत् शाकुन्तलस्यास्य चतुर्विधाः पाठपरम्पराः उपलभ्यन्ते इति।

1. गौडीयपाठपरम्परा अथवा वङ्गीयपाठपरम्परा
2. देवनागरीपाठपरम्परा अथवा पाश्चत्यपाठपरम्परा
3. काश्मीरपाठपरम्परा अथवा शारदापाठपरम्परा
4. दाक्षिणात्यपाठपरम्परा

1. जर्मन् विद्वान् पिशल्वर्यः 1877 तमे वर्षे गौडीयपाठत्वेन प्रचलितं वङ्गपरम्परायाः प्रथमं संस्करणं सम्पादितवान्। पुनश्च द्वितीयं संस्करणं लेनमैनवर्यस्य सम्पादने 1922 तमे वर्षे हार्वर्ड विश्वविद्यालयात् मुद्रितमभवत्।

2. पाश्चात्यदेशेषु ख्यातं संस्करणं तावत् काशीपाठपरम्परासम्बद्धम्। मोनियर् विलियम्स्वर्येण 1876 तमे वर्षे स्वीयेन आङ्ग्लानुवादेन पादटिप्पण्या च सहितं नाटकं लण्डन्-तः प्राकाशि। साम्प्रतम् उपलभ्यमानं शुद्धनागरीपाठसंस्करणमित्युच्यमानं संस्करणं तावत् 1902 तमे वर्षे पुनातः पी एन् पाटनकरवर्यः प्रकाशितवान्।

3. काश्मीरमथवा शारदापाठयुक्तं संस्करणम् आनीतवान् प्रो.एस्.के बेल्वलकर् महोदयः। इदं संस्कृरणं प्रो.वी.राघवन् महोदयस्य आमुखेन सह 1965 तमे वर्षे साहित्य-अकाडमीतः प्रकाशितमभवत्।

4. दाक्षिणात्य पाठपरम्परासम्बद्धं संस्करणं तावत् काटयवेमभूपालस्य टीकया 1876 तमे वर्षे तेलुगुलिप्या चेन्नपुरीतः प्रकाशितमभवत्। अस्याः टीकायाः नाम कुमारगिरिराजीया इति। टीकासिहितं दाक्षिणात्यपाठसम्बद्धं प्रथममुद्रणमिति शोधकारैः अभिप्रेतम्।

---

[1] अभिज्ञानशाकुन्तलम्, सम्पादकः व्याख्याकारश्च – डा सुधाकर मालवीयः, कृष्णदास अकाडमी, वाराणसी, 1991 प्राकाशनम्

संस्कृतपरिषदा प्रस्तूयमानमिदं पूर्णचन्द्रिकाव्याख्यासहितं दाक्षिणात्य पाठसम्बद्धं प्रकाशनं प्रथमवारं 1882 तमे वर्षे चेन्नपुरीतः प्रकाशितमभवत्। अस्य प्रकाशनस्य अवलोकनेन इदमवगम्यते यत्, 1876 तमवर्षे कुमारगिरिराजीयया टीकया काटयवेमभूपालस्य प्रथमप्रकाशनोत्तरं टीकासहितप्रकाशेनेषु द्वितीयं प्रकाशनम् इदमेवेति, दाक्षिणात्यपाठपरम्परासम्बद्धं द्वितीयं प्रकाशनमपि इदमेवेति च।

आचार्यस्य सुधाकरमालवीयवर्यस्य खेदः आसीद्यत् "दाक्षिणात्य पाठपरम्परा अपूर्णा इव प्रतिभाति। यतः अत्र बहूनां श्लोकानां कथोपकथनानां च लोपः दृश्यते।"[2] इति। अपि च श्रीमतः आचार्यस्य वसन्तकुमारभट्टवर्यस्य संशोधनग्रन्थावलोकनेन अपि च ग्रन्थस्यास्य स्वागतवचनेन च इदं स्पष्टमवगम्यते यत् उपलभ्यमानाः दाक्षिणात्यपाठाः अपूर्णाः एवेति। परन्तु संस्कृतपरिषदा प्रस्तूयमानसंस्करणस्थश्लोकसङ्ख्यावलोकनेन इदमवगम्यते यत् उपलभ्यमानेभ्यः दाक्षिणात्यपाठसंस्करणेभ्यः प्रस्तूयमानं दाक्षिणात्यपाठसंस्करणं पुरातनम् अपि च स्थूलकायमिति। संस्करणेऽस्मिन् विद्यमाना श्लोकसङ्ख्या इत्थं वर्तते।

प्रथमाङ्के 34 श्लोकाः, द्वितीयाङ्के 18 श्लोकाः, तृतीयाङ्के 28 श्लोकाः, चतुर्थाङ्के 22 श्लोकाः, पञ्चमाङ्के 31 श्लोकाः, षष्ठाङ्के 32 श्लोकाः, सप्तमाङ्के 35 श्लोकाः। आहत्य 200 श्लोकाः।

आचार्यस्य वसन्तकुमारभट्टमहोदयस्य संशोधनग्रन्थावलोकनेन[3] इदमपि स्पष्टमवगम्यते यत् प्रस्तूयमानं दाक्षिणात्यपाठसंस्करणं मिथिला–वङ्गसंस्करणद्वयात् तुल्यताम् आप्नोतीति।

---

2 "वस्तुततः दाक्षिणात्य पाठपरम्परा एक प्रकार से अपूर्ण है। उसमे बहुते श्लोक तथा कथोपकथन का अभाव है जो हमे बङ्गीय पाठपरम्परा मे प्राप्त है।"

3 1. Shakuntalam Textual Criticism by Vasantkumar M. Bhatt, Arsha Gurukul Mahavidyalay, Rajasthan, 2015

अदः नवीनं संशोधितं पादटिप्पण्या परिष्कृतं दाक्षिणात्यपाठपरम्परासम्बद्धं प्रकाशनं तत्रभवद्भिः पूर्वसंशोधकैः संसाधितान् बहुविधान् प्रश्नान् समाधातुमर्हतीति पूर्णविश्वासोऽस्माकम्।

III. व्याख्यातृपरिचयः

आन्ध्रप्रदेशतेलङ्गाणप्रान्तयोः महान्तो मूर्धन्याः तेलुगुदेशीयाः संस्कृतकवयः, व्याख्यातारः बहवो विलसन्ति। अमीषु चतुष्पञ्चशो विदुषो विहाय अन्ये संस्कृतजगति अप्रसिद्धाः। कारणं तावत् तेषां संस्कृतकृतयः तेलुगुलिप्या मुद्रिताः। अतस्ताः कृतयः तेलुगुदेशे एव प्रचुरं प्राचुर्यं लेभिरे। तादृशान् मूर्धन्यान् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनान्तर्गतत्वेन दुर्लभग्रन्थपुनर्मुद्रणम् आरब्धम्।

नाटकस्यास्य व्याख्याकृत् श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालो नाम। विजयनगरस्य 'सङ्गमवलस'संस्थानीयोऽयम्। कदाचित् 18 शतकस्य आदिमकाले विभिन्नैः कारणैः संस्थानात् च्युतः सन् व्याख्यातुः पिता पेद्दनिश्शङ्कः बोब्बिलिराजस्य आश्रयं प्रार्थितवान्, लब्धवाँश्च। तत्रैव कृतिव्याख्याकर्ता पेद्दनिश्शङ्क–सन्यासाम्बा–दम्पत्योः द्वितीयापत्यत्वेन जन्म अलभत। एषः यदा मातुः गर्भे आसीत् तदैव दुर्भाग्यात् पिता दिवम्प्रयातः। तदग्रेऽयं बोब्बिलिराजस्य पर्यवेक्षणे परिपोषितोऽभवत्।[4] ततः परं तस्य मातुलेन विद्याविनयकोविदेन मेदिनीरायनरसिंहराजेन सह विशाखपट्टणं प्रयाय आङ्ग्लान्ध्रभाषयोः प्रावीण्यं

---

2. Kalidasa Kavyalokan, Kya Mpulik Kya Naveen? By Prof. Vasantkumar M. Bhatt, Samskrit Sahitya Acadmey, Gandhinagar , 2019
3. Abhigyan Shakuntala_Kashmiri_Version, By Vasantkumar M. Bhatt, Rashtriya Sanskrit Sansthan, New Delhi, 2018
4. Abhijnana Shakuntalam, Kriti Sameeksha se patha Sameeksha, Sanskrit Academy, Hyderabad, 2010

4 ఆపన్ను సంగవమవలస భూపతి నిశ్శంకనృపతి మును గదుఁ గరుణన్
గాపాడెను రాయఁడపక్ష్మాపాలవరుండు కొంతకాలము దనుకన్ – అవతారిక
(ప్రపతనపారిజాతము)

प्राप्नोत्। तत्रैव महामहोपाध्यायानां परवस्तु वेङ्कटरङ्गाचार्याणां सान्निध्ये संस्कृतग्रन्थान् अधीयाय। 1847 तमे वर्षे अयं भूस्वामी (अधिनायकः) बभूव। स्वकीये भूस्वाम्ये बहून् कवीन् विदुषः च पर्यपूपुषयत्।

"श्रौतप्रयोगेषु स्मार्तक्रियासु च प्रावीण्यं प्राप्य भेदाभेदवादनिपुणया प्रतिभया वेदान्तप्रसङ्गान् अकार्षीत्। यमनियमासनादि-योगान्तरङ्गसारान् सारल्येन पपौ। स्वाधीनशक्तिरयं नीतिशास्त्रग्रन्थनिर्माता बभूव। वैद्यविद्यायां नैपुण्यं लब्धा दीनानां सेवां चकार। ज्योतिर्विद्भूत्वा शुभाशुभफलनिरूपणम् अकार्षीत्। शिल्पविज्ञानविशेषज्ञाता, विविधरत्नपरीक्षाप्रविवेकबुद्धिरयं श्रीमान् निश्शङ्कभापालो विजयतेतराम्" इति श्रीमान् परवस्तु वेङ्कटरङ्गाचार्यः स्वीये श्रीमन्निश्शङ्कचरितमित्याख्ये ग्रन्थे लिलेख।[5]

मृत्युञ्जयस्य मातुलः सङ्गमवलसतः क्रोशमिते दूरे दुर्गमेकं निर्माय मृत्युञ्जयनिगरमिति नाम चकार। अदः नगरं स्वीये भूस्वाम्ये मुख्यं नगरमासीत्। तत् नगरं परितः विद्यामानेषु देव-ब्राह्मणसम्पत्तिरूपेण लब्धेषु बहुषु ग्रामेषु मन्दिर-वापी-कूप-तटाकादीन् निर्माय तत्रस्थप्रजाः धर्मेण पर्यपीपलत्, परिपुपोष च।[6]

राजशेखरविलासः, गौरीविवाहः, श्रीसूर्यनारायणचरितम्, दशावतारनाटकम्, पारिजातम्, हिल्-भूस्वामिचरितम्, भूमिपालकविधिदर्पणम्, कार्मेकिल्-गुणप्रकाशसूक्तिरत्नावलिः, मानसबोधश्रीशम्भुशतकम्, भल्लाणचरितम्, गुम्पसोमेश्वरचरितम् इत्येषा मृत्युञ्जयनिश्शङ्केन प्रणीतानां प्रमुखतेलुगुग्रन्थानामावलिः।

कविरयं शतश्लोकयुक्तं त्रिपरिच्छेदात्मकं 'नीतिशास्त्रसङ्ग्रहः' इति संस्कृतकाव्यमेकं चकार। ग्रन्थस्यास्य प्रथमे परिच्छेदे 30 श्लोकाः, द्वितीयतृतीयपरिच्छेदयोः 35 श्लोकाः विराजन्ते। मृत्युञ्जस्यैव आस्थानविद्वान्

---

5 श्रीमन्निश्शङ्कचरितम् – 51, 59, 60 श्लोकाः

6 श्रीमन्निश्शङ्कचरितम् – 136 पृष्ठसङ्ख्या

आकेल्ल वेङ्कटशास्त्रिवर्यः ग्रन्थमेतं तेलुगुभाषया व्याचख्यौ। कालान्तरे श्री पेरम्बुदूरि शेषाचार्यः आङ्ग्लभाषया विवरणं प्रणिनाय।[7]

अयं मृत्युञ्जयनिश्शङ्कभूपालः त्रयाणां कालिदासनाटकानां व्याख्यां चकार। शाकुन्तलनाटकव्याख्यानस्य नाम 'पूर्णचन्द्रिका' आसीत्। इयमेव उत्तरोत्तरा 'मृत्युञ्जभूपालीयमि'ति नाम्ना तस्मिन्प्रान्ते विश्रुताभवत्। विक्रमोर्वशीयस्य 'रत्नदीपिका'ख्यव्याख्यां, मालविकाग्निमित्रस्य 'विबुधरञ्जनी'इत्याख्यव्याख्यां चकार।

मृत्युञ्जयनिश्शङ्कस्य संस्कृतान्ध्रभाषयोः सेवां प्रशंसन् वङ्गस्थायाः एशियाटिक् सोसायिटीति संस्थायाः अध्यक्षः सप्तम एड्वर्डराजा मृत्युञ्जयनिश्शङ्कभूपालम् एशियाटिक् सोसायिटीति संस्थायाः सदस्यत्वेन चितवान्।

परियोजनान्तर्गतत्वेन अस्यैव व्याख्यातुः रत्नदीपिकाव्याख्यानेन विक्रमोर्वशीयनाटकमपि प्राकाशं नीयते।

अभिज्ञानशाकुन्तलनाटकमिदम् पूर्णचन्द्रिकाव्याख्यानसंवलितम् 1882 (1804 शालिवाहनशकवर्षे) तमे वर्षे परवस्तु वेङ्कटरङ्गाचार्यवर्यैः, आकेल्ल वेङ्कटशास्त्रिभिश्च सुसम्पादितं सत् चेन्नपुरीस्थवर्तमानतरङ्गिणीमुद्रणालयात् तेलुगुलिप्या सम्मुद्रितमभवत्। इदानीम् अस्मत्सम्पादने पादटिप्पणीसहितं दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन पुनर्मुद्र्यते।

IV. व्याख्यापरिचयः

(क) कृतेः अस्याः नामकरणविषये प्रश्नः उदेति यत् शकार–अकारयोः सन्निहितः प्रयोगः अभिज्ञानशकुन्तलम् इति वा उत शकार–आकारयोः युक्तः प्रयोगः अभिज्ञानशाकुन्तलम् इति वा इति। मृत्युञ्जयनिश्शङ्कभूपालः स्वीयव्याख्यायां शकारे आकारयुक्तं प्रयोगं बहुधा चकार। मङ्गलाचरणसन्दर्भे

---

7 आन्ध्रसंस्थानमुलु साहित्यपोषणमु, डा तूमाटि दोणप्प, आन्ध्रविश्वकलापरिषद् प्रकाशनम् – 484 पृष्ठसङ्ख्या

प्रतिज्ञां कुर्वन् *"श्रीमृत्युञ्जयनिश्शङ्कक्षितिपालेन रच्यते। व्याख्या शाकुन्तलाख्यस्य विदुषां दयया मया॥"*, मङ्गलाचरणानन्तरं नान्द्याः प्रस्तावनां प्रस्तुवन् *"अथ तत्र भवान् कालिदासनामा महाकविः शाकुन्तलाख्यं नाटकं चिकीर्षुश्चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्त्यर्थं नान्दीरूपामाशिषं प्रयुङ्क्ते।"* सप्ताङ्कानाम् अवसाने निबद्धासु पुष्पिकासु *"इति श्रीमृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तलव्याख्याने पूर्णचन्द्रिकाव्याख्याने .....।"* इति।

परन्तु नान्द्यन्ते सूत्रधारस्य *"अद्य खलु कालिदासग्रथितवस्तुना नवेनाभिज्ञानशकुन्तलाख्येन नाटकेनोपस्थातव्यमस्माभिः।"* इत्यस्याः पङ्क्तेः व्याख्यां कुर्वन् व्याख्याता *"नवेन नूतनेन, अभिज्ञानशकुन्तलाख्येन तन्नाम्ना नाटकेन"* इति शकार–अकारयुक्तं प्रयोगं कृतवान्। तत्र प्रश्नः एषः उदेति यत् शकार–अकारयुक्तं प्रयोगं व्याख्याता समर्थयति उत दोषेण अनुकरोति इति। यतः काश्मीर–मैथिली–वङ्गसंस्करणेषु शकर–अकारयुक्तः पाठः उपलभ्यते।

तथाहि अभिज्ञानं च शकुन्तला च अभिज्ञानशकुन्तलम् इति विग्रहे 'चार्थे द्वन्द्वः' <2-2-29> इति समाहारद्वन्द्वसमासः। 'सर्वो द्वन्द्वो विभाषया एकवद्भवति' इति नियममाश्रित्य एकवद्भावेन अभिज्ञानशकुन्तलमित्येव रूपम्। अभिधेयेन अभिधायकस्य व्यपदेशात् अभिज्ञानशकुन्तलमिति सिद्धम्।

अभिज्ञानं च शकुन्तला च अभिज्ञानशकुन्तलम् इत्यत्र शकुन्तलाम् अधिकृत्य कृते ग्रन्थे इत्यस्मिन् 'अधिकृत्य कृते ग्रन्थे' <4-3-87> इत्यनेन सूत्रेण अण् प्रत्यये 'तद्धितेष्वचामादेः' <7-2-117> इति आदिवृद्धौ अभिज्ञानशाकुन्तलमिति रूपं सिद्धम्।

अधिकृत्य कृते ग्रन्थे इत्यर्थे 'वृद्धाच्छः' <4-2-114> इत्यनेन छप्रत्ययं कृत्वा तस्य 'लुबाख्यायिकाभ्यो बहुलम्' इति नियमेन लोपं कृत्वा अभिज्ञानशकुन्तलमिति रूपं साधयितुं शक्यते। अथवा अभिधेयाभिधायकयोः अभेदव्यपदेशेनापि सिद्ध्यति।

निष्कर्षेण इदं वक्तुं शक्यते यत् शकार–अकारयुक्तं रूपं, शकार–आकारयुक्तं रूपं च साधुनी वर्तेते। अत्र व्याख्याता द्वयोः रूपयोः प्रयोगं दर्शितवानित्यतः रूपद्वयं विदुषां सम्मतम्।

(ख) व्याख्याता मृत्युञ्जयनिश्शङ्कभूपालः निजप्रतिज्ञावाक्येषु "*सुखबोधाय बालानां क्रियते पूर्णचन्द्रिका*" इति जगाद। तामेव प्रतिज्ञामनुसरन् प्रत्येकं पदस्य अर्थावबोधाय कोषवाक्यानि प्रददौ। एतदर्थं व्यख्यात्रा अनुशीलिताः कोषाः। विद्वान् कोशपाणिरित्युक्तिरत्र स्मर्तव्या।

1. **सूत्रधारः** इत्यत्र सूत्रशब्दस्य व्याख्यां कुर्वन् 'सूत्रं तु सूचने ग्रन्थभेदे तन्तुव्यवस्थयोः' इति रत्नमालाकोषस्था पङ्क्तिः प्रादर्शि व्याख्यात्रा।

2. **मुच्यन्तामभीशवः** इत्यत्र 'अभीशुः प्रग्रहे रश्मौ' इति, हस्तमुद्यम्य इत्यत्र 'हस्ते नक्षत्रभेदे स्यात्करेभकरयोरपि' इति, **आकृतीनाम्** इत्यत्र 'आकृतिः कथिता रूपे सामान्यवपुषोरपि' इत्येवं विश्वकोषपङ्क्तीरुदाजहार।

3. **रथ्याः** इत्यत्र 'रथ्यो वोढा रथस्ययः' इति, परिषच्छब्दे 'समज्या परिषद्गोष्ठी सभासमितिसंसदः' इति, उपभोगक्षममित्यत्र 'क्षमं शक्ते हिते त्रिषु' इत्येवं बहुषु स्थानेषु अमरकोषस्थपङ्क्तीः निददर्श।

4. **नेपथ्यमित्यत्र** 'नेपथ्यस्सयादलङ्कारे रङ्गज्यायां नपुंसकम्' इति मेदिनीकोषं प्रददर्श।

5. **कथमियमित्यत्र** कथमित्याश्चर्यपदवाचकमिति 'कारणेऽपि कथं तर्के विस्मये सम्पदुद्भवः' इति वैजयन्तीकोषं निदर्शनरुपेण सन्ददर्श।

6. किसलयरागः इत्यत्र पल्लवसमानरक्तिमा इति निगदन् 'रागोऽनुरगे मात्सर्ये क्लेशादौ लोहितादिषु' इति शाश्वतकोषपक्तिं ददर्श।

7. पर्युपासनमिति शब्दस्य पर्यायपदं सूचयन् 'अभ्यस्तेप्युचितं न्याय्यम्' इति यादवकोषस्थं पङ्क्तिम् उदाजहार।

8. रजा शकुन्तलां सम्मानयन् 'पूज्यां शकुन्तलाम्' इति वाक्यं प्रयुनक्ति। तत्र पूज्यामिति पदस्य व्याख्यां कुर्वन् श्रीमान् निश्शङ्कभूपालः 'त्रिषु तत्र भवान्पूज्यस्ततैवात्रभवानपि' इति विश्वप्रकाशकोषस्थं पङ्क्तिं लिलेख।

9. 'बाणासनहस्ताभिर्यवनीभिः' इत्यत्र यवनीशब्दस्य पर्यायान् शब्दार्णवात् ददर्श। 'किरातीचामरधरायवनीशस्त्रधारिणी' इति। तथैव राजधानीत्यस्य शब्दस्य तात्पर्यं 'प्रधाननगरी राज्ञां राजधानीति कथ्यते' इत्यनया शब्दार्णवस्थपङ्क्त्या निददर्श।

10. क्वचित् हलायुधकोषस्थस्य पङ्क्तिं दर्शयति यथा – 'बिन्दुर्नापद्मकेज्ञातर्यक्षरावयवेलव'

11. "यद्यपि 'पत्नीभ्रता' इत्यर्थकः श्यालशब्दः दन्त्यादित्वेन प्रयुक्तः तथापि रभसकोशे दन्त्यादित्वेन तालव्यादित्वेन च उभयोः प्रयोगदर्शनादत्र कविना तालव्यादित्वेन प्रयोगः कृतः।"

इत्येवं व्याख्याता विभिन्नपादनाम् व्याख्यानं विन्दन् एकादशकोशेभ्यः[8] पर्यायपदानि उदाजहार।

(ग) व्याख्यानावसरे सुखबोधाय सन्दर्भानुगुणं पाणिनीयानि सूत्राणि अपि उट्टङ्कितवानिति व्याख्यायां विशेषः।

1. सर्वथा इत्यस्मिन् शब्दे 'प्रकारवचने थाल्' <५.३.२३> इति प्रत्ययो वर्तते इति प्रादर्शि।

---

[8] कुश्यते संश्लिष्यते इत्यस्मिन्नर्थे कुश संश्लेषणे इत्यतो अधिकरणादौ घञि कोशशब्दो निष्पद्यते। कुष्यते आकृष्यते आयस्थानेभ्यः इत्यस्मिन्नर्थे कुष निष्कर्षे इत्यस्माद्धातोः घञ्प्रत्यये कोषशब्दो निष्पद्यते। कोश–कोषयोः प्रयोगः सामानार्थे प्रयुज्येते इत्यूह्यम्।

2. युक्तरूपम् इत्यत्र 'प्रशंसायां रूपप्' <५.३.६६> इत्यनेन सूत्रेण विहितः रूपप्-प्रत्ययः 'कार्ये उत्कृष्टत्वम्' इत्यस्मिन् अर्थे विधीयते। अतः राज्ञः रूपोत्कृष्टत्वं प्रतिपादयन् युक्तरूपमिति पदं प्रयुयोज कालिदासः इति प्रादर्शि।

3. यावदवतरामि इत्यत्र यावत्पुराशब्दयोर्निपातयोरुपपदयोः भविष्यति काले धातोर्लट् प्रत्ययो भवतीति दर्शयन् 'यावत्पुरानिपातयोर्लट्' <३.३.४> सूत्रनिर्देशं चकार व्याख्याने।

(घ) कवयः कालिदासोपामाः अस्तुवन्। ते कालिदासस्य शब्दालङ्कार-अर्थालङ्कारप्रयोगनैपुणीं प्रशशंसुः। तान् उदाहरणरूपेण यत्र तत्र उपयुयुजुश्च। निश्शङ्कभूपालः नाटकस्य निजव्याख्यायां कालिदासस्य सर्वेषां श्लोकानाम् अलङ्कारान् नोल्लिलेख। बहु विरलतया तल्लक्षणानि प्रददौ।

'इदं किलाव्याजमनोहरं...' 1.18 इत्यत्र दृष्टान्तालङ्कारः इति व्याख्याता जगाद। तस्य लक्षणमपि 'चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः' इति दर्शितं तेन। परन्तु अन्ये व्याख्याकाराः अत्र दृष्टन्तापेक्षया उपमा-व्याजस्तुति-सन्देहसङ्करालङ्काराः स्युरिति न्यगदन्। श्लोकस्य भावस्तावत् 'लोकातीतसौन्दर्यशालिनीं शकुन्तलामाश्रमोचितधर्माचरणेषु वृक्षसेचनादिषु कर्मसु नियुक्तामवलोक्य राजा दुष्यन्तश्चिन्तयति। यत् अहो! निसर्गसुन्दरेणानेन वपुषा यः आश्रमधर्मान् विधापयितुं समीहते, सर्वथा अविमृश्यकारी सः ऋषिः नीलोत्पलपत्रधारया निष्ठुरां शमीवल्लीं चिच्छित्सति इति।'

अत्र दृष्टान्तालङ्कारस्य लक्षणमुखेन समन्वयो यथा नीलोत्पलपत्रस्थानीया शकुन्तला, निष्ठुरशमीवल्लीस्थानीयाः आश्रमधर्माः। नीलोत्पलपत्रस्य शमीलतया सङ्घर्षणेन यथा नीलोत्पलपत्रस्यैव हानिर्जायते। तथैव आश्रमधर्माणां बलादनुष्ठानेन शकुन्तलायाः सुकुमारगात्रहानिर्जायते इति कवेराशयम् अयमेवालङ्कारः सुष्ठु द्योतयतीति व्याख्यातुराकूतिरत्र सम्भावनीया।

(ङ) व्याख्याता निजव्याख्याने तत्र तत्र शास्त्रीयन्यायानां समावेशमकरोत्। *"ततः प्रविशति आत्मना तृतीयो वैखानसः"* इति पङ्क्त्याः व्याख्यानावसरे "नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि वा" इति न्यायं दर्शितवान्। अनेनागमिष्यताम् ऋषिकुमाराणां पात्रसूचनं क्रियते।

"इति फलान्युपहरतः" इत्यत्र धर्मशास्त्रसम्मतं कश्चित् लौकिकन्यायो यथा "अग्निहोत्रगृहं क्षेत्रं धेनुं बालकमेव च। रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्" इति।

(च) तत्र तत्र पदानां व्याख्यानावसरे साहित्यग्रन्थान्तरगतान् श्लोकान् उद्धृतवान् व्याख्याकारः।

1. वैखानसः इति पदस्य व्याख्यां कुर्वन् 'पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा। कालपक्वैस्स्वयं शीर्णैर्वैखानसमते स्थितः॥' इति मनुस्मृतेः श्लोकम् उदाजहार।

2. 'स्मितं कृत्वा' इत्यत्र भरतकोशस्थं विप्रदासस्य पङ्क्तिं दर्शयन् "ईषद्विकसितैर्गण्डैः कटाक्षैस्सौष्ठवान्वितैः। अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत्" इति स्मितस्य लक्षणमुदाजहार। सन्दर्भेऽस्मिन् हास्यप्रभेदाः भरतकोशे यथा – "स्मितं च हसितं चैव विहसितं साहसितम् भवेत्प्रहसितैश्चापि तथाऽतिहसितं भवेत् । षड्भावसंश्रितं हास्यमेवं षड्विधमुच्यते।"

3. गान्धर्वविवाहं व्याख्यायन् व्याख्याता याज्ञवल्क्यस्य [9]विवाहप्रकरणस्थां 'गान्धर्वः समयान्मिथः' इति पङ्क्तिं स्मारयति। अत्रैव मनुः 'गान्धर्वस्स विधिज्ञेयो मैथुन्यः कामसम्भवः।' इति निगदति। मिताक्षरायां तावत् 'गान्धर्वस्तु परस्परानुरागेण भवति' इत्युक्तम्। परन्तु राजा दुष्यन्तः धर्मार्थमियं परिणीता न तु कामार्थमिति जगाद। इदं कालिदासस्य वर्णनचातुर्यमिति मन्तव्यम्।

---

9 आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः। राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ॥१.६१॥

(छ) बाणपातवर्तिनः इति शब्दस्य व्युत्पत्तिं दर्शयमास यथा 'बाणः पात्यतेऽस्मिन्निति बाणपातः। तत्पतनप्रदेशः। अधिकरणे घञ्' लावण्यमिति पदस्य लक्षणं 'मुक्ताफलेषु छायायातरलत्वमिवान्तरा, प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते' इति ददर्श।

(ज) पताकाचिह्नस्य लक्षणं दर्शयति यथा – "अपवारितकं प्रोक्तं त्रिपताकेन पाणिना" अत्र व्याख्यानस्य अवलोकनेन पताकाचिह्नेन अपवारणं करोति विदूषकः इति अवगम्यते। वास्तविकतया जनान्तिकमिति नाटकीयाभिनयसन्दर्भे करेण त्रिपातकामुद्रा दर्श्यते। तल्लक्षणं दशरूपके यथा – "त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम्। अन्योऽन्यं मन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम्॥"

इत्येतादृशैः बहुविधैः व्याख्यानविशेषैः संस्तुतमिदं व्याख्यानम् इदं स्पष्टमवगमयति यत् इयं व्याख्या केवलं सुकुमाराध्येतुः अवगमनायैव निर्मिता न तु वैदुष्यप्रदर्शनार्थम् इति।

V. सम्पादनस्यास्य विशेषाः

सम्पादनकर्मणि अस्मिन् बहवो क्लेशाः अनुभूताः। अस्माभिः लब्धायां मुद्रित–प्रतिकृतौ अक्षराणि सूक्ष्माण्यासन्। तेन उट्टङ्कने बहवो दोषाः उपस्थिताः। सप्ताधिकवारं परिष्करणं विधाय विदुषां पुरतः साम्प्रतं प्रस्तूयते। अपि च सम्पादनेऽस्मिन् मूलपाठेन सह तोलनार्थं त्रयः पाठाः स्वीकृताः। तद्यथा –

A. डा श्रीकृष्णमणि त्रिपाठीवर्यस्य विमला–चन्द्रकला–संस्कृत–हिन्दीव्याख्योपेतम् अभिज्ञानशाकुन्तम् – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2004

B. एम् आर् काले महोदयेन सम्पादितम् अभिज्ञानशाकुन्तलम्, मोतीलालबनारसीदासप्रकाशनम् – 1987

C. वैखानसकुलतिलकेन श्रीनिवासाचार्यविरचितव्याख्यासहितम् अभिज्ञानशाकुन्तलम् – वाविल्ल रामस्वामिशास्त्रुलु अण्ड् सन्स् इत्येतैः प्रकाशितम्, चेन्नपुरी – 1934

त्रिष्वपि पाठेषु बहुत्र विभिन्नता दृश्यते। प्रत्येकं पङ्क्तिषु भेदः दृष्टिगोचरो भवति। **'A'** इति प्रकाशनं तावत् देवनागरीपाठपरम्परासम्बद्धम्। **'B, C'** इति पाठद्वयं दाक्षिणात्यपाठपरम्परासम्बद्धम्। कदाचित् रङ्गमञ्चे नाटकस्य मञ्चनार्थम् अपेक्षितरीत्या तत्तत्प्रान्तीयाः नाटकमञ्चकाः स्वापेक्षया मूलनाटकस्थेषु वाक्येषु संशोधनमकार्षुर्वा इति संशयो जायते। **'C'** इति वाविल्लरामस्वामि–संशोधितप्रकाशने तु अव्ययानां भूरिशः प्रयोगः दृश्यते। अत एव प्रत्येकं पङ्क्तिः अन्यप्रकाशनेभ्यः भिद्यते। **'B'** इति एम् आर् काले वर्याणां संशोधितप्रकाशने तु बहवो पाठभेदाः दर्शिताः। ते सर्वे पाठभेदाः अस्मिन् सम्पादने प्रस्तुताः। अपि च

1. विदूषकस्य नाम माढव्यः इति पाठेषूपलभ्यते। परन्तु व्याख्यानेऽस्मिन् माधव्यः इत्येव प्रयोगः दृश्यते।
2. 'C' इति प्रकाशने 'राजा' इत्यस्मिन् स्थाने दुष्यन्तः इति वर्तते। 'हला' इत्यादिषु 'सखि' इति भेदः वर्तते। 'अदितिः' इत्यस्मिन् स्थाने दाक्षायणीति पाठः वर्तते। अस्मिन् व्याख्याने तावत् तथा नैव दृश्यते।
3. अस्मिन् व्याख्याने "रैवतकसेनापतिस्तावदाहूयताम्" इति द्वितीयाङ्कस्थस्य राज्ञः वाक्यस्य "रैवतक! सेनापतिस्तावदाहूयताम्" इति 'A' 'B' 'C' इति प्रकाशनेषु पाठभेदः दृश्यते। व्याख्यात्रा निजव्याख्याने 'रैवतकसेनापतिः - रैवतकाख्यश्चमूपतिः' इति व्याख्यातम्। अन्यत्र ग्रन्थेषु रैवतक इति दौवारिकः अभिहितः। (क्वचित् ग्रन्थेषु अयमेव श्रृङ्खतक इति नाम्ना व्यवहृतो वर्तते।)
4. व्याख्याता स्वीये व्याख्याने गौतमीति तापसीं कण्वस्य श्वसृत्वेन परिचाययतीति व्याख्यनस्यास्य वैशिष्ट्यम्।

5. 'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः' इति पाणिनीयशिक्षायां संस्कृताक्षराणां सङ्ख्या 63/64 इत्युक्तम्। तत्र 'ळ'कारः न समाविष्टः। 'ळ'कारस्तु वेदेषु दृश्यते। व्याख्याकारस्य संस्करणमिदं तेलुगुलिप्या मुद्रितत्वात् तेलुगुलिप्यां 'ळ'कारस्य प्रयोगः वर्तत इत्यतः 1882 मुद्रितसंस्करणे बहुत्र 'ळ'कारस्य प्रयोगः कृतः। परन्तु संस्कृते सः वर्णः नोपलभ्यते इत्यतः सम्पादितेऽस्मिन् संस्करणे 'ळ'कारस्य स्थाने 'ल'कारः एव प्रयुक्तः इत्यवधेयम्।
6. ग्रन्थस्य कायवर्धनभिया संशोधनेऽस्मिन् प्राकृतपङ्क्तयः न समावेशिताः।
7. यद्यपि व्याख्यात्रा निजव्याख्याने शाकुन्तलगतानां श्लोकानां छन्दोऽलङ्काराः न निरूपिताः, तथापि अस्माभिरस्मिन् ग्रन्थे परिशिष्टरूपेण छन्दोऽलङ्काराः समावेशिताः। क्वचित् एकस्य श्लोकस्य बहवो अलङ्काराः निर्दिष्टाः, ताः विभिन्नेभ्यः ग्रन्थेभ्यः एव चिताः इति स्मारयामि।
8. परिशिष्टे श्लोकानां (गेयानां) रागतालावपि संयोजितौ। वाविल्ल रामस्वामि प्रकाशने व्याख्यातॄणां श्रीनिवासाचार्यवर्याणां टिप्पणी आसीद्यत् "संस्कृतनाटकप्रदर्शनमार्गदर्शक-प्रथमाचार्यैः श्रीगोमठं श्रीनिवासाचार्यैः श्रीमद्भिः निवृत्तन्यायाधीशैः सि वि कृष्णस्वामि अय्यर् महाशयैश्च एतद्गेयरागानुसन्धानमकारि।" इति

इदं सम्पादनं यद्यपि 1882 तमे वर्षे भारतस्य दक्षिणभागात् प्रकाशितमभवत्, तथापि दाक्षिणात्यपाठपरम्परासम्बद्धपाठत्वेन ग्रहीतुं न शक्यते। यतः मृत्युञ्जयनिश्शङ्कभूपालः एशियाटिक् सोसाइटी संस्थायाः सदस्यत्वं लब्धवानिति हेतोर्वा, विशाखपट्टनं वङ्गप्रान्तात् सन्निकृष्टम् इति हेतोर्वा, बहुविधानां वङ्गपाठनाम् अवलोकनहेतोर्वा पूर्णचन्द्रिकाव्याख्यानयुतमिदं संस्करणं वङ्गपाठपरम्परासम्बद्धसंस्करणैः तुल्यतामाप्नोति। तदर्थमत्रत्यश्लोकसङ्ख्या एव प्रमाणम्।

VI. कार्तज्ञाविष्करणम्

मृत्युञ्जयनिश्शङ्कभूपालसदृशान् महतः कवीन् परिचाययितुं संस्कृतपरिषदियम् 'अष्टादशी'नामकेन परियोजनामाध्यमेन प्रकाशनानि विदधाति। इयं परियोजना राष्ट्रियसंस्कृतसंस्थानमिति पूर्वनाम्नः केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। मह्यं परियोजनायाः प्रधानानुसन्धातृनियोगं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विदधे। परियोजनायाम् अस्यां संस्कृतपरिषदः शोधसहायकः डा सन्तोषकुमारजोषीवर्यः सहप्रधानानुसन्धातृत्वेन वर्तत इति आत्मानं धन्यं मन्ये।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च नमोवाकान् वितरामि। उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयामि।

आचार्य वसन्तकुमारभट्टमहोदयः परिष्कृतसम्पादनाय अस्मै स्वागतवचनानि विलिख्य कृतेरस्याः मूल्यं वर्धितवान्। अतस्तस्मै महोदयाय भूरिशः धन्यवादान् समर्पयामि।

मुद्रित-प्रतिकृतावस्यां यद्यपि अक्षराणि सूक्ष्माण्यासन् तथापि महत्या जागरूकतया उट्टङ्कितवत्यै हैमवतीवर्यायै द्विवारं टङ्कितस्य पाठस्य संशोधनं कृतवत्यै डा जि सुमेधायै च धन्यवादान् वितनोमि। सन्दर्भेऽस्मिन् मुद्रकाय धन्यवादान् अविष्करोमि। कर्मण्यस्मिन् सहकृतवद्भ्यः संस्कृतपरिषदः सहकारिसदस्येभ्यः धन्यवादान् च वितरामि।

इत्थं बुधजनविधेयः परियोजना-प्रधानानुसन्धाता
डा. विरिवेण्टि सुब्रह्मण्यम्
षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

पूर्णचन्द्रिकाप्रकाशः

सुविदितमेव साहितीरसिकैः संस्कृतकाव्यानाम् अथवा विभिन्नग्रन्थानाञ्च अध्ययनार्थं, कवेः अथवा ग्रन्थकर्तुः अन्तःस्तत्वम् अवगन्तुं व्याख्यानापेक्षा वरीवर्तीति, अत एव विद्वद्वराः बहूनां ग्रन्थानां व्याख्यानानि व्यरचयन्। व्याख्यानां बाहुल्येन ग्रन्थस्य गौरवमतिशेत इत्युक्तौ न कापि विप्रतिपत्तिः। एतस्यां व्याख्यारचनपरम्परायां तेलुगुप्रदेशीयानां सेवा महत्येवासीत् ।

तेलुगुप्रादेशिकैः रचिताः बहवो ग्रन्थाः अप्रकाशिताः, प्रकाशिताश्च केचन नोपलभ्यन्ते। केचन ग्रन्थाः तेलुगुलिप्यां प्रकाशिताः इत्यतः तेलुगुलिप्यनभिज्ञानामेतेषां ग्रन्थानां परिचयः नैवास्ति। तस्यां परम्परायाम् अन्यतमाः मृत्युञ्जयनिश्शङ्कभूपालविरचितव्याख्याग्रन्थाः अपि सम्मिलन्ति।

भारती कालिदासस्य कुव्याख्या विषमूर्छिता ।
एषा सञ्जीविनी टीका तामद्यो जीवयिष्यति ।।

इति प्रतिज्ञां कृत्वा कालिदासश्रव्यकाव्यत्रयस्य सञ्जीविनी व्याख्यां विरच्य संस्कृतसाहित्ये अत्युन्नतस्थानं यथा प्राप्तवान् तथैव मृत्युञ्जयनिश्शङ्कभूपालः अपि अतिसंक्षिप्त-प्राचीनव्याख्यानसंक्लेशितमानसानां संस्कृतभाषाध्येतॄणाम् अत्यन्तोपकाराय कालिदासदृश्यकाव्यत्रयस्य व्याख्यां लिखित्वा साहित्यरसिकानां मनस्सु सुस्थिरं स्थानमवाप। किन्त्वेते ग्रन्थाः तेलुगुलिप्या प्रकाशिताः इति कृत्वा तेलुगुलिप्यनभिज्ञानां संस्कृतपाठकानां बहूनाम् एतेषां ग्रन्थानां परिचयः नास्ति। डा. वि. राघवन्, श्रीराममूर्तिः, तूमाटि दोणप्प, बिरुदराजु रामराजु इत्यादि-परिशोधकवरेण्यानां सौहार्देन मृत्युञ्जयनिश्शङ्कभूपालस्य जीवनविशेषाः, साहित्यसेवादि-विषयाः एवं विशेषतया व्याख्याग्रन्थानां परिचयात्मकाः उल्लेखाः तत्र तत्र विरलतया समुपलभ्यन्ते। एतेषां महाशयानां विषयान् ज्ञातुं प्रधानतया एते आकराःभवन्ति। ते च

1. "Contribution of Andhras to Sanskrit literature" by Sri Rama Murthy आन्ध्रदेशीयानां संस्कृतसेवा इत्ययं परिशोधनात्मकः ग्रन्थः

श्रीराममूर्तिमहाशयेन लिखितम्। अस्मिन् ग्रन्थे व्याख्याकर्तुः निश्शङ्कभूपालस्य परिचयः लेशमात्रमेव दरीदृश्यते। (पृष्टसंख्या 138) श्रीराममूर्तिमहाशयेन ग्रन्थेऽस्मिन् मृत्युञ्जयनिश्शङ्कः कालिदासनाटकत्रयस्य प्रतिपदटीकाम् अलिखत् इत्येव उल्लिखितम्।

2. "आन्ध्र संस्थानालु साहित्यपोषणम्" इत्यस्य ग्रन्थकर्ता डा. तूमाटिदोणप्प ग्रन्थेऽस्मिन् आन्ध्रप्रदेशे स्थितानां संस्थानानां साहित्यसेवा उल्लिखिता। तदन्तर्गत- तत्वेन ग्रन्थेस्मिन् संगमवलस इति संस्थानस्य सेवा उल्लिखिता। अत्र मृत्युञ्जयनिश्शंकु भूपालवंशवृत्तान्तं साहित्यसेवा इत्यादिविषयाः वर्णिताः सन्ति । तदाधारेण केचन विषयाः उपलभ्यन्ते। ग्रन्थोऽयं 1969 तमे वर्षे वाल्तेर्-तः (विशाखपट्टणम्) प्रकाशितः। पृष्टसंख्या 484 तः 488 पर्यन्तम्।
3. "विशाखपट्टनम् डिस्ट्रिक्ट् गेजिटर्" इत्यस्मिन् ग्रन्थे 299 तमे पृष्टे निश्शंकु वंशसम्बद्धाः विषयाः केचन उपलभ्यन्ते ।
4. न्यू केटालगस् केटालागोरियम् मद्रास् 1968 राघवन् पृष्टसंख्या 286. ग्रन्थेऽस्मिन् अभिज्ञानशाकुन्तलव्याख्यायाः विशिष्टपूर्णचन्द्रिकायाः प्रस्तावः दृश्यते। व्याख्याग्रन्थस्यास्य प्रकाशनवर्षः 1804 इति वर्तते. परं शकवर्षः वा क्री.श.इति वा उल्लेखः नास्त्यत्र। ग्रन्थमुखपृष्टे "शालिवाहनगतशताब्दाः" इति वर्तते। तेन ग्रन्थोऽयं क्री.श. 1882 तमे वर्षे प्रथमवारं प्रकाशितः इति ज्ञायते।
5. इण्डियन् आफीस् लैब्ररी प्रिंटेड् बुक्स् मध्ये 1938 पृष्टसंख्या 16. द्रष्टव्यमिति एन् सि. सि. 286 तमे पृष्टे उल्लेखः दृश्यते । अनेनाधारेणापि ग्रन्थोऽयं 1882 तमे वर्षे प्रकाशित इति विज्ञायते ।
6. आचार्य बिरुदुराजु रामराजु महोदयस्य (आन्ध्रदेशीयानां संस्कृतसेवा) Contribution of Andhras to Sanskrit literature) इत्याख्ये ग्रन्थेऽपि केचन विषयाः उपलभ्यन्ते ।अयं च ग्रन्थः राष्ट्रियसंस्कृतसंस्थानस्य वित्तसहायेन 2002 तमे वर्षे प्रकाशितः।

7. सङ्गमवलससंस्थानाधीश्वराणां चरितोपनिबद्धः "श्रीमन्निश्शंकचरितम्" इत्याख्यस्य ग्रन्थस्य प्रस्तावः "आन्ध्रसंस्थानालु - साहित्यपोषणमु" इत्यस्मिन् ग्रन्थे 484 पृष्ठे दृश्यते ।

एतेषां ग्रन्थानां प्रमाणाधारैः मृत्युञ्जयनिश्शङ्कभूपालस्य पिता पेद्दननिश्शङ्कभूपालः, पितामहः वेङ्कटनिश्शङ्कभूपालः इति, एते विशाखपट्टणमण्डलान्तर्गतसङ्गमवलससंस्थानाधीश्वराः इति च ज्ञायते। मृत्युञ्जयनिश्शङ्कभूपालः स्वयं कविः पण्डितश्च। अयं च महाशयः महामहोपाध्याय परवस्तु वेङ्कटरङ्गाचार्याणां सकाशे व्याकरणादिशास्त्राण्यधीतवान्।

मृत्युञ्जयनिश्शङ्कभूपालेन नैके संस्कृत-तेलुगुग्रन्थाः रचिताः। संस्कृतग्रन्थेषु कालिदासनाटकत्रयस्य संस्कृतटीका विरचिता। नीतिशास्त्रसङ्ग्रहः अपरो ग्रन्थः अधुना नोपलभ्यते ।

अभिज्ञानशाकुन्तलम् – व्याख्यानानि

शाकुन्तलस्य पाठव्यवस्था देशभेदेन भिन्ना दृश्यते। तत्र च 1. वङ्गीयपाठः, 2. काश्मीरपाठः 3. दाक्षिणात्यपाठः 4. नागरपाठः च मुख्यतया दृश्यते। एषु पाठचतुष्टयेषु भेदाः दृश्यन्ते प्रधानतया श्लोकसङ्ख्याविषये भेदाः दृश्यन्ते। एवमेव एतान् पाठान् आधारीकृत्य विभिन्नटीकाग्रन्थाश्च रचिताः वर्तन्ते। एतेषु दाक्षिणात्यपाठमाधारीकृत्य रचिताः व्याख्याः एव अधिकाः उपलभ्यन्ते इति गवेषकानाम् अभिप्रायः। संस्कृतवाङ्मये उपलभ्यमानाः व्याख्याग्रन्थाः –

1. राघवभट्टः – अर्थद्योतनिका
2. घनश्यामः – सञ्जीविनी
3. महामहोपाध्ययशङ्करः – रसचन्द्रिका
4. नरहरिः – अभिज्ञानशाकुन्तलटिप्पणी
5. काटयवेमः – कुमारगिरिराजीया
6. श्रीनिवासाचार्यः – शाकुन्तलव्याख्या
7. अभिरामः – अभिरामीयम्

8. खिस्ते पण्डित श्रीनारायणशास्त्री – लक्ष्मीटीका
9. रामवर्म – सारदीपिका
10. अज्ञातकर्तृकम् – चर्चा
11. मृत्युञ्जयनिश्शङ्कभूपालः – पूर्णचन्द्रिका

अभिज्ञानशाकुन्तलम् – पूर्णचन्द्रिका

अयं च व्याख्यानग्रन्थः क्री. श 1882 तमे वर्षे प्रथमवारं श्रीमच्चित्रभानुसंवत्सरमाघबहुलैकादशी–इन्दुवासरे, चन्नपुरी वर्तमानतरङ्गिणनी–मुद्राक्षरशालायां तेलुगुलिप्या प्रकाशितः।

तत्र मुखपृष्टे एवं विद्यते "अतिसंक्षिप्त–प्राचीन–व्याख्यान–सङ्क्लेषित–मानसानां संस्कृत–भाषा–ध्येतृजनानामत्यन्तोऽपकाराय विशाखपट्टण–मण्डलान्तर–स्थित–सङ्गमवलस–राजधान्यधिनायकः श्रीमान् मृत्युञ्जय–निश्शङ्क–भूपाल–विरचितया मृत्युञ्जयभूपालीय–द्वितीयनामधेय–विशिष्टपूर्णचन्द्रिकाभिख्य–प्रतिपद–व्याख्यया साकं संयोज्य" इति ।

ग्रन्थान्तपुष्पिका तावत् एवं विद्यते "इति श्रीमृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तलव्याख्याने पूर्णचन्द्रिकाख्याने प्रथमोऽङ्कः जयत्वाचन्द्रतारकम्"।

अस्य ग्रन्थस्य परिष्कर्तारौ महामहोपाध्यायः विद्वच्छिरोमणिः व्याख्यतुः आत्मीयविद्यागुरुः श्रीपरवस्तुवेङ्कटरङ्गाचार्यः, अपि च स्वास्थानपण्डितग्रगण्यः वैयाकरणः श्रीमदाकेल्लवेङ्कटशास्त्री च आस्ताम्।

व्याख्यानविशेषाः

सुखबोधाय बालानां क्रियते पूर्णचन्द्रिका ।

श्रीमृत्युञ्जयनिश्शङ्कक्षितिपालेन रच्यते।। इति प्रतिज्ञां विधाय, निश्शङ्कभूपालकविः कृतप्रतिज्ञामनुसृत्य प्रतिपदव्याख्यां सरलया सरसया पद्धत्या अत्यन्तमनोहरशैल्या सर्वेषां सुलभावगाहतया च अकरोत्।

श्रीमृत्युञ्जनिश्शङ्कभूपालः स्वव्याख्याने आवश्यकतानुसारं कोशग्रन्थेभ्यः, शास्त्रग्रन्थेभ्यः उदाहरणानि, अपेक्षितस्थानेषु नाट्यलक्षणानि व्याकरणसूत्राणि च प्रमाणत्वेन ददौ।

व्याख्याने उद्धृताः ग्रन्थाः

पर्यायपदनिरूपणप्रसङ्गे व्याख्याने बहुत्र विभिन्नकोशगतश्लोकान्, श्लोकपादान् वा प्रमाणत्वेन उपयुक्तवान्। ते च कोशग्रन्थाः रत्नमाला, विश्वकोशः, शब्दार्णवः, मेदिनीकोशः, शाश्वतकोशः, वैजयन्तीकोशः, शब्दार्णवः इत्यादि। अमरकोशस्योपयोगम् अधिकतया स्वव्याख्याने उपयुक्तवानिति व्याख्यानावलोकनेन ज्ञायते ।

एवमेव शब्दसाधनक्रमे आवश्यकतानुसारं सूत्राणि सूचितानि। एवमेव विशेषधातूनां लकारनिरूपणञ्चाकरोत् स्वव्याख्याने मृत्युञ्जयः।

एवमेव विशिष्टशब्दव्याख्यानावसरे प्रमाणत्वेन मनुस्मृत्यादिग्रन्थप्रमाणं प्रादर्शयत्। तथैव नाटकनाट्यलक्षणनिरूपणावसरे प्रतापरुद्रीय, दशरूपकादि-नाट्यलक्षणग्रन्थानप्युपयुक्तवान्। केषाञ्चन ग्रन्थानां व्याख्यानप्रसङ्गाः दिङ्मात्रमत्र प्रदर्श्यते।

- **अमरकोशः**

  परिषत् - (पृष्टसङ्ख्या-3) समज्यापरिषद्गोष्ठी सभा समिति संसद इत्यमरः।

  सूतः - (पृष्टसङ्ख्या-9) सूतः क्षत्ता च सारथिः।

- **रत्नमाला**

  सूत्रधारः - (पृष्टसङ्ख्या-2) सूत्रं तु सूचने ग्रन्थभेदे तंतु व्यवस्थयोरितिरत्नमाला ।

- **विश्वकोशः**

  सारङ्गः - (पृष्टसङ्ख्या-10) सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गज ।

  अभीशवः - (पृष्टसङ्ख्या-12) अभीशुः प्रग्रहेरश्मा ।

आकृतिः – (पृष्टसङ्ख्या–30) आकृतिः कथिता रूपे सामान्यवपुषोरपि।

- शाश्वतकोशः

रागः - (पृष्टसङ्ख्या–32) रागानुरागे मात्सर्ये क्लेशादौ लोहितादिषु।।

- मेदिनीकोशः

नेपथ्यम् - (पृष्टसङ्ख्या–2) नेपथ्यास्स्यादलङ्कारे रङ्गज्यायां नपुंसकम्।

- वैजयन्तीकोशः

कथमित्याश्चर्ये – (पृष्टसङ्ख्या–27)कारणेपि कथं तर्के विस्मये सम्पदुद्भव।

पूज्यः – (तत्रैव)भट्टारको भट्टरकः पूज्यस्तत्र भवानपि ।।

- प्रतापरूद्रीयम्

दशविधरूपकानि – (पृष्टसंख्या–4) नाटकं सप्रकरणं भाणप्रहसनं डिमः। व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ।।

पात्रलक्षणम् – (पृष्टसङ्ख्या–4) नातिस्थूलानातिकृशान्नात्युच्चानाति–वामना। हावभवाविलासाढ्यानर्तकीयाजितश्रमा।। तां बुधाः पात्रमित्याहुः गुणाघारतया सदा।।

नाटकधर्मः – (पृष्टसङ्ख्या–6) रङ्गं प्रसाद्यमधरैश्श्लोकैः काव्यार्थसूचकैः। ऋतुंकञ्चिदुपादद्याद्भारतीं वृत्तिमाश्रयेत् ।।

- मनुस्मृतिः

वैखानसः – (पृष्टसङ्ख्या–15) पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा। कालपक्वैस्स्वयं सीर्णैर्वैखानसमते स्थितः।।

(2–14, पृष्टसंख्या 91) यदह्नाकुरुते धर्मं प्रजाधर्मेण पालयन्। शतवर्षसहस्राणि तस्य भुङ्क्ते महाफलम् ।।

(पृष्टसङ्ख्या–211) वर्णाश्रमाणाञ्च राजा सृष्टोभिरक्षितेति।।

- **व्याकरणम्**

प्रतिपात्रम् – (पृष्टसङ्ख्या-4) पात्रे पात्रे अव्ययं विभक्तीत्यादिनावीप्सायामव्ययीभावः।

वृक्षकः – (पृष्टसङ्ख्या-30) वृक्षक इत्यल्पार्थेकन्प्रत्ययः।

शकुन्तला – (पृष्टसङ्ख्या-33) निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनिमिति प्रथमा ।

वर्णाश्रमाणां रक्षिता (पृष्टसङ्ख्या-211) कर्तृकर्मणोः कृति ।

अतः खलु प्रियंवदासि इति (पृष्टसङ्ख्या-31) अत्र निरुक्त्यलङ्कारः।

तदुक्तं – निरुक्तिर्योदतो नाम्नामन्यार्थत्वप्रकल्पनम्

एवं मृत्युञ्जयनिश्शङ्कभूपालेन (ग्रन्थस्य मुखपृष्टे दृश्यते) "अतिसङ्क्षिप्तप्राचीनव्याख्यानसङ्क्लेशितानाम् उपकाराय" इत्येवं प्रतिज्ञा कृता। किमर्थमेवं प्रतिज्ञामकरोत्। किं तर्हि प्राचीनव्याख्याः अतिसङ्क्षिप्ताः इत्यादिप्रश्नाः भवन्ति। ते प्रश्नाः एवं समाधातुं शक्यन्ते ।

उपलभ्यमान शाकुन्तलनाटकव्याख्याकारेषु श्रीनिवासः अन्यतमः। अयं स्वव्याख्याने "कुतो धर्मक्रियाविघ्न (5-14) इत्यस्य पञ्चमाङ्कस्थस्य श्लोकस्य "कुत इत्यादि सतां सज्जनानां न दुष्टानां रक्षितरि परिपालके"[1] इति एकस्यां पङ्क्तावेव व्याख्यानं चकार। क्वचिदितरव्याख्यानग्रन्थेषु श्लोकोऽयं न दृश्यते एव।

एतादृशानि व्याख्यानानि मनसि निधायैव मृत्युञ्जयनिश्शङ्कः एवं प्रतिज्ञां चकारेति ऊहितुं शक्यते।

मृत्युञ्जयनिश्शङ्कभूपालः मल्लिनाथव्याख्यानानि मनसि निधाय मल्लिनाथ प्रतिज्ञां च हृदि संस्थाप्य (इहान्वयमुखेनैव, नामूलं लिख्यते किञ्चित्) इत्यादिना अन्वयमुखेन प्रतिपदं व्याख्यां चकार। मल्लिनाथ इव कोशप्रामाण्यं, व्याकरणप्रामाण्यं, सन्दर्भोचित ग्रन्थप्रामाण्यमपि यथावसरं प्रादर्शयत्। भाषाध्येतृणां

---

[1] श्रीनिवासव्याख्या – पृष्टसङ्ख्या 228

कृते व्याख्येयम् अन्वर्थनामा सती पूर्णचन्द्रस्य चन्द्रिकेव साहितीरसिकानां अमन्दानन्दं जनयतीति आशासे ।

एनम् अवसरं कल्पितवद्भ्यः अस्माकं निदेशकेभ्यः आचार्य के. नीलकण्ठं महोदयेभ्यः कार्तज्ञ्यं वितरामि ।

सुहृज्जनसुधीविधेयः
परियोजना-सहायानुसन्धाता
डा.जोषि सन्तोषकुमारः
षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

पात्रपरिचयः

पुरुषपात्राणि

- सूत्रधारः – नाटकाध्यक्षः
- राजा – दुष्यन्तः – नायकः
- वैखानसः – कण्वशिष्यः
- शिष्यद्वयम् – कण्वशिष्यौ
- सूतः – दुष्यन्तस्य रथसारथिः
- विदूषकः – माधव्यः – राज्ञः सुहृत्
- रैवतकः – सेनापतिः
- दौवारिकः – द्वारपालः – द्वाररक्षकः
- ऋषिकुमारौ – कण्वाश्रमवासिनौ
- करभकः – आज्ञप्तिहरः
- शिष्यः – होमवेला निवेदकः
- ऋषिकुमारकौ – उपायनहस्तौ
- कण्वः – काश्यपमहर्षिः – शकुन्तलाः पालयिता
- शार्ङ्गरवः – कण्वमहर्षिशिष्यः
- शारद्वतः – कण्वमहर्षिशिष्यः
- कञ्चुकी – सौविदल्लः – वातायनः
- वैतालिकौ – स्तुतिपाठकौ
- पुरोहितः – सोमरातः – राज्ञः पुरोहितः
- पुरुषः – धीवरः
- श्यालः – नगरपालकः – नगररक्षकः
- सूचकः – भटः
- जानुकः – भटः
- मातलिः – इन्द्रस्य सारथिः
- बालः – सर्वदमनः – भरतः – दुष्यन्तस्य पुत्रः

- मारीचः – कश्यपमहर्षिः
- गालवः – कश्यपमहर्षिशिष्यः

स्त्रीपात्राणि

- नटी – नाटकाध्यक्षस्य भार्या – सूत्रधारस्य पत्नी
- शकुन्तला – दुष्यन्तस्य पत्नी – कण्वमहर्षिपोष्यपुत्री – नायिका
- अनसूया – शकुन्तलायाः प्रियसखी
- प्रियंवदा – शकुन्तलायाः प्रियसखी
- गौतमी – तापसी – कण्वस्य भगिनी
- तापसिन्यः – तिस्रः
- वेत्रवती – प्रतीहारी
- परभृतिका – चेटी
- मधुकरिका – चेटी
- सानुमती – अप्सराः
- चतुरिका – चेटी
- यवनी – यवनाङ्गना – धनुर्बाणधात्री काचित् परिचारिका
- तापसिन्यौ – भरतेन सह वर्तिन्यौ
- अदितिः – कश्यपस्य पत्नी

कविकुलसार्वभौमेन श्रीकालिदासमहाकविना विरचितम्

अभिज्ञानशाकुन्तलं नाम नाटकम्

श्रीमता मृत्युञ्जयनिश्शङ्कभूपालविरचितया

मृत्युञ्जयभूपालीयया व्याख्यया (पूर्णचन्द्रिकापराख्यया) संवलितम्

कविकुलसार्वभौमेन श्रीकालिदासमहाकविना विरचितम्

अभिज्ञानशाकुन्तलं नाम नाटकम्

श्रीमता मृत्युञ्जयनिश्शङ्कभूपालविरचितया
मृत्युञ्जयभूपालीयया व्याख्यया (पूर्णचन्द्रिकापराख्यया) संवलितम्

अथ प्रथमोऽङ्कः

(मङ्गलाचरणम्)

श्लो॥ या सृष्टिस्स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तश्श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुस्सर्वभूत[1]प्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥1॥

व्याख्यानप्रारम्भः

श्री रजताद्रिनिवेशं श्रीगौरीशं नमामि भक्त्याहम्।
निर्विघ्नपरिसमाप्त्यै व्याख्यायाः पूर्णचन्द्रिकाख्यायाः॥

निधाय चित्ते श्रीवाणीगिरिजास्तत्पतीन् गुरून्।
सुखबोधाय बालानां क्रियते पूर्णचन्द्रिका॥

श्रीमृत्युञ्जयनिश्शङ्कक्षितिपालेन रच्यते।
व्याख्या शाकुन्तलाख्यस्य विदुषां दयया मया॥

अथ तत्र भवान् कालिदास नामा महाकविः शाकुन्तलाख्यं नाटकं चिकीर्षुश्चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्त्यर्थं नान्दीरूपामाशिषं प्रयुङ्क्ते। या सृष्टिरित्यादिना, ताभिः प्रसिद्धाभिः, प्रत्यक्षाभिः अष्टाभिस्तनुभिः

---

1 'सर्वबीज' इति 'A' इति प्रकाशने पाठान्तरम्

पृथिव्यादिमूर्तिभिः, प्रपन्नस्सहितः ईशः शिवः, वः युष्मान् सामाजिकान्, अवतु रक्षत्विति योजना, ताभिः काभिरित्यपेक्षायां या तनुः, स्रष्टुर्ब्रह्मणः आद्या प्रथमा सृष्टिः सृजनं भवति अनेनोदकरूपा मूर्तिरुक्ता, अत एव ससर्जादाविति मनुना कथितत्वात्, या तनुः विधिहुतं विधिना शास्त्रेण हुतं दत्तम्, हविराज्यादिकं वहति प्रापयति, एतेन वह्निरूपा तनुरुक्ता, या तनुश्च होत्री होमकर्त्री अनेन सोमयाजिरूपा तनुरुक्ता, ये द्वे तनू कालं कलाकाष्ठादिरूपं प्रतिपदादि पूरं च विधत्तः प्रवर्तयत इत्यर्थः, अनेन दिवाकरनिशाकररूपे तनू प्रतिपादिते, या तनुः श्रुतिविषयगुणा श्रोत्रेन्द्रियगोचरीभूतगुणवती, विश्वं प्रपञ्चं व्याप्य स्थिता, अनेनाकाशरूपा तनुरुक्ता, यां तनुं सर्वभूतप्रकृतिरिति सर्वभूतानां समस्तप्राणिनां प्रकृतिः कारणभूतेत्याहुर्वदन्ति बुधा इति शेषः, अनेन भूरूपा तनुरुक्ता, यया तन्वा प्राणिनः सर्वजन्तवः प्राणवन्तः चैतन्यविशिष्टाः, अनेन वायुरूपा तनुरुदीरिता, एवंविधाभिः मूर्तिभिरुपलक्षितः परमेश्वरः रङ्गप्रदेशवर्तिनां विबुधादिजनानां मङ्गलप्रदायको भवत्वित्याशयः॥1॥

(नान्द्यन्ते)[2]

सूत्रधारः - ([3]नेपथ्याभिमुखमवलोक्य) आर्ये! यदि नेपथ्यविधानमवसितं [4]तर्हीतस्तावदागम्यताम्॥

नान्द्या अन्ते सूत्रधारः। सूत्रं धारयतीति सूत्रधारः, सूत्रं नाम सूचनम्, नि॥ "सूत्रं तु सूचने ग्रन्थभेदे तन्तुव्यवस्थयो"रिति रत्नमाला, सूचनं नाम चतुर्विधाभिनयात्मकं नाट्यमुच्यते, आहेति शेषः, नेपथ्येति, नेपथ्यस्याभिमुखं वीक्ष्येत्यर्थः, नेपथ्यो रङ्गभूमिः, नि॥ "नेपथ्यस्स्यादलङ्कारे रङ्गज्यायां नपुंसकम्" इति मेदिनी॥ रङ्गभूमिर्नाम तिरस्करिण्यन्तरितं भूमिकाग्रहणयोग्यं नटवर्गस्थानम्,

---

2 'नान्द्यन्ते - ततः प्रविशति सूत्रधारः' इति 'A' इति प्रकाशने पाठान्तरम्

3 'नेपथ्याभिधानम्' इति 'A' इति प्रकाशने पाठान्तरम्

4 'तदित आगम्यतां तावत्' इति 'A' इति प्रकाशने पाठान्तरम्

'इतस्तावदागम्यतां तावत्' इति 'B' इति प्रकाशने पाठान्तरम्

आर्य इति, आर्ये नटि, नेपथ्यविधानम् अलङ्कारसम्पादनं, तावत्साकल्येनावसितं यदि समाप्तं चेदित आगम्यताम्, त्वयेति शेषः॥

नटी - (प्रविश्य) [5]आर्य! इयमस्मि। [6]आज्ञापयत्वार्यः। को नियोगोऽनुष्ठीयतामिति॥

नटीत्यादि। आहेति शेषः, प्रविश्य सूत्रधारनिकटे प्रवेशं कृत्वा आर्य! नटी इयमस्मि एषाहमागतेत्यर्थः, को नियोगः का वा आज्ञा, अनुष्ठीयतां मया क्रियतामित्येतदार्यो मामनुशास्त्वित्यर्थः॥

सूत्रधारः - आर्ये! [7]अभिरूपभूयिष्ठा परिषदियम्। [8]अद्य खलु कालिदासग्रथितवस्तुना नवेनाभिज्ञानशकुन्तलाख्येन[9] नाटकेनोपस्थातव्यमस्माभिः। तत्प्रतिपात्रमाधीयतां यत्नः॥

सूत्रधार इत्यादि। हे आर्ये, इयं परिषत् सभा, नि॥ "समज्या परिषद्गोष्ठी सभासमितिसंसद" इत्यमरः। अभिरूपभूयिष्ठा, सकलकलाप्रवीणविद्वज्जनप्रचुरा, नि॥ "प्राप्तरूपसुरूपाभिरूपा बुधमनोज्ञयोः" इति विश्वः। स्वविद्याभिज्ञसन्निकटेन गुणिनां स्वगुणविकासनोत्साहस्समुल्लसतीत्याशयः। अद्य खलु इदानीं तावत्,

---

5 'आर्यपुत्र' इति 'A' इति प्रकाशने पाठान्तरम्
'आर्यपुत्र इयमस्मि।' इत्येव पाठः 'B' प्रकाशने दृश्यते।

6 क्वचिदयं पाठो नास्ति।

7 'इयं हि रस-भाव-विशेददीक्षागुरोर्विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषद्' इति 'A' इति प्रकाशने पाठान्तरम्।
'इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्याभि.... परिषद्। अस्यां च ...... वस्तुनाभिज्ञानशाकुन्तलनामधेयेन नवेन नाट.......' इति 'B' इति प्रकाशने पाठन्तरमुपलभ्यते इति सूचितम्।

8 'अस्यां च' इति 'A' इति प्रकाशने पाठान्तरम्

9 'अभिज्ञानशाकुन्तलनामधेयेन नवेन' इति 'A' इति प्रकाशने पाठान्तरम्
'नवेन.....शाकुन्तलाख्येन' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

अस्माभिर्नटैः, कालिदासग्रथितवस्तुना, कालिदासनामकमहाकविपरिकल्पितकथास्वरूपेण, नवेन नूतनेन, अभिज्ञानशकुन्तलाख्येन तन्नाम्ना नाटकेन, दशविधरूपकेषु प्रथमरूपकेणोपस्थातव्यमाराधनीयम्, दशविधरूपकाणि तु-

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति।

तल्लक्षणानि तु, प्रतापरुद्रीयादौ द्रष्टव्यानि विस्तरभयान्नेह कथ्यन्ते, तत्तस्मात् प्रतिपात्रम्, पात्रे पात्रे सू। 'अव्ययं विभक्ति....' इत्यादिना वीप्सायामव्ययीभावः। पात्रलक्षणन्तु।

नातिस्थूला नातिकृशा नात्युच्चा नातिवामना।
हावभावविलासाढ्या नर्तकी याजितश्रमा॥
तां बुधाः पात्रमित्याहुर्गुणाधारतया सदेति।

यत्नः सावधानत्वम्, आधीयतां क्रियताम्, सम्यक्सावधानप्रयोगो नटैः कर्तव्य इति भावः॥

नटी - सुविहितप्रयोगतया आर्यस्य न किमपि परिहास्यते[10] ॥

सुविहितेत्यादि, प्रयुज्यत इति प्रयोगः, सुविहितप्रयोगतया, सम्यक्कृत प्रयोगपरिश्रमतया, आर्यस्य नटस्य किमपि, किञ्चिदपि, न परिहास्यते, न परित्यज्यते, निश्शेषं निरूप्यत इत्याशयः॥

सूत्रधारः - [11]आर्ये! कथयामि ते भूतार्थम्॥

श्लो॥ आपरितोषाद्विदुषां न साधुमन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययञ्चेतः ॥2॥

---

10 'परिहापयिष्यति' इति 'C' इति प्रकाशने पाठान्तरम्।

11 '(सस्मितम्)' इति 'A' इति प्रकाशने पाठान्तरम्

नटः स्वाहङ्कारं परिहरति, आर्य इत्यादिना, ते तव भूतार्थं सत्यार्थं कथयामि वच्मि, विदुषां पण्डितानाम्, आपरितोषात्, सम्यक्सन्तुष्टिपर्यन्तम्, प्रयोगविज्ञानम्, प्रयोगपरिचयनैपुण्यं साधु रम्यं न मन्ये मान्यं न तर्कयामि, विद्वत्सम्मतिपर्यन्तं प्रयोगस्य योग्यता न निश्चीयत इति भावः, तथा हि, बलवत्सुष्ठु यथा तथा शिक्षितानाम्, परिचितानामपि, चेतः मनः, आत्मनि स्वरूपे, अप्रत्ययम् अविश्वासग्रस्तम्, स्वविद्यावैशद्ये बुधजनसम्मतिं विना, विश्वासो न शस्यत इत्यर्थः॥

नटी - (सविनयम्) [12]एवं न्विदम्। अनन्तरकरणीयं तावदार्य आज्ञापयतु॥

सविनयमिति। इदं पूर्वश्लोकोक्तम्, एवं नु इत्थमेव हि, आर्यः अनन्तरकरणीयं भविष्यत्कर्तव्यम् आज्ञापयतु, नियोजयतु, तावत्साकल्येन, नि॥ "यावत्तावच्च साकल्येऽवधौ मानेऽवधारण" इत्यमरः॥

सूत्रधारः - [13]किमन्यदस्याः परिषदः श्रुतिप्रसादनतः[14]॥

किमन्यदिति। अस्याः परिषदः एतस्यास्सभायाः, श्रुतिप्रसादनतः, श्रवणेन्द्रियतृप्तेरन्यत्किमस्ति, न किञ्चिदपीत्यर्थः, नि॥ "किं वितर्के परिप्रश्ने क्षेपे निन्दापराधयोः" इति विश्वः॥

---

12 'आर्य!' इति सम्बोधनं क्वचित् पाठेषूपलभ्यते।
'आर्य एवमेतत्। अनन्तरकरणीयमार्य आज्ञापयतु' इति 'B' इति प्रकाशने पाठान्तरम्
'एवमेतत्। अनन्तरकरणीयं तावदार्य आज्ञापयतु।' इति 'C' इति प्रकाशने पाठान्तरम्।

13 'आर्य!' इति सम्बोधनं क्वचित् पाठेषूपलभ्यते।
'किमन्यदस्याः परिषदः श्रुतिप्रसादनतः। तदिममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयतमाम्। सम्प्रति हि' इति 'B' इति प्रकाशने पाठान्तरम्।
'किमन्यदस्याः सङ्गीतात्; प्रसाद-प्रमोदहेतोः गीता-सङ्गीतादनन्तरकरणीयमस्ति।' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

14 'श्रुतिप्रमोदहेतोर्गीतात् करणीयमस्ति?' इति 'A' इति प्रकाशने पाठान्तरम्।

नटी - अथ कतमं पुनर्ऋतुमधिकृत्य गास्यामि॥

नटी सूत्रधारं नाटकधर्ममनुसृत्य गानविषये ऋतुं पृच्छति। अथ कतममिति, नाटकधर्मो नाम -

रङ्गं प्रसाद्य मधुरैश्लोकैः काव्यार्थसूचकैः॥

ऋतुं कञ्चिदुपादद्याद्भारतीं वृत्तिमाश्रयन्निति॥

अथानन्तरमहं कतममृतुं पुनः ऋतुषु, कं वा ऋतुम् अधिकृत्य उद्दिश्य, गास्यामि गानं करिष्यामि॥

सुत्रधारः - नन्विममेव[15] तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य[16] गीयताम्। सम्प्रति हि॥

श्लो॥ सुभगसलिलावगाहाः [17]पाटलसंसर्गसुरभिवनवाताः।
प्रच्छायसुलभनिद्रादिवसाः परिणामरमणीयाः॥3॥

नन्वित्यादि। नन्वित्यामन्त्रणे, इमम् एनमेव अचिरप्रवृत्तम् अदीर्घकालप्रवृत्तम्, उपभोगक्षमम् उपभुज्यन्त इत्युपभोगाः, वनविहारजलक्रीडाचन्दनानुलेपनादयः तेषां क्षमं हितम्, नि॥ "क्षमं शक्ते हिते त्रिषु" इत्यमरः॥ ग्रीष्मसमयमधिकृत्य ग्रीष्मर्तुमुद्दिश्य, गीयतां तावत् गानं क्रियतामिति विध्यर्थे लोट्। सम्प्रति हि इदानीन्तु, सुभगेति, दिवसाः दिनानि, सुभगसलिलावगाहाः सुलभजलप्रवेशाः, तापहारित्वादिति भावः, पाटलसंसर्गसुरभिवनवाताः पाटलादिपुष्पाणां, सम्बन्धेन परिमलविशिष्टाः अरण्यवायवो येषु ते तथोक्ताः प्रच्छाय सुलभनिद्राः प्रकृष्टच्छायाप्रदेशेषु,

---

15 'तमिममेव' इति 'A' इति प्रकाशने पाठान्तरम्

16 'आश्रित्य' इति 'A' इति प्रकाशने पाठान्तरम्

17 'पाटलि' इति 'A' इति प्रकाशने पाठान्तरम्

'पाटलसंसर्गि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

सुगमसुषुप्सयो येषु ते, पुनः परिणामरमणीयाः दिवसावसाने रम्याः, अति सुखप्रदा इति भावः॥

नटी - तथा। (इति गायति[18])

श्लो॥ [19]ईषदपि चुम्बितानि भ्रमरैस्सुकुमारकेसरशिखानि।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि॥4॥

नटीति। नटी, तथा सूत्रधारनिर्देशप्रकारेण इति गायति एवं गानं करोति, तदेव विवृणोति, ईषदित्यादि। भ्रमरैः भृङ्गैः, ईषदल्पम्, चुम्बितानि आस्वादितान्यपि, सुकुमारकेसरशिखानि सौकुमार्यविशिष्टकिञ्जल्काग्राणि, शिरीषकुसुमानि ग्रीष्मर्तुप्रधानतन्नामकपुष्पाणि, प्रमदाः स्त्रियः, दयमानास्सत्यः करुणायत्तचित्तास्सत्यः, अवतंसयन्ति शिरसि धारयन्ति, एतेन ऋतुसूचनं निर्दिष्टम्॥

सूत्रधारः - आर्ये। साधु गीतम्। अहो [20]रागबद्धचित्तवृत्तिरालिखित इव सर्वतो रङ्गः। तदिदानीं [21]कतमत्प्रकरणमाश्रित्यैनामाराधयामः॥

सूत्रधारः नटी गानं स्तौति॥ आर्य इति, साधुगीतं सम्यग्गानं कृतम्, तदेवोपपादयति, अहो इति, अहो इत्याश्चर्ये लोकोत्तरगानश्रवणादाश्चर्यम्। रङ्गः रङ्गस्थलस्थितसामाजिकवर्गः, रागबद्धचित्तवृत्तिः नटीगीतरागानुषक्तचेतो व्यापारस्सन्, सर्वतस्समन्तात्, आलिखित इव चित्रार्पित इव स्थित इत्युत्प्रेक्षा

---

18 'गायति' इत्येव पाठः उपलभ्यते

19 'क्षणं चुम्बितानि इति, ईषदीषच्चुम्बितानि' इति 'A' इति प्रकाशने पाठान्तरम्। उपलभ्यन्ते।
'ईषच्चुम्बितानि' इति 'C' इति प्रकाशने पाठान्तरम्।

20 'रागापहृत इति रागनिविष्ट' इति पाठान्तरमुपलभ्यते इति 'A' 'B' इति प्रकाशनयोः निर्दिष्टम्।
'रागानुबद्धचित्तवृत्ति' इति 'C' इति प्रकाशने पाठान्तरम्।

21 'कतमं प्रयोगम्' इति 'A' इति प्रकाशने पाठान्तरम्।

तत्तस्मादिदानीं सम्प्रति, कतमत्प्रकरणमाश्रित्य किं नाम रूपकमधिकृत्य, एनां परिषदं सभ्यानिति यावत्, आराधयामः परितोषयामः॥

नटी - नन्वार्यमिश्रैः प्रथममेवाज्ञाप्तमभिज्ञानशकुन्तलं नाम अपूर्वं नाटकं प्रयोगेणाधिक्रियतामिति[22] ॥

पूर्वनियुक्तमेवार्थं पुनर्निर्णयायत्तचित्तं सूत्रधारं नटी शङ्कते॥ नन्वित्यादि, नन्वार्यमिश्रैः भवद्भिः मिश्रशब्दोऽयं देश्यः पूज्यवाचकः, अभिज्ञानशकुन्तलं नाम तन्नाम्ना प्रसिद्धम् अपूर्वं निरुपमानं, नाटकं रूपकं, प्रयोगेण तदभिज्ञाव्यापारेण, अधिक्रियतां व्यवह्रियताम्, इत्येवं प्रकारेण प्रथमं पूर्वमेव आज्ञप्तं नियुक्तम्, पुनर्नियोगः किमर्थमिति भावः॥

सूत्रधारः - आर्ये! सम्यगनुबोधितोऽस्मि। अस्मिन् क्षणे विस्मृतं खलु मया[23]। कुतः॥

श्लो॥ तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तस्सारङ्गेणातिरंहसा॥5॥

इति निष्क्रान्तौ।

इति प्रस्तावना

नटीकृतां शङ्कां पात्रप्रवेशनव्याजेन समाधत्ते, आर्य इति, आर्ये, सम्यगनुबोधितोऽस्मि, अस्मिन् क्षणे सम्प्रति, मया विस्मृतं खलु श्रुतमप्यश्रुतपूर्वमिव जातम्, प्रकृतार्थविस्मरणे कारणमाह, कुत इत्यादि, कुतः कस्मादिति चेत्, हरिणा चित्ताकर्षणशीलेन, गीतरागेण गीतसम्बन्धि सुधामधुरस्वरविशेषेण, अतिरंहसा अतिवेगेन, सारङ्गेण कृष्णसारेण, एष पुरोवर्ती

---

22 'प्रयोगेऽधिक्रियताम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

23 'तत्सर्वम्' इति अधिकः पाठः 'C' इति प्रकाशने लभ्यते।

दुष्यन्तः, तन्नामकः राजा पार्थिव इव, प्रसभं बलात्, हृत आकृष्टोऽस्मि, अश्रुतपूर्वगानसौन्दर्यमेव प्रस्तुतकर्तव्यविस्मारकमित्याशयः॥

इति एवं प्रकारेण, पात्रनिर्गमनं सूचयित्वा नटीनटौ निष्क्रान्तौ निर्गतौ॥ अनन्तरकथावसरप्रदानार्थमिति शेषः॥ इति प्रस्तावना॥

अथ प्रथमोऽङ्कः -

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च[24]।)

सूतः - (राजानं मृगं चावलोक्य) आयुष्मन्!

श्लो॥ कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम्॥6॥

प्रथमोऽङ्कः - प्रस्तावनानन्तरम् अङ्कः प्रारभ्यते॥ ततः प्रविशतीत्यादि, अङ्क लक्षणन्तु – श्लाघ्यपुरुषप्रवेशवर्णनारूपम्, दशरूपके द्रष्टव्यम्। ततः सूत्रधारनिष्क्रमणानन्तरं सशरचापहस्ते बाणधनुस्सहितकरः, मृगानुसारी हरिणानुगतः, राजा दुष्यन्तः सूतस्सारथिश्च, रथेन स्यन्दनेन सह, नि॥ "शताङ्गस्स्यन्दनोरथः", "सूतः क्षत्ता च सारथिः" इति चामरः, प्रविशति। रङ्गस्थलमिति शेषः, सूतः राजानं मृगञ्चावलोक्य प्रेक्ष्य आहेति शेषः, किमिति, आयुष्मन्निति राज्ञस्सम्बोधनम्, कृष्णसारे सारङ्गे अधिज्यकार्मुके अधिगतमौर्वीकधनुषि त्वयि भवति च, चक्षुर्नेत्रं नेत्र इत्यर्थः जातावेकवचनं, ददन् सारयन्, मृगानुसारिणं हरिणमनुसरन्तं, स च दक्षाध्वरसमये पलायमानो यज्ञ एव, पिनाकिनं शम्भुं साक्षात्प्रत्यक्ष यथा तथा, पश्यामि प्रेक्ष्य इव स्थितः॥

राजा - सूत! [25]दूरममुना [26]सारङ्गेण वयमाकृष्टाः[27]। [28]अयं [29]पुनरिदानीमपि।

---

24 'ततः प्रविशति रथाधिरूढः सशरचापहस्तो मृगमनुसरन् राजा सूतश्च' इति 'A' इति प्रकाशने पाठान्तरम्।

श्लो ॥ ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने [30]बद्धदृष्टिः
पश्चार्धेन प्रविष्टश्शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैश्श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥7॥

(सविस्मयम्) कथमनुपतत एव मे प्रयत्नप्रेक्षणीयस्संवृत्तोऽयं मृगः[31] ॥

सूतेत्यादि॥ सूत - हे सारथे। वयममुना सारङ्गेण अनेन मृगेण, नि॥ "सारङ्गश्चातके भृङ्गे कुरंगे च मतङ्गज" इति विश्वः, दूरमाकृष्टाः दूर प्रदेशमासिताः, अयं पुनरिदानीमपि अयं मृगस्त्वद्याप्याकर्षतीति पूर्वेण सम्बन्धः, तदेवाह ग्रीवभङ्गेत्यादिना, ग्रीवायाः कन्धरायाः, नि॥ "ग्रीवायां शिरोधिःकन्धरेत्यपि" इत्यमरः। भङ्गेन विवलितेन अभिरामं रमणीयं यथा तथा अनुपतति अनुसरति, स्यन्दने रथे, नि॥ "शताङ्गस्स्यन्दनो रथ" इत्यमरः, मुहुः पुनःपुनः, नि॥ "मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समा" इत्यमरः, बद्धदृष्टिः दत्तचक्षुः, शरपतनभयात् बाणनिपातभयेन, पूर्वकायं अङ्गस्य पूर्वभागं, भूयसा अतिशयेन, पश्चार्धेन शरीरपश्चाद्भागेन, प्रविष्टः प्राप्त इति यावत्, श्रमविवृतमुखभ्रंशिभिः क्लेशव्यात्तानन परिच्युतैः, नि॥ "श्रमः

25 'वयममुना' इति 'C' इति प्रकाशने पाठान्तरम्।

26 'कृष्णसारेण' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

27 'दूरममुना सारङ्गेण वयमाकृष्टाः' इति 'A' इति प्रकाशने पाठान्तरम्।

28 'सोऽयमिदानीमपि' इति 'A' इति प्रकाशने पाठान्तरम्।

29 'अयमिदानीमपि' इति 'C' इति प्रकाशने पाठान्तरम्।

30 'दत्तदृष्टिः' इति 'B' इति प्रकाशने पाठान्तरम्।

31 'तदेष कथमनुपतत् एव मे प्रयत्नप्रेक्षणीयः संवृत्तः' इति 'A' इति प्रकाशने पाठान्तरम्।
'तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः' इति 'B' इति प्रकाशने पाठान्तरमुपलभ्यते।
'अयं मृगः' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

भेदाऽध्वरत्यादे"रित्यमरः, अर्धावलीढैः अर्धखादितैः, दर्भैः कुशैः, कीर्णवर्त्मा आस्तीर्णमार्गः, उदग्रप्लुतत्वात् अति शीघ्रधावनाद्धेतोः, वियत्याकाशे, नि॥ "वियद्विष्णुपदं वातुपुंस्याकार विहायसि" इत्यमरः, बहुतरम् अतिविस्तारम्, उर्व्यां भूमौ, नि॥ "वसुधोर्वी वसुन्धरे" इत्यमरः, स्तोकं अल्पं, नि॥ "स्तोकाल्पक्षुल्लकास्सूक्ष्मम्" इत्यमरः, प्रयाति गच्छति, पश्येति वाक्यार्थः कर्म, सविस्मयं अद्भुतसहितं, नि॥ "विस्मयोद्भुतमाश्चर्यम्" इत्यमरः, कथं केन हेतुना, अनुपततः अनुसृत्यागच्छत एव, मे मम, प्रयत्नप्रेक्षणीयः अधिकयत्नेन दर्शनीयः, संवृत्तः अभूत्, मृग इति शेषः, रथमन्दगमनकारणं वेदितुं राज्ञा सूतश्शङ्कित इत्याशयः॥

सूतः - आयुष्मन्! [32]उत्खातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः। तेन मृग एष विप्रकृष्टान्तरस्संवृत्तः। सम्प्रति हि। समदेशवर्तिनस्ते[33] न दुरासदो भविष्यति॥

सूतमाधत्ते। आयुष्मन्नित्यादिना, इयं भूमिः भूः, उत्खातिनी निम्नोन्नतस्थलवती, इत्यस्माद्धेतोः, रश्मि संयमनात्, प्रग्रहाणां नियमानात्, रथस्य वेगो मया मन्दीकृतः अलसीकृतः, तेन हेतुना, एष मृगः विप्रकृष्टान्तरः दूरतरावकाशः, संवृत्तः अभवत्, सम्प्रति अधुना, नि॥ "एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा" इत्यमरः, समदेशवर्तिनः समभूमौ गच्छतः, ते तव दुरासदो दुर्लभः, न भविष्यति इतः परं सुलभो भवतीत्यभिप्रायः॥

राजा - तेन हि मुच्यन्तामभीशवः[34]।

---

32 'उद्घातिनी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

33 'समदेशवर्ती न ते' इति 'A' इति प्रकाशने पाठान्तरम्
'समदेशवर्ती न दुरासदः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

34 'इषुः' इति मूर्धन्य एव साधु इति मन्ये। तालव्यशकारयुक्तं पदं नोपलभ्यते।

तेन हि समदेशवर्तित्वेन हेतुना। अभीशवः प्रग्रहाः, नि॥ "अभीशुः प्रग्रहे रश्मौ" इति विश्वः, मुच्यन्तां त्यज्यन्ताम्, रथस्यातिवेगगमनाभिलाषस्सूचितो अनेनेति वेदितव्यम्॥

सूतः - यथाज्ञापयत्यायुष्मान्! (रथवेगं निरूप्य) आयुष्मन् पश्य पश्य।[35]

श्लो॥ [36]मुक्तेषु रश्मिषु निरायतपूर्वकाया-
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥8॥

सूत इति। आयुष्मान् यथाज्ञापयति तथा करोमीति शेषः, रथवेगं रथजवं निरूप्य अभिनीय, मुक्तेष्विति, रश्मिषु प्रग्रहेषु, मुक्तेषु विसृष्टेषु सत्सु, निरायतपूर्वकायाः नितरां दीर्घदेहस्य पूर्वभागा येषां ते तथोक्ताः, निष्कम्पचामरशिखाः निष्कम्पाः कम्परहिताः चामराणां शिखा अग्राणि येषां ते तथोक्ताः, निभृतोर्ध्वकर्णाः निश्चलोदग्रश्रोत्राः, नि॥ "कर्णशब्दग्रहौ श्रोतम्" इत्यमरः, तथा आत्मोद्धतैः स्वोत्क्षिप्तैः खुरोद्धूतैरित्यर्थः, रजोभिर्धूलिभिः अलङ्घनीयाः अस्पृश्याः, अमी रथ्याः इमे रथवाहः, नि॥ "रथ्यो वोढा रथस्यय" इत्यमरः, मृगजवाक्षमया कुरङ्गवेगासहिष्णुतयेव, धावन्ति तीव्रतयागच्छन्ति॥

राजा - (सहर्षम्) [37]सत्यमतीत्य हरितो हरींश्च वर्तन्ते वाजिनः। तथा हि।

---

35 'सम्प्रति हि' इति अधिकः पाठः 'C' इति प्रकाशने लभ्यते।

36 'स्वेषामपि प्रसरतां रजसामलङ्घ्य निष्कम्पचामरशिखाश्च्युतकर्णभङ्गः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते॥' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम् उपलभ्यते इति निर्दिष्टम्।

श्लो॥ यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
[38]यदर्थे विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित्क्षणमपि न पार्श्वे रथजवात्॥9॥

सूत! पश्येनं व्यापाद्यमानम्[39]। ([40]इति शरसन्धानं नाटयति)

राजेति। सहर्षं सानन्दं, रथवेगदर्शनजनितोऽत्र हर्षः, सत्यं याथार्थ्येन वाजिनो अश्वाः, नि॥ "वाजिनोऽश्वेषु पक्षिणः" इत्यमरः, हरितो हरींश्च हरिद्वर्णानश्वानपि सूर्याश्वानित्यर्थः, अतीत्य अतिक्रम्य वर्तन्ते तिष्ठन्तीति वेगातिशयोक्तिः, तदेव कार्यमुखेन विवृणोति तथाहीत्यादिना, आलोके दर्शने, याति सूक्ष्मं स्वल्पतया भासते, तद्वस्तु, सहसा शीघ्रम्, विपुलतां विस्तृतत्वं, व्रजति प्राप्नोति, स्थूलतया प्रदृश्यत इति भावः, यद्वस्तु अर्धे अर्धभागे, विच्छिन्नं भवति तद्वस्तु कृतसन्धानमिव विरचितसंयोगमिव भवतीत्यस्यात्राप्यनुषङ्गः, प्रकृत्या स्वभावतः, यद्वक्रं वल्गितम्, नि॥ "आवद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि" इत्यमरः, तदपि नयनयोः नेत्रयोः, समरेखम् ऋजु, भवति, रथजवात् स्यन्दनवेगात्, किञ्चिद्वस्तु, मे मम, दूरे पार्श्वे च क्षणमपि स्वल्पकालमपि न भवति, एतत्सर्वं रथवेगकृतमिति तात्पर्यार्थः, सूत व्यापाद्यमानं हन्यमानं, मयेति शेषः, एनं मृगं, पश्य आलोकय, नि॥ "दर्शनालोकनेक्षणम्" इत्यमरः, इति शरसन्धानं बाणाकर्षणं, नाटयत्यभिनयति॥

---

37 'नूनमतीत्य हरिणं हरयो वर्तन्ते', अपि च 'कथमतीत्य' इति 'A' इति प्रकाशने उपलभ्यन्ते।

38 'यदर्द्धे' इति 'A' इति प्रकाशने पाठान्तरम्।
'यदध्वा, यदन्तः' इति पाठद्वयमुपलभ्यते 'B' इति प्रकाशने निर्दिष्टम्

39 'व्यापाद्यम्' इति 'A' इति प्रकाशने पाठान्तरम्

40 'राजा शरसन्धानं नाटयति' इति 'A' इति प्रकाशने पाठान्तरम्

(नेपथ्ये) भो भो राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ॥

नेपथ्य इत्यादि भो भो राजन्! भो भो इति सम्बुद्धिवाचकौ, नि॥ "स्युः प्याट्पाडङ्ग हे है भोः" इत्यमरः, सम्भ्रमातिशयद्योतनार्थं द्विर्वचनम्, अयमाश्रममृगः न हन्तव्यो न हन्तव्यः अवध्य इत्यर्थः, द्विर्वचनन्तु पूर्ववत्॥

सूतः - (आकर्ण्यावलोक्य च) आयुष्मन्! अस्य खलु ते [41]बाणपातवर्तिनः कृष्णसारस्यान्तरे [42]तपस्विन उपस्थिताः ॥

सूत इति। आकर्ण्य श्रुत्वा, अवलोक्य दृष्ट्वा च, क्रमात् तपस्विजनोक्तं तपस्वनश्चेति शेषः, आयुष्मन् बाणपातवर्तिनः बाणः पात्यतेऽस्मिन्निति बाणपातः, तत्पतनप्रदेशः, अधिकरणे घञ्, तत्र तिष्ठतः अस्य कृष्णसारस्य हरिणस्यान्तरे मध्ये, तपस्विनः मुनयः, उपस्थितास्सम्प्राप्ताः॥

राजा - (ससम्भ्रमम्) तेन हि [43]प्रगृह्यन्तां वाजिनः[44] ॥

राजेति॥ ससम्भ्रमं भयसहितं यथा तथा, मुनिशब्दश्रवणात् राज्ञस्सम्भ्रमः, तेन हेतुना, वाजिनोऽश्वाः, प्रगृह्यन्ताम् आकृष्यन्ताम्॥

सूतः - [45]तथा। (इति रथं स्थापयति)

---

41 'बाणपातपथवर्तिनः' इति 'A' इति प्रकाशने पाठान्तरम्
'पथ, पातपथ' इति द्विविधं पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

42 'अन्तरायौ द्वौ तपस्विनौ संवृत्तौ' इति 'A' इति प्रकाशने पाठान्तरम्

43 'निगृह्यन्ताम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

44 'इषवः' इति 'A' इति प्रकाशने पाठान्तरम्।
'अभीषवः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

45 'यथा शरणमत्यायुष्यान् (इति तथा करोति) (इति रथं स्तापयति)' इति 'A' इति प्रकाशने पाठान्तरम्
'तथा करोति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

सूत इति। तथा तेन प्रकारेण करोमीति शेषः इत्युक्त्वा रथं स्थापयति, तद्गमनं स्तम्भयतीत्यर्थः॥

(ततः प्रविशत्यात्मना तृतीयो वैखानसः[46])

नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि वेतिन्यायेन तपस्विन उपस्थिता इति सूचितं मुनिप्रवेशमाह, तत इति, ततः रथस्थापनानन्तरम् आत्मना तृतीयः एकस्वयमन्यौ च त्वावित्यर्थः, वैखानसः वानप्रस्थाश्रमी, अत्र मनुः॥ "पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा। कालपक्वैस्स्वयं सीर्णैर्वैखानसमते स्थित" इति, प्रविशति रङ्गस्थलं प्राप्तः॥

वैखानसः - (हस्तमुद्यम्य) राजन्! [47]आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

श्लो॥ न खलु न खलु बाणस्सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे [48]पुष्पराशाविवाग्निः।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता [49]वज्रसाराश्शरास्ते॥10॥

श्लो॥ तत्साधुकृतसन्धानं प्रतिसंहर सायकम्।
आर्तत्राणाय वश्शस्त्रं न प्रहर्तुमनागसि॥11॥

वैखानस इत्यादि। हस्तमुद्यम्य करमूर्ध्वं प्रसार्य, नि॥ "हस्ते नक्षत्रभेदेस्यात्करेभकरयोरपि" इति विश्वः, हे राजन्! नेति, मृदुनि कोमले,

---

46 '(ततः सशिष्यः प्रविशत्यात्मना तृतीयो वैखानसः)' इति 'A' इति प्रकाशने पाठान्तरम्
'सशिष्यः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

47 'आश्रम...हन्तव्यः' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

48 'तूल' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

49 'सारपुङ्खाः' इति 'C' इति प्रकाशने पाठान्तरम्।

अस्मिन् पुरोदृश्यमाने, मृगशरीरे कुरङ्गाङ्गे, शरपात सहनाक्षम इत्याशयः, पुष्पराशौ कुसुमसमूहे, अग्निर्वह्निरिव, नि॥ "अग्निर्वैश्वानरोवह्निः" इत्यमरः, बाणः मार्गणः, न सन्निपात्यः न प्रयोज्यः खलु, बतेत्यनुकम्पायाम्, नि॥ "भेदानुकम्पा सन्तोषविस्मया मन्त्रणे बत" इत्यमरः, हरिणकानां मृगाणाम्, नि॥ "मृगे कुरङ्गवातायु हरिणाजिनयोनयः" इत्यमरः, अतिलोलं अतितरलम्, नि॥ "चलं लोलं चलाचलम्। चञ्चलं तरलं चैव" इत्यमरः, जीवितं जीवनं च, क्व कुत्र, ते तव, निशितनिपाताः तीक्ष्णप्रसाराः, वज्रसाराः वज्रायुधवत्कठिनाः, शराश्च क्व कुत्र, अत्यन्तासम्भावितार्थद्योतकौ क्व शब्दौ, तदिति, तत् तस्मात्, नि॥ "यत्तद्य तस्ततोहेतौ" इत्यमरः, साधुकृतसन्धानम् आकर्णान्तसम्पूरितं, सायकं शरं, प्रतिसंहर निवर्तय, वः युष्माकं, शस्त्रमायुधम्, नि॥ "शस्त्रमायुधलोहयोः" इत्यमरः, आर्तत्राणाय दीनसंरक्षणाय, भवति, अनागसि निरपराधे, जन्ताविति शेषः, प्रहर्तुं हन्तुम् न भवति, राज्ञां दीनरक्षणमेव शीलमिति भावः॥

राजा - एष प्रतिसंहृतः॥ ([50]यथोक्तं करोति)

राजेति। एष बाणः प्रतिसंहृतः लक्ष्यान्निवर्तितः, भवदाज्ञयेतिशेषः, इति एवमुक्त्वा यथोक्तं मुनिभिर्यथा कथितं, करोति तथेति शेषः॥

वैखानसः - [51]सदृशमेतत्पुरुवंशप्रदीपस्य भवतः।

श्लो॥ जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि॥12॥

[52]इतरौ - ([53]बाहू उद्यम्य) सर्वथा चक्रवर्तिनं पुत्रमाप्नुहि॥

---

50 'इति यथोक्तं करोति' इति 'A' इति प्रकाशने पाठान्तरम्

51 '(सहर्षम्)' इति 'A' इति प्रकाशने पाठान्तरम्

52 वाक्यमेतत् 'C' इति प्रकाशने नास्ति।

वैखानस इति। पुरवंशप्रदीपस्य पुरुरिति कश्चन महाराजः, अस्य दुष्यन्तस्य, पूर्वतमः तस्य वंशः कुलं, तत्प्रदीपस्य तत्प्रकाशकस्य, भवतस्तव एतत् मुनिवचनकरणम्, सदृशम् अनुरूपं, तदेवाह, जन्मेति– यस्य तवपुरो राज्ञः वंशे अन्वये, जन्म उत्पत्तिः, नि॥ "जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव" इत्यमरः, तस्य ते, इदं पूर्वोक्तं, युक्तरूपं प्राशस्त्येन युक्तम्, सू॥ 'प्रशंसायां रूपप्' इति रूपप्प्रत्ययः, एवं गुणोपेतं भवद्गुणसदृशगुणयुतं, चक्रवर्तिनं सार्वभौमत्वविशिष्टं, पुत्रं कुमारम्, आप्नुहि लभस्व, आशिषि लोट्, इतराविति, बाहू भुजौ, उद्यम्य ऊर्ध्वं प्रसार्य, सर्वथा अमोघं यथा तथा, सू॥ 'प्रकारवचने थाल्' इति थाल्प्रत्ययः, चक्रवर्तिनं पुत्रमाप्नुहीति पूर्ववदेव आशिषं प्रयुक्तवन्तौ॥

राजा - (सप्रणामम्) प्रतिगृहीतम्[54]।

राजेति। सप्रणामं प्रत्यभिवन्दन सहितम्, प्रतिगृहीतं स्वीकृतं युष्मदाज्ञयेति शेषः, अनेन राज्ञो मुनिष्वति भक्तिस्सूचिता॥

वैखानसः - राजन्! समिदाहरणाय प्रस्थिता वयम्। [55]एष खलु कण्वस्य[56] [57]महर्षेरुपमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्यातिपातः तत्प्रविश्य प्रतिगृह्यतामातिथेयस्सत्कारः[58]। अपि च।

53 'हस्तमुद्यम्य' इति 'A' इति प्रकाशने पाठान्तरम्

54 'प्रतिगृहीतं ब्राह्मणवचनम्' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्

55 'एषः खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते। इति अपि च 'एष चास्मद्गुरोः साधिदैवतं इव (एष)' इति 'A' इति प्रकाशने पाठान्तरम्

56 'काश्यपस्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

57 'कुलपतेः' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्

58 'प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः' इति 'B' इति प्रकाशने पाठान्तरम्
'प्रविश्यात्र गृह्यतामातिथिसत्कारः' इति 'C' इति प्रकाशने पाठान्तरम्।

श्लो ॥ [59]रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियास्समवलोक्य[60]।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति ॥ 13 ॥

वैखानस इति॥ हे राजन्! वयं समिधाहरणाय इन्धनानयनाय, प्रस्थिताः प्रयाताः, उपमालिनीतीरं मालीनीनदीकूले, विभक्त्यर्थेऽव्ययीभावः, नि॥ "कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु" इत्यमरः, कण्वस्य महर्षेः कण्वाख्यमुनेः, नि॥ "कण्वं पापं मुनौ तु न" इत्यमरः, एष खल्वाश्रमः अयं प्रसिद्धाश्रमः, दृश्यते लक्ष्यते, अन्यकार्यातिपातः इतरकृत्यातिक्रमः, न चेत् न भवति यदि, प्रविश्य आश्रमं प्राप्य, आतिथेयः अतिथिषु योग्यस्सत्कारः, प्रतिगृह्यतां प्राप्यतां, युष्माभिरिति शेषः, आश्रमप्रवेशे प्रयोजनमाह– अपिचेत्यादि। अपि च किं च तपोधनानां तप एव धनं एषां तेषां, क्रियाः यागादिसत्कर्माणि, प्रतिहतविघ्नाः निर्विघ्नाः, अत एव रम्याः रमणीयाः, समवलोक्य सम्यग्वीक्ष्य, मौर्वीकिणाङ्कः ज्याघातकिणचिह्नः, मे मम, भुजो बाहुः, नि॥ "भुजबाहूप्रवेष्टोदोः" इत्यमरः, कियत् कियद्वा, भूमण्डलं रक्षति परित्रायते, इति ज्ञास्यसि अवगमिष्यसि, अनेन राज्ञः शास्त्रज्ञानं सूचितम्॥

राजा - अपि [61]सन्निहितोऽत्र कुलपतिः ॥

अत्राश्रमे कुलपतिः कण्वमहर्षिः सन्निहितोऽपि समीपवर्ती किमु॥

वैखानसः - इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय[62] नियुज्य[63] दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः ॥

---

59 'धर्म्याः' इति 'A' इति प्रकाशने पाठान्तरम्

60 'समभिवीक्ष्य' इति 'A' इति प्रकाशने पाठान्तरम्

61 'सन्निहितस्तत्र' इति 'A' इति प्रकाशने पाठान्तरम्

62 'अतिथिसत्कारार्थम्' इति 'A' इति प्रकाशने पाठान्तरम्

वैखानस इति। इदानीं अद्यैव, शकुन्तलां व्युत्पत्तिः शकुन्तैः पक्षिभिः लीयते पुष्यत इति तथोक्ताम्, एतच्च महाभारते द्रष्टव्यम्, दुहितरं पुत्रिकां, अतिथिसत्काराय अभ्यागत पूजार्थं, नियुज्य नियम्य, अस्याः पुत्र्याः, प्रतिकूलं दैवं, शमयितुं निवारयितुं, सोमतीर्थं नाम सिद्धस्थानं गतः यातः॥

राजा - [64]भवतु। [65]तां द्रक्ष्यामि। सा खलु [66]विदितभक्तिर्मां महर्षेः कथयिष्यति॥

राजेति। भवतु मुनिः आश्रमे माभूत्, तां शकुन्तलां, द्रक्ष्यामि वीक्षिष्ये, सा खलु शकुन्तलैव, विदितभक्तिस्सती ज्ञातभक्तिस्सती, मां मद्विषये, महर्षेः कण्वस्य, कथयिष्यति विज्ञापयिष्यति॥

वैखानसः - साधयामस्तावत्। (इति सशिष्यो निष्क्रान्तः)

वैखानस इति। तावदिदानीं साधयामः साध्यं यथा तथा इन्धनादिकं सम्पादयामः, इत्युक्त्वा सशिष्यः शिष्यसहितस्सन् निष्क्रान्तः निर्गतः।

राजा - सूत! [67]चोदयाश्वान्। पुण्याश्रमदर्शनेन[68] तावदात्मानं पुनीमहे॥

---

63 'आदिश्य' इति 'A' इति प्रकाशने पाठान्तरम्
'आदिश्य, सन्दिश्य' इति पाठद्वयमुपलभ्यते 'B' इति प्रकाशने निर्दिष्टम्
'सन्दिश्य' इति 'C' इति प्रकाशने पाठान्तरम्।

64 '(आत्मगतम्) भवतु। तां द्रक्ष्यामि। (प्रकाशम्) सैवदितभक्तिं मां महर्षेः करिष्यति।' इति 'C' इति प्रकाशने पाठान्तरम्।

65 'तामेव द्रक्ष्यामि' इति 'A' इति प्रकाशने पाठान्तरम्
'तामेव पश्यामि' इति 'B' इति प्रकाशने पाठान्तरम्।

66 'विदितभक्तिम्' इति 'A' इति प्रकाशने पाठान्तरम्

67 'नोदयाश्वान्' इति 'A' इति प्रकाशने पाठान्तरम्

68 'दर्शनसम्भावनादावनयात्मानं पुनीमहे ' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

राजेति। हे सूत! अश्वान् वाजिनः, चोदय प्रेरय, पुण्याश्रमदर्शनेन पुण्यास्तपस्विनः तेषामाश्रमः तस्यावलोकनेन, नि॥ "दर्शनालोकनेक्षणम्" इत्यमरः, आत्मानं तावत् स्वयं साकल्येन, पुनीमहे पवित्रीकुर्महे॥

सूतः - यदाज्ञापयत्यायुष्मान्। ([69]इति भूयो रथवेगं निरूपयति)

सूत इति आयुष्मान् प्रभुः यदाज्ञापयति तत्करवाणीति शेषः, भूयः पुनः, रथवेगं तज्जवं, निरूपयति अभिनयति॥

राजा - (समन्तादवलोक्य) सूत! अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्येति॥

राजेति। समन्तादवलोक्य सर्वतो दृष्ट्वा हे सूत! अयमाभोगः परिपूर्णता, तपोवनस्य सम्बन्धी यथा भवति तथा, अकथितोऽपि अन्यैरनुक्तोऽपि, ज्ञायत एव बुध्यत एव, अस्माभिरिति शेषः॥

सूतः - कथमिव[70]॥

सूत इति। कथमिव केन प्रकारेण ज्ञायत इत्यनुषङ्गः॥

राजा - किं न पश्यति भवान्। इह हि।

श्लो॥ नीवाराः [71]शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदस्सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयश्शब्दं सहन्ते मृगाः
तोयाधारपथाश्च वल्कलशिखा निष्यन्दरेखाङ्किताः॥14॥

अपि च॥

---

69 'भूयो रथवेगम्' इति 'A' इति प्रकाशने पाठान्तरम्

70 'तत् कथम्' इति 'C' इति प्रकाशने पाठान्तरम्।

71 'शुककोटरार्भकमुख' इति पाठान्तरमुपलभ्यते इति 'A' 'B' इति प्रकाशनयोः निर्दिष्टम्।

श्लो ॥ [72]कुल्याम्भोभिः पवनचपलैश्शाखिनो धौतमूला
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन।
एते चार्वागुपवनभुविच्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति॥15॥

राजेति। भवान् त्वं न पश्यति किं नेक्षते किम्? इह हि अत्र तपोवने तु, नीवारा इति, शुकगर्भकोटरमुखभ्रष्टाः शुकागर्भे येषां कोटरमुखानां तानि तथोक्तानि, तेभ्यो भ्रष्टाः च्युताः, नीवाराः तृणधान्यानि, नि॥ "तृणधान्यानि नीवाराः" इत्यमरः, तरूणां पादपानां, नि॥ "विटपीपादपन्तरुः" इत्यमरः, अधःदृश्यन्त इति शेषः, इतरत्र किरातभयाच्छुकानतथानीवारान्विक्षिपन्तीत्यभिप्रायः, इङ्गुदीफलभिदः तापसतरुफल भेदिनः, अत एव प्रस्निग्धाः प्रकर्षेण मसृणाः, उपलाः प्रस्तराः, नि॥ "पाषाणप्रस्तरग्रावोपलाश्मानश्शिलादृषत्" इत्यमरः, क्वचित् कुत्रचित्, सूच्यन्ते तपोवनसम्बन्धित्वेन ज्ञाप्यन्त एव, मृगाः कुरङ्गाः, विश्वासोपगमात् विस्रम्भप्राप्तेः, अभिन्नगतयः यथापूर्वगमनास्सन्तः, शब्दं रथध्वनिं, सहन्ते मर्षयन्ति, न तु भीताः पलायन्त इति भावः, तोयाधारपथाः जलाधारमार्गाश्च, वल्कलशिखानिष्यन्दरेखाङ्किताः वल्कलशिखानां मुनिपरिधानीयवस्त्राग्राणां ये निष्यन्दाः जलस्रावः तेषां रेखाः पङ्क्तयस्ताभिरङ्किताः, एभिश्चिह्नैः, तपोवनमिति ज्ञातव्यमिति भावः, अपि च किञ्च, कुल्येति पवनचपलैः वातचञ्चलैः, नि॥ "नभस्वद्वातपवनपवमानप्रभञ्जा" इत्यमरः, कुल्याम्भोभिः कृत्रिमसरिज्जलैः, नि॥ "कुल्याल्पा कृत्रिमा सरिद्" इत्यमरः, शाखिनो वृक्षाः, धौतमूलाः प्रक्षालितस्कन्धमूलप्रदेशाः, तथा आज्यधूमोद्गमेन घृतहोमधूमाविर्भावेन, किसलयरुचां पल्लवकान्तीनां, रागः रक्तिमा, भिन्नः च्युतः, एते हरिणशिशवः कुरङ्गशाबकाः, नि॥ "पृथुकश्शाबकश्शिशुः" इत्यमरः, नष्टाशङ्कास्सन्तः

[72] अयं श्लोकः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते। 'B' इति प्रकाशने पाठान्तरत्वेनोपलभ्यते इति निर्दिष्टम्।

व्यपगतभयास्सन्तः, नि॥ "शङ्कावितर्क भययोः" इत्यमरः, छिन्नदर्भाङ्कुरायां विलूनकुशकिसलयायाम्, अर्वागुपवनभुवि पश्चिमोद्यानभूभागे, मन्दमन्दम् अतिमन्दं यथा तथा, चरन्ति इतस्ततस्सञ्चरन्तीत्यर्थः॥

सूतः - सर्वमुपपन्नम्॥

सर्वं भवदुक्तमुपपन्नं समीचीनम्॥

राजा - (स्तोकमन्तरं गत्वा) [73]तपोवनवासिनामुपरोधो माभूत्। [74]अत्रैव तावद्रथं स्थापय। यावदवतरामि॥

राजेति। स्तोकम् अल्पम्, अन्तरम् अभ्यन्तरप्रदेशं, गत्वा यात्वा, तपोवनवासिनां तपोवनस्थितानाम्, उपरोधः निरोधः, माभूत् न भवतु, तावदिदानीं अत्रैव प्रदेशे, रथं स्यन्दनं, स्थापय निक्षिप, गमनं मा कुरु इत्यर्थः, यावदवतरामि अवरोक्ष्यामि, सू॥ 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट्॥

सूतः - [75]धृताः प्रग्रहाः। अवतरत्वायुष्मान्!

सूत इति। प्रग्रहाः रश्मयः, धृताः गृहीताः, आयुष्मान् राजा अवतरतु रथादवरोहतु॥

राजा - (अवतीर्य[76]) सूत! विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। [77]इदं तावद्गृह्यताम्॥ (इति [78]सूतस्याभरणानि धनुश्चोपनीय[79]) सूत!

---

73 'आश्रमोपरोधो माभूत्' इति 'A' इति प्रकाशने पाठान्तरम्

74 'तदिहैव' इति अपि च 'एतावत्येवं रथं स्थापय' इति 'A' इति प्रकाशने पाठान्तरम् उपलभ्यते।

'एतावत्येव रथं स्थापय' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

75 'यदाज्ञापयत्युष्मान्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

76 '(अवतीर्य आत्मानं चावलोक्य)' इति 'A' इति प्रकाशने पाठान्तरम्

यावदहमाश्रमवासिनः प्रत्यवेक्ष्योपावर्ते[80]। तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः॥

राजेति॥ अवतीर्य रथादवरुह्य, हे सूत! तपोवनानि विनीतवेषेण नम्रवेषेण, प्रवेष्टव्यानि नाम प्रवेशार्हाणि खलु। इदं तावद्वक्ष्यमाणं सर्वं गृह्यतां स्वीक्रियताम् इत्युक्त्वा सूतस्य सारथेः, आभरणानि भूषणानि, धनुश्चापश्च उपनीय दत्वा, हे सूत! अहं आश्रमवासिनः तपोवनस्थान्मुनीन् प्रत्यवेक्ष्य विलोक्य, यावदुपावर्ते यावता कालेन निवर्तिष्ये तावत् तावतैव कालेन, वाजिनः सैन्धवाः। नि॥ "वाजिवाहार्वगन्धर्व हयसैन्धवसप्तय" इत्यमरः। आर्द्रपृष्ठाः सिक्तकायोपरिभागाः। क्रियन्तां विरच्यन्ताम्।

सूतः - तथा[81] । (इति निष्क्रान्तः)

सूत इति। तथेति तथा भवदुक्तप्रकारेण, करिष्यामीत्युक्त्वा निष्क्रान्तः निर्गतः॥

राजा - (परिक्रम्यावलोक्य) इदमाश्रमद्वारम्। यावत्प्रविशामि॥ (प्रविश्य निमित्तं सूचयन्[82])

श्लो॥ शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥16॥

---

77 'तदिमानि तावद् गृह्यन्तामाभरणानि धनुश्च (इति सूतायार्पयति)' इति 'A' इति प्रकाशने पाठान्तरम्।

78 'सूताय' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

'सूतहस्ते धनुश्चाभरणानि' इति 'C' इति प्रकाशने पाठान्तरम्।

79 क्वचिदेतन्नास्तीति इति 'B' इति प्रकाशने निर्दिष्टम्।

80 'प्रत्यवेक्षाहमुपावर्ते' इति 'A' इति प्रकाशने पाठान्तरम्

81 'यदाज्ञापयति देवः' इति 'A' इति प्रकाशने पाठान्तरम्

82 'प्रवेशमभिनयन्, निमित्तं सूचयित्वा' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति॥ परिक्रम्य गत्वा, अवलोक्य वीक्ष्य, इदं परिदृश्यमानम्। आश्रमद्वारं भवतीति शेषः। यावत्प्रविशामि प्रवेशं करिष्यामि। इत्युक्त्वा प्रविश्य आश्रममिति शेषः। निमित्तं सूचयन् शकुनं ज्ञापयन्, शान्तमिति इदमाश्रमपदं एतदाश्रमस्थानं शान्तं शमगुणयुक्तम्। बाहुर्भुजश्च। स्फुरति स्पन्दते। अस्य स्फुरणस्य फलम् इह अस्मिन्वने कुतः कस्मात् भवति। पक्षान्तरमाह अथवेत्यादिना। अथवा यद्वा भवितव्यानां भाविकार्याणां सर्वत्र सकलदेशेषु द्वाराणि प्राप्त्युपायाः भवन्ति जायन्ते॥

(नेपथ्ये) इत इतस्सख्यौ॥

नेपथ्य इति॥ हे सख्यौ। इत इत इत्यादरातिशयाद्द्विरुक्तिः आगच्छतमिति शेषः॥

राजा - (कर्णं दत्वा) अये दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते। यावदत्र गच्छामि॥ (परिक्रम्यावलोक्य च) अये! एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैस्सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते॥ ([83]निरूप्य) अहो मधुरमासां दर्शनम्।

श्लो॥ शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥17॥

[84]यावदिमां छायामाश्रित्य प्रतिपालयामि। (इति विलोकयन् स्थितः)

राजेत्यादि॥ कर्णं दत्वा श्रोत्रं निधाय। तदालापश्रवणार्थमिति शेषः। अये इति महर्षेः वृक्षवाटिकां दक्षिणेन वृक्षपङ्क्तेर्दक्षिणा दूरप्रदेशे सू॥ 'एनपाद्वितीया'

---

83 'निपुणं निरूप्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

84 'तावदेनां तरुच्छायामाश्रित्य विलोकयामि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

'यावदेनां तरुच्छायाम्...' इति 'C' इति प्रकाशने पाठान्तरम्।

इति द्वितीया। आलाप इव अन्योन्याभाषणमिव। नि॥ "स्यादाभाषणमालाप" इत्यमरः। श्रूयते आकर्ण्यते। अत्रास्मिन्प्रदेशे यावद्गच्छामि गमिष्यामि परिक्रम्य गत्वा अवलोक्य दृष्ट्वा च, एतास्तपस्विकन्या इमा मुनिकन्यकाः, स्वप्रमाणानुरूपैः आत्मशक्तिसदृशैः, सेचनघटैः अभिषेककुम्भैः, बालपादपेभ्यः कोमलवृक्षेभ्यः, पयो दातुं जलं वितरीतुम्, इत एवाभिवर्तन्ते एतत्प्रदेशमेव पर्यटन्ति॥ निरूप्य आसाम् एतासां स्त्रीणां दर्शनम् अवलोकनं मधुरम् अतीव स्वादुतरम्। नि॥ "स्वादुप्रियातुमधुरा"वित्यमरः॥ अहो इत्याश्चर्ये मुनिकन्यासु लावण्यदर्शनात् आश्चर्यमिति भावः। एतदेव प्रतिपादयति॥ शुद्धान्तेत्यादि। शुद्धान्तदुर्लभम् अन्तःपुरेऽप्राप्यं, इदं वपुः एतच्छरीरम्, आश्रमवासिनः आश्रमस्थितस्य। जनस्य लोकस्य। यदि भवति वर्तते चेत् तर्हि उद्यानलताः उपवनवल्लिकाः, वनलताभिः आरण्यकलतिकाभिः, गुणैः सौकुमार्यादिभिः, दूरीकृताः तिरस्कृताः, यावदिति। इमां छायां वृक्षसम्बन्धिनीम्, आश्रित्य निषेव्य, प्रतिपालयामि यावत्साकल्येन द्रक्ष्यामीत्युक्त्वा विलोकयन्पश्यन्, स्थितः वृक्षान्तरितस्सन्निति शेषः॥

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)

शकुन्तला - इत इतस्सख्यौ॥

तत इति। यथोक्तव्यापारा पूर्वोक्तवृक्षसेचनकर्मप्रवृत्ता, शकुन्तला सखीभ्यां सह, प्रविशति रङ्गस्थलमिति शेषः इत इति। व्याख्यातमेतत्॥

अनसूया - हला शकुन्तले! [85]त्वत्तोऽपि तातकाश्यपस्य [86]आश्रमवृक्षः प्रियतर इति तर्कयामि। [87]येन नवमालिकाकुसुमपेलवा अपि त्वमेतेषामालवालपूरणे नियुक्ता॥

---

85 'त्वत्तोऽपि तातकाश्यपस्य आश्रमवृक्षकाः प्रियतरा इति तर्कयामि। यदनेन नवमालिकाकुसुमपेलवा त्वमप्येतेषामालवालपूरणे नियुक्ता॥' इति 'A' इति प्रकाशने पाठान्तरम्।

86 'आश्रमवृक्षकाः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

अनसूयेति। हला सखि। नि॥ "हन्दे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति" इत्यमरः, शकुन्तले तातकाश्यपस्य जनककण्वस्य, आश्रमवृक्षः स्वस्थानस्थितशाखी त्वत्तो भवत्तोऽपि प्रियतर इति अत्यन्तप्रिय इति तर्कयामि ऊहां करोमि। यद्यस्मात्कारणात्, नवमालिकाकुसुमपेलवा सप्तलापुष्पकोमला त्वमपि। एतेषां वृक्षाणाम् आलवालपूरणे आवपसंसेचने नियुक्ता आज्ञप्ता॥

शकुन्तला - हला अनसूये! न केवलं तातनियोग एव। अस्ति मे सोदर स्नेहोऽप्येतेषु॥ (इति वृक्षसेचनं निरूपयति)[88]

हलेत्यादि। सख्यनसूये तातनियोग एवं केवलं जनकाज्ञैव न ममापि एतेष्वाश्रमवृक्षेषु, सोदरस्नेहः सहजप्रेम, अस्ति विद्यते खलु। इत्युक्त्वा वृक्षसेचनं निरूपयति अभिनयति॥10

राजा - [89]कथमियं[90] सा कण्वदुहिता। [91]असाधुदर्शी खलु तत्र भवान् काश्यपः[92]। य इमामाश्रमधर्मे नियुङ्क्ते।

---

87 'यन्नवमालिकाकुसुमपेशलात्वमप्येतेषामालवालसेचने नियुक्ताः' इति 'C' इति प्रकाशने पाठान्तरम्।

88 'न केवलं तात नियोग एव अस्ति मे सोदरस्नेहः एतेषु॥ (इति वृक्षसेचनं निरूपयति)' इति 'A' इति प्रकाशने पाठान्तरम्।

'सह सखीभ्यां वृक्षसेचनं नाट्येन निरूपयति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

'न केवलं तातनियोगः। अस्ति ममापि खलु सोदरस्नेह एतेषु।' इति 'C' इति प्रकाशने पाठान्तरम्।

89 '(आत्मगतम्)' इति पाठः 'A' इति प्रकाशने उपलभ्यते।

90 'कथमिदम्' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

91 'अहो, असाधुदर्शी' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

92 'भगवान् कण्वः' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

श्लो॥ इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं[93] साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां[94] छेत्तुमृषिर्व्यवस्यति[95] ॥18॥

भवतु [96]पादपान्तरित एव [97]विश्वस्तां तावदेनां पश्यामि। ([98]इति तथा करोति)

राजेति। इयम् एतादृशलावण्यातिशयवती सा पूर्वोक्ता कण्वदुहिता ऋषिपुत्रीति कथमित्याश्चर्ये। नि॥ "कारणेऽपि कथं तर्के विस्मये सम्पदुद्भवः" इति वैजयन्ती तपस्विकन्याया एतादृशरूपादेरसम्भवादाश्चर्यं युज्यते। तत्र भवान् पूज्यः। नि॥ "भट्टारकोभट्टरकः पूज्यस्तत्र भवानपि" इति वैजयन्ती॥ काश्यपः कण्वः, असाधुदर्शी खलु उचितज्ञो न हि यो मुनिः। इमां सुन्दरीं आश्रमधर्मे वृक्षसेचनादि-कठिनव्यापारे नियुङ्क्ते प्रेरयति तस्मादसाधुदर्शीति पूर्वेणान्वयः। असाधुदर्शित्वमेव विशदयति इदमित्यादिना अव्याजमनोहरं निसर्गरमणीयं इदं पुरोवर्ति वपुश्शरीरं तपः क्षमं चान्द्रायणादि-मुनिव्रतयोग्यं साधयितुं कर्तुं यः मुनिः इच्छति वाञ्छति। सः मुनिः नीलोत्पलपत्रधारया अल्पसाधनेनेत्यर्थः। शमीलतां छेत्तुं महत्कार्यं साधयितुं व्यवस्यति उद्युङ्क्ते। ध्रुवं नूनं किलेति सम्भावनायाम्। नि॥ "वार्ता सम्भाव्ययोः किले"त्यमरः। अस्मिन् श्लोके दृष्टान्तालङ्कारः। तदुक्तम्।

---

93 'तपःफलम्' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

94 'समिल्लतां' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

95 'समिल्लतां छेत्तुमयं व्यवस्यति' इति 'C' इति प्रकाशने पाठान्तरम्।

96 'पादपान्तर्हित एव विस्रब्धां तावदेनां पश्यामि' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।
'पादपान्तर्हित एव विश्रब्धं तावदेनां पश्यामि' इति 'B' इति प्रकाशने पाठान्तम्।

97 'विस्रब्धम्' इति 'C' इति प्रकाशने पाठान्तरम्।

98 'तथा करोति' इति पाठः 'A' इति प्रकाशने उपलभ्यते।
'अपवार्य स्थितः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

"चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृति"रिति॥ भवत्विति। भवतु मुनिर्यादृशस्तादृशो वास्तु, अहं पादपान्तरितो वृक्षतिरोहित एव। विश्वस्तां विश्वासयुक्ताम् एनां शकुन्तलां तावत्पश्यामि द्रक्ष्यामीत्युक्त्वा, तथा करोति तद्वत्कुरुते॥

शकुन्तला - सखि अनसूये! अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रितास्मि[99]। शिथिलय तावदेनम्[100] ॥

शकुन्तलेति। हे अनसूये! इति सख्यास्सम्बोधनम्। अति पिनद्धेन दृढबद्धेन, अनेन वल्कलेन त्वक्परिधानेन, प्रियंवदया तन्नाम्न्या सख्या, नियन्त्रितास्मि दृढं बद्धास्मि। एनं शिथिलय तवात् सङ्कोचय॥

अनसूया - तथा। (इति शिथिलयति)॥

अनसूयेति। तथा तेन प्रकारेण, करीष्यामीत्युक्त्वा शिथिलयति श्लथं करोति वल्कलमिति शेषः॥

प्रियंवदा - (सहासम्) अत्र पयोधरविस्तारयितृकम् आत्मनो यौवनमुपालभस्व। मां किमुपालभसे[101] ॥

अत्रेत्यादि अत्र वल्कलदृढबन्धने विषये, पयोधरविस्तारयितृकं कृतस्तनबहुलीकारं, आत्मनः स्वस्याः, यौवनं तारुण्यं, उपालभस्व निन्दां कुरु। मां पुनः किं केन कारणेन, उपालभसे निन्दसि। वल्कलबन्धनदार्ढ्यं न मयाकृतं किं तु प्रतिक्षणविजृम्भमाणयौवनकृतम् अतोऽहं नोपालभ्येति भावः॥

राजा - सम्यगियमाह।

---

99 'पीडितास्मि' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

100 'तावदेतत्' इति पाठान्तरं 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

101 'मां किमुपालभसे' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

[102]श्लो॥ इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन।
वपुरभिनवमस्याः पुष्यति स्वं न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण॥19॥

अथवा काममननुरूपमस्या[103] वल्कलम्। [104]न पुनरलङ्कारश्रियं पुष्यति[105]। कुतः।

श्लो॥ सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥20॥

राजेत्यादि इयं प्रियंवदा, सम्यक् समीचीनं यथा तथा। आह भाषते॥ इदमिति स्कन्धदेशे भुजशिरोभागे। नि॥ "स्कन्धो भुजशरोंऽसोऽस्त्री" इत्यमरः। उपहितसूक्ष्मग्रन्थिना समीपनिहितप्रतनुबन्धेन स्तनयुगपरिणाहाच्छादिना वक्षोज युगवैशाल्यगोपनेन वल्कलेन त्वगुत्तरीयेण। नि॥ "त्वक् स्त्रीवल्कं वल्कलमस्त्रियाम्" इत्यमरः॥ अभिनवं नूतनम्, इदमस्याश्शकुन्तलायाः वपुश्शरीरं पाण्डुपत्रोदरेण परिणतपर्णाभ्यन्तरेण, पिनद्धं बद्धं, कुसुमं पुष्पमिव। नि॥ "स्त्रियस्सुमनसः पुष्पं प्रसूनं कुसमं सुमम्" इत्यमरः। स्वां स्वीयां, शोभां द्युतिं। नि॥ "शोभा कान्तिर्द्युतिश्छविः" इत्यमरः। न पुष्यति न पुष्णाति। इमं पक्षं

102 अयं श्लोकः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते। 'B' इति प्रकाशने पाठन्तरत्वेनोपलभ्यते इति निर्दिष्टम्।

103 'काममननुरूपमस्या वपुषो वल्कलम्' इति पाठान्तरं 'A' 'B' इति प्रकाशनयोः उपलभ्यते। 'वयसो वल्कलं' इति 'C' इति प्रकाशने पाठान्तरम्।

104 'न पुनरलङ्कारश्रियं न पुष्यति' इति पाठान्तरं 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

105 'पुष्णाति' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

निराकृत्य पक्षान्तरमाह अथवेत्यादिना। अस्याः शकुन्तलायाः, वपुषः शरीरस्य। नि॥ "गात्रं वपुस्संहननं शरीरं वर्ष्मविग्रह" इत्यमरः। वल्कलं त्वक्पटं, कामम् अत्यन्तम्, अननुरूपम् असदृशं तथापि अलङ्कारश्रियं भूषशोभां, न पुष्यतीति न किन्तु पुष्यत्येवेत्यर्थः॥ अशोभावहं वस्तु कुत्र शोभत इत्याशंक्य स्वोक्तिदार्ढ्यार्थं दृष्टान्तानुपपादयति। कुत इत्यादिना सरसिजं पद्मम्। सू॥ 'सप्तम्यां जनेर्डः' इति ड प्रत्ययः 'तत्पुरुषे कृति बहुलम्' इत्यलुक्। शैवलेन जलनील्या। नि॥ "जलनीली तु शैवालं शैवलः" इत्यमरः। अनुविद्धं संसक्तमपि, रम्यं मनोहरं, हिमांशोरिन्दोः, मलिनं नैल्ययुक्तं, 'ज्योत्स्नातमिस्रे'त्यादिना निपातनात्साधुः। लक्ष्म कलङ्कोपि, लक्ष्मीं शोभां, तनोति विस्तारयति, इयं एतादृशलावण्यवती तन्वी सुन्दरी, वल्कलेनाप्यधिकमनोज्ञा वल्कलसहिताप्यत्यन्तरमणीया, तथाहि मधुराणां रमणीयानाम् आकृतीनां रूपाणां। नि॥ "आकृतिः कथिता रूपे सामान्यवपुषोरपि" इति विश्वः। किं किं वा वस्तु, न मण्डनं न प्रकाशकं, किन्तु अरम्यमपि प्रकाशक मेवेत्यर्थः॥

शकुन्तला - (अग्रतोऽवलोक्य) एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव[106] मां [107]केसरवृक्षकः। [108]यावदेनं सम्भावयामि। (इति परिक्रामति[109])

शकुन्तलेति अग्रतोऽवलोक्य पुरो दृष्ट्वा, एष केसर वृक्षकः अयं बालवकुलः। सू॥ 'वृक्षक' इत्यल्पार्थेकन्प्रत्ययः। वातेरितपल्लवाङ्गुलीभिः वायुचलितकिसलयकरशाखाभिः। नि॥ "अङ्गुल्यः करशाखाः स्युः" इत्यमरः। मां त्वरयतीव जलप्रदानार्थमिति शेषः। एनं वकुलं यावत्सम्भावयामि सम्भावयिष्यामि। इत्युक्त्वा परिक्रामति तत्र गच्छतीत्याशयः॥

---

106 'किमपि व्याहरतीव' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

107 'चूतवृक्षः' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

108 'तत् चावदेनाम्' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

109 'यथोक्तं करोति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

प्रियंवदा - हला शकुन्तले! अत्रैव तावन्मुहूर्तं तिष्ठ॥

प्रियंवदेति॥ हला शकुन्तले सखि शकुन्तले! अत्र केसरवृक्षसमीप एव मुहूर्तं तावत् क्षणमात्रं, तिष्ठ अवतिष्ठस्व॥

शकुन्तला - किन्निमित्तम्॥[110]

शकुन्तलेति किन्निमित्तं को वा हेतुः॥ मदवस्थानस्येति शेषः॥

प्रियंवदा - यावत्त्वयोपगतया लतासनाथ इव अयं केसरवृक्षकः प्रतिभाति॥

प्रियंवदेति। यावत् यावता कलेन, उपगतया समीपं प्राप्तया। त्वया भवत्या। अयं केसरवृक्षकः एष बालवकुलः। लतासनाथ इव वल्लिकासमेत इव॥ नि॥ "वल्ली तु व्रततिर्लता" इत्यमरः। प्रतिभाति प्रकाशते॥

शकुन्तला - अतः खलु प्रियंवदासि त्वम्॥

शकुन्तलेति। अतः खलु अस्मात्प्रियभाषणादेव हेतोः। त्वं प्रियंवदासि तन्नामधेयासि अत्र निरुक्त्यलङ्कारः तदुक्तं "निरुक्तिर्योदतो नाम्नामन्यार्थत्व प्रकल्पनम्" इति॥

राजा - [111]प्रियमपि तथ्यमाह[112] शकुन्तलां प्रियंवदा। अस्याः खलु।

श्लो॥ अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं[113] यौवनमङ्गेषु सन्नद्धम्॥21॥

---

110 एतत् वाक्यं 'B' 'C' इति प्रकाशनयोः नोपलभ्यते।

111 'न पुनः प्रियंवदा, प्रियमपि तथ्यमाह। अस्याः खलु।' इति 'C' इति प्रकाशने पाठान्तरम्।

112 'अवितथमाह' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

113 'लोकनीयम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

राजेति॥ प्रियंवदा शकुन्तलां प्रति प्रियमपि मनोहरमपि, वचनमिति शेषः। तथ्यमाह सत्यमेवाहेत्यर्थः। तदेव विशदीकरोति अस्या इत्यादिना। खलु शब्दोऽत्र हेत्वर्थकः। खलु यतो हेतोः अस्याः शकुन्तलायाः अधरः अधरोष्ठः, किसलयरागः पल्लवसमानरक्तिमा। नि॥ "रागोऽनुरागे मात्सर्ये क्लेशादौ लोहितादिषु" इति शाश्वतः॥ बाहू भुजौ कोमलविटपानुकारिणौ मृदुलविटपसदृशौ, अङ्गेषु सर्वावयवेषु, सन्नद्धं विकासोन्मुखं, यौवनं तारुण्यम्, नि॥ "तारुण्यं यौवनं समे" इत्यमरः॥ कुसुमं प्रसूनमिव, लोभनीयं कमनीयं भवतीति शेषः। तस्मादस्याः लतात्वं युक्तमेवेति भावः॥

अनसूया - हला शकुन्तले! इयं स्वयंवरवधूस्सहकारस्य त्वया कृतनामधेया वनज्योत्स्नीति[114] नवमालिका। [115]एनां विस्मृतासि॥

अनसूयेत्यादि। हला सखि शकुन्तले! इयं पुरो दृश्यमाना लता, सहकारस्य रसालवृक्षस्य। नि॥ "रसालोऽसौ सहकरोऽतिसौरभः" इत्यमरः। स्वयं वरवधूः स्वयंवरे परिगृहीत कन्यका। वनज्योत्स्नीति त्वया भवत्या कृतनामधेया विरचिताभिधाना। नि॥ "आख्याह्वे आभिधानं च नामधेयं च नाम च" इत्यमरः। सर्ववनप्रकाशकत्वादस्य अन्वर्थत्वं नवमालिका सप्तलाख्या, एनां लतां विस्मृतासि विस्मरणं प्राप्तासि॥

शकुन्तला - तदात्मानमपि विस्मरिष्यामि॥ (लतामुपेत्यावलोक्य च) हला। [116]रमणीये खलु कालेऽस्य लतापादपमिथुनस्य

---

114 'वनज्योत्स्ना' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम् उपलभ्यते।

115 'तातकण्वेन त्वमिव स्वहस्तेन संवर्द्धिता माधवीलता तत्कथमेनां विस्मृतवती।' इति 'A' इति प्रकाशने पाठान्तरम् उपलभ्यते।

116 'रमणीयः खलु कालः' इति 'A' इति प्रकाशने पाठान्तरम्।

[117]व्यतिकरस्संवृत्तः[118]। नवकुसुमयौवना वनज्योत्स्नी बद्धपल्लवतयोपभोगक्षमस्सहकारः[119]॥ (इति पश्यन्ती तिष्ठति)

शकुन्तलेत्यादि। आत्मानं मामपि, विस्मरिष्यामि यदि विस्मृतिं प्राप्स्यामि यदि। तदा तर्हि, विस्मरामीति सम्बन्धः। न विस्मरणीयेति भावः। लतामुपेत्य नवमालिकां प्राप्य अवलोक्य दृष्ट्वा च, हला सखि रमणीये क्रीडायोग्ये, काले समये, अस्य एतस्य, लतापादपमिथुनस्य वल्लीवृक्षद्वन्द्वस्य, व्यतिकरस्सम्पर्कः, संवृत्तः खलु सिद्धो हि। कुत इत्यत आह। नवेत्यादि। वनज्योत्स्नी नवकुसुमयौवना नूतनपुष्पतारुण्या सहकारः बद्धपल्लवतया निरूढरागवत्तयेति यावत्। उपभोगक्षमः सम्भोगशक्तः। नि॥ "क्षमं शक्तेहि ते त्रिष्वि"त्यमरः। इत्युक्त्वा पश्यन्ती प्रेक्षमाणा नवमालिकामित्यनुषज्यते। तिष्ठति वर्तते॥

प्रियंवदा - (सस्मितम्) अनसूये। जानासि किन्निमित्तं शकुन्तला [120]वनज्योत्स्नीमतिमात्रं प्रेक्षत[121] इति॥

प्रियंवदेति सस्मितं समन्दहासं, यथा तथा अनसूयां प्राहेत्यन्वयः। तत्प्रकारमेवाह अनसूये इत्यादि। हे अनसूये! शकुन्तला वनज्योत्स्नीं नाम लताम्। किं निमित्तं केन कारणेन। सू॥ 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शन'मिति प्रथमा।

---

117 'रतिकरः' इति 'A' इति प्रकाशने पाठान्तरम्।

118 'रमणीये खलु काल एतस्या लतापादप मिथुनस्य व्यतिकरः संवत्तः।' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

119 'यन्नवकुसुमयौवना वनज्योत्स्ना स्निग्धपल्लवतयोपभोगक्षमः सहकारः।' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।
नवकुसुमयौवना वनज्योत्स्ना स्निग्धपल्लवतयोपभोगक्षमः सहकारः।' इति पाठान्तरं 'B' इति प्रकाशने उपलभ्यते।

120 'वनज्योत्स्नाम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

121 'पश्यतीति' इति पाठान्तरं 'A' 'B' इति प्रकाशनयोः उपलभ्यते।
'पश्यति?' इति 'C' इति प्रकाशने पाठान्तरम्।

अतिमात्रम् अत्यन्तासक्त्या, प्रेक्षते पश्यति। इत्येतत् जानासि अवगच्छसि किमित्यर्थः॥

अनसूया - न खलु विभावयामि। कथय॥

अनसूयेति। अहं न विभावयामि खलु न जानामि खलु। खलुशब्दो जिज्ञासार्थकः। अतिमात्रदर्शनकारणमिति शेषः। कथय ब्रूहि॥

प्रियंवदा - यथा [122]वनज्योत्स्नानुरूपेण पादपेन सङ्गता अपि नाम एवमहमपि आत्मनोऽनुरूपं वरं लभेयेति॥

प्रियंवदेति। वनज्योत्स्नी अनुरूपेण स्वसदृशेन, पादपेन वृक्षेण। यथा येन प्रकारेण सङ्गता सम्बन्धं प्राप्ता, अहमपि एवम् अनेन प्रकारेण, आत्मनः स्वस्याः अनुरूपं योग्यं, वरं वल्लभं, लभेय प्राप्नुयामित्यतिमात्रं पश्यतीति पूर्वेण सम्बन्धः॥

शकुन्तला - एष नूनं तवात्मगतो मनोरथः[123] ॥ (इति कलशमावर्जयति)

एष इति॥ एष मनोरथः अयमनुकूलवरप्राप्तिरूपाभिलाषः। तव भवत्या। आत्मगतः मनोगतः। न तु ममेति भावः॥

राजा - अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्। अथवा कृतं सन्देहेन।

श्लो॥ असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥22॥

तथापि तत्त्वत [124]एवैनामुपलप्स्ये॥

---

122 'वनतोषिणी' इति 'A' इति प्रकाशने पाठान्तरम्

123 'एष ते आत्मनश्चित्तगतो मनोरथः तन्न ते वचनं श्रोष्यामि।' इति पाठान्तरं 'A' इति प्रकाशने उपलभ्यते।

124 'एनामुपलप्स्ये' इति पाठान्तरं 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

राजेति। कुलपतेः कण्वस्य। इयम् एषा शकुन्तला, असवर्णक्षेत्रसम्भवा असमानजातीयजायासम्भूता। नि॥ "क्षेत्रं पुरे गृहे देहे केदारे योनिभार्ययो"रिति वैजयन्ती। स्यादपि नाम भवेद्वा, एवं सन्दिह्य प्रमाणैर्निश्चिनोति। अथवेत्यादिना। अथवा यद्वा, सन्देहेन संशयेन, कृतं अलं सन्देहो न कर्तव्य इत्यर्थः। तदेवाह। असंशयमिति इयं क्षत्रपरग्रहक्षमा क्षत्रियस्वीकारयोग्या, असंशयं अत्रार्थे संशयो नास्ति, कुतः यद्यस्मात्कारणात्, आर्यं पूज्यं, निर्दोषमित्यर्थः। मे मम, मनश्चित्तं, अस्यां कुमार्याम्, अभिलाषि आसक्तं, तथा हि सतां सत्पुरषाणां, सन्देहपदेषु संशयास्पदेषु, वस्तुषु कार्येषु, विषये अन्तःकरणप्रवृत्तयः चेतोव्यापाराः, प्रमाणं निश्चायकं भवतीति शेषः, तस्माद्राजपरिग्रहणार्हेति पूर्वेण सम्बन्धः। तथापि संशयाभावेऽपि तत्त्वतः याथार्थ्येनैव, एनां शकुन्तलाम्, उपलप्स्ये ज्ञास्यामि॥

शकुन्तला - (ससम्भ्रमम्) [125]सखि! अहो सलिलसेकसम्भ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते। (इति भ्रमरबाधां नाटयति[126])

शकुन्तलेति। ससम्भ्रमम् सभयं यथा तथा। हे सखि! सलिलसेक-सम्भ्रमोद्गतः जलसेचनभयादुत्थितः, नवमालिकाम् उज्झित्वा त्यक्त्वा, मधुकरो द्विरेफः, मे मम, वदनं मुखम्, अभिवर्तते अनुसरति, एतेन वदनस्य नवमालिकाधिकसौरभ्यं व्यज्यते। इत्युक्त्वा भ्रमरबाधां नाटयत्यभिनयति॥

राजा - (सस्पृहं विलोक्य[127]) साधु बाधनमपि रमणीयमस्याः[128]।

---

125 'सखि! अहो' इत्यस्मिन् स्थाने 'अम्मो' इति पाठान्तरं 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

126 'रूपयति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

127 'सस्पृहम्' इत्येव पाठः 'B' इति प्रकाशने वर्तते।

128 'साधु ......' इत्येषः पाठः 'B' इति प्रकाशने नोपलभ्यते। अपि च 'साध्वसाराधनमपि रमणीयमस्याः' इति पाठान्तरमुपलभ्यते इति च निर्दिष्टं वर्तते।

[129]श्लो॥ यतो यतष्षट्चरणोऽभिवर्तते
ततस्ततः प्रेरितलोललोचना।
विवर्तित भ्रूरियमद्य शिक्षते
भयादकामापि हि दृष्टिविभ्रमम्॥23॥

अपि च। (सासूयमिव)

श्लो॥ [130]चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु [131]कर्णान्तिकचरः।
करं[132] व्याधून्वन्त्याःपिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती॥24॥

राजेति राजा दुष्यन्तः, सस्पृहं साभिलाषं यथा तथा विलोक्य वीक्ष्य, शकुन्तलामिति शेषः। अस्याश्शकुन्तलायाः बाधनं पीडनमपि, रमणीयम् अति मनोहरं, साधुयुक्तं च, तदेवोपपादयति। यत इति। षट्चरणो भृङ्गः। नि॥ "द्विरेफ पुष्पलिड्भृङ्ग षट्पदभ्रमरालय" इत्यमरः। यतो यतः यस्मिन्यस्मिन् देशे अभिवर्तते सञ्चरति। ततस्ततः तत्र तत्र, प्रेरितलोललोचना प्रसारितचञ्चलनेत्री सती, विवर्तितभ्रूः विवलितभ्रूः, इयं शकुन्तला, अकामां तादृशेच्छारहितापि, भयात् अलिभीत्या, दृष्टिविभ्रमं वीक्षणविलासम्, अद्यास्मिन्काले, शिक्षते अभ्यस्यति॥ सासूयं सेर्ष्यमिव पुनः प्राह चलापाङ्गामिति॥ चलापाङ्गां कम्पितनेत्रां, तं यथा तथा। दृष्टो वीक्षितस्सन्। वेपथुमतीं कम्पवतीं, एनां बहुशः वारं वारं, स्पृशसि स्पर्शनं करोषि। रहस्याख्यायी रहस्यं कथयन्निव, कर्णान्तिकचरः श्रोत्रसमीपवर्ती

129 श्लोकोऽयं 'A' 'B' इति प्रकाशनयोः नोपलभ्यते। 'B' इति प्रकाशने पाठान्तरत्वेनोपलभ्यते इति निर्दिष्टम्।

130 'चलापाङ्गम्' इति पाठान्तरमुपलभ्यते इति 'A' 'B' इति प्रकाशनयोः निर्दिष्टम्।

131 'कर्णे' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

132 'करौ' इति 'B' इति प्रकाशने पाठान्तरम्।

सन्, मृदुललितं यथा तथा स्वनसि ध्वनिं करोषि। करौ हस्तौ व्याधून्वन्त्याः कम्पयन्त्याः, अस्याः रतिसर्वस्वं सुरतसारांशमिति यावत्। अधरम् अधरोष्ठं, पिबसि चुम्बसि। हे मधुकर! भ्रमर, तत्वान्वेषात् याथार्थ्यपरिशीलनात्, वयं हता वञ्चिताः, त्वं कृती धन्यः खलु। अभिमतलाभादिति भावः॥

शकुन्तला - [133]न एष धृष्टो विरमति। अन्यतो गमिष्यामि। [134](पदान्तरे स्थित्वा स दृष्टिक्षेपम्) कथमितोऽप्यागच्छति। हला परित्रायध्वं[135] परित्रायध्वं[136] मामनेन दुर्विनीतेन दुष्टमधुकरेणाभिभूयमानाम्॥

शकुन्तलेति आहेति शेषः। एष धृष्टः प्रगल्भः मधुकरः, न विरमति न त्यजति, अन्यतः इतरत्र, गमिष्यामि यास्यामि। इत्युक्त्वा पदान्तरे अन्यस्थाने, स्थित्वा निविश्य, सदृष्टिक्षेपं दृक्प्रसारणसहितं यथा तथा। इतः अत्रापि आगच्छति आपतति। कथं को वा उपायो भवेत्। हला हे सख्यौ! माम् अनेन पुरोदृश्यमानेन, दुष्टमधुकरेण क्रूरभ्रमरेण, अभिभूयमानां तिरस्क्रियमाणां, परित्रायध्वं परित्रायध्वं रक्षत रक्षत॥

उभे - (सस्मितम्) [137]के आवां परित्रातुम्। दुष्यन्तमाक्रन्द। राजरक्षितानि[138] तपोवनानि नाम॥

उभे इति। उभे अनसूयाप्रियंवदे, सस्मितं सोपहासम्, आवां परित्रातुं रक्षितुं, त्वामिति शेषः। के असमर्थे इत्यर्थः। दुष्यन्तं नाम राजानम्, आक्रन्द आह्वानं कुरु। तपोवनानि आश्रमाः राजरक्षितानि भूपालपालितानि हि॥

---

133 'न एष ..... आगच्छति' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

134 (पदान्तरे....क्षेपम्) इति पाठः 'B' 'C' इति प्रकाशनयोः नोपलभ्यते।

135 'परित्रायेथाम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

136 परित्रायध्वमिति द्विवारं पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

137 'का वयम्' इति 'A' इति प्रकाशने पाठान्तरम्

138 'राज रक्षितव्यानि' इति 'A' इति प्रकाशने पाठान्तरम्

राजा - [139]अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यम्[140]। (इत्यर्धोक्ते स्वगतम्) [141]राजभावस्त्वभिज्ञातो भवेत्। भवतु। एवं तावदभिधास्ये॥

राजेति। आत्मानं मां प्रकाशयितुं दर्शयितुं, अयमवसरः एष एव समयः इति मनसि निश्चित्य आह न भेतव्यमिति न भेतव्यं भयं न कार्यं भवतीभिरिति शेषः। राजभावः मम राजत्वं अभिज्ञातः विदितः भवेत्। भवतु विदितोऽस्तु। एवं वक्ष्यमाणप्रकारेण, अभिधास्ये प्रच्छाद्य वक्ष्यामीत्यर्थः॥

शकुन्तला - (पदान्तरे स्थित्वा[142]) कथमितोऽपि मामनुसरति॥[143]

शकुन्तलेति। शकुन्तला पदान्तरे प्रदेशान्तरे, स्थित्वा उषित्वा, इतोऽपि अस्मिन्प्रदेशेऽपि, मामनुसरति अनुधावति। कथं को वा उपायो भवेत्॥

राजा - (सत्वरमुपसृत्य)

श्लो॥ कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु॥25॥

---

139 '(स्वगतम्) अवसरोऽयमात्मानं दर्शयितुम्। कः कोऽत्र भोः (इत्यर्थोक्ते विचार्य)' इति 'C' इति प्रकाशने पाठान्तरम्।

140 'न भेतव्यं न भेतव्यम्' इति 'A' 'B' इति प्रकाशने पाठान्तरम्

141 'एवं राजाहमिति परिज्ञानं भवेत्। भवतु अतिथिसमाचारमवलम्बिष्ये।' इति 'A' इति प्रकाशने पाठान्तरम्

'राजभावस्तावत्, एवं हि राजाहमस्मीति परिज्ञातं भविष्यति। भवतु। अतिथिसमाचारमेव समुचिताचारसत्कारम् अवलम्बिष्ये।' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

142 'पदान्तरे स्थित्वा। सदृष्टिक्षेपम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

143 'नैष दुष्टो विरमति, तस्मादन्यतो गमिष्यामि। कथमितोऽयमनुसरति?' इति पाठान्तरम् 'C' इति प्रकाशने उपलभ्यते।

(सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः)

राजेति। सत्वरं त्वरासहितं यथा तथा। उपसृत्य समीपं प्राप्य, क इति॥ दुर्विनीतानां दुष्टानां शासितरि नियामके, पौरवे पुरुवंशोत्पन्ने दुष्यन्ते, वसुमतीं भूमिं, शासति परिपालयति सति। अयं मधुकरः मुग्धासु अप्रगल्भासु तपस्विकन्यासु ऋषिकुमारीषु विषये अविनयम् अपराधम् आचरति करोति। राज्ञा इत्युक्ते सति सर्वाः शकुन्तलादयः राजानं भूपतिं, दृष्ट्वा वीक्ष्य, किञ्चिदीषदीव, सम्भ्रान्ताः सभयाः॥

अनसूया - आर्य! न खलु किमप्यत्याहितम्। इयं नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता। (इति शकुन्तलां दर्शयति॥)

अनसूयेति। हे आर्य! राजन्!, किमपि किञ्चिदपि, अत्याहितं महद्भयं, न खलु नास्ति हि। परन्तु इयं एषा, नौ आवयोः, प्रियसखी शकुन्तला, मधुकरेण षट्पदेन, अभिभूयमाना तिरस्क्रियमाणा, कातरीभूता भीता जाता। इत्युक्त्वा शकुन्तलां दर्शयति। राजेति शेषः। नि॥ "अधीरे कातरत्रस्नौ भीरुभीरुकभीलुकाः" इत्यमरः॥

राजा - (शकुन्तलाभिमुखो भूत्वा) अपि तपो वर्धते॥

राजेति। राजा प्राह। किमिति तपः मुनिव्रतं वर्धतेपि समेधते किम्॥

शकुन्तला - (साध्वसादवचना तिष्ठति)

एवं राज्ञा पृष्टे। शकुन्तला साध्वसाद्भयात्, अवचना निरुत्तरा सती, तिष्ठति तूष्णीं स्थितवती॥

अनसूया - इदानीमतिथिविशेषलाभेन। हला शकुन्तले! गच्छोटजम्। फलमिश्रमर्घ्यमुपहर। इदं पादोदकं भविष्यति॥

अनसूयेति॥ इदानीमद्य, अतिथिविशेषलाभेन उत्तमागन्तुकस्य भवतस्समागमेन, तपो वर्धत इति शेषः। हला सखि शकुन्तले। उटजं पर्णशालां, प्रति। नि॥ "पर्णशालोटजोस्त्रियाम्" इत्यमरः॥ गच्छ याहि, किमर्थमिति चेत्। फलमिश्रं फलयुक्तम्, अर्घ्यं पूजाविध्यर्थमुदकम्, उपहर आनय। इदम् अस्मत्करगतवृक्षसेचनकलशस्थितं जलं पादोदकं, पाद्यं भविष्यति॥

राजा - [144]भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्॥

राजेति। भवतीनां युष्माकं, सूनृतया सत्यप्रियया। नि॥ "सूनृतं प्रियेसत्य" इत्यमरः। गिरा वाक्येनैव, आतिथ्यम् अतिथिसत्कारः, कृतं रचितप्रायम्॥

प्रियंवदा - तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः॥

प्रियंवदेति। तेन कारणेन, अस्यां पुरोवर्तिन्यां, प्रच्छाय शीतलायां प्रकृष्टच्छायाप्रदेशशैत्यान्वितायां सप्तपर्णवेदिकायां कर्पूरकदलीवृक्षाधस्थित-वितर्दिकायाम्। नि॥ "स्वाद्वितर्दिस्तुवेदिका" इत्यमरः। आर्यः भवानित्यर्थः। उपविश्य निषण्णो भूत्वा, परिश्रमविनोदं पथिक्लेशापहारं, करोतु रचयत्विति प्रार्थनायां लोट्॥

राजा - [145]नूनं यूयमप्यनेन [146]कर्मणा परिश्रान्ताः॥

राजेति। अनेन कर्मणा वृक्षसेचनव्यापारेण, यूयं भवत्योऽपि, परिश्रान्ताः आयासिताः। नूनं निश्चयः। तस्माद्भवतीभिरप्युपवेशनीयमिति भावः॥

---

144 'भवतु' इत्यधिकः पाठः 'C' इति प्रकाशने पाठान्तरम्।

145 'ननु' इति 'A' इति प्रकाशने पाठान्तरम्
'ननु' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

146 'धर्मकर्मणा' इति 'A' इति प्रकाशने पाठान्तरम्

अनसूया - हला शकुन्तले! उचितं नः पर्युपासनमतिथीनाम्। [147]अत्रोपविशामः। (इति सर्वे उपविशन्ति)

अनसूयेति हला सखि शकुन्तले। अतिथीनाम् आगन्तुकानां, पर्युपासनं सेवनं, नोऽस्माकम्, उचितं न्याय्यम्। नि॥ "अभ्यस्तेप्युचितं न्याय्य" इति यादवः। अत्र वेदिकायाम् उपविशामः निषीदामः। इत्युक्त्वा सर्वे शकुन्तलादयो राजा चेत्यर्थः। उपविशन्ति निषीदन्ति॥

शकुन्तला - (आत्मगतम्) किं नु खल्विमं जनं[148] प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता॥

शकुन्तलेति। आत्मगतं स्वगतं, पर्यालोचयतीति शेषः। कथमिति चेत्। इमं राजानं प्रेक्ष्य वीक्ष्य, अहं तपोवनविरोधिनः आश्रमवनानर्हस्य, विकारस्य व्यतिरिक्तमानसव्यापारस्य गमनीया प्राप्या, संवृत्ता जातास्मि, किं नु खलु को वा हेतुर्भवेत्॥

राजा - (सर्वा विलोक्य) अहो [149]समवयोरूपरमणीयं भवतीनां सौहार्दम्[150] ॥

राजेति सर्वा विलोक्य समस्ताः प्रेक्ष्य। भवतीनां युष्माकं, सौहार्दं सुहृद्भावः। समवयोरूपरमणीयं तुल्येन वयसा, सौन्दर्येण मनोहरम्। अहो इत्याश्चर्ये समानानुरूपताया दुर्घटत्वादाश्चर्यम्॥

प्रियंवदा - (जानान्तिकम्) अनसूये! को नु खल्वेष चतुरगम्भीराकृतिर्मधुरम् [151]आलपन् [152]प्रभाववानिव लक्ष्यते॥

---

147 'तस्मादत्रोपविशामः।' इति 'C' इति प्रकाशने पाठान्तरम्।

148 'जनम्' इति पाठः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

149 'समान' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

150 'सौहार्दं भवतीनाम्।' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रियंवदेति । जनान्तिकम् आप्तजनसमीपे रहसीत्यर्थः। कथयतीति शेषः। किमिति। हे अनसूये! एषः अयं, चतुरगम्भीराकृतिः चातुर्यगाम्भीर्ययुक्ताकारः, मधुरं श्राव्यं यथा तथा। आलपन् आभाषमाणस्सन्, प्रभाववानिव प्रभुत्वविशिष्ट इव, लक्ष्यते दृश्यते। को नु खलु को वा स्यात्॥

अनसूया - सखि ममाप्यस्ति कौतूहलम्। [153]प्रक्ष्यामि तावदेनम्॥ (प्रकाशम्) आर्यस्य मधुरालापजनितो [154]विश्वासो मां मन्त्रयति[155]। कतम आर्येण राजर्षिवंशोऽलङ्क्रियते। कतमो वा विरहपर्युत्सुकजनः कृतो देशः। किन्निमत्तं वा सकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा [156]पदमुपनीतः॥

अनसूयेति। सखि। प्रियंवदे । ममापि। कौतूहलं अयं को वा भवेदिति परिज्ञानकौतुकम्। अस्ति विद्यते। एनं पुरुषं, तावत्साकल्येन, प्रक्ष्यामि प्रश्नं करिष्यामि॥ अथ सर्वश्राव्यं यथा तथा राजानं पृच्छति प्रकाशमित्यादि। प्रकाशं प्रकटम्। आहेति शेषः। आर्यस्य पूज्यस्य तव मधुरालापजनितः श्राव्यवचनसम्भूतः, विश्वासः विस्रम्भः, भयाभाव इति यावत्, मां मन्त्रयति प्रेरयति। आर्येण भवता कतमः को वा, राजर्षिवंशः राजर्षिकुलम्, अलङ्क्रियते प्रकाश्यते। भवान्कस्मिन्राजर्षिकुले जात इत्याशयः। कतमः को वा, देशः जनपदं, विरहपर्युत्सुकजनः विरहेण भवद्वियोगेन पर्युत्सुकजनः अत्युत्कण्ठितप्रजः। कृतः

151 'प्रियमालपन्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्

152 'प्रभुरिव दृश्यते ' इति 'C' इति प्रकाशने पाठान्तरम्।

153 'पृच्छामि' इति पाठान्तरम् इति 'B' इति प्रकाशने उपलभ्यते।

154 'विस्रम्भः' इति 'A' इति प्रकाशने पाठान्तरम्
'विश्रम्भो' इति पाठान्तरम् इति 'B' इति प्रकाशने उपलभ्यते।

155 'मन्त्रयते' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्
'मन्त्रापयति' इति 'C' इति प्रकाशने पाठान्तरम्।

156 'पात्रतामुपनीतः' इति 'C' इति प्रकाशने पाठान्तरम्।

रचितः। भवन्निवासदेशः को वा भवेदिति भावः। किन्निमित्तं केन हेतुना वा। सुकुमारतरः अत्यन्तसौकुमार्ययुक्तोऽपि आत्मा देहः। नि॥ “आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि” इति विश्वः। तपोवनगमनपरिश्रमस्य तपोवनयानहेतुकस्य प्रयासस्य, पदं स्थानम् उपनीतः प्रापितः, भवदागमनकारणं किमित्याशयः। अनेन वंशदेशागमनकारणानि पृष्टानीति वेदितव्यम्॥

शकुन्तला - (आत्मगतम्) हृदय! मा उत्ताम्य। एषा त्वया चिन्तितमनसूया मन्त्रयते॥

शकुन्तलेति आत्मगतं मनसीत्यर्थः। चिन्तयतीति शेषः। हे हृदय चित्तस्य सम्बोधनमिदं मा उत्ताम्य सन्देहग्लानिं मा गमः। एषा अनसूया, त्वया भवत्या चिन्तितम् आलोचितमर्थं मन्त्रयते पर्यालोचयति॥

राजा - (आत्मगतम्) कथमिदानीमात्मानं निवेदयामि। कथं [157]वात्मापहारं करोमि। भवतु। एवं तावदेनां वक्ष्ये। (प्रकाशम्) भवति। यः [158]पौरवेण राज्ञा धर्माधिकरे नियुक्तः [159]सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः॥

राजेति। आत्मगतं स्वगतं, सर्वाश्राव्यं यथा तथेति भावः। इदानीमद्य आत्मानं स्वं, कथं केन प्रकारेण, निवेदयामि ज्ञापयामि। कथं केन वा प्रकारेण आत्मापहारं स्वस्वरूपगोपनं करोमि करिष्यामि। वर्तमानसामीप्ये लट्। उभयत्रापि दोषसम्भवाच्चिन्ता युज्यते। भवतु यथा तथा वास्तु। एवं तावत् वक्ष्यमाणप्रकारेणैव एनां कन्यां, वक्ष्ये भाषिष्ये, प्रकाशं सर्वश्राव्यमित्यर्थः। तत्प्रकारमेवाह भवतीत्यादिना यः जनः, पौरवेण राज्ञा पुरुवंशोद्भवेन नृपेण, धर्माधिकारे

---

157 ‘वात्मनः परिहारम्’ इति ‘A’ इति प्रकाशने पाठान्तरम्

158 ‘पौरवेण नगरवर्मा’ इति ‘A’ इति प्रकाशने·पाठान्तरम्

159 ‘पुण्याश्रमदर्शनप्रङ्गेन’ इति ‘A’ इति प्रकाशने पाठान्तरम्
‘सोऽहमाश्रमिणमविघ्नक्रियोपलम्भाय’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

धर्मपरिपालनोद्योगे, नियुक्तः स्थापितः, सः एतादृशः अहम्, अविघ्नक्रियोपलम्भाय निर्विघ्नधर्मकार्यसिध्यर्थं मुनीनामिति शेषः। इदं भवदीयं धर्मारण्यं तपोवनम्, आयातः आगतोऽस्मि॥

अनसूया - सनाथा इदानीं धर्मचारिणः॥

अनसूयेति। इदानीमद्य धर्मचारिणः धर्माचरणशीलाः तापसा इत्यर्थः। सनाथः नाथवन्तः भवतेति शेषः॥

शकुन्तला - (शृङ्गारलज्जां नाटयति)

शकुन्तलेति। शृङ्गारलज्जाम् अनुरागव्यञ्जकरमणीयवदना वनगमनादि-व्रीडानुभावमभिनयति॥

सख्यौ - (उभयोराकारं विदित्वा जनान्तिकम्) हला शकुन्तले! यद्यत्राद्य तातस्सन्निहितो भवेत्॥

सख्याविति। उभयोश्शकुन्तलादुष्यन्तयोराकारमिङ्गितं, विदित्वा साकूतावलोकनादीन् सम्यक् ज्ञात्वा, जनान्तिकं रहसीत्यर्थः। आलपत इति शेषः। किमिति हलेत्यादि। सखि शकुन्तले। अद्य इदानीं अत्र प्रदेशे, तातः काश्यपः सन्निहितः समीपस्थः भवेद्यदि भवति चेत्, किं करोषीति भयोद्भावनम्॥

शकुन्तला - (सरोषम्[160]) ततः किं भवेत्॥

एवं सखीभ्यामुक्ते उत्तरमाह। शकुन्तलेति। सरोषं सकोपम्, मर्मोद्घटनादिति भावः। ततः तर्हि किं भवेत् किं करिष्यति॥

सख्यौ - इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति[161]॥

---

160 अयं पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

161 'इमं जीवितसर्वस्वेनाप्यतिथिं कृतार्थीकरिष्यति।' इति पाठः 'C' इति प्रकाशने वर्तते।

सख्याविति। प्रकारान्तरेण योजयित्वा ब्रूतः। इममित्यादि। तातस्सन्निहितश्चेत् इमं पुरोवर्तिनमतिथिविशेषं महाराजरूपं, जीवितसर्वस्वेनापि प्राणतुल्यप्रियतमवस्तुनापि, कृतार्थं कृतकृत्यं, सफलागमनमिति यावत् करिष्यति रचयिष्यति। तस्य जीवति सर्वस्वभूता त्वमेवेत्याशयः॥

शकुन्तला - युवामपेतम्॥ किमपि हृदये कृत्वा मन्त्रयेथे। न [162]वां वचनं श्रोष्यामि॥

शकुन्तलेति। हे सख्यौ युवां भवत्यौ, अपेतम् अपसरतं, किमपि किं वा, हृदये मनसि, कृत्वा आलोच्येत्यर्थः मन्त्रयेथे गुप्तं सम्भाषेथे। वां युवयोः, वचनं वाचं, न श्रोष्यामि न शृणोमि, न करिष्यामीत्यर्थः॥

राजा - वयमपि तावद्भवत्यौ[163] सखीगतं [164]किमपि पृच्छामः॥

राजेति। वयमपि तावदिदानीं भवत्यौ युवां, सखीगतं शकुन्तलाश्रितं किमपि जिज्ञासितं, पृच्छामः प्रश्नं कुर्मः। प्रच्छिधातुः द्विकर्मकः॥

सख्यौ - आर्य। अनुग्रह इवेयमभ्यर्थना॥

सख्याविति। हे आर्य! इयं भवत्कृता, अभ्यर्थना अस्मत्सखी विषया प्रार्थना, अनुग्रह इव स्थित इति शेषः॥

राजा - भगवान् काश्यपश्शाश्वते ब्रह्मणि वर्तते[165]। इयं च [166]वस्सखी तदात्मजेति कथमेतत्॥

---

162 'युवयोः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्

163 'भवत्योः' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्

164 'किञ्चित्' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्

165 'भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्राकाशः' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्

166 'वाम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

राजेति। प्रश्नप्रकारमाह भगवानिति भगवान् माहात्म्यवान्, नि॥ "भगश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वि"त्यमरः। शाश्वते नित्ये, ब्रह्मणि ब्रह्मचर्ये, वर्तते तिष्ठति। इयं पुरस्थिता, वः युष्माकं, सखी शकुन्तला, तदात्मजा कण्वपुत्री इत्येतत् वचनं, कथं केन प्रकारेण सम्भवतीत्यर्थः॥

अनसूया - श्रृणोत्वार्यः। अस्ति कोऽपि[167] कौशिक इति गोत्रनामधोयो महाप्रभावो राजर्षिः॥

अनसूयेति। आर्यः राजा, शृणोतु शृणुतां, कौशिक इति गोत्रनामधेयः गोत्रप्रयुक्तनामकः। महाप्रभावः अधिकप्रतापसम्पन्नः, राजर्षिः राजश्रेष्ठः, अस्ति विद्यते॥

राजा - अस्ति। श्रूयते॥

राजेति। अस्ति विद्यत इति श्रूयते श्रूयमाणो भवति॥

अनसूया - तं नौ[168] प्रियसख्याः प्रभवमवगच्छ। उज्झितायाश्शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता॥

अनसूयेति। तं कौशिकं। नौ आवयोः। प्रियसख्याः शकुन्तलायाः। प्रभवं जनकम्। अवगच्छ जानीहि। उज्झितायाः त्यक्तायाः तेनेति शेषः। शरीरसंवर्धनादिभिः। तातकाश्यपः कण्वमुनिः। अस्याः शकुन्तलायाः। पिता पातीति व्युत्पत्या पोषकः न तु जनक इति भावः॥

राजा - उज्झितशब्देन जनितं मे[169] कौतूहलम्। [170]आमूलाच्छ्रोतुमिच्छामि॥

---

167 'तत्र भवान् कौशिकः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

168 'आवयोः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्

169 'नः' इति 'A' इति प्रकाशने पाठान्तरम्

राजेति। उज्झितशब्देन तेनोज्झिताया इति पूर्ववाक्यस्थेनेत्यर्थः। मे मम। कौतूहलं जिज्ञासाभिलषितम्। जनितम् उत्पादितम्। अतः आमूलात् अस्या जननम् आरभ्य। श्रोतुं भवत्या इति शेषः। इच्छामि वाञ्छामि॥

अनसूया - श्रृणोत्वार्यः॥ गौतमीतीरे[171] पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी॥

अनसूयेति। आर्यः भवानित्यर्थः। शृणोतु एतद्वृत्तान्तमिति शेषः। पुरा पूर्वस्मिन्काले। किलेति कथाप्रसिद्धिद्योतकमव्ययम्। गौतमीतीरे गौतम्या गौतमाख्यमुन्यानीताया। गोदवर्या नद्यास्तीरे। उग्रे घोरे तपसि चान्द्रायणादिके वर्तमानस्य तिष्ठतः तपस्यत इत्यर्थः। तस्य प्रसिद्धस्य राजर्षेर्विश्वामित्रस्य। किमपि केन वा कारणेन। जातशङ्कैरुद्भूतभयैः। नि॥ "शङ्कावितर्कभययो"रित्यमरः। देवैरमरैः। मेनका नाम एतन्नाम्नी, अप्सराः स्वर्गवेश्या, यद्यपि अयं शब्दः अमरसिंहाभिधाने स्त्रियां बहुष्वप्सरस इति बहुवचनांतत्वेन अनुशिष्टः, तथापि तस्य प्रायिकाभिप्रायत्वन्नदोषः। तथा च प्रयोगः। मानिनः प्रियवधूरिव, रागादप्सराव्यथित पार्श्वमशून्यमिति। नियमविघ्नकारिणी समाधिप्रत्यूहहेतुस्पती, प्रेषिता गमिता॥

राजा - अस्त्येतदन्यसमाधिभीरुत्वं देवानाम्॥

राजेति देवानाम् सुराणाम्, एतत् एवं विधम्। अन्यसमाधिभीरुत्वं अन्येषामितरेषाम्, समाधिभ्यो नियमेभ्यः, भीरुत्वं भयशीलता, अस्ति विद्यते॥

अनसूया - ततो वसन्तावतारसमयेऽस्या[172] [173]उन्मादयितृकं रूपं प्रेक्ष्य। (इत्यर्धोक्ते लज्जया विरमति)

---

170 'तदामूला' इति 'A' इति प्रकाशने पाठान्तरम्

171 एषः शब्दः 'A' 'C' इति प्रकाशनयोः नोपलभ्यते

172 'वसन्तोदारसमये तस्या उन्मादयितृकं रूपं प्रेक्ष्य' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्

अनसूयेति। ततः मेनकागमनानन्तरम्, वसन्तावतार समये वसन्तर्तुप्रादुर्भावकाले। अस्या मेनकायाः, उन्मादयितृकं चित्तविभ्रान्तिजनकम्। नि॥ "उन्मादश्चित्तविभ्रम" इत्यमरः। उत्पूर्वकमदिधातोर्णिजन्तात्तृच् ततस्वार्थे क प्रत्ययः। रूपं सौन्दर्यम्, प्रेक्ष्य विलोक्य, इत्यनेन प्रकारेण। अर्धोक्ते अर्धस्य वाक्यार्धभागस्य उक्ते कथने सति, लज्जया अकार्यकथनजन्यव्रीडया, विरमति उपरमति, मौनमवलम्बितवतीत्यर्थः॥

राजा - परस्तादवगम्यत[174] एव। सर्वथाप्सरसस्सम्भवैषा॥

राजेति। परस्तादतःपरम्, अवगम्यते ज्ञायत एव तच्चरितमिति शेषः। सर्वथा सर्वप्रकारैः। सर्वशब्दात्प्रकारवचने थालिति थाल्प्रत्ययः। एषा शकुन्तला, अप्सरस्सम्भवा मेनकाप्रसूता भवतीति शेषः॥

अनसूया - अथ किम्॥

अनसूयेति। अथ किमित्यङ्गीकारे, एवमेवेत्यर्थः। नि॥ "अङ्गीकृतौ स्यादथ कि"मित्यमरः॥

राजा - उपपद्यते।

श्लो॥ [175]मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥26॥

राजेति। उपपद्ययते युज्यते, मानुषीष्विति। मानुषीषु मनुष्याङ्गनासु, अस्य लोकोत्तरस्य, रूपस्य सौन्दर्यस्य, कथं केन वा प्रकारेण, सम्भवः उत्पत्तिः, स्यात् भवेतदित्याक्षेपे, न भवेदेवेत्यर्थः। एतद्दृष्टान्तेन विवृणोति। नेति। प्रभातरलं

---

173 'उन्मादयितृ' इति पाठान्तरम् इति 'B' इति प्रकाशने उपलभ्यते।

174 'परस्तात् ज्ञायत एव' इति 'A' इति प्रकाशने पाठान्तरम्
'पुरस्तात् मन्यते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

175 'मानुषीभ्यः कथं नु स्यादस्य' इति 'A' इति प्रकाशने पाठान्तरम्

प्रभया कान्त्या, तरलं चञ्चलम्, नि॥ "चञ्चलं तरलं चैव पारिप्लव परिप्लव" इत्यमरः। ज्योतिः तेजः विद्युदित्यर्थः। वसुधातलाद्भूतलात्, नोदेति नोत्पद्यते, किन्तु मेघादेवेत्यर्थः। भूतलात्तडिदुत्पत्तिरिव मनुष्यस्त्रीष्वस्या उत्पत्तिरत्यन्तासम्भावितेति भावः॥

शकुन्तला- (अधोमुखी भूत्वा[176] तिष्ठति।)

शुकुन्तलेति। शकुन्तला अधोमुखी लज्जया अवनतवदना भूत्वा, तिष्ठति वर्तते। स्वसौन्दर्यवर्णनादित्याशयः॥

राजा - (आत्मगतम्) लब्धावकाशो मे मनोरथः। किन्तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं[177] मे मनः॥

राजेति। आत्मगतं स्वगतम्, अत्यन्ताश्राव्यमिति भावः। मे मम, मनोरथः मनोभिलाषः, लब्धावकाशः प्राप्तावसरः, किन्तु अपितु, सख्याः प्रियंवदायाः, परिहासोदाबृतां केल्युच्चारिताम्, वरप्रार्थनां वरविषयक याञ्चाम्, श्रुत्वा आकर्ण्य, मे मम, मनः स्वान्तं, धृतद्वैधीभावकातरं धृतः द्वैधीभावस्सन्देहो येन तत्तथोक्तम्, अत एव कातरं भयस्वभावं भवतीति शेषः॥

प्रियंवदा - (सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा) पुनरपि वक्तुकाम इवार्यः॥

प्रियंवदेति। सस्मितं सोपहासं, शकुन्तलां विलोक्य दृष्ट्वा नायकाभिमुखी दुष्यन्तराजस्य सम्मुखी भूत्वा प्राहेति शेषः। किमिति। आर्यः महाराजः, पुनः भूयः, वक्तुकामः सम्भाषणेच्छुरिव तिष्ठतीति शेषः॥

शकुन्तला - (सखीमङ्गुल्या तर्जयति।)

---

176 एषः शब्दः 'A' इति प्रकाशने नोपलभ्यते

177 'द्वैत' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शकुन्तलेति। शकुन्तला सखीं प्रियंवदाम्, अङ्गुल्या करशाखया, तत्रापि तर्जन्या, नि॥ "अङ्गुल्यः करशाखास्स्यु"रित्यमरः। तर्जयति भीषयति, तर्जननिमित्तम् आत्मनो व्रीडाजनकस्य जननवृत्तान्तस्य, पुनः पुनरुद्घाटनमिति ज्ञेयम्॥

राजा - सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम्॥

राजेति। भवत्या त्वया, सम्यक् सामीचीन्येन, उपलक्षितं तर्कितं, अधरस्पन्दनादि तन्नियतधर्मेणेत्याशयः। नः अस्माकं, सच्चरितश्रवणलोभात् साधुचरित्राकर्णनाभिलाषात्, अन्यत् इतरदपि, प्रष्टव्यम् पृच्छार्हं वाक्यम् अस्ति विद्यते॥

प्रियंवदा - अलं विचार्य। अनियन्त्रणानुयोगस्तपस्विजनो नाम॥

प्रियंवदेति। अलं विचार्य, अलमिति प्रतिषेधे। विचारो न कार्य इत्यर्थः। सू॥ 'अलं खल्वोः प्रतिषेधयोः प्राचांक्त्वे'ति त्वा प्रत्ययः। 'समासेऽनञ्पूर्वे क्त्वोल्यबि'ति ल्यबादेशः। तपस्विजनः मुनिजनः। अनियन्त्रणानुयोगो नाम असङ्कुचितप्रश्नो हि॥

राजा - [178]सखीं ते ज्ञातुमिच्छामि॥

श्लो॥ वैखानसं किमनया व्रतमाप्रदाना
द्व्यापाररोधि मदनस्य निषेवितव्यम्।
[179]अत्यन्तमात्म [180]सदृशेक्षणवल्लभाभिः
आहो [181]निवत्स्यति समं हरिणाङ्गनाभिः ॥27॥

---

178 'इति सखीं ते ज्ञातुमिच्छामि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्

179 'अत्यन्तमेव' इति 'A' इति प्रकाशने पाठान्तरम्

180 'मदिरेक्षण' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्

राजेति। ते तव, सखीं शकुन्तलां, ज्ञातुं अननुरूपमुनिकुमारकवराभिलाषिणी उत स्वानुरूपमहाराजादिवराभिलाषिणी वेति वेदितुमिच्छामि। तदेवाह वैखानसमित्यादि। अनया शकुन्तलया, आप्रदानात् कस्मैचित्पुरुषाय प्रतिसादनपर्यन्तम्, मदनस्य मन्मथस्य, व्यापाररोधि उपवनविहारादि प्रतिबन्धकम्। वैखानसं व्रतम् अतिदुष्करकर्मविशेषः। निषेवितव्यं कर्तव्यं किम्। अहो दर्शने। यासां ताभिरत एव वल्लभाभिः मनोज्ञाभिः। हरिणाङ्गनाभिः मृगीभिस्समम् अत्यन्तम्, निवत्स्यति स्थास्यति वा॥

प्रियंवदा - आर्य! धर्माचरणेऽपि परवशोऽयं जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः॥

प्रियंवदेति। हे आर्य गुरोः पुनः काश्यपस्य तु। अस्याश्शकुन्तलायाः। अनुरूपवरप्रदाने योग्यजामातृसमर्पणे, सङ्कल्पः अभिप्रायः॥

राजा - (आत्मगतम्) [182]न दुरवापेयं खलु प्रार्थना।

श्लो॥ भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्॥28॥

राजेति। आत्मगतं स्वगतम्, इयं प्रार्थना याञ्चा, न दुरवापा न दुर्लभा खलु सुलभैवेति भावः। भवेति। हे हृदय चेतः, साभिलाषं सकामं भव, सम्प्रति इदानीम्, सन्देहनिर्णयः संशयावनोदनं, जातः अभूत्। त्वं यद्वस्तु अग्निं वह्निम्, आशंकसे तर्कयसि, तत् प्रसिद्धम्, इदं परिदृश्यमानं वस्तु, स्पर्शक्षमं स्प्रष्टुमर्हं रत्नं जातमित्यनुषङ्गः। शकुन्तला परिग्राह्यैवेति मानसमाश्वासयतीति भावः॥

---

181 'नु वस्त्यति' इति 'C' इति प्रकाशने पाठान्तरम्।

182 'दुरवापेयं न खलु प्रार्थना (आत्मगम्)' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'दुरवापेयं खलु प्रार्थना (आत्मगतम्)' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तला - (सरोषमिव) अनसूये! अहं गमिष्यामि[183] ॥

शकुन्तलेति। शकुन्तला सरोषमिव सक्रोधमिव, वस्तुतस्तु स्वाभिलाषस्य तस्मिन् स्थितत्वात्, रोषो नास्तीति इव शब्देन व्यज्यते अहं गमिष्यामि यास्यामि॥

अनसूया - किन्निमित्तम् ॥

अनसूयेति। किन्निमित्तं को वा हेतुः, भवद्गमनस्येति शेषः॥

शकुन्तला - इमामसम्बद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै [184]निवेदयिष्यामि ॥

शकुन्तलेति। असम्बद्धप्रलापिनीम् अनर्हभाषिणीम्, इमां पुरोवर्तिनीं प्रियम्वदां नाम सखीम्, आर्यायै पूज्यायै गौतम्यै, निवेदयिष्यामि विज्ञापयिष्यामि॥

अनसूया - सखि! न युक्तं [185]तेऽकृतसत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम् ॥

अनसूयेति। हे सखि! शकुन्तले। ते तव, अकृतसत्कारम् अविहितातिथ्यम्, अतिथिविशेषम् उत्कृष्टागन्तुकं, विसृज्य त्यक्त्वा, स्वच्छन्दतः स्वेच्छातः, गमनं यानं, न युक्तं न साम्प्रतम् अनुचितमिति भावः॥

शकुन्तला - (न किञ्चिदुक्त्वा प्रस्थितैव)

---

183 'गमिष्याम्यहम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्
'गमिष्यामि तावदहम्' इति 'C' इति प्रकाशने पाठान्तरम्।

184 'निवेदयितुम्' इति 'C' इति प्रकाशने पाठान्तरम्।

185 'ते' इति पदं 'A' 'B' इति प्रकाशनयोः नोपलभ्यते
'अकृतसत्कारमतिथिविशेषमुज्झित्वाश्रमवासिनो जनस्य स्वच्छन्दतो गमनम्' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। शकुन्तला। किञ्चित्किमपि प्रतिवचनं नोक्त्वा न वदित्वा, प्रस्थिता गतैव॥

राजा - [186](ग्रहीतुमिच्छन्निगृह्यात्मानम्) अहो [187]चेष्टा प्रतिरूपिका कामिनो मनोवृत्तिः[188]। अहं हि।

श्लो ॥ [189]अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥29॥

राजेति। ग्रहीतुं धर्तुं, शकुन्तलामिति शेषः। इच्छन् अभिलष्यन्, आत्मानं चित्तं, निगृह्य निरुध्य, आहेति शेषः। किमिति। कामिनः कामुकस्य, मनोवृत्तिः चेतोव्यापारः, चेष्टाप्रतिरूपिका कायिकव्यापारानुगुणा भवति। अहो इत्याश्चर्ये। हि यस्मात्। अहमित्युत्तरेणान्वयः। अनुयास्यन्निति। मुनितनयां ऋषिपुत्रिकां, सहसा बलात्कारेण, अनुयास्यन् अनुसृत्य गमिष्यन्, विनयेन विनीतत्वेन, वारितप्रसरः प्रतिबद्धगमनव्यापारः, स्थानात् स्वाधिष्ठितप्रदेशात्, अनुच्चलन् अप्रस्थितस्सन्नपि, गत्वा यात्वा, प्रतिनिवृत्तः परावृत्त इव स्थितः॥

प्रियंवदा - (शकुन्तलां निरुध्य[190]) हला न ते युक्तं गन्तुम्॥

प्रियंवदेति। प्रियंवदा शकुन्तलां गच्छन्तीमितिशेषः। निरुध्य प्रतिबध्य, हला सखि, गन्तुं प्रयातुं, ते तव, न युक्तं नोचितम्॥

---

186 '(आत्मगतम्) आः कथं गच्छति' इति 'A' 'B' 'C' इति प्रकाशनेषु अधिकः पाठः उपलभ्यते।

187 'चेष्टापि मनोवृत्तिरूपा' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

188 'कामिजनमनोवृत्तिः' इति 'B' इति प्रकाशने पाठान्तरम्।
'काममिनः प्रवृत्तिः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

189 'स्थानादचलन्नपि' इति 'A' इति प्रकाशने पाठान्तरम्

190 'उपरध्य', 'उपसृत्य' इति पाठान्तराणि उपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शकुन्तला - (सभ्रूभङ्गम्) किन्निमित्तम्॥

शकुन्तलेति। सभ्रूभङ्गं भृकुटियुक्तम्। किन्निमित्तम्, अनौचित्ये को हेतुरित्यर्थः॥

प्रियंवदा - वृक्षसेचने [191]धारयसि मे। एहि तावदात्मानं मोचयित्वा ततो गमिष्यसि। (इति बलादेनां निवर्तयति)

प्रियंवदेति। वृक्षसेचने पादपजलप्रदानकर्मणि, मे मह्यं, धारयसि ऋणग्रस्तासि, एहि आगच्छ, तावदिदानीम् आत्मानं स्वां, मोचयित्वा अनृणां कृत्वा, ततः ऋणविमोचनानन्तरं, गमिष्यसि यास्यसि, इत्युक्त्वा बलात् बलात्कारेण, निवर्तयति आगमयति॥

राजा - भद्रे! वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये। तथा ह्यस्याः।

श्लो। स्रस्तान्सावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं[192] कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि[193] चैकहस्तयमिताः पर्याकुला मूर्धजाः॥30॥

तदहमेनामनृणां करोमि। (इत्यङ्गुलीयं दातुमिच्छति)॥

राजेति॥ हे भद्रे प्रियंवदे! वृक्षसेचनात् पादपार्द्रीकरणादेव, अत्रभवतीं पूज्यां शकुन्तलां, नि॥ "त्रिषु तत्र भवान्पूज्यस्तथैवात्रभवानपि" इति विश्वप्रकाशः॥ परिश्रान्तां श्रमवतीं, लक्षये तर्कयामि, तथाहि तदेवोपपादयति

---

191 'ते' इति 'A' इति प्रकाशने अधिकः पाठः उपलभ्यते।
'द्वे' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

192 'स्रस्त–' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

193 'ध्वंसनि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अस्या इत्यादिना। अस्याश्शकुन्तलायाः, बाहू भूजौ, स्रस्तांसौ सन्नतस्कन्धदेशौ, घटोत्क्षेपणात् वारिपूरितकलशोन्नमनात् हेतोः, अतिमात्रलोहिततलौ अतिशयेन रक्तप्रदेशौ, अद्यापि वृक्षसेचने निवृत्तेऽपि, प्रमाणाधिकः परिमाणातीतः, श्वासः प्राणवायुप्रसरः, स्तनवेपथुं वक्षोजकम्पं, जनयति उत्पादयति, घर्माम्भसां स्वेदबिन्दूनां, जालकं समूहः, वदने मुखे, कर्णशिरीषरोधि- श्रवणभूषणीभूतशिरीषपुष्पप्रतिबन्धकं सत्॥ बद्धं लग्नं, बन्धे केशपाशे, स्रंसिनि शिथिले सति, मूर्धजाः शिरोरुहाः, पर्याकुलाः इतस्ततः प्रसृतास्सन्तः, एकहस्तयमिताः एकेन हस्तेन बद्धाः, अन्यहस्तस्य घटावलम्बनत्वादितिभावः। तत्तस्मात्, अहम् एनां भवत्सखीम्, अनृणाम् ऋणविमुक्ताम्, करोमीत्युक्त्वा अङ्गुलीयकम् अङ्गुल्याभरणं, दातुं वितरितुम् इच्छति स्पृहयति॥

उभे - (नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः)

उभे इति। उभे अनसूयाप्रियंवदे । नाममुद्राक्षराणि नाम्नो दुष्यन्तेति नामधेयस्य, मुद्रा चिह्नं, तस्याः अक्षराणि ज्ञापकवर्णान्, अनुवाच्य पठित्वा, परस्परमन्योऽन्यम्, अवलोकयतः पश्यतः, अयं राजा किमित्यभिप्रायेणेति भावः॥

राजा - अलमस्मानन्यथा सम्भाव्य। राज्ञः [194]प्रतिग्रहोऽयमिति [195]राजपुरुषं मामवगच्छथ॥

राजेति। अस्मान् अन्यथा सम्भाव्य राजेति मत्वा, अलं राजसम्भावना न कार्येत्यर्थः। अयं राज्ञः प्रतिग्रहः राजसम्बन्धी कश्चन पुरुषः, इत्यनेन प्रकारेण, माम् अवगच्छथ जानीथ, न त्वहं राजेत्याशयः॥

---

194 'परिग्रहोऽयमिति' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

195 'राज... गच्छत' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

प्रियंवदा - तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलीवियोगमार्यस्य वचनेनानृणेदानीमेषा। (किञ्चिद्विहस्य) हला शकुन्तले! मोचितास्यनुकम्पिनार्येण अथवा महाराजेन। गच्छेदानीम्॥

प्रियंवदेति। तेन हेतुना, एतद्भवद्दत्तम् अङ्गुलीयकम्, आर्यस्य तव अङ्गुलीवियोगं करशाखाविरहं नार्हीति हि, वचनेन भवद्वाक्येनैव, एषा इदानीमद्य अनृणा, इत्युक्त्वा, किञ्चिद्विहस्य मन्दं हसित्वा, सखि शकुतले, अनुकम्पिना दयालुना, आर्येणाथवा महाराजेनेत्यनेन राज्ञाच्छादितोऽपि राजभावः आभ्यां ज्ञात इति बोध्यम्॥

शकुन्तला - (आत्मगतम्) यद्यात्मनः प्रभविष्यामि। (प्रकाशम्) का त्वं विस्रष्टव्यस्य वा रोद्धव्यस्य वा?

शकुन्तलेति। आत्मगतं मनोगतम्, आत्मनः स्वस्याः, प्रभविष्यामि यदि स्वतन्त्रा भविष्यामि चेत्, प्रत्युपकर्तुं शक्यमिति भावः। किन्तु काश्यपाधीनेत्यर्थः॥ प्रकाशं सर्वश्राव्यं यथा तथा, विस्रष्टव्यस्य विसर्जनस्य वा, रोद्धव्यस्य निरोधनस्य वा, त्वं का न कापीत्यर्थः। उभयत्रापि भावे तव्यप्रत्ययः॥

राजा - (शकुन्तलां विलोक्य। आत्मगतम्) किं नु खलु यथा वयमस्यामेवमियमप्यस्मान् प्रति स्यात्। अथवा लब्धावकाशा मे प्रार्थना। कुतः।

श्लो॥ वाचं न मिश्रयति यद्यपि मे[196] वचोभिः
कर्णं [197]ददात्यभिमुखं मयि भाषमाणे।
कामं न तिष्ठति मदाननसम्मुखी सा[198]

---

[196] 'मद्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम् उपलभ्यते।

[197] 'ददात्यवहिता' इति 'A' इति प्रकाशने पाठान्तरम् उपलभ्यते।

भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥31॥

राजेत्यादि। राजा दुष्यन्तः, शकुन्तलां विलोकयन्, तस्याः चेष्टाः पश्यन्निति यावत्। आत्मगतं स्वगतं, वयम् अस्यां शकुन्तलायां यथा अनुरागसहिता भवामः, एवमनेन प्रकारेण, अस्मान्प्रति इयं शकुन्तलापि स्यात्किन्नु खलु भवेद्वेति सम्भावनायां लिङ्। एवं सन्दिह्य, वक्ष्यमाणचिह्नैः तस्याः स्वस्मिन्ननुरागं निश्चिनोति, अथवेत्यादिना, अथवा पक्षान्तरे, मे मम, प्रार्थना अभिलाषः, लब्धावकाशा प्राप्तावसरा सफलेति भावः। तथा हि। वाचमिति। अभिमुखे सम्मुखे, मयि भाषमाणे वदति सति, मे मम, वचोभिः वचनैः, वाचं स्वकीयामुक्तिम्, यद्यपि विचार्यमाणे न मिश्रयति न बन्धयति, तथापि वाङ्मिश्रणाभावेऽपि, कर्णं श्रोत्रं, ददाति प्रसारयति मद्वचनेष्विति शेषः। सा शकुन्तला, कामं यद्यपि, मदाननसम्मुखी मन्मुखाभिमुखी न तिष्ठति न निवसति, तथापि अस्याः शकुन्तलायाः, दृष्टिः आलोकनन्तु, भूयिष्ठमत्यन्तम्, अन्यविषया इतरत्र व्यावृता न भवति, मामेव साभिलाषं पश्यतीति भावः॥

(नेपथ्ये[199]) भो भो स्तपस्विनस्सन्निहितास्तपोवनसत्त्वरक्षायै भवत।

प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः।

श्लो॥ तुरगखुरहतस्तथा हि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु।

पतति परिणतारुणप्रकाशश्शलभसमूह इवाश्रमद्रुमेषु॥32॥

अपि च।

---

198 'सम्मुखीना' इति अपि च 'सम्मुखीयम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम् उपलभ्यते।

199 'आकाशे' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

श्लो ॥ तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः [200]
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः ।[201]
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं [202]प्रविशति गजस्स्यन्दनालोकभीतः ॥33॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, वदन्तीति शेषः, एवमुत्तरत्राप्यूह्यम्, किमिति। सन्निहिताः समीपावस्थिताः, भो भोस्तपस्विनः, अत्र ससम्भ्रम् आह्वाने द्विरुक्तिः। तपोवनसत्वरक्षायै आश्रमस्थित मृगादिजन्तुपरित्राणाय, भवेत् स्यात्। कुतः मृगयाविहारी आखेटविहरणशीलः, पार्थिवः पृथिवीपतिः दुष्यन्तः, प्रत्यासन्नः समीपं प्राप्तः, किल किलेति वार्तायाम्। तदेवाह तुरगेत्यादि। तथाहि। तुरगखुरहतः अश्वशफोक्षिप्तविरेणुः परागः, विटपविषक्तजलार्द्रवल्कलेषु विटपेषु शाखासु सुविषक्तास्सम्बद्धाः जलेनार्द्रास्सिक्ताः ये वल्कलास्तेषु, परिणतारुणप्रकाशः आस्तङ्गतसूर्यसदृशकान्तिः, अत एव शलभसमूहः पतङ्गसन्दोह इव, आश्रमद्रुमेषु तपोवनवृक्षेषु, पतति प्रसरति, एतेन सायंकालो व्यज्यते, अपि च किं च। तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः तीव्राघातेन गाढहननेन प्रतिहतः ध्वस्तः तरुस्कन्धः वृक्षप्रकाण्डः, तेन लग्नः संसक्तः, एको दन्तो यस्य सः। पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः पादैराकृष्टा आनीताः ये व्रततिवलयाः लतावेल्लनानि, तेषामासङ्गेन सम्बन्धेन, सञ्जातपाशः सम्भूतबन्धः, भिन्नसारङ्गयूथः भिन्नः भेदं प्राप्तः सारङ्गयूथो गजसमूहो येन सः, स्यन्दनालोकभीतः रथदर्शनत्रस्तः, गजः, नः अस्माकम्, तपसः मूर्तो मूर्तिमान्, विघ्नः प्रत्यूह इव, धर्मारण्यं तपोवनम्, प्रविशति अधितिष्ठति, तस्मात् यूयम् अवहिता भवतेति मुनीनामाह्वानं प्रवर्तते॥

---

200 'स्कन्धमग्नैः' इति, 'तीव्राघातादभिमुखतरुस्कन्धभग्नैकदन्तः' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

201 'सज्जनाज्जात' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

202 'व्रजति च' इति 'C' इति प्रकाशने पाठान्तरम्।

सर्वाः - (कर्णं दत्वा किञ्चिदिव सम्भ्रान्ताः)

स्पष्टम्॥

राजा - (आत्मगतम्) अहो धिक् पौरा[203] अस्मदन्वेषिणः तपोवनमुपरुन्धन्ति। भवतु। प्रतिगमिष्यामस्तावत्॥

राजेति। आत्मगतं स्वगतम्, अहो अस्मदन्वेषिणः मन्मार्गणशीलाः, पौरास्सैनिकाः, तपोवनं धर्मारण्यम्, उपरुन्धन्ति पीडयन्ति, धिगिति निन्दायाम्॥ भवतु तावदिदानीं प्रतिगमिष्यामः सैनिकान् समागच्छामः॥

सख्यौ - आर्य! अनेनारण्यकवृत्तान्तेन पर्याकुलास्स्मः। अनुजानीहि नः उटजगमनस्य॥

सख्याविति। सख्यौ प्राहतुरिति शेषः। किमिति हे आर्य! अनेन श्रूयमाणेन आरण्यकस्य गजस्य वृत्तान्तेन, पर्याकुलाः भीताः स्मः भवामः, अतः नः अस्माकम्, उटजगमनाय पर्णशालां गन्तुम्, अनुजानीहि अनुज्ञां देहि॥

राजा - (ससम्भ्रमम्) गच्छन्तु भवत्यः। वयमप्याश्रमपीडा यथा न [204]भविष्यति तथा प्रयतिष्यामहे॥ [205]

राजेति। भवत्यो यूयं, गच्छन्तु यान्तु, वयमपि आश्रमपीडा यथा येन प्रकारेण, न भविष्यति तथा तेन प्रकारेण, प्रयतिष्यामहे प्रयत्नं करिष्यामः, सर्वे उत्तिष्ठन्ति। सर्वे राजादयः, उत्तिष्ठन्ति उन्नमन्ति॥

सख्यौ - आर्य! असम्भावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जामहे आर्यं विज्ञापयितुम्॥

---

203 'सैनिका' इति 'A' 'B' 'C' इति प्रकाशनयेषु पाठान्तरम् उपलभ्यते।

204 'भवति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम् उपलभ्यते।

205 '(सर्वे उत्तिष्ठन्ति)' इति 'A' 'B' 'C' इति प्रकाशनयेषु पाठान्तरम् उपलभ्यते।

सख्याविति। हे आर्य! असम्भावितातिथिसत्कारम् अकृतातिथ्यम् आर्यं, भूयः पुनरपि, प्रेक्षणनिमित्तं विज्ञापयितुं, लज्जामहे व्रीडामहे॥

राजा - मा मैवम्। दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि॥

राजेति। राजा ममैवम्, एवं मा वदत, भवतीनां युष्माकम्, दर्शनेनैव पुरस्कृतोऽस्मि, नि॥ "पुरस्कृतः पूजितेरात्यभियुक्तेऽग्रतः कृत" इत्यमरः॥

शकुन्तला - [206]अनसूये। अभिनवकुशसूच्या परिक्षतं मे चरणम्। कुरवकशाखापरिलग्नं च वल्कलम्। तावत्परिपालयतं माम्। यावदेतान्मोचयामि। (इति राजानमेवावलोकयन्ती[207] सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता॥

शकुन्तलेति। अनसूये, मे चरणम् अभिनवकुशसूच्या नूतनदर्भाग्रेण, परिक्षतं व्रणितं, वल्कलं च कुरवकशाखापरिलग्नं कुरवकवृक्षशाखायां संसक्तं, मां तावत् परिपालयतं प्रतीक्षेताम्, एतान्कुशादीन् यावन्मोचयामि इत्युक्त्वा, राजानमेव अवलोकयन्ती पश्यन्ती, सव्याजं सकपटं, विलम्ब्य सखीभ्यां सह निष्क्रान्ता निर्गता॥

राजा – मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयात्रिकान्समेत्य नातिदूरे[208] तपोवनस्य निवेशयामि[209]। न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम्। मम हि।

---

[206] शकुन्तलायाः वाक्यमिदं इति 'C' इति प्रकाशने नोपलभ्यते। (सव्याजं....निष्क्रान्ता) इत्येवोपलभ्यते।

[207] 'राजानमवलोकयन्ती' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम् उपलभ्यते।

[208] 'दूरेण' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[209] 'निवेशयेयम्' इति 'B' इति प्रकाशने पाठान्तरम्।

श्लो ॥ गच्छति पुरश्शरीरं धावति पश्चादसंस्तुतं[210] चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥34॥

राजेति। नगरगमनं पुरयानं प्रति, मन्दौत्सुक्यः क्षीणोत्कण्ठोऽस्मि, अनुयात्रिकान् सैनिकान्, समेत्य मिलित्वा, तपोवनस्य नातिदूरे समीपे, यावन्निवेशयामि निवेशयिष्यामि, शकुन्तलाव्यापारात्, आत्मानं मां, निवर्तयितुं न शक्नोमि खलु, हि यस्मात्, मम शरीरं पुरो गच्छति सेनां प्रत्यग्रे गच्छति, चेतश्चित्तम्, पश्चात् शकुन्तलां प्रति, असंस्तुतमपरिचितमपि, धावति शीघ्रं गच्छति, अतः, प्रतिवातं वाताभिमुखं नीयमानस्य, केतोर्ध्वजस्य, चीनांशुकं पट्टाम्बरमिव स्थितमिति शेषः॥

(इति निष्क्रान्तास्सर्वे)

॥ इति प्रथमोऽङ्कः ॥

इति निष्क्रान्तास्सर्वे॥ प्रथमोऽङ्कः

इति श्रीमृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तलव्याख्याने पूर्णचन्द्रिकाख्याने प्रथमोऽङ्कः। जयत्वाचन्द्रतारकम्॥

210 'पश्चादसंस्थितम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम् उपलभ्यते।

अथ द्वितीयोऽङ्कः

शाकुन्तलनाटके – सव्याख्याने द्वितीयोङ्कः

(ततः प्रविशति विषण्णो विदूषकः)

विदूषकः - (निश्श्वस्य) भो दिष्टम्[1]। एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि[2]। अयं मृगः। अयं वराहः। अयं शार्दूल इति मध्याह्नेऽपि[3] [4]ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यतेऽटव्या अटवीम्[5]। [6]पत्रसङ्करकषायाणि [7]कटूनि गिरिनदी जलानि पीयन्ते। [8]अनियतवेलं शूल्यमांसभूयिष्ठ आहारोऽश्यते[9]। [10]तुरगानुधावनखण्डितसन्धे रात्रावपि निकामं

---

1 'भो हतोऽस्मि' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।
'भो दृष्टम्' इति 'B' इति प्रकाशने पाठान्तरम्।

2 'अस्मीति' इति एषः अधिकः पाठः 'A' 'C' इति प्रकाशनयोः न दृश्यते।

3 'मध्यन्दिनेऽपि' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

4 'ग्रीष्मे' इति असमस्तं पदं 'A' इति प्रकाशने पाठः उपलभ्यते।

5 'आहिण्ड्यते अटव्या अटवीम्' इत्यस्य स्थाने 'आहिण्ड्य' इति 'A' इति प्रकाशने, 'आहिण्ड्य अटवीतोऽटवी' इति 'B' इति प्रकाशने पाठः उपलभ्यते।

6 'पत्रसङ्करकषायविरसानि उष्णकटुकानि पीयन्ते गिरिनदीसलिलानि' इति 'A' इति प्रकाशने पाठान्तरम्।

7 'कदुष्णानि' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

8 'अनितवेलं च उष्णोष्णमांसभूयिष्ठं भुज्यते' इति 'A' इति प्रकाशने पाठान्तरम्।

9 'भुज्यते' इति 'B' इति प्रकाशने पाठान्तरम्।

10 'तुरगगजानां च शब्देन रात्रावपि मे नास्ति प्रकामशयितव्यम्' इति 'A' इति प्रकाशने, 'तुरगगानुधावनसङ्क्षुभित सन्धेर्मे रात्रिमपि निकामं शयितव्यं नास्ति।' इति 'C' इति प्रकाशने पाठान्तरम्।

शयितव्यं नास्ति। [11]ततो महत्येव प्रत्यूषे दास्याःपुत्रैः [12]शकुनिलुब्धकैः [13]वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि। [14]इयतेदानीमपि पीडा न निष्क्रामति। ततो गण्डस्योपरि [15]पिटका संवृत्ता। [16]ह्यः किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला नाम ममाधन्यतया दर्शिता। [17]साम्प्रतं नगरगमनाय मनः [18]कथमपि न करोति। [19]अद्यापि तस्य तामेव चिन्तयतोऽक्ष्णोः प्रभातमासीत् का गतिः। यावदेनं [20]कृताचारपरिकर्माणं प्रेक्षे। (इति परिक्रम्यावलोक्य च॥)

---

11 'ततो' इति पदमेतत् 'A' इति प्रकाशने न दृश्यते।

12 'शाकुनिकलुब्धैः' इति 'A' इति प्रकाशने, 'श्वगणलुब्धैः' इति 'C' इति प्रकाशने पाठान्तरम्।

13 'कर्णोपघातिना वनगमनकोलाहलेन' इति 'A' इति प्रकाशने पाठान्तरम्।

14 'एतावतापि मे पीडा न संवृत्ता यतः अयं गण्डस्य उपरि विस्फोटकः संवृत्तः' इति 'A' इति प्रकाशने, 'एतावत्यपि .....' इति 'C' इति प्रकाशने पाठान्तरम्।

15 'पिण्डकः' इति 'B' इति प्रकाशने पाठान्तरम्।

16 'तेन हि किल अस्मासु अवहीनेषु तत्र भवता मृगानुसारिणा आश्रमपदं प्रविष्टेन मम अधन्यतया शकुन्तला नाम कापि तपस्विकन्यका दृष्टा' इति 'A' इति प्रकाशने पाठान्तरम्।

17 'तां प्रेक्ष्य' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

18 'कथामपि' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

19 'एवमेव चिन्तयतः मे प्रभाता अक्ष्णोः रजनी। का गतिः यावदेनं कृताचारपरिग्रहं प्रियवयस्यं प्रेक्षे' इति 'A' इति प्रकाशने पाठान्तरम्।

20 'कृताचारपरिग्रहं प्रियवयस्यं प्रेक्षे' इति 'A' इति प्रकाशने, 'कृताचारपरिक्रमं पश्यामि' इति 'B' इति प्रकाशने, 'कृताचारपरिकर्माणं वयस्यं पश्यामि।' इति 'C' इति प्रकाशने पाठान्तराणि उपलभ्यन्ते।

कविरिदानीम् अन्यां कथामुपक्रममाणो वस्तुसङ्घटनार्थं वृत्तवर्तिष्यमाणार्थसूचनाय विदूषकं नामार्थोपक्षेपकं प्रस्तौति। ततः प्रविशतीत्यादिना।। ततः अनन्तरं, विदूषकः प्रविशति नेपथ्यान्निर्गच्छति। विदूषक इति। विदूषको नाम नायकपार्श्ववर्ती हास्यकारी कश्चन पुरुषः, निःश्वस्य निश्वासं कृत्वा, भो! दिष्ट हे! ईश्वरेति विचार्य, मृगयाशीलस्य आखेटव्यसनिनः, एतस्य राज्ञः दुष्यन्तस्य, वयस्यभावेन मित्रभावेन, निर्विण्णः दुःखितोऽस्मि, सुखेऽनुभवितव्ये तद्विपरीतं जातमिति यावत्, दुःखप्रकारमेवाह। अयं मृग इत्यादिना। अयं पुरोगतः, एवमग्रेऽपि। मृगः कुरङ्गः, अयं वराहः किटिः, अयं शार्दूलः व्याघ्रः, इत्येवं प्रकारेण, मध्याह्ने दिनमध्यभागेऽपि, तदानीमेवोदकपानार्थं मृगाणामागमनसम्भवादिति भावः। ग्रीष्मविरलपादपच्छायासु ग्रीष्मके विरलाः सूक्ष्माः पादपच्छायाः वृक्षाधस्थितानातपप्रदेशाः यासु तासु, वनराजीषु गहनपङ्क्तिषु, अटव्या अटवीं वनाद्वनम्, आहिण्ड्यते परिभ्राम्यते, ग्रीष्मेत्यनेन कालस्य अति सन्तापकरत्वं तत्रापि मध्याह्न इत्यनेन सञ्चारानर्हता सूच्यते। स्थलासौष्ठवमुक्त्वा जलासौष्ठवमाह। पत्रेति। पत्रसङ्करकषायाणि पर्णसङ्गकषायरसानि अत एव क्वचित्कटुरसानि, गिरिनदीजलानि पर्वतप्रवाहसलिलानि, सू। 'गिरिनद्यादीनां वा' इति विकल्पाण्णत्वाभावः। पीयन्ते पानं क्रियन्ते, अथ अभ्यवहारासौष्ठवमाह- अनियतेति। अनियतवेलम् अव्यवस्थितकालं यथा तथा। शूल्यमांसभूयिष्ठः शूलं पक्वपललबहुलः। आहारो भोजनम्, आश्यते भुज्यते, अथ निद्रासौख्याभावमाह - तुरगेति। तुरगानुधावनखण्डितसन्धेः - अश्वानुसरणविशीर्णसन्धिबन्धस्य, रात्रावपि रजन्यामपि, निकाममत्यन्तं, शयितव्यं निद्रेत्यर्थः, नास्ति न भवति। ततः अनन्तरं महति चिरावशिष्ट एव, प्रत्यूषे प्रातःकाले, नि।। "प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्यूषसी अपि" इत्यमरः। दास्याः पुत्रैः राजभटैरिति शेषः, सू।। 'षष्ठ्या अक्रोश' इत्यलुक्, शकुनिलुब्धकैः पक्षिग्राहकैश्च, वनग्रहणकोलाहलेन जालादिकं प्रसारयितुं, वनसीमाग्रहणकलकलेन प्रतिबोधितोऽस्मि निद्राभङ्ग

प्रापितोऽस्मि, इदानीमद्य इयता कलेनापि, पीडा बाधा न निष्क्रामति न निर्गच्छति, ततः तस्मात्कारणात्, गण्डस्य व्रणविशेषस्य, उपर्यूर्ध्वभागे, पिटका संवृत्ता व्रणान्तरमुत्पन्नमिति भावः। अत्र गण्डो मृगया पिटकाशकुन्तलादर्शनं, ह्यः किलास्मास्ववहीनेषु ह्यः गतदिने, अस्मासु मत्प्रभृतिजनेषु, अवहीनेषु अमिलितेषु सत्सु, मृगानुसारेण हरिणानुवृत्या, आश्रमपदं तपोवनभूमिं, प्रविष्टस्य प्राप्तस्य, तत्र भवतो राज्ञः शकुन्तलानामतापसकन्यका मुनिपुत्रिका, ममाधन्यतया भाग्यहैन्येन दर्शिता प्रेक्षिता, साम्प्रतम् इदानीम्, नगरगमनाय पुरं प्रतियानाय, मनःकथमपि मानसिकव्यापारमपि, न करोति न तनुते, का गतिः ममेति शेषः। कृताचारपरिकर्माणं विरचिताचारार्थालङ्कारम्। एनं राजानं, यावत्प्रेक्षे द्रक्ष्यामीति, परिक्रम्य किञ्चिद्गत्वा, अवलोक्य दृष्ट्वा च, आहेति शेषः।।

एष [21]बाणासनहस्ताभिर्यवनीभिर्वनपुष्पमालाधारिणीभिः परिवृत इत एवागच्छति प्रियवयस्यः। भवतु। अङ्गभङ्गविकल इव भूत्वा स्थास्यामि। यद्येवमपि नाम विश्रमं लभेय॥ (इति दण्डकाष्टमवलम्ब्य स्थितः॥)

किमिति एष इति। एष राजा बाणासनहस्ताभिः करस्थितचापाभिः, वनपुष्पमालाधारिणीभिः वनपुष्पमालिकाः कण्ठेधृतवतीभिः, यवनीभिः यवनाङ्गनाभिः, यवनाङ्गनानां राजनिकटे शस्त्रधारणमुक्तं शब्दार्णवे। "किरातीचामरधरायवनीशस्त्रधारिणी"ति। परिवृतस्सन् प्रियवयस्यः प्रियसखः। इतः इमं देशं, प्रत्येव आगच्छति समायाति, भवतु अस्तु, अहं अङ्गभङ्गविकलः अवयवलोपविरूपितो भूत्वेव। स्थास्यामि वर्तिष्ये, एवमपि यदि अनेन प्रकारेण विद्यमानश्चेत् विश्रमं विश्रान्तिं, लभेय नाम प्राप्नुयाम् इत्युक्त्वा, दण्डकाष्ठं दण्डहेतुकयष्टिविशेषम्, अवलम्ब्य आधारं कृत्वा, स्थितः अतिष्ठत्, अनेन वेषहास्यमुक्तम्।।

---

21 'बाणासनहस्तः हृदयनिहितप्रियजनः वनपुष्पमालाधारी इत एव आगच्छति प्रियवयस्यः' इति 'A' इति प्रकाशने पाठान्तरम्।

(ततः प्रविशति यथा निर्दिष्टपरिवारो[22] राजा)

तत इति। ततः अनन्तरं, राजा दुष्यन्तः, यथा निर्दिष्टपरिवारः विदूषकोद्दिष्ट परिवारसहितस्सन्। प्रविशति प्राप्नोति, रङ्गस्थलमिति शेषः।।

राजा - (आत्मगतम्)

श्लो ॥ कामं प्रिया न सुलभा मनस्तु [23]तद्भावदर्शनाश्वासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥1॥

(स्मितं कृत्वा) ॥ एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते[24]। [25]तद्यथा।

श्लो ॥ स्निग्धं वीक्षितमन्यतोऽपि नयने [26]यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा [27]इत्यवरुद्धया यदपि [28]सा सासूयमुक्ता सखी
सर्वं तत्किल मत्परायणमहो [29]कामी स्वतां पश्यति ॥2॥

राजेति। प्रिया स्वाभिलाषविषयभूता नायिका, कामं प्रायेण, न सुलभा सुखेनोपलब्धुमशक्या, एवं दुर्लभत्वज्ञानेऽपि। मनः मानसन्तु, तद्भावदर्शनाश्वासि तस्याभावदर्शनेन अभिलाषज्ञानेन अश्वासि विश्वासयुक्तं, मनसिजे मन्मथे,

---

22 'यथानिर्दिष्टः' इति 'A' इति प्रकाशने पाठान्तरम्।
23 'तद्भावदर्शनायासि' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरमुपलभ्यते।
24 'विप्रलभ्यते' इति 'A' इति प्रकाशने पाठान्तरम्।
25 'कुतः' इति 'A' इति प्रकाशने पाठान्तरम्।
26 'यत्प्रेषयन्त्या' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
27 'इत्युपरुद्धया' इति 'A' 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।
28 'तत्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
29 'कामः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरमुपलभ्यते इति निर्दिष्टम्।

अकृतार्थे आलिङ्गनादिभिरकृतकृत्येऽपि, उभयप्रार्थना नायिकानायकयोः परस्पराभिलाष एव, रतिं प्रीतिं कुरुते जनयतीत्यर्थः। स्मितंकृत्वा किञ्चिद्विहस्य, तदुक्तम्, "ईषद्विकसितैर्गन्धैः कटाक्षैस्सौष्ठवान्वितैः। अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत्" एवंम् उक्तप्रकारेण, प्रार्थयिता कामुकः, आत्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः, आत्मनः स्वस्य, अभिप्रायेण अभिलाषेण, सम्भाविता तर्किता, इष्टजनस्य प्रियजनस्य, चित्तवृत्तिः मनोव्यापारो येन तथाभूतस्सन्, विडम्ब्यते परिहास्यते, लोकैरिति शेषः। तद्यथेति उक्तमेवार्थं विशदयति। स्निग्धमिति। नयने नेत्रे, प्रेरयन्त्या प्रसारयन्त्या, तया नायिकया, यत्स्निग्धं वीक्षितं स्वानुरागप्रकाशकं, सुकुमारं प्रेक्षणम्, अन्यतः कृतमपि स्वीयत्वेनैव कामी पश्यतीत्युत्तरेणान्वयः। नितम्बयोः कटिपश्चाद्भागयोः, गुरुतया गौरवेण, यन्मन्दं गम्भीरं, यातं यानं च, तत् विलासात् विलसनादिव, सा सखी, मा गा इत्यवरुद्धया न गच्छेति प्रतिबद्धया तयेति शेषः। सासूयं स प्रणयकोपं, यदप्युक्ता अभिहिता, एतत्सर्वं मत्परायणं मद्विषयकं, किलेति सम्भावनायाम्, कामी कामुकः, सतां स्वकीयत्वं, पश्यति आलोचयतीत्यर्थः। वस्तुतस्तु शकुन्तलाव्यापाराणाम् अन्यविषयत्वेऽपि स्वकीयताभिमानो ममानुचित इत्याशयः।।

विदूषकः - (तथास्थित एव) भो वयस्य। [30]न मे हस्तौ प्रसरतः।

तद्वाचामात्रेण [31]जाप्यसे॥

विदूषक इति। भो वयस्य सखे, मे मम, हस्तौ करौ, न प्रसरतः न व्याप्नुतः, तत्तस्मात्, वाचामात्रेण भाषणेनैव, ज्ञाप्यसे बोध्यसे, इति तथा स्थित एव आहेति शेषः।।

---

30 'न मे हस्तपादं प्रसरति वाङ्मात्रेण जापयिष्यामि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

31 'वाङ्मात्रेण विजयी भव' इति 'C' इति प्रकाशने पाठान्तरम्।

'जयतु जयतु भवान्' इति 'B' इति प्रकाशने अधिकः पाठः।

राजा - [32]कुतोऽयं गात्रोपघातः॥

राजेति। अयं एषः, गात्रोपघातः अङ्गवैकल्यं, कुतः कस्मात्कारणात् जात इत्यध्याहारः।।

विदूषकः - कुतः किल स्वयमक्षिणी[33] आकुलीकृत्याश्रुकारणं पृच्छसि॥

विदूषक इति। कुतः किल कस्मात्किल, किलेत्यलीके, अजानन्निव हेतुं पृच्छिसीति भावः, एतदेव दृष्टान्तेन स्पष्टयति स्वयमेवेति। स्वयं भवानेव, अक्षिणी नेत्रे आकुलीकृत्य व्यथयित्वा, अश्रुकारणं बाष्पहेतुं, पृच्छसि प्रश्नं करोषि।।

राजा - न खल्ववगच्छामि। [34]भिन्नार्थमभिधीयताम्॥

राजेति। न खल्ववगच्छामि न जानाम्येव, भिन्नार्थं स्पष्टार्थं यथा तथा, अभिधीयताम् उच्यतां कारणमिति शेषः।।

विदूषकः - भो वयस्य। यद्वेतसः कुब्जलीलां विडम्बयति। तत्किमात्मनः प्रभावेन। ननु[35] नदीवेगस्य॥

विदूषक इति। भो वयस्य हे सखे, वेतसः वेतसवृक्षः, कुब्जलीलां वामनवेषं, विडम्बयत्यनुकरोतीति यत् तदनुकरणम्, आत्मनस्स्वस्य प्रभावेन सामर्थ्येन वा, नदीवेगस्य ननु प्रवाह वेगस्य वा भवतीति शेषः।।

राजा - नदीवेगस्तत्र कारणम्॥

राजेति। तत्र वामनीभावे, नदीवेगः प्रवाहवेगः कारणम्।।

---

32 '(सस्मितम्)' इति 'C' इति प्रकाशने अधिकः पाठः।

33 'स्वयमक्ष्याकुलीकृत्य' इति 'A' 'B' इति प्रकाशनयोः, 'स्वयमेव अक्षिणी...' इति 'C' इति प्रकाशने पाठान्तरम्।

34 'भिन्नार्थ...' इत्येषः पाठः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

35 'उत' इति 'C' इति प्रकाशने पाठान्तरम्।

विदूषकः - ममापि भवान्॥

विदूषक इति। ममापि अङ्गवैकल्ये भवान्कारणम्।।

राजा - कथमिव॥

राजेति। कथमिव केन प्रकारेण, मम कारणत्वमिति शेषः।।

विदूषकः - एवं राजकार्याण्युज्झित्वा [36]एतादृशे [37]अमानुषसञ्चाराकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यम्? यत्सत्यं, प्रत्यहं [38]श्वापदानुसरणैः संक्षोभितसन्धिबन्धानां मम गात्राणामनीशोऽस्मि संवृत्तः। [39]तत्प्रसादयिष्ये [40]विस्रष्टुं मामेकाहमपि तावद्विश्रमितुम्[41] ॥

विदूषक इति। एवं पूर्वोक्तप्रकारेण, राजकार्याणि प्रत्यहं राज्ञा कर्तव्यानि व्यवहारावलोकनादीनि, उज्झित्वा त्यक्त्वा, एतादृशे एवं विधे, अमानुषसञ्चारे मनुष्यप्रचाररहिते, अत एव आकुल प्रदेशे भयङ्करस्थले, त्वया वनचरवृत्तिना किरातव्यापारेण, भवितव्यं भाव्यं, प्रत्यहं दिने दिने, श्वापदानुसरणैः व्याघ्राद्यन्वेषणैः, संक्षोभितसन्धिबन्धानां पीडितास्थिग्रन्थीनां, मम गात्राणां अवयवानाम्, अनीशः अनियन्त असमर्थ इति यावत्, संवृत्तोऽस्मि निष्पन्नोऽस्मि, सत्यम् इदं सर्वं यथार्थमित्यर्थः, तत् तस्मात्, प्रसादयिष्ये अनुग्रहं जनयिष्ये।

---

36 'तादृशे' इति 'A' इति प्रकाशने पाठान्तरम्।

37 'आकुलप्रदेशे' इत्येव पाठः 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

38 'श्वापदसमुत्सारणैः' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

39 'तत्प्रसादयिष्यामि' इति 'A' इति प्रकाशने, 'तत्प्रसाद मे' इति 'B' इति प्रकाशने, 'तत्प्रसीदतु भवान्' इति 'C' इति प्रकाशने पाठान्तराणि उपलभ्यन्ते।।

40 'विसर्जितुम्' इति 'A' इति प्रकाशने, 'विसर्जयतु' इति 'C' इति प्रकाशने पाठान्तरम्। 'B' इति प्रकाशने तु एतत्पदं नोपलभ्यते।

41 'विश्राम्यताम्' इति 'C' इति प्रकाशने पाठान्तरम्।

किमर्थमित्यत आह। विस्रष्टुमिति। माम् एकाहमेकदिनमपि, विश्रमितुं विश्रमं प्राप्तुं, तावददिदानीं विस्रष्टुं परित्यक्तुम्।।

राजा - (आत्मगतम्)[42] अयं चैवमाह। ममापि [43]काश्यपसुतामनुस्मृत्य [44]मृगयाविक्लवं चेतः। कुतः।

श्लो॥ न नमयितुमधिज्यमस्मि शक्तो
धनुरिदमाहितसायकं मृगेषु।
सहवसतिमुपेत्य यैः प्रियायाः
कृत इव मुग्धविलोकितोपदेशः[45] ॥3॥

राजेति। आत्मगतं स्वगतम्, अयं विदूषकश्च एवं प्रकारेणाह- ममापि काश्यपसुतां शकुन्तलाम्, अनुस्मृत्य विचार्य, चेतः चित्तं, मृगया विक्लबं आखेटपराङ्गखं भवतीत्यध्याहारः, कुतः कस्मादितिचेत् नेति। मृगेषु हरिणेषु, आहितसायकं प्रतिसंहितबाणम्, इदं धनुः, आधिज्यम् अधिगतमौर्वीकं यथा तथा, नमयितुं प्रह्वीकर्तुं, शक्तः समर्थो नास्मि न भवामि, कुत इत्यत आह सहेति यैर्मृगैः। सहवसतिं सहावस्थानम्, उपेत्य प्राप्य, प्रियायाः शकुन्तलायाः, मुग्धविलोकितोपदेशः सविलासावलोकनबोधनं कृत इव।।

विदूषकः - (राज्ञो मुखं विलोक्य) अत्र भवान् किमपि हृदये कृत्वा मन्त्रयते। अरण्ये मया रुदितमासीत्॥

विदूषक इति।। अत्र विषये भवान् त्वं, किमपि यद्वा, हृदये मनसि, कृत्वा निक्षिप्य, मन्त्रयते आलोचयते, सू।। 'शेषे प्रथम' इति प्रथमपुरुषः, मया

---

42 'स्वगतम्' इति 'A' इति प्रकाशने पाठान्तरम्।

43 'कण्वसुतामनुस्मृत्य' इति 'A' इति प्रकाशने पाठान्तरम्।

44 'मृगयां प्रति निरुत्सुकं चेतः, तथा हि' इति 'A' इति प्रकाशने पाठान्तरम्।

45 'लोचनकान्तिसंविभागः' इति 'B' इति प्रकाशने पाठान्तरम्।

उक्तम् अरण्ये रुदितं रोदनम्, आसीत् अभवत्, मदुक्तस्य त्वया अनादृतत्वात् अरण्यरोदनप्रायं जातमित्याशयः।।

राजा - (सस्मितम्) किमन्यत्। अनतिक्रमणीयं मे सुहृद्वाक्यमिति स्थितोऽस्मि॥

राजेति। सस्मितं समन्दहासं, स्मितस्य कारणं तु विदूषकेन स्वाभिप्रायो ज्ञात इति। अन्यत् भवदभिप्रायनिर्वहणातिरिक्तं, किमस्ति न किमपीत्यर्थः, सुहृद्वाक्यं मित्रवचनम्, अनतिक्रमणीयम् अनुल्लङ्घ्यमिति स्थितोऽस्मि।।

विदूषकः - चिरञ्जीव। (इति गन्तुमिच्छति)

विदूषक इति। चिरञ्जीव मदनुज्ञा दानेन त्वं चिरकालं जीवतादित्याशीर्वादं कृत्वा, गन्तुं स्वस्थानं प्रति यातुम्, इच्छति काङ्क्षति।।

राजा - वयस्य! तिष्ठ। [46]शृणु सावशेषं मे वचः॥

राजेति। हे वयस्य सखे, तिष्ठ मा गमः, मे मम, वचः वाक्यं, सावशेषं किञ्चिदवशिष्टम् अतो न गन्तव्यमिति भावः।

विदूषकः - आज्ञापयतु भवान्॥

विदूषक इति। भवान् त्वम्, आज्ञापयतु नियुङ्क्ष्व।।

राजा - विश्रान्तेन भवता [47]ममाप्येतस्मिन्ननायासे कर्मणि सहायेन भवितव्यम्॥

राजेति। विश्रान्तेन निवृत्तश्रमेण, भवता त्वया, एतस्मिन् कस्मिंश्चित्, अनायासे प्रयासरहिते, कर्मणि कार्ये, मम सहायेन सहकारिणा भवितव्यं भाव्यम्।।

---

46 'शृणु' इति पदमिदं 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

47 'ममाप्यनायासे' इति 'A' इति प्रकाशने पाठान्तरम्।

विदूषकः - किं मोदकखादिकायाम्॥[48]

विदूषक इति। मोदकखादिकायां मोदकानां भक्ष्यविशेषाणां खादिकायां भक्षणे विषये, खादृ भक्षण इति धातोः धात्वर्थनिर्देशे ण्वुल्वक्तव्य इति ण्वुल् प्रत्ययः। किं सहायेन भवितव्यं किमित्याशयः॥

राजा - यत्र वक्ष्यामि॥

राजेति। अहं यत्र यस्मिन्कार्ये, वक्ष्यामि नियोक्ष्यामि, तत्रेत्यर्थाल्लभ्यते॥

विदूषकः - गृहीतः क्षणः॥

विदूषक इति। क्षणः निर्व्यापारस्थितिः, गृहीतस्स्वीकृतः, मयेति शेषः॥

राजा - कः कोऽत्र भोः॥[49]

राजेति। भो इति सम्बोधनम्, अत्र स्थले कः कः को वा तिष्ठतीत्यर्थः॥

दौवारिकः - (प्रविश्य[50]) आज्ञापयतु भर्ता॥

दौवारिक इति। दौवारिकः द्वारे नियुक्तः पुरुषः, प्रविश्य राजनिकटं प्राप्य, आहेति शेषः, किमिति भर्ता राजा, आज्ञापयतु आदिशतु॥

राजा - [51]रैवतकसेनापतिस्तावदाहूयताम्॥

राजेति। रैवतकसेनापतिः रैवतकाख्यश्चमूपतिः। तावदिदानीम्। आहूयताम् आकार्यतां त्वयेति शेषः॥

---

48 'तेन ह्ययं संगृहीतः क्षणः' इति 'B' इति प्रकाशने अधिकः पाठः।
'किं मोदक खादने?' इति 'C' इति प्रकाशने पाठान्तरम्।

49 '(प्रविश्य दौवारिकः)' इति 'C' इति प्रकाशने पाठान्तरम्।

50 अयं पाठः 'A' इति प्रकाशने उपलभ्यते।

51 'रैवतक! सेनापतिस्तावदाहूयताम्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

दौवारिकः - तथा॥ (इति निष्क्रम्य सेनापतिना सह पुनः प्रविश्य) एष आज्ञापनोत्कण्ठो भर्तैतो[52] दत्तदृष्टिरेव तिष्ठति। उपसर्पत्वार्यः॥

दौवारिक इति। तथा तेन प्रकारेण, करोमीत्युक्त्वा, निष्क्रम्य बहिर्निर्गम्य, सेनापतिना चमूनायकेन सह, प्रविश्य राजसमीपं प्राप्य, आह किमिति एष इति। एष भर्ता अयं प्रभुः, आज्ञापनोत्कण्ठः शासनकरणौत्सुक्यः इतः अमुं देशं प्रति, दत्तदृष्टिः निवेशितचक्षुस्सन्नेव तिष्ठति वर्तते, आर्यः भवानित्यर्थः उपसर्पतु अनुसरतु।।

सेनापतिः - (राजानमवलोक्य) [53]दृष्टदोषापि स्वामिनि मृगया केवलं [54]गुण एव संवृत्ता। तथाहि देवः॥

श्लो॥ अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं
रविकिरणसहिष्णु[55] स्वेदलेशैरभिन्नम्[56]।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति ॥4॥

सेनापतिरिति। सेनापतिः, राजानं दुष्यन्तं, विलोक्य वीक्ष्याहेति शेषः, किमिति स्वामिनि प्रभौ विषये, मृगया आखेटः, दृष्टदोषापि दृष्टाः लक्षिताः दोषाः कार्श्यादयो यस्यां सा एवं विधापि, गुण एव लाघवादिगुणोत्पादक एव, केवलम् अत्यन्तं, संवृत्ता जाता, तदेवोपपादयति तथाहीत्यादिना, अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं सन्ततचापमौर्व्याकर्षणकठिनपूर्वभागं,

---

52 'भर्ता यतो' इति 'A' इति प्रकाशने पाठान्तरम्।

53 'अदृष्टदोषापि' इति 'C' इति प्रकाशने पाठान्तरम्।

54 'गुणायैव' इति 'C' इति प्रकाशने पाठान्तरम्।

55 'सहिष्णुः' इति 'B' इति प्रकाशने पाठान्तरत्वेनोपलभ्यते इति निर्दिष्टम्।

56 'रभिन्नः' इति 'B' इति प्रकाशने पाठान्तरत्वेनोपलभ्यते इति निर्दिष्टम्।

रविकिरणसहिष्णु–सूर्यातपसहनशीलम्, अत एव स्वेदलेशैर्घर्मबिन्दुभिः, नि।। “घर्मो निदाघस्स्वेदस्स्यात्” इत्यमरः। अभिन्नं संसक्तं, अपचित कृशमपि, व्यायामत्वाद्धृढत्वाद्धेतोः, अलक्ष्यं लघु गात्रं शरीरं, गिरिचरः पर्वतसञ्चारी, नागो गजः नि।। “गजेपि नागमातङ्गौ” इत्यमरः, प्राणस्य शक्तेः, सारं स्थिरांशमिव, देवो राजा, बिभर्ति धारयतीति सम्बन्धः।।

(उपेत्य) जयतु स्वामी। गृहीतश्वापदमरण्यम्[57]। किमिति स्थीयते[58] ॥

उपेत्येति। सेनापतिरित्यस्यात्राप्यनुषङ्गः। उपेत्य राजसमीपं प्राप्य, स्वामी राजा। सू।। 'स्वामिन्नैश्वर्यं' इति निपातनात्साधुः, जयतु सर्वोत्कर्षेण वर्तताम्, अरण्यं वनं, गृहीतश्वापदं निरुद्धशरभादिसत्वं, तस्मात् किमिति केन हेतुना, स्थीयते निवासः क्रियते, गम्यतामित्यर्थः।।

राजा - मन्दोत्साहः[59] कृतोऽस्मि मृगयापवादिना माधव्येन॥

राजेति। हे सेनापते, मृगयापवादिना मृगयानिन्दाशीलेन माधव्येन तन्नाम्ना विदूषकेन, मन्दोत्साहः मृगयायामुत्साहशून्यः कृतोऽस्मि।।

सेनापतिः - (जनान्तिकम्) सखे! स्थिरप्रतिबन्धो[60] भव। अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये॥

---

57 'श्वापदप्रचारं गृहीतमृगप्रचारं; सूचितश्वापदमरण्यं तत्किमन्यदनुष्ठीयते। किमन्यत्र-किमिति-स्थीयते' इति 'B' इति प्रकाशने पाठान्तरत्वेनोपलभ्यते इति निर्दिष्टम्।
'निगृहीतश्वापदप्रचारमरण्यमिदम्।' इति 'C' इति प्रकाशने पाठान्तरम्।

58 'किमन्यत्रावस्थीयते?' इति 'A' इति प्रकाशने पाठान्तरम्।
'किमद्यापि' इति 'C' इति प्रकाशने पाठान्तरम्।

59 'भग्नोत्साहः' इति 'B' इति प्रकाशने पाठान्तरत्वेनोपलभ्यते इति निर्दिष्टम्।
'सेनापते! भग्नोत्साहः........माढव्येन' इति 'C' इति प्रकाशने पाठान्तरम्।

60 'दृढ प्रतिज्ञो' इति 'A' इति प्रकाशने पाठान्तरम्।
'सखे विदूषक स्थिर प्रतिज्ञो भव ' इति 'C' इति प्रकाशने पाठान्तरम्।

सेनापतिरिरिति। जनान्तिकं नियतश्राव्यं यथा तथा, विदूषकमाहेतियोजना, हे सखे स्थिरप्रतिबन्धः अचलमृगयाप्रतिरोधः भव, अहं तावदहं तु, स्वामिनो राज्ञः, चित्तवृत्तिं मनोव्यापारम् अनुवर्तिष्ये अनुसरिष्यामि।।

(प्रकाशम्) [61]प्रलपत्येष वैधेयः। ननु प्रभुरेव निदर्शनम्। पश्यतु देवः[62]।

श्लो॥ मेदश्छेदकृशोदरं लघु [63]भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षस्स च धन्विनां यदिषवस्सिध्यन्ति लक्ष्ये चले
[64]मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः॥5॥

प्रकाशमिति। प्रकाशं सर्वश्राव्यं यथा तथेत्यर्थः, एष वैधेय मूर्खः, प्रलपति गुणानभिज्ञत्वात् यद्वा तद्वा जल्पति, तद्वचनं न ग्राह्यामित्यर्थः, ननु राजन् प्रभुस्त्वमेव निदर्शनम्, मृगयाया गुणवत्वे दृष्टान्तः, तथाहि, मेदश्छेदेति। मेदसः स्थूलत्वजनकधातुविशेषस्य, छेदेन नाशेन, कृशमुदरं यस्यतत्तथोक्तं, लघु लाघवगुणयुक्तं, वपुश्शरीरम्, उत्थानयोग्यम् अश्वाद्यारोहणार्हमिति यावत्, किञ्च। सत्त्वानां जन्तूनां, चित्तं चेतः, भयक्रोधयोः भीत्यमर्षयोः, विकृतिमत् विकारयुक्तं सत्, लक्ष्यते ज्ञायते, धन्विनां धनुष्मतां, सः उत्कर्षोऽतिशयश्च वर्तत इति शेषः। चले चञ्चले, लक्ष्ये शरव्ये, इषवो बाणाः, सिध्यन्ति निष्पद्यन्त इति यत्, एवं स्थिते मृगयां मिथ्या मृषैव, व्यसनं कामजदोषं, वदन्ति बृवन्ति मन्वादय इति शेषः। ईदृग्गेतादृशः, विनोदः कालयापनोपायः, कुतः कस्माद्भवति न कुतोऽपि भवतीत्यर्थः।।

---

61 'प्रलपत्वेष वैधवेयः' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

62 अयं पाठः 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।

63 'भवत्युत्साहयोग्यम्' इति 'A' इति प्रकाशने पाठान्तरम्।

64 'मिथ्या हि' इति 'C' इति प्रकाशने पाठान्तरम्।

विदूषकः - [65](सरोषम्) अपेहि रे! उत्साहहेतुक! अत्रभवान् प्रकृतिमापन्नः। त्वं तावदटव्या अटवीमाहिण्डन्[66] नरनासिकालोलुपस्य जीर्णर्क्षस्य कस्यापि मुखे पतिष्यसि॥

विदूषक इति। सरोषं सामर्षं, रे उत्साहहेतुक उत्साहजननकारण, अपेहि अपयाहि, अत्र भवान् पूज्यो राजा, प्रकृतिमापन्नः, स्वभावं गतः मृगयावैमुख्यं गतः, त्वं तावत् त्वं तु, अटव्या अटवीं, वनाद्वनमाहिण्डन् सञ्चरन्, नरनासिकालोलुपस्य मनुष्यघ्राणासक्तस्य। कस्यापि कस्यचित्, जीर्णर्क्षस्य वृद्धभल्लूकस्य, मुखे वदने, पतिष्यसि प्रवेक्ष्यसि॥

राजा - [67]भद्र! सेनापते! आश्रमसन्निकृष्टे[68] स्थिताः स्मः। अतस्ते वचो नाभिनन्दामि। अद्य तावत्।

श्लो॥ गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
[69]विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
[70]विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः॥6॥

---

[65] सरोषमित्येतत् पदं 'B' इति प्रकाशने नास्ति।

[66] 'त्वं तावद्दास्याः पत्रोऽटवीतोऽटवीमाहिण्डमानो' इति 'A' इति प्रकाशने पाठान्तरम्।
'त्वं तावदटवीतोऽटवीमाहिण्डमानो' इति 'B' इति प्रकाशने पाठान्तरम्।
'अटवीतोऽटवीमाहिण्डन्......मिषलोलुपस्य....कस्यापि....' इति 'C' इति प्रकाशने पाठान्तरम्।

[67] 'भद्रसेन' इति 'A' इति प्रकाशने पाठान्तरम्।

[68] 'सन्निकृष्टस्थिताः' इति 'सन्निकृष्टं' इति 'B' इति पाठान्तराणि उपलभ्यन्ते इति प्रकाशने निर्दिष्टम्।
'किं बहुना? आश्रम....त्वद्वचनं' इति 'C' इति प्रकाशने पाठान्तरम्।

[69] 'विश्रब्धं' इति 'A' इति प्रकाशने, 'विस्रब्धं' इति 'B' इति प्रकाशने पाठान्तराणि उपलभ्यन्ते।

राजेति। भद्र मङ्गलप्रदेति तस्यानुनयः, सेनापते वयमाश्रमसन्निकृष्टस्थिताः तपोवनसमीपवर्तिनः, स्मः भवामः, अतः अस्माद्धेतोः, ते तव, वचो वचनं, नाभिनन्दामि न बहुमन्ये, अद्यतावत् अस्मिन्दिने तु, कर्तव्यांशमुपदिशति। गाहन्तामिति। महिषाः कासराः, शृङ्गैः विषाणैः, मुहुः पुनःपुनः, ताडितमाहतम्, निपानसलिलम् आहवजलं, नि।। "आहावस्तु निपानं स्यादुपकूपजलाशयः" इत्यमरः। गाहन्तां विलोडयन्तु, छायाबद्धकदम्बकं छायायां वृक्षाद्यनातपप्रदेशे, बद्धं सङ्घटितं, कदम्बकं समूहो येन तत्तथोक्तं, मृगकुलं हरिणसङ्घः, रोमन्थं चर्वितचर्वणम्, अभ्यस्यतु अभ्यासं करोतु, वराहततिभिः किटिसमूहैः,पल्वले वेशन्ते, मुस्ताक्षतिः मुस्तकखादनं, विस्रब्धं निर्भयं क्रियतां, शिथिलज्याबन्धम् अनधिगतमौर्वीगुणम्, इदं परिदृश्यमानम्, अस्मद्धनुः अस्माकं चापः, विश्रान्तिं विश्रमं, लभतां प्राप्नोतु।।

सेनापतिः - [71]यत्प्रभविष्णवे रोचते॥

सेनापितिरिति। प्रभविष्णवे राज्ञे, यद्रोचते तदेव क्रियत इति वाक्यशेषः। सू।। 'रुच्यर्थानां प्रीयमाण' इति चतुर्थी।।

राजा - तेन हि निवर्तय पूर्वगतान् [72]वनग्राहिणः। यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति[73] तथा निषेद्धव्याः[74]। [75]पश्य -

---

70 'विश्रामं' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

71 'यथा प्रभविष्णवे' इति 'A' इति प्रकाशने पाठान्तरम्।

72 'धनुर्ग्राहिणः' इति 'A' इति प्रकाशने पाठान्तरम्।

73 'अभिरुन्धन्ति' इति 'B' इति प्रकाशने पाठान्तरत्ने उपलभ्यते इति निर्दिष्टम्। '...दूरात्परिहरिष्यन्ति,' इति 'C' इति प्रकाशने पाठान्तरम्।

74 'वनं नाभिरुन्धति दूरात्परिहरन्ति च' इति 'A' इति प्रकाशने पाठान्तरम्।

75 'पश्य' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

श्लो॥ शमप्रधानेषु [76]तपोधनेषु
गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव[77] सूर्यकान्ता-
स्तदन्यतेजोऽभिभवाद्वमन्ति[78] ॥7॥

राजेति। तेन हेतुना, पूर्वगतान् प्रथमं यातान्, वनग्राहिणः विपिनावरोधकान्, निवर्तय प्रत्यावर्तय, मे मम, सैनिकाः सेनायां भवा भटाः, तपोवनं कण्वाश्रमं, यथा येन प्रकारेण, नोपरुन्धन्ति न बाधन्ते, तथा तेन प्रकारेण, निषेद्धव्या निवारणीयाः, निषेधे कारणमाह पश्येत्यादिना। शमश्शान्तिः, प्रधानं मुख्यो गुणो येषां ते तथोक्ताः, तेषु तपोधनेषु मुनिषु, दाहात्मकं दहनशीलं, गूढं बहिरप्रकाशितं, तेजः प्रताप इति यावत्, अस्ति विद्यते, उक्तमर्थं दृष्टान्तेन स्पष्टीकरोति स्पर्शेति, स्पर्शानुकूलाः स्पर्शे अनुगुणाः, सूर्यकान्ता मणिविशेषाः अन्यतेजोऽभिभवात् तेजोऽन्तरतिरस्कारात्, तत्तेजः वमन्ति बहिः प्रकटयन्ति, इव शब्दो वाक्यालङ्कारे॥

सेनापतिः - यदाज्ञापयति स्वामी॥

सेनापतिरिति। स्वामी महाराजः, यदाज्ञापयति तत्करवाणीति शेषः॥

विदूषकः - गच्छ भो दास्याःपुत्र![79] ध्वंसितस्तव[80] उत्साहवृत्तान्तः॥

विदूषक इति। भो दास्याः पुत्रेति नीचसम्बोधनं सेनापतेः, गच्छ व्रज, ते तव, उत्सहवृत्तान्तः आखेटसम्बन्धितोषप्रवृत्तिः, ध्वंसितः राज्ञा विनाशितः॥

---

76 'तपोवनेषु' इति 'A' इति प्रकाशने पाठान्तरम्।

77 'अपि' इति 'B' इति प्रकाशने पाठान्तरम्।

78 'दहन्ति' इति 'B' इति प्रकाशने पाठान्तरम्।

79 वाक्यमिदं 'A' 'B' इति प्रकाशने नोपलभ्यते।

80 'विध्वंसतां ते' इति 'B' इति प्रकाशने पाठान्तरम्।

(निष्क्रान्तः सेनापतिः)

निष्क्रान्त इति। सेनापतिः सेनानीः, विदूषकेन निर्भर्त्सितस्सन्, निष्क्रान्तो निर्गतः।।

राजा - (परिजनं विलोक्य) अपनयन्तु भवत्यो मृगयावेषम्[81]। रैवतक! त्वमपि स्वं नियोगमशून्यं कुरु॥

राजेति। परिजनं सहचरपरिवारजनं, विलोक्य वीक्ष्य, भवन्तः यूयं, मृगयावेषं तदनुगुणवेषम्, अपनयन्तु उत्सृजन्तु, हे रैवतक रैवतक इति दौवारिकस्य नाम, त्वमपि, नियोगम् आज्ञाम्, अशून्यं सफलं, कुरु प्रवर्तय।।

परिजनः - यद्देव आज्ञापयतीति (निष्क्रान्तः)

परिजन इति। देवः राजा, यदाज्ञापयति तदेव कुर्म इत्युक्त्वा निष्क्रान्तो निर्गतः।।

विदूषकः - कृतं भवतेदानीं[82] निर्मक्षिकम्। साम्प्रतमस्मिन्[83] पादपच्छायाविरचितवितानसनाथे शिलातले [84]उपविशतु भवान्[85]। यावदहमपि सुखासीनो भवामि॥

---

81 'मृगयावेशम्' इति तालव्यशकारप्रयोगः 'A' इति प्रकाशने पाठान्तरत्वेन दृश्यते। 'मृगयावेशम्' इति तालव्यशकारयुक्तः 'B' इति प्रकाशने पाठान्तरम्।

82 'भवता' इति 'B' इति प्रकाशने पाठान्तरम्।

83 'साम्प्रतमेतस्मिन्' इति 'B' इति प्रकाशने पाठान्तरम्।
'...मेतस्यां ....यायामविरलत...आसने निषीदतु....। अहमपि तावत्....' इति 'C' इति प्रकाशने पाठान्तरम्।

84 'निषीदतु' इति 'B' इति प्रकाशने पाठान्तरम्।

85 'साम्प्रतमेतस्यां पादपच्छायायां विरचितलतावितानदर्शनीयायामासने निषीदतु भवान्' इति 'A' इति प्रकाशने पाठान्तरम्।

विदूषक इति। भवता त्वया, इदानीम् अद्य, निर्मक्षिकं कृतं विविक्तं रचितं, साम्प्रतम् अधुना अस्मिन् पुरोदृश्यमाने, पादपच्छायाविरचितवितानसनाथे वृक्षच्छाया सम्पादितवितानसहिते, शिलातले पाषाणप्रदेशे, भवान् उपविशतु निषीदतु, अहमपि तावदिदानीं, सुखासीनः सुखोपविष्टः भवामि॥

राजा - गच्छाग्रतः॥

राजेति। गच्छाग्रतः पुरतो व्रज॥

विदूषकः - एतु भवान्॥ (उभौ परिक्रम्योपविष्टौ)

विदूषक इति। एतु भवान् भवानागच्छत्वित्यर्थः, इत्युक्त्वा उभौ राजविदूषकौ, परिक्रम्य गत्वा, उपविष्टौ निषण्णौ॥

राजा - माधव्य! अनवाप्तचक्षुः फलोऽसि। येन त्वया [86]द्रष्टव्यानां परं न दृष्टम्॥

राजेति। हे माधव्य! विदुषकस्यैवनामान्तरमेतत्, त्वम् अनवाप्तचक्षुःफलः अलब्धनेत्रानन्दः, असि भवसि, येन हेतुना, त्वया भवता। द्रष्टव्यानां दर्शनीयानां परम् अधिकं, वस्तु न दृष्टं नावलोकितम्॥

विदूषकः - ननु भवानग्रतो मे वर्तते॥

विदूषक इति। ननु राजन् भवान्, मे मम, अग्रतः पुरतः। वर्तते तिष्ठति॥

राजा - सर्वः [87] कान्तमात्मीयं[88] पश्यति। [89]अहं तु तामेवाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि॥

---

86 'दर्शनीयं न दृष्टम्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

87 'खलु' इति अधिकः पाठः 'A' इति प्रकाशने दृश्यते।

88 'आत्मानं' इति 'B' इति प्रकाशने पाठान्तरत्नेनोपलभ्यते इति निर्दिष्टम्।

89 'अहं तु' इति पदद्वयं 'A' इति प्रकाशने न दृश्येते।

राजेति। सर्वस्सकलोजनः। आत्मीयं स्वकीयं, कान्तं मनोहरं, पश्यति अनुसन्धत्ते, अहं तु आश्रमललामभूतां तपोवनस्याभरणायमानां, तामेव शकुन्तलाम्, अधिकृत्योद्दिश्य। ब्रवीमि वच्मि।।

विदूषकः - (स्वगतम्) भो वयस्य! यदि सा तपस्विकन्यकानभ्यर्थनीया। तदा किं तया दृष्टया॥[90]

विदूषक इति। स्वगतम् आत्मगतं, भवतु राज्ञोक्तं सर्वमस्तु, अस्य राज्ञः अवसरम् अवकाशं, न दास्यामि नार्पयिष्यामि, प्रकाशमिति। प्रकाशं सर्वैर्ज्ञातं यथा तथा आहेति शेषः। किमिति भो वयस्य हे सखे, अनभ्यर्थनीया अप्रार्थनीया, सा भवद्दृष्टा तपस्विकन्यका यदि मुनिकुमारी चेत्, तदा तर्हि, दृष्टया प्रेक्षितया, किं प्रयोजनम् अस्माकमिति शेषः।।

राजा - सखे[91]। न परिहार्ये वस्तुनि पैरवाणां मनः प्रवर्तते।[92]

श्लो॥ [93]सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम्।
अर्कस्योपरि शिथिलं च्युतमिव नवमल्लिका[94]कुसुमम्॥8॥

---

90 ‘भवतु अस्यावसरं न दास्ये। भो वयस्य ते तापसकन्यकाभ्यर्थनीया दृश्यते’ इति ‘A’ ‘B’ इति प्रकाशनयोः पाठान्तरम्।

‘भवतु नास्मै अवसरं दास्यामि।....अद्य तापसकन्यकाप्यभ्यर्थनीया दृश्यते’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

91 ‘धिङ्मूर्ख’ इति पाठभेदः वर्तते इति ‘B’ इति प्रकाशने निर्दिष्टम्।

92 अस्मात् परं ‘विदूषकः – तस्मात्कथमेतत्’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

93 ‘निवारितनिमेषाभिर्नेत्रपङ्क्तिभिरुत्सुकः।
नवामिन्दुकलांलोकः केन भावेन पश्यति।।’ इति ‘B’ इति प्रकाशने पाठान्तरम्।

94 ‘मालिका’ इति ‘B’ इति प्रकाशने पाठान्तरम्।

‘अर्क....पतितं....नवमालिका’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

राजेति। हे सखे, परिहार्ये हेये वस्तुनि विषये, पौरवाणां पुरुवंश्यानां राज्ञामित्यर्थः, मनः चित्तं, न प्रवर्तते न प्रसरति, कथमित्यत आह सुरयुवतीति। सुरयुवतिसम्भवं मेनकासम्भूतम्, अनेन रूपातिशय उक्तः। मुनेः विश्वामित्रस्य, अपत्यं पुत्रिका, अनेन शकुन्तलायास्सवर्णक्षेत्रतया परिणययोग्यत्वमुक्तम्, तदुज्झिताधिगतं तया मेनकया उज्झितमुत्सृष्टं सत्, अधिगतं सम्प्राप्तं, कण्वमुनिना इति शेषः। किलेति सम्भावनायाम्, अत्र दृष्टान्तमाह, अर्कस्येत्यादि। अर्कस्य रव्याख्यवृक्षस्य, उपर्यूर्ध्वभागे, परिच्युतं स्रस्तं, शिथिलं विशीर्णं, नवमल्लिकाकुसुमं नूतनमाख्यपुष्पमिवस्थितमिति शेषः।।

विदूषकः - (विहस्य) यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य [95]तिन्तिडिकायामभिलाषो भवेत्। तथा अन्तःपुर[96]स्त्रीरत्नपरिभाविनो भवत इयमभ्यर्थना॥

विदूषक इति। विहस्य राजोक्ते परिहासं कृत्वा, विदूषकः प्राह, किमिति पिण्डखर्जूरैः पिण्डीकृतखर्जूरविशेषैः, उद्वेजितस्य बहुलमधुररसभक्षणेन जिह्वाजडतां प्रापितिस्य, कस्यापि जनस्य, तिन्तिडिकायां चिञ्चाफले, अभिलाषः प्रीतिः, यथा येन प्रकारेण, भवेज्जायते तथा तेन प्रकारेण, अन्तःपुरस्त्रीरत्नपरिभाविनः अवरोधवधूश्रेष्ठतिरस्कारिणः, भवतः तव, इयं शकुन्तलागता, अभ्यर्थना याञ्चा भवति।।

राजा - न तावदेनां [97]पश्यसि। [98]येन नैवमवादीः॥

---

95 'तिन्तिण्यामभिलाषो' इति 'A' इति प्रकाशने पाठान्तरम्।
'तिन्त्रिण्यामभिलाषो' इति 'C' इति प्रकाशने पाठान्तरम्।

96 'अन्तःपुर' इति पाठः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

97 'जानासि' इति 'B' इति प्रकाशने पाठान्तरम्।

98 'येन त्वमेवंवादी' इति पाठः 'A' इति प्रकाशने पाठान्तरम्।
'योम त्वमेवमवादीः' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। त्वम् एनां तावत् शकुन्तलां तु, न पश्यसि नावलोकयसि, कुत इति चेत्, येन कारणेन, एवं पूर्वोक्तप्रकारेण, अवादीरुक्तवानसि, अतस्त्वया तत्सौन्दर्यं न ज्ञातमिति भावः।

विदूषकः - तत्खलु रमणीयम्। यद्भवतोऽपि विस्मयमुत्पादयति॥

विदूषक इति। तत् शकुन्तलारूपं, रमणीयं खलु मनोहरमेव, यद्यस्मात्, भवतस्तवापि, विस्मयमाश्चर्यम् उत्पादयति जनयति।

राजा - वयस्य। किं बहुना।

श्लो॥ [99]चित्रे निवेश्य परिकल्पितसत्त्वयोगा[100]
रूपोच्चयेन मनसा विधिना[101] कृतासु[102]।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥9॥

राजेति। हे वयस्य सखे, बहुना अधिकेन, तत्सौन्दर्यादि-प्रकाशेन, किं प्रयोजनं किमपि नास्तीत्यर्थः, किन्तु संक्षिप्य वक्ष्यामित्यर्थः, तदेवाह चित्र इति। विधिना ब्रह्मणा। चित्रे आलेख्ये, निवेश्य सम्यग्लिखित्वा, परिकल्पितसत्त्वयोगा सम्पादितप्राणसंयोगा, रूपोच्चयेन चन्द्रारविन्दाद्युपमानवस्तुगतकान्तिसमूहेन, मनसा मानसेन, कृता नु निर्मिता वा, एवं निर्माणस्य कारणमाह- स्त्रीरत्नेति। धातुर्ब्रह्मणः,विभुत्वम् अनेकविधसृष्टिसामर्थ्यं, तस्याश्शकुन्तलायाः, वपुश्शरीरं च, अनुचिन्त्य मुहुर्मुहुः पर्यालोच्य स्थितवत इति शेषः, मे मम, सा आश्रमे दृष्टा,स्त्री

99 'चित्ते' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

100 'सर्वयोगान्' इति 'A' इति प्रकाशने पाठान्तरम्।
'सत्तयोगात्' इति 'B' इति प्रकाशने पाठान्तरम्।

101 'परिकल्पिता नु' 'B' इति प्रकाशने पाठान्तरत्वेन उपलभ्यते इति निर्दिष्टम्।

102 'कृता नु' इति 'B' इति प्रकाशने पाठान्तरम्।

युवतिः, अपरा पूर्वविलक्षणा, रत्नसृष्टिः श्रेष्ठवस्तुनिर्माणं, प्रतिभाति अवभासते, एवंविधस्त्रीसृष्टिः पुरा कदाचिदपि केनापि न दृष्टेत्याशयः।।

विदूषकः - यद्येवम्। प्रत्यादेश इदानीं रूपवतीनाम्॥

विदूषक इति। यद्येवम् इदं भवदुक्तं सत्यं चेत्, रूपवतीनां सौन्दर्यशालिनीनां, शकुन्तला इदानीं प्रत्यादेशः निराकरणं, शकुन्तलया अद्य प्रभृति सर्वा निराकृता इति भावः।।

राजा - इदं च मे मनसि वर्तते।

श्लो॥ अनाघ्रातं पुष्पं किसलयमलूनं कररुहै
[103]रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः[104] ॥10॥

राजेति। इदं वक्ष्यमाणं, मे मम, मनसि चित्ते, वर्तते विद्यते, शकुन्तलाविषये वक्तव्यमवशिष्टमिति भावः। तदेवाह- अनाघ्रातमिति। अनघं अनवद्यं, तद्रूपं तत्सौन्दर्यम्, अनाघ्रातम् आघ्राणरहितं, पुष्पं प्रसूनं, कररुहैर्नखैः, अलूनम् अच्छिन्नम्, किसलयं पल्लवम्, अनाविद्धम् अनुत्कीर्णं, रत्नं मणिः, नि।। "रत्नं श्रेष्ठे मणावपि" इति विश्वः, अनास्वादितरसम् अननुभूतरसं, नवं नूतनं, मधु मद्यम्, अखण्डमविच्छिन्नं, पुण्यानां जन्मान्तरकृतसुकृतानां, फलं प्रयोजनमिव च, नि।। "फलं प्रयोजने सस्य" इति विश्वः।। स्थितमिति शेषः। इह अस्मिन् रूपे विषये, विधिः दैवं, कं पुरुषं, भोक्तारमनुभवितारं, समुपस्थास्यति प्रापयिष्यति, न जाने न वेद्मि, को वास्या रमणो भवतीति न ज्ञायत इत्यर्थः।।

---

103 'रनाभुक्तं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

104 'भुवि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

विदूषकः - तेन हि लघु परित्रायतामेनां भवान्। मा कस्यापि तपस्विन इङ्गुदीतैलचिक्कणशीर्षस्य[105] हस्ते पतिष्यति॥

विदूषक इति। तेन हेतुना, लघु शीघ्रं, भवान् त्वम्, एनां शकुन्तलां, परित्रायतां रक्षतात्, कुत इति चेत् कस्यापि इङ्गुदीतैलचिक्कणशीर्षस्य तापसतरुस्नेहमसृणशिरसः, तपस्विनः मुनेः, हस्ते करे, पतिष्यति अधिष्ठास्यति, तत्पूर्वं त्वमेव पाणिग्रहणं कृत्वा तां रक्षेत्यर्थः॥

राजा - परवती खलु तत्रभवती। न च [106]सन्निहितोऽत्र गुरुजनः[107] ॥

राजेति। तत्रभवति शकुन्तला, परवती पराधीना खलु, गुरुजनः पित्रादिः, न सन्निहितः न समीपस्थितश्च।

विदूषकः - अथ[108] भवन्तमन्तरेण कीदृशोऽस्या[109] दृष्टिरागः॥

विदूषक इति। अथ अनन्तरम्, अस्याः शकुन्तलायाः, भवन्तमन्तरेण त्वां विना, दृष्टिरागः अनुरागव्यञ्जकावलोकनं, कीदृशः कथं प्रकारः, त्वां विना शकुन्तलायाः कुत्रानुरागो जायत इति भावः। न जायत एवेत्यर्थः।

राजा - निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः[110]। तथापि तु।

श्लो॥ अभिमुखे मयि [111]संहृतमीक्षितं
हसितमन्यनिमित्तकृतोदयम्[112]।

---

105 '....स्यारण्यकस्य' इति 'C' इति प्रकाशने पाठान्तरम्।

106 'सन्निहितगुरुजाना' इति 'A' इति प्रकाशने पाठान्तरम्।

107 'कुलपतिः' इति 'B' इति प्रकाशने पाठान्तरम्।

108 'अत्र' इति 'A' इति प्रकाशने पाठान्तरम्। 'अथात्र' इति 'C' इति प्रकाशने पाठान्तरम्।

109 'कीदृशस्तस्याः' इति 'A' इति प्रकाशने पाठान्तरम्।

110 'अप्रगल्भाः कन्यकाः' इति 'B' इति प्रकाशने पाठान्तरम्।

111 'संहृतमीक्षणं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

विनयवारितवृत्तिरतस्तया

न विवृतो मदनो न च संवृतः ॥11॥

राजेति। तपस्विकन्याजनः मुनिकुमारीजनः, निसर्गत् स्वभावदेव, अप्रगल्भः अप्रौढः, तथापि प्रौढत्वेऽपि, कश्चन विशेषोऽस्तीत्याह अभिमुख इति। मयि अभिमुखे सम्मुखस्थिते सति, ईक्षितं दृष्टिः, संहृतं प्रत्यावर्तितं, हसितं हसनम् अन्यनिमित्तकृतोदयम् अन्येन निमित्तेन कृतोदयं निष्पादितम्, इतः कारणद्वयेन, मदनः कामः, विनयवारितवृत्तिः, विनयेन सौशील्यादिगुणेन, वारतवृत्तिः निवारित स्वव्यापारस्सन्, न विवृतः न प्रकटितः, न संवृतः न प्रच्छादितश्च।

विदूषकः - [113]ननु खलु दृष्टमात्रस्य तवाङ्कमारोहति ॥

विदूषक इति। दृष्टमात्रस्य वीक्षतस्यैव तव, अङ्कम् उत्सङ्गम्, आरोहति अधितिष्ठति खलु, नन्विति सम्बोधने।।

राजा - मिथः[114] प्रस्थाने पुनः शालीनतयापि [115]ममाविष्कृतो भावस्तत्रभवत्या। तथा हि।

श्लो॥ दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥12॥

---

112 'कथोदयम्' इति 'B' इति प्रकाशने पाठान्तरम्।

113 'किं नु खलु.........रोहति?' इति 'C' इति प्रकाशने पाठान्तरम्।

114 'सखीभ्यां मिथः' इत्यधिकः पाठः 'B' 'C' इति प्रकाशनयोः पाठान्तरत्वेनोपलभ्यते।

115 'काममाविष्कृतो' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'मयि भूयिष्ठमाविष्कृतो' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'भूयिष्ठमाविष्कृतो भावः तथा हि' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। मिथः रहस्यप्रदेशे, प्रस्थाने गमने सति, शालीनतया अधृष्टत्वेनापि, नि।। "स्यादधृष्टेतुशालीन" इत्यमरः। तत्रभवत्या शकुन्तलया, मम मत्सम्बन्धी, भावोऽभिप्रायः, आविष्कृतः प्रकटितः, भावदर्शनप्रकारमाह-तथाहीत्यादिना। चरणः पादः, अकाण्डे अनवसरे, कारणं विनेति यावत्। दर्भाङ्कुरेण कुशोद्गमेन, क्षतः खण्डित इति व्याजेन, कतिचिदेव कियन्त्येव, पदानि पादान्, गत्वा यात्वा, स्थिता न निर्गता। किञ्च द्रुमाणां वृक्षाणां, शाखासु लतासु, असक्तमलग्नमपि, वल्कलं चीरं, विमोचयन्ती आकर्षयन्ती, विवृत्तवदना प्रत्यावृत्तानना च, आसीत् अभूत्।

विदूषकः - तेन हि गृहीतपाथेयो[116] भव। कृतं त्वयोपवनं तपोवनमिति [117]प्रेक्षे ॥

विदूषक इति। तेन हेतुना, त्वमेव गृहीतपाथेयः स्वीकृतातिथिसत्कारः, भव एधि, त्वया तपोवनं मुनिजननिवासभूतस्थलविशेषः, उपवनम् आरामः, कृतं रचितमिति, प्रेक्षे पश्यामि।।

राजा - सखे! तपस्विभिः [118]कैश्चित्परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन [119]पुनराश्रमपदं[120] गच्छामः ॥

राजेति। हे सखे विदूषक, कैश्चित्तपस्विभिः मुनिभिः, परिज्ञातः इहस्थ इत्यवबुद्धः, अस्मि भवामि, चिन्तय तावत् आलोचय, केनापदेशेन व्याजेन तु,

---

116 'गृहीतपाथेयः कृतोऽसि तया। अतोनुरक्तं तपोवनमिति पश्यामि।' इति पाठान्तरमुपलभ्यते 'B' इति प्रकाशने निर्दिष्टम्। 'यद्येवं गृ...वनमुपवनमिति' इति 'C' इति प्रकाशने पाठान्तरम्।

117 'पश्यामि' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

118 'कैश्चिदिहस्थः परि...।...शेन सकृदप्याश्र...प्रविशामः।' इति 'C' इति प्रकाशने पाठान्तरम्।

119 'सकृतप्याश्रमे वसामः' इति 'A' इति प्रकाशने पाठान्तरम्।

120 'सकृदप्याश्रमे वसामः' इति 'B' इति प्रकाशने पाठान्तरम्।

पुनः भूयोऽपि, आश्रमपदं मुनिजनस्थानं, गच्छामः व्रजामः, एतेन शकुन्तलानिमित्तं राज्ञः पुनराश्रमगताभिलाषस्सूच्यते।।

विदूषकः - कोऽपरोऽपदेशः। [121]**ननु भवान्राजा ॥** [122]

विदूषक इति। अपरः अन्यः, अपदेशः मिषः, कः कीदृशः, भवान् त्वं, राजा ननु प्रभुः खलु, प्रभुत्वव्याजेन प्रवेशो युक्त इति भावः।

राजा - ततः किम् ॥ [123]

राजेति। ततः राजत्वेन किं प्रयोजनम्, न किमपीत्यर्थः।।

विदूषकः - नीवारषष्ठभागम[124]**स्माकमुपहरन्त्विति ॥**

विदूषक इति। अस्माकं नीवारषष्ठभागं नीवारस्य तृणधान्यावशेषस्य, षष्ठं भागं, राजग्राह्यं करम्, उपहरन्तु उपायनं कर्वुन्तु, तन्मिषेण तत्र गमनं युज्यत इति भावः।।

राजा - मूर्ख! अन्यदेव[125] **भागधेयमेते तपस्विनो निर्वपन्ति। यो रत्नराशीनपि विहायाभिनन्द्यते।**[126] **पश्य।**

---

[121] 'युष्माकं राज्ञाम्' इति 'B' इति प्रकाशने पाठान्तरम्।

[122] 'कोऽपरोपदेशस्तव राज्ञः। नीवारषष्ठभागमस्माकमुपहरन्त्विति' इति 'A' इति प्रकाशने पाठान्तरम्।

[123] एषः पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

[124] 'भाग....मारण्यकामस्मा...' इति 'C' इति प्रकाशने पाठान्तरम्।

[125] 'अन्यद्भागधेयमेतेषां रक्षणे निपतति यद्रत्नराशीनपि' इति पाठभेदः उपलभ्यते 'B' इति प्रकाशने निर्दिष्टम्। एतद्वाक्यं 'C' इति प्रकाशने पाठान्तरम्।

[126] 'मूर्ख, अन्यद्भागधेयमेतेषां रक्षणे निपतति यद्रत्नराशीनपि विहायाभिनन्द्यम्' इति 'A' इति प्रकाशने पाठान्तरम्।

श्लो॥ यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि [127]तत्फलम्।
तपष्षड्भागमक्षय्यं ददत्यारण्यका हि नः॥13॥

राजेति। हे मूर्ख विवेकशून्य, एते तपस्विनो मुनयः, अन्यदेव भागधेयं अन्यादृशं भाग्यम्, निर्वपन्ति वितरन्तीत्यर्थः, यः करः, रत्नराशीन् मणिसङ्घानपि, विहाय त्यक्त्वा, अभिनन्द्यते प्रीत्यागृह्यते, तथा हि– यदिति। नृपाणां राज्ञाम्, वर्णेभ्यो ब्राह्मणादिभ्यः, यत्फलमुत्तिष्ठति आगच्छति, तत्फलं क्षयि नश्वरं, पश्य जानीहि, आरण्यकाः अरण्यनिवासिनो मुनयः, अक्षय्यं विनाशरहितं, तपष्षड्भागं तपसष्षष्ठम्भागं, नः अस्माकं, ददति समर्पयन्ति हि, अतस्तत्र करग्रहो न कार्य इत्यर्थः॥

(नेपथ्ये) हन्त, सिद्धार्थौ स्वः॥

नेपथ्य इति। नेपथ्ये रङ्गभूमौ, सिद्धार्थौ कृतकृत्यौ, स्वः भवावः, इति वाक्यं श्रुतं, हन्तेति हर्षे॥

राजा - (कर्णं दत्वा) अये! धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम्॥

राजेति। कर्णंदत्वा श्रुत्वा, अये विदूषक, धीरप्रशान्तस्वरैः धीरः धैर्ययुक्तः, प्रशान्तश्शान्तियुक्तश्च गुणो येषां तैः, तपस्विभिर्मुनिभिः, भवितव्यं भाव्यम्, एते आगताः मुनयो भवेयुरिति भावः॥

दौवारिकः - (प्रविश्य) [128]जयतु जयतु भर्ता। एतौ द्वावृषिकुमारकौ[129] प्रतिहारभूमिमुपस्थितौ॥

दौवारिक इति। दौवरिकः द्वारपालकः, प्रविश्य राजसमीपं प्राप्य, आहेति शेषः। किमिति भर्ता राजा, जयतु जयतु सर्वोत्कर्षेण वर्तताम्, एतौ परिदृश्यमानौ,

---

127 'तद्धनम्' इति 'A' इति प्रकाशने पाठान्तरम्।

128 'जयतु भर्ता' इति अनाम्रेजितप्रयोगः 'A' इति प्रकाशने दृश्यते।

129 'ऋषिकुमारौ' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

द्वौ ऋषिकुमारकौ मुनिपुत्रौ, प्रतिहारभूमिं द्वारपालस्थानम् नि।। "प्रतीहारो द्वारपालद्वार्स्थद्वार्स्थित दर्शकाः" इत्यमरः। उपस्थितौ प्राप्तौ।

राजा - तेन हि अविलम्बितं प्रवेशय तौ ॥

राजेति। तेन मुनिकुमारत्वेन हेतुना, अविलम्बितं त्वरितं, यथा तथा, तौ मुनिपुत्रौ, प्रवेशय प्रापय।

दौवारिकः - (एष प्रवेशयामि) (इति निष्क्रम्य, ऋषिकुमाराभ्यां सह प्रविश्य) इत इतो भवन्तौ ॥

दौवारिक इति। एषः त्वत्पुरस्थितोऽहं, प्रवेशयामि उपनयामि ताविति शेषः, इत्युक्त्वा निष्क्रम्य तदानयनार्थं निर्गत्य, ऋषिकुमाराभ्यां मुनिपुत्राभ्यां सह, प्रविश्य राजसमीपं प्राप्य, भवन्तौ युवाम्, इत इतः आगच्छतामिति शेषः।।

उभौ – (राजानमवलोकयतः)

प्रथमः - अहो! दीप्तिमतोऽपि विश्वसनीयतास्य वपुषः। अथवा उपपन्नमेतद् [130]अस्मिन्नृषिकल्पे राजनि। कुतः।

श्लो ॥ अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यश्शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥ 14 ॥

उभाविति। उभौ मुनिपुत्रौ, राजानं नृपं, विलोकयतः पश्यतः, अनन्तरं प्रथमः तयोराद्यः आह। किमिति दीप्तिमतः तेजस्विनोऽपि, अस्य राज्ञोवपुषश्शरीरस्य, विश्वसनीयता सौम्यता, अहो इत्याश्चर्ये, प्रभूणां सौम्यताया

---

130 'ऋषिभ्यो नातिभिन्ने राजनि' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्। 'एतदृषिभ्यः, तपस्विभ्यः' इत्यादि पाठाः भावन्तीति 'B' इति प्रकाशने उपलभ्यते।

दुर्लभत्वादाश्चर्यम्, पक्षान्तरमाह- अथवेति। अथवा यद्वा, अस्मिन् पुरोगते, ऋषिकल्पे ऋषितुल्ये राजनि, उपपन्नं युक्तं, कुतः कस्मादिति चेत्। अध्याक्रान्तेति। अमुना राज्ञापि, सर्वभोग्ये सर्वजनोपभोगार्हे, आश्रमे राज्यरूपस्थानविशेषे, वसतिर्निवासः, अध्याक्रान्ता कृता, अयं राजापि, प्रत्यहं प्रतिदिनं, रक्षायोगात् प्रजापालनात्, तपः मुनिव्रतं, सञ्चिनोति संगृह्णाति, वशिनो जितेन्द्रियस्य, अस्य दुष्यन्तस्यापि, चारणद्वन्द्वगीतः चारणा इति देवस्तावकदेवयोनिविशेषाः, तेषां द्वन्द्वैर्मिथुनैः गीतो वर्णितः, पुण्यः पवित्रः, केवलमेकं, राजपूर्वः राजशब्दपूर्वकः, मुनिरितिशब्दः, द्यामाकाशम्, स्पृशति आश्रयते, अत्र मनुः- "यदह्नाकुरुते धर्मं प्रजाधर्मेण पालयन्। शतवर्षसहस्राणि तस्य भुङ्क्ते महाफलमिति"।

द्वितीयः - गौतम! अयं स बलभित्सखो [131]दुष्यन्तः॥

द्वितीय इति। हे गौतम अयं पुरोवर्ती, सप्रसिद्धः। बलभित्सखः इन्द्रसुहृत् दुष्यन्तः किम्?

प्रथमः - अथ किम्॥

प्रथम इति। प्रथमः प्राह- अथ किमित्यङ्गीकारे तथैवेत्यर्थः।।

द्वितीयः - तेन हि।

श्लो॥ नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।
आशंसन्ते [132]समितिषु सुरास्सक्तवैरा[133] हि दैत्यै-

---

[131] 'पार्थिवो' इति 'C' इति प्रकाशने पाठान्तरम्।

[132] 'सुरयुवतयो बद्धवैरा' इति 'A' इति प्रकाशने पाठान्तरम्।
'सुरसमितयः, सुरयुवतयः' इत्येवं पाठाः लभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।
'सुरयुवतयः' इति 'C' इति प्रकाशने पाठान्तरम्।

[133] 'बद्धवैरा' इति 'B' इति प्रकाशने पाठान्तरम्।

रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥15॥

द्वितीय इति। द्वितीयः प्राह किमिति। तेन हि पूर्वोक्तगुणवत्त्वेन हेतुना, नैतच्चित्रमिति, अयं दुष्यन्तः, एकः अप्रतिभटस्सन्, नगरपरिघप्रांशुबाहुः नगरस्य परिघौविष्कम्भाविवप्रांशू उन्नतौ बाहू यस्य सः तथोक्तः, कृत्स्नां समस्ताम् उदधिश्यामसीमाम् उदधिना समुद्रेण, श्यामा नीलाः सीमाः प्रान्तप्रदेशा यस्यास्ताम्, धरित्रीं भुवं, भुनक्ति पालयतीति यत्, एतन्नचित्रं कुतः, दैत्यैः राक्षसैः, सक्तवैराः सम्बद्धविरोधास्सन्तः, अधिज्ये अधिगतमौर्वीके, अस्य राज्ञो, धनुषि चापे, पौरुहूते इन्द्रसम्बन्धिनि, वज्रे च वज्रायुधे च, समितिषु युद्धेषु। विजयं जयसिद्धिम्, आशंसन्ते इच्छन्ति, सुराणामप्येतदपेक्षायां मनुष्याणां किमुतेति भावः।

उभौ - (उपगम्य) विजयस्व राजन्॥

उभाविति। उभौ द्वौ मुनिपुत्रौ, उपगम्य समीपं प्राप्य, हे राजन् विजयस्व सर्वोत्कर्षेण वर्तस्व, इत्याशीः प्रयुक्ता मुनिभ्यामिति भावः।

राजा - (आसनादुत्थाय) अभिवादये भवन्तौ ॥

राजेति। आसनात् पीठात्, उत्थाय, भवन्तौ युवाम्, अभिवादये प्रणमामि।

उभौ - स्वस्ति भवते। (इति फलान्युपहरतः)

उभाविति। उभौ मुनी, भवते तुभ्यं, नमस्वस्तीत्यादिना चुतुर्थी, स्वस्ति शुभम् अस्त्विति शेषः, इत्युक्त्वा फलानि राजार्पणयोग्यानि, उपहरतः अर्पयतः, "अग्निहोत्रगृहं क्षेत्रं धेनुं बालकमेव च। रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्" इति न्यायात्।।

राजा - (सप्रणामं परिगृह्य) [134]आज्ञामिच्छामि ॥[135]

'सक्तवैरा हि' इति 'C' इति प्रकाशने पाठान्तरम्।

134 'आज्ञापयितुमिच्छामि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

राजेति। सप्रणामं साभिवन्दनं, परिगृह्य स्वीकृत्य फलानीति शेषः, आह उवाच, किमिति अहम् आज्ञां भवन्नियोगम्, इच्छामि आकाङ्क्षामि।

उभौ - विदितो भवानाश्रमसदामिहस्थः। तेन भवन्तं प्रार्थयन्ते[136] ॥

उभाविति। भवान् त्वम्, आश्रमसदा मुनीनाम्, इहस्थः एतदाश्रमस्थः, विदितः ज्ञातः, मुनिभिरिति शेषः, तेन हेतुना, भवन्तं त्वां, प्रार्थयन्ते अभिवाञ्छन्ति।

राजा - किमाज्ञापयन्ति॥

राजेति। किं कीदृग्विधम्, आज्ञापयन्ति नियोजयन्ति।

उभौ - तत्रभवतः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि नः [137]इष्टिविघ्नमुत्पादयन्ति। तत्कतिपयरात्रं सारथिद्वितीयेन [138]भवता सनाथीक्रियतामाश्रम इति॥

उभाविति। तत्रभवतः पूज्यस्य, कण्वस्य महर्षेः कण्वमुनेः, असान्निध्यात् सन्निधानाभावात्, रक्षांसि राक्षसाः, नः अस्माकम्, इष्टिविघ्नं यागान्तरायम्, उत्पादयन्ति जनयन्ति, तत्तस्माद्धेतोः, कतिपयरात्रं कासुचिद्रात्रिषु, सारथिद्वितीयेन सारथिमात्रसहायेन, भवता त्वया, आश्रमः मुनिजनस्थानं, सनाथीक्रियतां रक्षणार्थं नाथवान्क्रियताम्, इति विज्ञापयन्तीति पूर्वेणान्वयः।

---

135 'आगमनप्रयोजनं ज्ञातुमिच्छामि' इति 'A' इति प्रकाशने पाठान्तरम्।

136 'निहस्थस्तपस्विभिस्तेन भवन्तमभ्यर्थयन्ते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। '...श्रमवासिनाम्...' इति 'C' इति प्रकाशने पाठान्तरम्।

137 'इष्टिविघ्नमुत्सादयन्ति' इति 'A' इति प्रकाशने पाठान्तरम्।
'इष्टिविघ्नमुत्पादयन्ति' इति 'B' इति प्रकाशने पाठान्तरम्। 'तपो विघ्नम्' इत्यपि पाठान्तरमुपलभ्यते इति निर्दिष्टम्।

138 'आयुधसध्रीचा भवता....' इति 'C' इति प्रकाशने पाठान्तरम्।

राजा - अनुगृहीतोऽस्मि॥

राजेति। अनुगृहीतः एवंविधकार्यनियोगेन भवदनुग्रहपात्रम्, अस्मि भवामि॥

विदूषकः - (अपवार्य) [139]एषा इदानीमनुकूला तेऽभ्यर्थना॥

विदूषक इति। अपवार्य प्रच्छाद्य, त्रिपताकहस्तेनेति भावः, तदुक्तम्- "अपवारितकं प्रोक्तं त्रिपताकेन पाणिना" इति, इदानीम् शकुन्तला पुनर्दर्शनोपायान्वेषणसमये, एषा मुनिकृता, अभ्यर्थना यज्ञरक्षणप्रार्थना, ते तव, अनुकूला अनुरूपा।

राजा - (स्मितं कृत्वा) रैवतक! [140]मद्वचनादुच्यतां सारथिः।
[141]सबाणासनं रथमुपस्थापयेति॥

राजेति। स्मितं मन्दहासं, कृत्वा आह किमिति, हे रैवतक द्वारपालस्येयं संज्ञा, सारथिः रथचोदकः, सबाणासनं सकार्मुकं रथम्, उपस्थापय उपानय, इति अनेन प्रकारेण, मद्वचनात् मम भाषितात्, उच्यताम् अभिधीयताम्।

दौवारिकः - [142]यद्देव आज्ञापयति। (इति निष्क्रान्तः)

दौवारिक इति। देवः राजा, यदाज्ञापयति यदादिशति तथा करोमीति शेषः। इत्युक्त्वा निष्क्रान्तः निर्गतः।

उभौ - (सहर्षम्)

---

139 'इयमिदानीमननुकूलाभ्यर्थना' इति 'C' इति प्रकाशने पाठान्तरम्।

140 'उच्यतामस्मत्सारथिः' इति 'A' इति प्रकाशने पाठान्तरम्।

141 'सबाणकार्मुकम्' इति 'C' इति प्रकाशने पाठान्तरम्।

142 'जयतु भर्ता। यद्देव....' इति 'C' इति प्रकाशने पाठान्तरम्।

श्लो॥ अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः॥16॥

उभाविति। उभौ द्वौ, सहर्षं ससम्भ्रमम्, अनुकारिणीति। पूर्वेषां वंश्यानां, अनुकारिणि अनुसारिणि, त्वयि विषये, इदं ब्राह्मणवचनाङ्गीकरणम्, युक्तरूपं प्राशस्त्येन युक्तं, 'प्रशंसायां रूप'बिति रूपप्रत्ययः। खलु यतः कारणात्, पौरवाः पुरुवंश्या राजानः, आपन्नाभयसत्त्रेषु आपन्नानाम् आपद्युक्तानाम् अभयान्येव सत्राणि क्रतुविशेषास्तेषु, दीक्षिताः गृहीतव्रताः, तस्मात्सुष्ठु युक्तमिति पूर्वेण सम्बन्धः।

राजा - (सप्रणामम्) [143]गच्छतां पुरो भवन्तौ। अहमप्यनुपदमागत एव॥

राजेति। राजा सप्रणामं नमस्कारयुक्तमाह किमिति। भवन्तौ युवां, पुरः अग्रे, गच्छतां प्रयाताम्, अहमपि अनुपदं युष्मत्पदमनुसृत्यैव, आगतः प्राप्तः, नि।। "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्यय"मित्यमरः।

उभौ - विजयस्व[144]। (इति निष्क्रान्तौ)

उभाविति। हे राजन्! त्वं विजयस्व सर्वोत्कर्षेण वर्तस्व, सू। 'विपराभ्यां जेः' इत्यात्मनेपदम्, इत्युक्त्वा निष्क्रान्तौ निर्गतौ। मुनिकुमाराविति शेषः।

राजा - माधव्य। अप्यस्ति शकुन्तलादर्शने[145] कुतूहलम्॥

---

143 'गच्छतां भवन्तौ' इति 'A' इति प्रकाशने पाठान्तरम्।

144 'विजयस्व राजन्' इति 'C' इति प्रकाशने पाठान्तरम्।

145 'दर्शनकौतुकम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'दर्शनकुतूहलम्?' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। हे माधव्य माधव्य इति विदूषकस्य नाम, शकुन्तलादर्शने शकुन्तलायाः प्रेक्षणे, कुतूहलम् अभिलाषः, अस्त्यपि विद्यते किम् अपिः प्रश्ने।

विदूषकः - प्रथमं सपरिवाहमासीत्। इदानीं राक्षसवृत्तान्तेन बिन्दुरपि नावशेषितः॥

विदूषक इति। प्रथमं त्वया तद्रूपवर्णनसमये, सपरिवाहं सजलोच्छ्वासं, नि।। "जलोच्छ्वावसाः परीवाहा" इत्यमरः।। यथा तथा आसीत् अभवत्, कौतूहलमिति शेषः, इदानीम् अद्य तु, बिन्दुर्लेशोऽपि, नि।। "बिन्दुर्नापद्म केज्ञातर्यक्षरावयवेलव" इति हलायुधः। नावशेषितः न स्थापितः।

राजा - मा भैषीः। ननु मत्समीपे[146] वर्तिष्यसे॥

राजेति। हे माधव्य त्वं माभैषीः भयं न प्राप्नुहि, मत्समीपे मन्निकटे। वर्तिष्यसे ननु स्थास्यसि हि।

विदूषकः - एष तव चक्ररक्षी भूतोऽस्मि।[147]

विदूषक इति। एषोऽहम्, तव त्वत्सम्बन्धी, चक्ररक्षीभूतः चक्ररक्षकतुल्यः तद्वत्संरक्ष्य इत्यर्थः, अस्मि भवामि।

दौवारिकः - (प्रविश्य) [148]सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते। एष पुनर्नगराद्देवीनामाज्ञप्तिहरः करभक आगतः॥

दौवारिक इत्यादि। दौवीरिकः द्वारपालः, प्रविश्य राजनिकटं प्राप्य, आहेति शेषः, किमिति, हे राजन् रथः स्यन्दनः, सज्जः सिद्धः, भर्तुः प्रभोः, विजयप्रस्थानं जयसूचकप्रयाणम्, अपेक्षते आकाङ्क्षते, एषः अयं, करभकः

---

146 'समीपवर्तिना त्वया भवितव्यम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

147 'एष राक्षसाद्रक्षितोऽस्मि' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

148 'जयतु भर्ता। सज्जो ....करभक उपस्थितः' इति 'C' इति प्रकाशने पाठान्तरम्।

तन्नामा भृत्यस्तु, देवीनाम् अन्तःपुरस्त्रीणाम्, आज्ञप्तिहरः आज्ञाप्रापकस्सन्, आगतः समागतः, नि॥ "देवी कृताभिषेकाया"मित्यमरः॥

राजा - (सादरम्) [149]किमम्बाभिः प्रेषितः ॥

राजेति। सादरम् – आदरसहितम्। अम्बाभिः – मातृभिः। प्रेषितः किं – प्रापितः किम्॥

दौवारिकः - अथ किम्॥

दौवारिक इति। अथ किमित्यङ्गीकारे। नि॥ अङ्गीकृतौस्यादथ किमित्यमरः॥ तथैवेत्यर्थः॥

राजा - [150]ननु प्रवेश्यताम्॥

राजेति। प्रवेश्यताम् – अन्तःप्राप्यतां ननु करभक इति शेषः॥

दौवारिकः - तथा। (इति निष्क्रम्य, करभकेण सह प्रविश्य) एष भर्ता। उपसर्प॥

दौवारिक इति। तथा – तेन प्रकारेण। इत्युक्त्वा। निष्क्रम्य – निर्गत्य। पुनः करभकेण सह – तन्नाम्नाभृत्येन सह। प्रविश्य – प्राप्य। आह किमिति। एष भर्ता – अयं प्रभुः। उपसर्प – आश्रय॥

करभकः - जयतु जयतु[151] भर्ता। देव्याज्ञापयति। आगामिनि चतुर्थदिवसे [152]पुत्रपिण्डपालनो नामोपवासो भविष्यति। [153]तत्र दीर्घायुषावश्यं वयं सम्भावयितव्या इति॥

---

149 'किमार्याभिः' इति 'A' इति प्रकाशने पाठान्तरम्।

150 'तेन हि' इति 'A' इति प्रकाशने पाठान्तरम्।

151 आम्रेडितप्रयोगः 'A' इति प्रकाशने नास्ति।

152 'प्रवृत्तपारणो मे उपवासो भविष्यति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

करभक इति। भर्ता प्रभुः। जयतु जयतु दिने दिने सर्वोत्कर्षेण वर्तताम्। सू।। नित्यवीप्सयोरिति नित्यार्थेद्विर्भावः। देवी त्वन्माता। आज्ञापयति नियोजयति, किमिति। आगामिनि भविष्यति, चतुर्थदिवसे तुर्यदिने, पुत्रपिण्डपालनोनाम पुत्राणां सुतानां पिण्डं पिण्डायुर्दायं पालयतीति तथोक्तः, पुत्रायुष्यप्रद इत्यर्थः, उपवासः निराहारः, भविष्यति सम्पत्स्यते, तत्र वासरे अवश्यं भृशम्, दीर्घायुषा चिरजीविना, वयं सम्भावयितव्याः बहूकरणीयाः इत्याज्ञापयतीति पूर्वेणान्वयः।

राजा - इतस्तपस्विकार्यम्। इतो गुरुजनाज्ञा।
[154]द्वयमप्यनतिक्रमणीयम्। किमत्र प्रतिविधेयम्[155]॥

राजेति। इतः अस्मिन्देशे, तपस्विकार्यं मुनिप्रयोजन इतः अस्मिन्देशे, गुरुजनस्य मात्रादेः, आज्ञा नियोगकरणं, द्वयं मुनिगुरुजनकार्ययुग्ममपि अनतिक्रमणीयम्. अनुल्लङ्घनीयम्, अत्रकार्यद्वयविषये प्रतिविधेयं प्रतिकरणीयं, किम् किमस्ति।

विदूषकः - त्रिशङ्कुरिवान्तरातिष्ठ[156]॥

विदूषक इति। त्रिशङ्कुर्नाम राजेव, अन्तरा मध्ये, तिष्ठ वर्तस्व, त्रिशङ्कुर्यथा भूस्वर्गयोर्मध्ये तिष्ठति तद्वद्भवानपि कार्यद्वयमध्ये तिष्ठत्वित्यर्थः।

राजा - सत्यमाकुलीभूतोऽस्मि[157]।

'निर्वृत्तपारण उपवासो मम भविष्यति। तस्मिन् दिवसे ....सन्निहतेन भवितव्यमिति' इति 'C' इति प्रकाशने पाठान्तरम्।

153 'तत्र दीर्घायुषावश्यं सम्भावनीयेति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

154 'उभयमप्यनुल्लङ्घनयं मया' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

155 'प्रतिविधातव्यम्?' इति 'C' इति प्रकाशने पाठान्तरम्।

156 'त्रिशङ्कुरिवान्तराले तिष्ठ' इति 'A' इति प्रकाशने पाठान्तरम्।

157 'कृतोऽस्मि' इति 'A' इति प्रकाशने पाठान्तरम्। 'अलं परिहासेन। सत्य...' इति 'C' इति प्रकाशने पाठान्तरम्।

श्लो॥ कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः।
पुरः प्रतिहतं शैलैः[158] स्रोतस्स्रोतोवहो[159] यथा॥17॥

(विचिन्त्य) सखे। [160]त्वमम्बया पुत्र इति प्रतिगृहीतः। अतो भवानितः प्रतिनिवृत्य मां [161]तपस्विकार्यव्यग्रमानसमावेद्य तत्रभवतीनां पुत्रकृत्यमनुष्ठातुमर्हति॥

राजेति। सत्यं याथार्थ्येन, आकुलीभूतः कलुषीभूतचित्तः, अस्मि भवामि, तथा हि कृत्ययोरिति, कृत्ययोः कार्ययोः, भिन्नदेशत्वात् नैकदेशत्वात्, मे मम, मनश्चित्तं, शैलैः पर्वतैः, पुरः अग्रे, प्रतिहतं प्रतिबद्धं, स्रोतोवहो नद्याः, स्रोतः प्रवाह इव, द्वैधीभवति द्विधाभूतं भवति, विचिन्त्य पर्यालोच्य, हे सखे त्वम्, अम्बया मात्रा, पुत्रः सूनुरिति प्रतिगृहीतः अङ्गीकृतोऽसि, अतः कारणात् भवान्, इतः अस्मात्प्रदेशात्, प्रतिनिवृत्य पुनर्गत्वा, मां तपस्विकार्यव्यग्रमानसं मुनिकार्यव्यासक्तचित्तम्, आवेद्य विज्ञाप्य, तत्रभवतीनाम् आम्बानां, पुत्रकृत्यं पुत्रेणावश्यकर्तव्यं व्यापारम् अनुष्ठातुं कर्तुम् अर्हति समर्थो भवति॥

विदूषकः - ननु खलु मां रक्षोभीरुकं गणयसि[162]॥

---

158 'शैले' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

159 'स्रोतोवहं' इति 'C' इति प्रकाशने पाठान्तरम्।

160 'त्वमार्याभिः पुत्र इव गृहीतः' इति 'A' इति प्रकाशने पाठान्तरम्।
'त्वमम्बाभिः' इति 'C' इति प्रकाशने पाठान्तरम्।

161 'तपस्विकार्यव्यग्रतामस्माकं निवेद्य' इति 'A' इति प्रकाशने पाठान्तरम्।
'व्यग्रतामस्माकमावेद्य, व्यग्रिताः स्म इत्यावेद्य' इति पाठान्तराणि उपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।
'मां तपस्विकार्यव्यग्रतां निवेद्य...अर्हसि।' इति 'C' इति प्रकाशने पाठान्तरम्।

162 'न खलु मां रक्षो भीरुकं गणय' इति 'A' इति प्रकाशने पाठान्तरम्।
'मा खलु मां .....' इति 'C' इति प्रकाशने पाठान्तरम्।

विदूषक इति। हे राजन्! मां रक्षोभीरुकं राक्षसेभ्यो भीतं, गणयसि अवगच्छसि खल्विति, काकु नन्वित्यामन्त्रणे।

राजा - (सस्मितम्) [163]भो महाब्राह्मण! कथमेतद्भवति सम्भाव्यते॥

राजेति। सस्मितं समन्दहासं, भो महाब्राह्मण! हे सर्वोत्कृष्टद्विजेत्युपहासः, भवति त्वयि विषये, एतत् रक्षोभीरुत्वं, कथं केन वा प्रकारेण, सम्भाव्यते अनुमीयते।

विदूषकः - [164]यथा राजानुजेन गन्तव्यम्। तथा गमिष्यामि॥[165]

विदूषक इति। राजानुजेन युवराजेन, यथागन्तव्यं तथा अहमपि गमिष्यामि।

राजा - ननु[166] तपोवनोपरोधः परिहरणीय इति सर्वाननुयात्रिकान्स्त्वयैव सह [167]प्रस्थापयामि॥

राजेति। ननु माधव्य, तपोवनोपरोधः आश्रमपीडा, परिहरणीयः परित्याज्यः, इति हेतोः सर्वान् समस्तान्, अनुयात्रिकान् अनुचरान्, त्वयैव सह भवता सममेव, प्रस्थापयामि प्रेषयामि।

विदूषकः - (सगर्वम्) तेन हि युवराजोऽस्मि इदानीं संवृत्तः॥

विदूषक इति। तेन हेतुना इदानीमद्य, युवराजः द्वितीयराजः, संवृत्तः सिद्धोऽस्मि इति, सगर्वं गर्वसहितम् उवाचेत्यर्थः।

---

163 'भो महाब्राह्मण' इत्येषः पाठः 'B' इति प्रकाशने नोपलभ्यते।

164 'तेन हि यथा ....' इति 'C' इति प्रकाशने पाठान्तरम्।

165 'तेन राजानुज इव गन्तुमुच्छामि' इति 'A' इति प्रकाशने पाठान्तरम्।
'गच्छामि' इति 'B' इति प्रकाशने पाठान्तरम्।

166 ननु इति पदं 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।

167 'प्रेषयामि' इति 'A' इति प्रकाशने पाठान्तरम्।

राजा - (आत्मगतम्[168]) चपलोऽयं वटुः। कदाचिदस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत्। भवतु। एनमेवं वक्ष्ये। (विदूषकं हस्ते गृहीत्वा, प्रकाशम्) वयस्य। [169]ऋषिगौरवादाश्रमं गच्छामि। न खलु सत्यमेव तापसकन्यकायां शकुन्तलायां[170] ममाभिलाषः। पश्य।

श्लो॥ क्व वयं क्व परोक्षमन्मथो
[171]मृगशावैस्सममेधितो जनः।
परिहासविजल्पितं[172] सखे!
परमार्थेन न गृह्यतां वचः॥18॥

राजेति। आत्मगतं स्वगतं, चपलः अनवस्थितचित्तः, अयं वटुर्ब्रह्मचारी, वक्तव्यावक्तव्यविवेकशून्य इत्यर्थः, अस्मत्प्रार्थनां अस्मत्सम्बन्धि शकुन्तलाविषयकेच्छां, कदाचित् कस्मिंश्चित्काले, अन्तःपुरेभ्यः अन्तःपुरवासि–स्त्रीजनेभ्यः, कथयेत् अभिधास्यति किमिति सम्भावनायां लिङ्, भवतु अयं यादृशस्तादृशो वा अस्तु, एनं विदूषकं, एवं वक्ष्यमाणप्रकारेण, वक्ष्ये कथयिष्यामि, इत्यालोच्य विदूषकं हस्ते पाणौ, गृहीत्वा अवलम्ब्य, प्रकाशं सर्वश्राव्यं यथा तथा आह किमिति, हे वयस्य अहं महाऋषिगौरवात् मुनिप्रीतेः, आश्रमं तपोवनं, गच्छामि यामि, सत्यं तत्त्वत एव तापसकन्यकायां मुनिकुमार्यां शकुन्तलायां, मम मत्सम्बन्धी, अभिलाषः इच्छा, न खलु नास्ति हि, तत्र

168 'स्वगतम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

169 'महर्षि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'महर्षि गौर....' इति 'C' इति प्रकाशने पाठान्तरम्।

170 'शकुन्तलायां' इति पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

171 'मृगशावैः सह वर्धितो जनः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

172 'विकल्पितं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

हेतुमाह- पश्येत्यादिना, वयं नागरका इति भावः, क्व कुत्र, मृगशावैः हरिणशिशुभिस्सम्, नि।। "पृथुकश्शाबकश्शिशु"रित्यमरः। एधितः सम्वर्धितः, अत एव परोक्षमन्मथः निगूढमदनविकारः जनः, क्व कुत्र, उभयमपि न घटत इत्यर्थः, हे सखे, परिहासविजल्पितं परिहार्थमुक्तं, वचः मद्वचनं, परमार्थेन तत्त्वतः, न गृह्यतां नाङ्गीक्रियताम्।

विदूषकः - अथ किम्[173] ॥

विदूषक इति। अथ किं तथैवेत्यर्थः।

इति निष्क्रान्तास्सर्वे ॥

इति द्वितीयोऽङ्कः ।

इति निष्क्रान्तास्सर्वे।। द्वितीयोऽङ्कः।

इति श्रीमृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तलव्याख्याने पूर्णचन्द्रिकाख्याने द्वितीयोऽङ्कः।।

173 इदं वाक्यम् 'A' इति प्रकाशने पाठान्तरम्।

अथ तृतीयाङ्कादौ विष्कम्भः

(ततः प्रविशति कुशानादाय यजमानशिष्यः)

शिष्यः - अहो महाप्रभावो[1] राजा[2] दुष्यन्तः। [3]येन प्रविष्टमात्र एवाश्रमं तत्रभवति[4] निरुपप्लवानि नः कर्माणि संवृत्तानि।[5]

श्लो॥ का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुङ्कारेणेव धनुषः स हि [6]विघ्नानपोहति॥1॥

यावदिमान्वेदिसंस्तरणार्थं[7] दर्भानृत्विग्भ्य [8]उपहरामि॥

कविरिदानीमन्यां कथामारिप्सुर्वस्तु सङ्घटनाय विष्कम्भं नामकमर्थोपक्षेपकं प्रस्तौति ततः प्रविशतीत्यादि। ततोऽनन्तरं यजमानशिष्यः। यजमानस्य कण्वस्य शिष्यः छात्रः, नि।। "छात्रान्तेवासिनौ शिष्य" इत्यमरः।। कुशान् दर्भान्। नि।।

---

1 'महाप्रभवः' इति 'B' इति प्रकाशने पाठान्तरम्।
'महानुभावः खलु पार्थिवो दुष्यन्तः।' इति 'C' इति प्रकाशने पाठान्तरम्।

2 'पार्थिवो' इति 'B' इति प्रकाशने पाठान्तरम्।

3 'यत्' इति 'B' इति प्रकाशने पाठान्तरम्।
'यत्प्रविष्टमात्र एव सारथिद्वितीये तत्रभवति इदमाश्रमपदं निवृत्तरक्षोविघ्नं संवृत्तम्। निरुपप्लवानि च नः कर्माणि सिद्धानि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'यत्प्रविष्टमात्र..........तत्रभवति.....राजनि....' इति 'C' इति प्रकाशने पाठान्तरम्।

4 '....भवति राजनि...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

5 '(विचिन्त्य, सविस्मयम्) अहो महानुभावः पार्थिवो दुष्यन्तः। प्रविष्टमात्र एव तत्र भवति सारथिद्वितीये राजनि निरुपद्रवाणि नः कर्माणि प्रवृत्तानि भवन्ति।' इति 'A' इति प्रकाशने पाठान्तरम्।

6 'विघ्नान्व्यपोहति' इति 'A' इति प्रकाशने पाठान्तरम्।

7 'स्तरणार्थान्' इति 'C' इति प्रकाशने पाठान्तरम्।

8 'उपनयामि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

"अस्त्रीकुशं कुथो दर्भ" इत्यमरः। आदाय गृहीत्वा, प्रविशति प्राप्नोति रङ्गस्थलमिति शेषः, शिष्य इति, शिष्यः प्राहेति शेषः, एवमुत्तरत्रापि योज्यं, किमिति दुष्यन्तो राजा माहाप्रभावः अतिमानुष प्रतापशाली, अहो आश्चर्यं, येन कारणेन, तत्रभवति पूज्ये दुष्यन्ते, आश्रमं तपोवनं, प्रविष्टमात्रे प्राप्तमात्र एव, नोऽस्माकं, कर्माण्युद्देश्यकार्याणि, निरुपप्लवानि निरन्तरायाणि, संवृत्तानि सञ्जातानि, महानुभावत्वमेवाह- का कथेत्यादि, हि यस्मात्कारणात्, ज्याशब्देन मौर्वीध्वनिनैव हुङ्कारेण हुं शब्दकरणेनैव, स राजा, दूरतः सुदूरं, विघ्नान् प्रत्यूहकारिणः, अपोहति अपसारयति, बाणसन्धाने शराकर्षणे सति, का कथा विघ्नानपोहतीति का वार्तेत्यर्थः, शिष्यस्स्वागमनप्रयोजनमाह यावदित्यादि, वेदिसंस्तरणार्थं वेदीं परित आच्छादनार्थं, ऋत्विग्भ्यो याजकेभ्यः, इमान् एतान्, दर्भान् कुशान्, यावदुपहरामि समर्पयिष्यामि, सू। 'यावत्पुरा निपातयोर्लडि'ति भविष्यदर्थे लट्।

(परिक्रम्यावलोक्य च आकाशे) प्रियंवदे! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते। (श्रुतिमभिनीय[9]) किं ब्रवीषि?

परिक्रम्येति। परिक्रम्य सर्वतस्सञ्चरित्वा, अवलोक्य दृष्ट्वा च, आकाश इति। आकाशे, नेपथ्यव्यतिरिक्तस्थाने, हे प्रियंवदे इदं त्वत्करगतम् उशीरानुलेपनं जलाशयानुलेपनं, नि।। "मूलेऽस्योशीरमस्त्रियाम्। अभयं नलदं सेव्यममृणालं जलाशयः" इत्यमरः।। मृणालवन्ति बिसयुक्तानि, नलिनीपत्राणि पद्मदलानि च, कस्य हेतोः, नीयन्ते प्राप्यन्ते, श्रुतिं तद्वाक्यश्रवणम्, अभिनीय व्यञ्जकचेष्टया प्रकाश्य, किं ब्रवीषि किं वा वदसि।

आतपलङ्घनाद्बलवदस्वस्था शकुन्तला तस्याश्शरीरसन्ताप[10]निर्वापणायेति॥

---

9 'आकर्ण्य' इति 'B' इति प्रकाशनयोः पाठान्तरम्।

10 'सन्दाह' इति अधिको पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

आतपेत्यादि। आतपलङ्घनात् आतपातिक्रमात्, बलवद्दृढं, शकुन्तला अस्वस्था पीडिता, तस्याः शकुन्तलायाः, शरीरसन्तापनिर्वापणाय देहतापप्रशमनार्थमिति, ब्रवीषि किमिति पूर्वेण सम्बन्धः, अत्र प्रविष्टया प्रियंवदया सहालापादाकाशभाषितमित्यवगन्तव्यं, तदुक्तम्। "किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यः। श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम्" इति।।

प्रियंवदे यत्नादुपचर्यताम्। सा हि तत्रभवतः कुलपतेरुच्छ्वसितम्[11]। अहमपि तावद्वैतानिकं शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि (इति निष्क्रान्तः)

॥ इति विष्कम्भः॥

प्रियंवद इत्यादि। हे प्रियंवदे यत्नात् प्रयत्नात्, उपचर्यताम् शीतलोपचारः क्रियतां, हि यस्मात्कारणात्, सा शकुन्तला, तत्रभवतः पूज्यस्य, कुलपतेः कण्वस्य, उच्छ्वसितम् जीवितप्रायेत्यर्थः, अहमपि तावत् इदानीं, वैतानिकं यज्ञसम्बन्धि, शान्त्युदकं शान्त्यभिमन्त्रितजलम् अस्यै शकुन्तलार्थं, गौतमी हस्ते गौतम्याः कण्वभगिन्याः हस्ते पाणौ, नि।। "हस्तौ तु पाणिनक्षत्रे" इत्यमरः। विसर्जयिष्यामि मोक्ष्यामि इत्येवमुक्त्वा, निष्क्रान्तः निर्गतः, विष्कम्भः।।

(ततः प्रविशति स [12]मदनावस्थो राजा)

---

11 'तर्हि त्वरितं गम्यताम्। यत्नादुपचर्यताम्। सखि सा खलु तत्र भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्।' इति 'A' इति प्रकाशने पाठान्तरम्।

'तर्हि यत्नादुपचर्यताम्। सा खलु भगवतः कण्वस्य ...।' इति 'B' इति प्रकाशने पाठान्तरम्।

'तर्हि यत्नादुपक्रम्यताम्। सा खलु कुलपतेरुच्छ्वसितम्।' इति 'C' इति प्रकाशने पाठान्तरम्।

12 'कामयमानावस्थो' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

'समदनावस्थः, कामयाना....' इति पाठान्तराण्युपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

ततः प्रविशतीत्यादि। ततः शिष्यनिष्क्रमणानन्तरं, समदनावस्थः मन्मथवेदनासहितः, राजा दुष्यन्तः, प्रविशति रङ्गस्थलमागच्छति।

राजा - (सचिन्तं निश्श्वस्य[13])

श्लो॥ जाने तपसो वीर्यं सा बाला परवतीति मे विदितम्।
[14]न च निम्नादिव सलिलं निवर्तते मे ततो हृदयम्॥2॥

राजेति। राजा सचिन्तं सनिर्वेदं, निश्श्वस्य निश्श्वासं प्रसार्य, आह किमति, जाने इति, तपसः कृच्छ्रचान्द्रायणादेः, परवती पराधीनेति, मे मम, विदितं ज्ञातं, मया ज्ञातमित्यर्थः, मे मम, हृदयं मनः, निम्नात् गम्भीरप्रदेशात्, सलिलं जलमिव, ततः शकुन्तलायाः, न निवर्तते न प्रत्यावर्तते, सर्वदा तत्रैव मे मनोऽभिरमत इत्यर्थः।

[15]भगवन्कुसुमायुध! त्वया चंद्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः। कुतः।

श्लो॥ तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥3॥

भगवन्नित्यादि। भगवन्नित्याक्षेपवचनं, कुसुमायुध पुष्पास्त्र, त्वया भवता, चन्द्रमसा कलानिधिना च आह्लादकरेणापि इत्याशयः, विश्वसनीयाभ्यां

---

13 एषः पाठः 'C' इति प्रकाशने नोपलभ्यते।

14 'अलमिति ततो हृदयं तथापि नेदं निवर्तयितुम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम्' इति 'C' इति प्रकाशने पाठान्तरम्।

15 '(मदनबाधां निरूप्य)' इति 'A' 'B' इति प्रकाशनयोः अधिकः पाठः।
'(मदनबाधां निरूपयन्)' इति 'C' इति प्रकाशने पाठान्तरम्।

विस्रम्भयोग्याभ्याम्, नि।। "समौ विस्रम्भविश्वासा"वित्यमरः। युवाभ्यामिति शेषः, कामिजनसार्थः कामुकजनसङ्घः, अतिसन्धीयते प्रतार्यते वञ्च्यत इत्यर्थः, कुतः कस्मादिति चेत्, उक्तमर्थमुपपादयति तवेत्यादिना, तव कुसुमशरत्वं पुष्पबाणत्वम्, इन्दोः चन्द्रस्य, शीतरश्मित्वं तुषारकिरणत्वं, नि।। "तुषारौ हिमशीतलौ" "किरणप्रग्रहौ रश्मी" इति च अमरः। इदन्द्वयम् एतद्युगम कुसुमशरत्वशीतरश्मित्वे इत्यर्थः, मद्विधेषु ममेवंविधप्रकारो येषां तेषु विरहिजनेष्वित्यर्थः, अयथार्थम् अननुगताभिदेयं सत्, दृश्यते लक्ष्यते, तथा हि, इन्दुः चन्द्रः, हिमगर्भैः हिमावृत्तैः, मयूखैः किरणैः, अग्निं वह्निं, विसृजति मुञ्चति, त्वमपि कुसुमबाणान् पुष्पशरान्, वज्रसारीकरोषि वज्रतीक्ष्णाग्रशरान्करोषि।

[16]भगवन्कामदेव! न ते मय्यनुक्रोशः॥ (मदनबाधां निरूप्य) कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत्। आं ज्ञातम्।[17]

श्लो॥ अद्यापि नूनं हरकोपवह्नि-
स्त्वयि ज्वलत्यौर्व इवाम्बुराशौ॥
त्वमन्यथा मन्मथ मद्विधानां
भस्मावशेषः कथमित्थमुष्णः॥4॥

भगवन्नित्यादि। हे भगवन् षड्गुणैश्वर्यसम्पन्न, कामदेव मन्मथदेव, ते तव, मयि विषये, अनुक्रोशः दया, न न भवति, मदनबाधां कुसुमशरपीडां, निरूप्य निर्धार्य, कुसुमायुधस्य पुष्पास्त्रस्य, सतः विदुषः, ते तव, एतदेवं विधं, दीनजनपीडाकरमिति यावत्, तैक्ष्ण्यं तीक्ष्णभावः, कुतः कस्मादागतमति शेषः, आं ज्ञातं एवं बुद्धं तीक्ष्णप्रकारोबुद्ध इत्यर्थः। आमेवमित्यव्ययेष्वमरः।। कथं ज्ञातमित्यत्राह- अद्येति। हरकोपवह्निः ईश्वरक्रोधाग्निः, अद्य इदानीमपि, और्वः

16 इतः आरभ्य क्वनु खलु पर्यन्तम् अधिको पाठः। एषः पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

17 'कुतः' इति 'C' इति प्रकाशने पाठान्तरम्।

बडबाग्निः, अम्बुराशौ समुद्र इव, त्वयि ज्वलति दीप्यते, नूनं निश्चयः, हे मन्मथ त्वम् अन्यथा प्रकारान्तरेण, भस्मावशेषः भूतिमात्रावशिष्टस्सन्, मद्विधानां मादृशां वियोगिजनानाम्, इत्थम् अनेन प्रकारेण, सू।। 'इदमस्थमु'रिति प्रकारार्थे थमु प्रत्ययः। कथं किमर्थम् उष्णः उष्णत्वगुणविशिष्टः, असि भवसि, हरकोपाग्नेरेव इदमुष्णत्वं न तु भवत इत्याशयः।।

अथवा।

श्लो॥ अनिशमपि मकरकेतुर्मनसोरुजमावहन्नभिमतो मे।
यदि मदिरायतनयनां तामधिकृत्य [18]प्रहरतीति ॥5॥

इदानीं मन्मथपीडाया अनुकूल्यमुपपादयति अथ वेत्यादिना। अथवा पक्षान्तरे, मकरकेतुः मन्मथः,अनिशं सर्वदा, मनसश्चित्तस्य, रुजं पीडाम्, आवहने सम्पादयन्नपि, मे मम, अभिमतः इष्ट एव, मदिरायतनयनां मद्यसदृशविशाललोचनां तां शकुन्तलाम्, अधिकृत्य उद्दिश्य प्रहरति यदि बाधते चेत् इति हेतोः इष्ट एवेति पूर्वेणान्वयः।

भगन्कन्दर्प। एवमुपालब्धस्य तेन मां प्रत्यनुक्रोशः।

श्लो॥ वृथैव सङ्कल्प शतैरजस्र-
मनङ्ग नीतोऽसि मया विवृद्धिम्।
आकृष्य चापं श्रवणोपकण्ठे
मय्येव युक्तस्तव बाणमोक्षः ॥6॥

भगन्नित्यादि। हे भगवन्कन्दर्प एवमुक्तप्रकारेण, उपालब्धस्य निन्दितस्य, ते तव, मां प्रति मामुद्दिश्य, अनुक्रोशः कृपा, न न भवति, तदेवाह वृथैवेत्यादिना। हे अनङ्ग अशरीर, सङ्कल्पशतैः असंख्याकमनोरथैः, मया विवृद्धिं विशेषाभिवृद्धिं, वृथा व्यर्थमेव, नीतः प्रापितोऽसि, श्रवणोपकण्ठे श्रोत्रसमीपे, चापं धनुः, आकृष्य

---

18 'प्रभवतीति' इति 'C' इति प्रकाशने पाठान्तरम्।

सन्धाय, तव बाणमोक्षः बाणप्रसारणं, युक्तः उचितः, किमिति काकुः, मदुपकृतस्य ते मदपकारो न न्याय्य इत्यर्थः।।

(सखेदं परिक्रम्य) क्वनु खलु संस्थिते [19]कर्मणि [20]सदस्यैरनुज्ञातः [21]श्रमक्लान्तमात्मानं विनोदयामि। (निश्श्वस्य) किं नु खलु मे प्रियादर्शनादृते शरणमन्यत्। [22]यावदेनामन्विष्यामि॥

सखेदमिति। सखेदं सश्रमं, परिक्रम्य कियद्दूरं गत्वा, कर्मणि यागकर्मणि, संस्थिते समाप्ते सति श्रमक्लान्तम् आयासखिन्नम्, आत्मानं स्वं, क्व नु खलु कुत्र वा प्रदेशे, विनोदयामि तोषयामि कालयापनं करोमीत्यर्थः, निश्श्वस्य निश्श्वासं कृत्वा, प्रियादर्शनादृते शकुन्तलावलोकनं विना, मे मम, अन्यत् इतरत्, शरणं रक्षकं, किं नु खलु किं वा स्यात्, न किमपीत्यर्थः, अतः, एनां शकुन्तलां, यावदन्विष्यामि विचेष्यामि।।

(सूर्यमवलोक्य) इमामुग्रातपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति। तत्रैव तावद्गच्छामि॥

सूर्यमित्यादि। सूर्यं रविम्, अवलोक्य दृष्ट्वा आह, किमिति, स सखीजना प्रियाजनपरिवृता शकुन्तला, लतावलयवत्सु वल्लीवेष्टनवत्सु, मालिनीतीरेषु मालिन्या नाम नद्यास्तटेषु, प्रायेण भूम्ना, इमाम् उग्रातपवेलाम् अतितीक्ष्णातपसमयं, गमयति यापयति, तत्रैव तं प्रदेशमेवेत्यर्थः, गच्छामि तावत् गमिष्यामि, शकुन्तलादर्शनेन कालं नेष्यामीत्याशयः।

---

19 'सवनकर्मणि' इति 'C' इति प्रकाशने पाठान्तरम्।

20 'निरस्तविघ्नैः' इत्येषः अधिकः पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

21 'खिन्न–' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'खिन्न' इति 'C' इति प्रकाशने नोपलभ्यते।

22 '......मन्विच्छामि।' इति 'C' इति प्रकाशने पाठान्तरम्।

[23](परिक्रम्यावलोक्य च)। अनया बालपादपवीथ्या सुतनुरचिरं गतेति तर्कयामि। कुतः।

श्लो॥ सम्मीलन्ति न तावद्बन्धनकोशास्तयापचितपुष्पाः।
क्षीरस्निग्धाश्चामी दृश्यन्ते किसलयच्छेदाः॥7॥

परिक्रम्येत्यादि। परिक्रम्य गत्वा, अवलोक्य दृष्ट्वा च, अनया पुरो दृश्यमानया, बालपादपवीथ्या तरुणवृक्षश्रेण्या तन्मार्गेणेत्यर्थः, सुतनुः शकुन्तला, अचिरं अल्पकालमेव, गता याता, इतीत्थं, तर्कयामि पर्यूहामि, कुतः कथमिति चेत्, सम्मीलन्तीति, तया शकुन्तलया, अपचितपुष्पाः संलूनप्रसूनाः, बन्धनकोशाः गुच्छकुड्मलाः तावदिदानीं, न सम्मीलन्ति न विकसन्ति, अमी परिदृश्यमानाः, किसलयच्छेदाः पल्लवलवनस्थानानि, क्षीरस्निग्धाः स्नुतपयस्सान्द्राश्च, दृश्यन्ते प्रेक्ष्यन्ते, अतोऽचिरगमनमूह्यत इति भावः।

([24]स्पर्शं रूपयित्वा) अहो प्रवातसुभगोऽयमुद्देशः।

श्लो॥ [25]शक्यमरविन्दसुरभिः [26]कणवाही मालिनीतरङ्गाणाम्।
[27]अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः॥8॥

स्पर्शमित्यादि। स्पर्शं शैत्ययुक्तपवनसम्पर्कसुखं, रूपयित्वा अभिनीय, अयं पुरोवर्ती, उद्देशः स्थानं, प्रवातसुभगः प्रकृष्टपवनरम्यः, अहो इत्याश्चर्ये,

---

23 परिक्रम्य इत्यारभ्य किसलयविच्छेदः पर्यन्तमेषः अधिकः पाठः 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।

24 '(परिक्रम्य स्पर्शसुखं रूपयित्वा)' इति 'C' इति प्रकाशने पाठान्तरम्।

25 'शक्यो..' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

26 'सुभगः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

27 'तप्तैर्निर्दयमालिङ्गितुं' इति 'A' इति प्रकाशने पाठान्तरम्।
'मदनग्लानैरङ्गैः पीडि.., निर्दयमा...' इति पाठान्तराण्युपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अनेनास्य देशस्य क्रीडायोग्यत्वं सूच्यते, शक्यमिति। अरविन्दसुरभिः पद्मपरिमलयुक्तः अनेन पद्मसम्पर्कात् वातस्य मान्द्यं सौरभ्यं चोक्तम्, मालिनीतरङ्गाणां मालिन्यानाम तत्रत्याया नद्याः तरङ्गाणामुर्मीणां कणवाही बिन्दुप्रापकः अनेन शैत्यमुक्तं, पवनः वायुः, अनङ्गतप्तैः मन्मथसन्तापितैः, अङ्गैरवयवैः, अविरलं गाढं, आलिङ्गितुं परिरब्धुं, शक्यं साध्यम्, सू।। शक्यमिति सामान्योपक्रमान्नपुंसकत्वम्, शक्यंश्वमां सेनापि क्षुन्निवर्तयितुमिति भाष्यप्रयोगात्।

(परिक्रम्यावलोक्य च) [28]अस्मिन्वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया तया[29] भवितव्यम्। तथाहि। (अधो विलोक्य)

श्लो॥ अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥9॥

परिक्रम्येत्यादि। परिक्रम्य गत्वा, अवलोक्य दृष्ट्वा च, अस्मिन् पुरो दृश्यमाने, वेतसपरिक्षिप्ते निचुलशाखिभिः परिवृते, लतामण्डपे वल्लीसद्मनि, तया शकुन्तलया, सन्निहितया समीपवर्तिन्या, भवितव्यम् भाव्यं, सू। 'तयोरेव कृत्यक्तखलर्थाः' इति भावे तव्यप्रत्ययः।। तथाहि तदेवोपपादयति, अभ्युन्नतेति, पुरस्तात् अग्रे, अभ्युन्नता अधिकसमुन्नता, पश्चात् पश्चिमभागे जघनगौरवात् कटिपुरोभागभारात्, अवगाढा भृशं मग्ना, पाण्डुसिकते हरिणवालुके अस्य लतामण्डपस्य, द्वारे प्रतिहारे, अभिनवा नूतना, पदपङ्क्तिः चरणविन्यासश्रेणिः, दृश्यते विलोक्यते, अनेन तासां विस्रम्भसम्भाषण श्रवणकौतूहलं राज्ञो गम्यते।।

[30]यावद्विटपान्तरेणावलोकयामि। (परिक्रम्य, तथा कृत्वा, सहर्षम्) अये लब्धं नेत्रनिर्वाणम्। एषा मे मनोरथप्रियतमा सकुसुमास्तरणं

---

28 'सत्यम्' इत्यधिकः पाठः 'C' इति प्रकाशने उपलभ्यते।

29 'शकुन्तलया' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

30 'यावद्विपटान्तरित एवा....' इति 'C' इति प्रकाशने पाठान्तरम्।

शिलापट्टमधिशयाना [31]सखीभ्यामन्वास्यते। भवतु।[32] श्रोष्याम्यासां विस्रम्भकथितानि॥ (इति विलोकयन् स्थितः)

यावदित्यादि। विटपान्तरेण शाखाव्यवधानेन, यावद्विलोकयामि द्रक्ष्यामि, परिक्रम्य प्राप्य तथा कृत्वा, शाखान्तरितो भूत्वेत्यर्थः, अये इत्यादि, नेत्रनिर्वाणम् अक्ष्णोश्श्रेयः, लब्धं प्राप्तम्, अये इति हर्षे नेत्रसद्भावस्य साफल्यं जातमिति हर्षः, एषा पुरोवर्तमाना, मे मम, मनोरथप्रियतमा सङ्कल्पानुकूला शकुन्तला, सकुसुमास्तरणं पुष्पाच्छादितं, शिलापट्टं पाषाणफलकम्, अधिशयाना उपविशन्ती सखीभ्यां सहचरीभ्याम्, अन्वास्यते सेव्यते, सू।। 'अधिशीङ्स्थासां कर्मे'ति शिलापट्टस्य कर्मत्वं, भवतु यथा तथा वा सखीजनसहिता तिष्ठतु, आसां स्त्रीणां, विस्रम्भकथितानि विश्वासालापान्, श्रोष्यामि आकर्णयिष्यामि इत्युक्त्वा विलोकयन् ताः पश्यन्, स्थितः आस्ते।

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)॥

(सख्यावुपवीजयतः)[33]

सख्यौ – (उपवीज्य सस्नेहम्) हला शकुन्तले। अपि सुखायते ते नलिनीपत्रवातः॥

ततः प्रविशतीत्यादि। ततोऽनन्तरम्, यथोक्तव्यापारा पूर्वोक्तावस्था, शकुन्तला सखीभ्याम् अनसूयाप्रियंवदाभ्यां, सह प्रविशति आगच्छति रङ्गमिति शेषः सख्यौ सहचर्यौ उपवीजयतः तालवृन्ताभ्यां परिचरतः, सख्यौ, प्रकृते उपवीज्य वीजनं कृत्वा, सस्नेहं प्रेमयुक्तं, पृच्छतः किमिति हला सखि शकुन्तले, ते तव, नलिनीपत्रवातः पद्मपर्णपवनः, सुखायते सौख्यं करोत्यपि, अपिः प्रश्ने।

---

31 'सखीभ्यामुपास्यते। श्रुणोमि तावदासां' इति 'A' इति प्रकाशने पाठान्तरम्। 'मुपास्यते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

32 'लताव्यवहितः' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

33 'सख्यावुपजीवयतः' इति पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

शकुन्तला - किं वीजयतो मां सख्यौ ॥

शकुन्तलेति। शकुन्तला प्राह- हे सख्यौ युवां मां वीजयतः मद्विषये वीजनं कुरुतः किम्, मया न ज्ञायत इत्यर्थः।

सख्यौ - (विषादं नाटयित्वा परस्परमवलोकयतः)

सख्याविति। सख्यौ अनसूयाप्रियंवदे, विषादम् उपचारवैफल्यप्रयुक्तखेदं नाटयित्वा अभिनीय, परस्परम् अन्योऽन्यम्,अवलोकयतः पश्यतः।

राजा - बलवदस्वस्थशरीरा शकुन्तला[34] दृश्यते॥ ([35]सवितर्कम्) तत्किमयमातपदोषः [36]स्यात्॥ उत[37] यथा मे मनसि वर्तते॥ (साभिलाषं[38] निर्वर्ण्य) अथवा कृतं सन्देहेन॥

श्लो॥ स्तनन्यस्तोशीरं [39]प्रशिथिलमृणालैकवलयं
प्रियायास्साबाधं [40]तदपि कमनीयं वपुरिदम्।
समस्तापः कामं मनसिजनिदाघप्रसरयोः
न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु॥ 10॥

---

[34] 'खलु अत्रभवती' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'तत्रभवती' इति 'C' इति प्रकाशने पाठान्तरम्।

[35] सवितर्कमित्येतत् पदम् 'C' इति प्रकाशने नोपलभ्यते।

[36] 'दोषः वा? उत मदनदोषो वा स्यात्? उभयथापि' इति 'C' इति प्रकाशने पाठान्तरम्।

[37] 'स्यात्किं मदनदोषो वा स्यात् (उभयं मे)' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[38] 'विचिन्त्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'साभिलाषं निर्वर्ण्य' इत्येतत् पदं 'C' इति प्रकाशने नोपलभ्यते।

[39] 'शिथिलित' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

[40] 'किमपि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

राजेति। शंकुन्तला बलवद्दृढम् अस्वस्थशरीरा पीडितदेहा, दृश्यते विलोक्यते, सवितर्कम् ऊहासहितं यथा तथा, तत्तस्मात्, अयं अस्वास्थ्यदोषः, आतपदोषः निदाघविकारःकिं स्यात् भवेत्किम्, उत अथवा, मे मम, मनसि स्वान्ते, यथा येन प्रकारेण, वर्तते विद्यते, मदनदोषो वेति भावः, साभिलाषं सतृष्णं, निर्वर्ण्य दृष्ट्वा, अथवा पक्षान्तरे, सन्देहेन संशयेन, कृतम् अलं, सन्देहो न कर्तव्य इत्यर्थः, एवं सन्दिह्य अथवेत्यादि पक्षान्तरेण सा बाधत्वेपि कमनीयत्वादिभिः मदनताप एवेति निश्चिनोति, स्तनस्येत्यादिना, स्तनयोर्न्यस्तं निक्षिप्तम्, उशीरं नलदलेपनं यस्य तत्तथोक्तं, प्रशिथिलः गलन्, मृणालैकवलयः बिसैककङ्कणो यस्य तत्तथोक्तं, प्रियायाः प्रेयस्याः, इदं वपुः परिदृश्यमान शरीरं, साबाधं सव्यथं, तदपि तथापि, कमनीयम् अतीवसुन्दरं, मनसिजनिदाघप्रसरयोः मन्मथग्रीष्मजतापप्रसारणयोर्मध्ये, ग्रीष्मस्य उष्णस्य, युवतिषु स्त्रीषु विषये। एवं पूर्वोक्तप्रकारेण, सुभगं मनोज्ञं, अपराद्धम् अपराधः, सू। 'नपुंसके भावे क्त' इति भावे क्त प्रत्ययः, न भवति अतो मदनदोष एवेत्याशयः।

प्रियंवदा - (जनान्तिकम्) अनसूये! तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकेव[41] शकुन्तला। किं नु खल्वस्यास्तन्निमित्तोऽयमातङ्को भवेत्॥

प्रियंवदेति। प्रियंवदा तन्नाम्नी सखी, जनान्तिकं रहस्ये आह- किमिति हे अनसूये, तस्य प्रसिद्धस्य, राजर्षेः राजश्रेष्ठस्य, प्रथमदर्शनादारभ्य आदिमप्रेक्षणात्प्रभृति, शकुन्तला पर्युत्सुका उत्कण्ठितेव तिष्ठतीति शेषः, अस्याश्शकुन्तलायाः अयमातङ्कः तापः, नि। "रुक्तापशङ्कास्वातङ्क" इत्यमरः। तन्निमित्तः राजदर्शनहेतुकः, स्यात्किन्नु खलु भवेत्किम्।

अनसूया - सखि! ममापीदृश्याशङ्का हृदयस्य। भवतु। प्रक्ष्यामि तावदेनाम्॥

---

41 'पर्युत्सुका आपन्नेव' इति 'C' इति प्रकाशने पाठान्तरम्।

अनसूयेति। हे सखि ईदृशी एवंविधा, आशङ्का वितर्कः, ममापि हृदयस्य वर्तत इतिशेषः, भवतु एवमस्तु, एनां शकुन्तलां, प्रक्ष्यामि बुभुत्सिष्यामि तावत्, तापहेतुं पृष्ट्वा ज्ञास्यामीति भावः।

(प्रकाशम्) सखि! प्रष्टव्यासि किमपि। [42]बलीयान्खलु ते सन्तापः॥

प्रकाशमिति। प्रकाशं सर्वश्राव्यम्, हे सखि शकुन्तले, ते तव, सन्तापः मन्मथपीडा, बलीयान् बलवान्खलु, अतः किमपि किं वा, प्रष्टव्या प्रश्नं कर्तुं योग्यासि।

शकुन्तला – (पूर्वार्धेन[43] शनयादुत्थाय) हला। किं वक्तुकामासि।

शकुन्तलेति। पूर्वार्धेन परोविद्यमानार्धभागेन शरीरस्येति शेषः, शयनात् पर्यङ्कात्, उत्थाय उत्थिता भूत्वा, हला सखि, किं यद्वचनं, वक्तुकामासि, सम्भाषितुमना असि।

अनसूया - हला शकुन्तले! अनभ्यन्तरे खल्वावां[44] मदनगतस्य वृत्तान्तस्य॥ किन्तु यादृशीतिहासनिबन्धेषु कामयमानानामवस्था[45] श्रूयते। तादृशीं [46]ते [47]प्रेक्षे। कथय। किन्निमित्तं ते सन्तापः[48]। विकारं खलु परमार्थतोऽज्ञात्वानारम्भः [49]प्रतीकारस्य॥

---

42 'बलवान्' इति 'C' इति प्रकाशने पाठान्तरम्।

43 'पुष्पशय्यामुदस्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

44 'अनभ्यन्तरा खलु वयं' इति 'C' इति प्रकाशने पाठान्तरम्।

45 'समवस्था' इति 'C' इति प्रकाशने पाठान्तरम्।

46 'तव पश्यामि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

47 'पश्यामि' इति 'C' इति प्रकाशने पाठान्तरम्।

48 'आयासः' इति 'C' इति प्रकाशने पाठान्तरम्।

49 'परिहारस्य' इति 'C' इति प्रकाशने पाठान्तरम्।

अनसूयेति।। हला सखि शकुन्तले, आवां मदनगतस्य मन्मथ प्राप्तस्य, वृत्तान्तस्य शृङ्गारचेष्टादेः, अनभ्यन्तरे अनभिज्ञे खलु, किन्तु परन्तु, इतिहसनिबन्धेषु रामायणादिग्रन्थेषु, कामयमानानां कामासक्तचेतसां, यादृशी यद्विधा, अवस्था स्थितिः, श्रूयते आकर्ण्यते, तादृशीं तद्विधां, ते तव, प्रेक्षे विलोकयामि, ते तव, सन्तापः विशेषतापः, किन्निमित्तं केन निमित्तेन, कथय ब्रूहि, सू। 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' इति तृतायार्थे प्रथमा, विकारं सन्तापहेतुं, परमार्थतः याथार्थ्येन, अज्ञात्वा अनवबुध्य, प्रतीकारस्य प्रतिविधानस्य अनारम्भः अनुपक्रमः खलु।

राजा - अनसूययापि मदीयस्तर्कोऽवगतः[50] ॥

राजेति। मदीयः मत्सम्बन्धी, तर्कः ऊहः, अनसूययाप्यवगतो ज्ञातः।

शकुन्तला - (आत्मगतम्) [51]बलीयान्खलु मेऽभिनिवेशः [52]इदानीमपि। [53]सहसैतयोः न शक्नोमि निवेदितुम्॥

शकुन्तलेति। आत्मगतं स्वगतं, मे मम, अभिनिवेशः आग्रहः, बलीयान् बलवत्तरः खलु, दुर्लभविषय इत्यर्थः, इदानीम् अद्यापि, सहसा अनालोचितं यथा तथा, एतयोस्सख्योः, निवेदितुं ज्ञापयितुं न शक्नोमि समर्था न भवामि।

प्रियंवदा - सखि शकुन्तले! सुष्ठ्वेषा भणति। किमात्मन आतङ्कमुपेक्षसे। अनुदिवसं खलु परिहीयसेऽङ्गैः। केवलं लावण्यमयी छाया त्वां न मुञ्चति॥

---

50 'अनुसूयामपि अनुगतो मदीयस्तर्कः। न हि स्वाभिप्रायेण मे दर्शनम्।' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

51 'बलवान्खलु' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

52 'इदानीमपि' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

53 'एतयोरपि सहसा न श.......।' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रियंवदेति। हे सखि शकुन्तले, एषा अनसूया, सष्ठु अनुकूलं भणति भाषते, आत्मनः स्वस्य, आतङ्कं तापं, किं केन हेतुना, उपेक्षसे नाद्रियसे, अनुदिवसं प्रतिदिनं, अङ्गैः अवयवैः परिहीयसे क्षीयसे खलु, त्वां लावण्यमयी सौन्दर्यप्रचुरा छाया, केवलं कान्तिरेव न मुञ्चति न त्यजति, लावण्यलक्षणं तु, "मुक्ताफलेषु छायायातरलत्वमिवान्तरा, प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते।" इति

राजा - [54]अवितथमाह प्रियंवदा। तथाहि।

श्लो॥ क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा[55]।
शोच्या च प्रियदर्शना च [56]मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी॥11॥

राजेति। प्रियंवदा नाम सखी अवितथमाह सत्यमुक्तवती, तथा हि तदेवोपपादयति, क्षामक्षामेति, आननं मुखं, क्षामक्षामकपोलं क्षामक्षामौ अतिपरिक्षीणौ कपोलौ गण्डौ यस्य तत्तथोक्तम्, कपोलयोस्स्वाभाविकी क्षामता इदानीं विरहक्लेशेनातिशयत इत्यर्थः, उरः वक्षस्थलं, काठिन्यमुक्तस्तनं काठिन्येन कार्कश्येन मुक्तौ त्यक्तौ स्तनौ पयोधरौ यस्यतत्तथोक्तम्, मध्यः अवलग्नं, क्लान्ततरः अतीवकृश इत्यर्थः, अंसौ स्कन्धप्रदेशौ, प्रकामविनतौ स्तनभारात्पूर्वमेव नतौ इदानीमतीव नतावित्यर्थः, छविः द्युतिः, पाण्डुरा सितवर्णा, मदनक्लिष्टा मन्मथपीडिता, इयं शकुन्तला, शोच्या एतादृश परिपुष्टावयवानामेवं क्षामत्वाच्छोचनीया च, प्रियदर्शनाक्षामत्वेऽपि लावण्यसद्भावात्,

---

54 एषः पाठः 'C' इति प्रकाशने नोपलभ्यते।

55 'पाण्डरा' इति 'A' इति प्रकाशने पाठान्तरम्।

56 'मदनग्लानोयमालक्ष्यते' इति 'A' इति प्रकाशने पाठान्तरम्।
'म्लानेय' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

स्वविषयानुरागजनितक्षामतादिमत्त्वेन च मनोज्ञदर्शना अत एव पत्राणां पर्णाणां, शोषणेन म्लानतापादकेन, मरुता वायुना, स्पृष्टा सम्बद्धा, माधवीयूथिकालतेव, आलक्ष्यते दृश्यते मयेति शेषः।

शकुन्तला – सखि! कस्य वान्यस्य कथयिष्यामि। किन्तु[57] आयासयित्रीदानीं[58] वां भविष्यामि॥

शकुन्तलेति। हे सखि अन्यस्य परस्य, कस्य वा जनस्य, कथयिष्यामि निवेदयिष्यामि, किन्तु परन्तु, इदानीमद्य, वां युवयोः, आयासयित्री श्रमसम्पादिनी, भविष्यामि श्रमं करिष्यामीति भावः।

उभे - अत एव खलु निर्बन्धः। स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति।।

उभे इति।। उभे अनसूयाप्रियम्वदे, आहतुः, किमिति अत एव हेतोः निर्बन्धः प्रतिबन्धः खलु, स्निग्धजनसम्विभक्तं मित्रजनेन सहानुभूतं, दुःखं व्यथा, सह्यवेदनम्, अनुभवशक्यपीडं भवति हि, प्रियजनेन सहानुभूयमानं दुःखं न वेदनावहमिति भावः।

राजा –

श्लो॥ पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम्।
दृष्टो [59]विवृत्य बहुशोऽप्यनया सतृष्ण-
[60]मत्रान्तरे श्रवणकातरतां गतोऽस्मि॥12॥

---

[57] 'किन्तु' इत्ययं पाठः 'A' इति प्रकाशने नोपलभ्यते।

[58] 'आयासयितृकेदानीं' इति 'C' इति प्रकाशने पाठान्तरम्।

[59] 'निवृत्य' इति 'A' इति प्रकाशने पाठान्तरम्।

[60] 'अत्रोतत्रश्र...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

राजेति। इयं बाला शकुन्तला, समदुःखसुखेन समे सुखदःखे यस्य तेन, जनेन सखीजनेन, पृष्टा प्रश्नं कृता, आधिहेतुं मानसव्यथाजनकं, मनोरथं अभिलाषं, न वक्ष्यतीति न किन्तु वक्ष्यत्येवेत्यर्थः, अनया प्रियया, नेत्रे विवृत्य परावृत्य, सतृष्णं साभिलाषं, बहुशः अनेकवारं, दृष्टः प्रेक्षितोऽस्मि, अत्रान्तरे प्रश्नोत्तरसमये, श्रवणकातरताम् आकर्णनभीरुत्वं, गतः प्राप्तोऽस्मि, किं वा वदिष्यतीति भीत इत्यर्थः॥

शकुन्तला - सखि। यतः प्रभृति मम दर्शनपथमागतस्स तपोवनरक्षिता राजर्षिः। [61](इत्यर्धोक्तेन लज्जां नाटयति)

शकुन्तलेति। हे सखि यतः प्रभृति यस्मादारभ्य, तपोवनरक्षिता आश्रमपरिपालकः, स राजर्षिः दुष्यन्तः, दर्शनपथं दृष्टिमार्गम्, आगतः प्राप्तः, इति एवं प्रकारेण, अर्धोक्तेन वाक्यार्धभागोच्चारणेन लज्जां व्रीडां, नाटयति अभिनयति।

उभे - कथयतु प्रियसखी॥[62]

उभे इति। प्रियसखि प्रेमास्पदीभूता सहचरी, कथयतु स्वाभिप्रायं प्रकटयत्विति विधौ लोट्।

शकुन्तला - ततः [63]प्रभृति तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता॥

शकुन्तलेति। ततः प्रभृति राजदर्शनादारभ्य, तद्गतेन अभिलाषेण मनोरथेन, एतदवस्था एतादृशप्रकारा, संवृत्ता तदा प्रभृति विरहपीडिता जातेत्याशयः।

---

61 '(इत्यर्धोक्तेन लज्जां नाटयति)' इत्येषः अधिकः पाठः 'A' इति प्रकाशने नोपलभ्यते। 'इत्यर्धोक्ते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

62 'कथयतु प्रियसखी' इत्येषः अधिकः पाठः 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।

63 'आरभ्य तद्गतेनाभि....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'आरभ्य' इति 'C' इति प्रकाशने पाठान्तरम्।

राजा – (सहर्षम्) श्रुतं [64]श्रोतव्यम्।

श्लो॥ स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः।
दिवस [65]इवाभ्रश्यामस्तपात्यये जीवलोकस्य॥13॥

राजेति। सहर्षं ससन्तोषं, श्रोतव्यं श्राव्यं, श्रुतम् आकर्णितं, स्मर एवेत्यादि, स्मरो मन्मथ एव, तापहेतुः सन्तापकारणं, स मन्मथ एव, निर्वापयिता सौख्यापादकः मे मम, जातस्संवृत्तः अस्मिन्नर्थे दृष्टान्तमाह दिवस इति तपात्यये ग्रीष्मावसाने, जीवलोकस्य प्राणिसङ्घस्य, अभ्रश्यामोमेघश्यामलः, दिवसो वासर इव भवतीति शेषः, सोऽपि प्रथमम् आतपेन तापमुत्पाद्य अनन्तरं वृष्ट्या तुष्ट्यापादको भवति।

शकुन्तला - तद्यदि वामनुमतं तथा वर्तेथां यथा तस्य राजर्षेरनुकम्पनीया भवामि। [66]अन्यथावश्यं [67]सिञ्चितं मे [68]उदकम्॥

शकुन्तलेति। तत् दुष्यन्तविषयकाभिलषितं, वां युवयोः, अनुमतं यदि अभीष्टं चेत्, तथा तेन प्रकारेण, वर्तेथाम् तिष्ठतं, दृढतरयत्नेन मयि जीवितं धारयेथामिति भावः, तस्य राजर्षेर्दुष्यन्तस्य, यथा येन प्रकारेण, अनुकम्पनीया दयनीया, भवामि तथेति पूर्वेणान्वयः, अन्यथा तथा नो चेत्, मे मम, उदकं जलं, अवश्यं भृशं, सिञ्चितं क्षरितम्, अञ्जलिपुटेन त्यजतमिति भावः।

राजा - [69]संशयच्छेदिवचनम्॥

---

[64] 'यच्छ्रोतव्यम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'यत् श्रोतव्यम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[65] 'इवार्धश्यामस्तपात्यते' इति 'A' इति प्रकाशने पाठान्तरम्।

[66] 'अन्यथा' इत्येव पाठः 'C' इति प्रकाशने उपलभ्यते।

[67] 'सिञ्चत मे तिलोदकम्' इति 'B' इति प्रकाशने पाठान्तरम्।

[68] 'तिलोदकम्' इति 'A' इति प्रकाशने पाठान्तरम्।

राजेति। वचनं शकुन्तलावाक्यम्, संशयच्छेदि सन्देहापनोदकम्।

प्रियंवदा - (जनान्तिकम्) अनसूये! दूरगतमन्मथाक्षमेयं कालहरणस्य। यस्मिन्बद्धभावैषा। स ललामभूतः पौरवाणाम्। [70]तद्युक्तमस्या अभिलाषोऽभिनन्दितुम्॥

प्रियंवदेति। जनान्तिकम् अनसूयामात्रविज्ञातं यथा तथा प्राह- किमिति, हे अनसूये इयं शकुन्तला, दूरगतमन्मथा अत्यर्थमन्मथावस्था मदनावस्था सुबह्वोऽतीता इति भावः, अत एव कालहरणस्य कालविलम्बस्य, अक्षया अर्हा, यस्मिन्पुरुषे, एषा बद्धभावा आसक्तचित्ता, स पुरुषः, पौरवाणां पुरुवंश्यानां राज्ञाम्, ललामभूतः भूषणतुल्यः, नि। "ललामम्पुच्छपुण्ड्राश्वभूषा प्राधान्यकेतुष्" इति विश्वः, तत्तस्मात्, अस्याः शकुन्तलायाः, अभिलाषः मनोरथः, अभिनन्दितुं श्लाघयितुं युक्तम्।।

अनसूया - तथा। यथा भणसि॥

अनसूयेति। हे सखि त्वं यथा भणसि वदसि, तत्तथा तेनैव प्रकारेणेत्यर्थः।

[71]प्रियंवदा - (प्रकाशम्) सखि। दिष्ट्या। [72]अनुरूपोऽस्या अभिनिवेशः। सागरं [73]वर्जयित्वा कुत्र वा महानद्यवतरति। क इदानीं सहकारमन्तरेणातिमुक्तलतां [74]पल्लवितां सहते[75]॥

---

69 'विमर्शच्छेदि' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

70 'तद्युक्तोऽस्या' इति 'A' इति प्रकाशने पाठान्तरम्।
'तस्माद्युक्तमस्या' इति 'C' इति प्रकाशने पाठान्तरम्।

71 सखि इत्यारभ्य महानद्यवतरति इति पर्यन्तं अनसूयायाः वाक्यमिति 'C' इति प्रकाशने उपलभ्यते।

72 'अनुरूपस्तेऽभिनिवेशः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

73 'उज्झित्वा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

74 'पल्लवितां' इत्येषः अधिकः पाठः 'A' इति प्रकाशने नोपलभ्यते।

प्रियंवदेति। हे सखि दिष्ट्या देववशेन, अस्याश्शकुन्तलायाः, अभिनिवेशः अनुरागोत्कर्षः, अनुरूपः युक्तः, महाकुलीनराजर्षिविषयकतया योग्य इत्यर्थः, महानदी उत्कृष्टनिम्नगा, सागरं समुद्रं, वर्जयित्वा त्यक्त्वा, कुत्र वा कस्मिन्वा प्रदेशे, अवतरति प्रविशति, इदानीमद्य, सहकारमन्तरेण रसालवृक्षं विना नि। "रसालोसौ सहकारोऽतिसौरभ" इत्यमरः। सू। 'अन्तरान्तरेण युक्त' इति द्वितीया, कः को वा वृक्षः, अतिमुक्तलतां माधवीवल्लीं, पल्लवितां सञ्जातपल्लवां सतीं, सहते वोढुं शक्नोति न कोऽपि सहत इत्यर्थः।

राजा - किमत्र चित्रम्। यदि विशाखे शशाङ्कलेखामनुवर्तेते॥

राजेति। विशाखे विशाखानक्षत्रे, शशाङ्कलेखां चन्द्रकलाम्, अनुवर्तेते अनुसरतो यदि, अत्र अस्मिन्नर्थे किं चित्रं न किमपि इत्यर्थः। नक्षत्राणां चन्द्रानुसरणस्य स्वाभाविकत्वादित्याशयः।।

अनसूया - कः पुनरुपायो भवेत् येनाविलम्बितं निभृतं च [76]सख्या मनोरथं सम्पादयावः॥

अनसूयेति। येनोपायेन। अविलम्बितं शीघ्रं, निभृतं गूढं यथा तथा, सख्याश्शकुन्तलायाः, कः पुनः को वा भवेत्, केनोपायेनोभयोस्सङ्घटनं करिष्याव इत्याशयः।

प्रियंवदा - निभृतमिति चिन्तनीयं[77] भवेत्। शीघ्रमिति सुकरम्॥

प्रियंवदेति। निभृतमित्यनेन चिन्तनीयमालोचनीयं भवेत्, शीघ्रमित्यनेन सुकरं सुखेन करणीयं भवेत्।

अनसूया - कथमिव॥

---

75 'अर्हीति' इति 'C' इति प्रकाशने पाठान्तरम्।
76 'सखीमनोरथं' इति 'C' इति प्रकाशने पाठान्तरम्।
77 'चिन्ता' इति 'C' इति प्रकाशने पाठान्तरम्।

अनसूयेति। कथमिव पूर्वोक्तवाक्यार्थद्वयं कथं सम्भवतीति भावः।

प्रियंवदा - ननु स[78] राजर्षिरस्यां स्निग्धदृष्ट्या सूचिताभिलाष [79]इमानि दिवसानि प्रजागरकृशो लक्ष्यते॥

प्रियंवदेति। सराजर्षिर्दुष्यन्तः, अस्यां शकुन्तलायां, स्निग्धदृष्ट्या प्रेमयुक्तदर्शनेन, सूचिताभिलाषः प्रदर्शितकामस्सन्, इमानि दिवसानि एषु दिनेष्वित्यर्थः सू। 'कालाध्वनोरत्यन्तसंयोग' इति द्वितीया, प्रजागरकृशः प्रजागरेण निद्राभावेन कृशः क्षीणस्सन्, लक्ष्यते दृश्यते, ननु विरहवेदनया कृशस्तिष्ठतीति भावः।

राजा – [80](आत्मानमवलोक्य) सत्यमित्थम्भूत एवास्मि। तथा हि।

श्लो॥ [81]इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्ग[82]प्रवर्तिभिरश्रुभिः।
[83]अनतिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते॥14॥

राजेति। राजा प्राह, किमिति, सत्यं तथ्यं, इत्थं भूतः एवं प्रकारं प्राप्तः, अस्मि भवामि, विरहकार्श्यमेवोपपादयति तथाहीत्यादिना, अन्तस्तापात् आधिहेतुकमनस्सन्तापात्, अशिशिरैः उष्णैः, निशि निशि रात्रौ रात्रौ,

---

78 'एष' इति 'C' इति प्रकाशने पाठान्तरम्।

79 'एतान् दिवसान्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

80 '(आत्मानमवलोक्य)' इत्येषः पाठः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

81 'अतिशिशिरतैरन्तस्तापैर्विवर्ण' इति पाठान्तरमुपलभ्यते इति 'A''B' इति प्रकाशनयोः निर्दिष्टम्।

82 'प्रसारिभिः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

83 'अनभिलुलित' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

भुजन्यस्तापाङ्गप्रवर्तिभिः भुजयोर्न्यस्ताभ्यां अपाङ्गाभ्यां प्रवर्तन्ते स्रवन्तीति तथोक्तैः अश्रुभिः नेत्रजलैः, विवर्णमणीकृतं विवर्णाः विकृतवर्णाः मणयो रत्नानि यस्मिन्तत्तथाभूतं कृतं, अनतिलुलितज्याघाताङ्कम् अनत्यन्तपीडितमौर्वीकिणाङ्कं, मणिबन्धनात् प्रकोष्ठप्रदेशात्, स्रस्तं स्रस्तं गलितं गलितम् इदं कनकलयं हाटककटकं, मया महुरनुपदं, प्रतिसार्यते प्रतिकूलमूर्ध्वं नीयते, एतेन पञ्चमी मदनावस्थोक्ता।

प्रियंवदा - (विचिन्त्य) हला। मदनलेखोऽस्य क्रियताम्। [84]इमं [85]देवताशेषापदेशेन सुमनोगोपितं कृत्वा [86]अस्य हस्तं प्रापयिष्यामि॥

प्रियंवदेति। विचिन्त्य पर्यालोच्य। हला सखि, अस्य राज्ञः, मदनलेखः मन्मथपत्रिका, क्रियतां विरच्च्यताम्, इमं मदनलेखं, सुमनोगोपितं पुष्पनिगूहितं कृत्वा, देवताशेषापदेशेन देव प्रसादव्याजेन, अस्य राज्ञः, हस्तं पाणिं, प्रापयिष्यामि गमयिष्यामि।

अनसूया - रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति॥

अनसूयेति। सुकुमारः प्रयासरहितः, प्रयोगः लेखिकाप्रेषणं, मे मह्यं, रोचते प्रीतिजनको भवति, सू। 'रुच्यर्थानां प्रीयमाण' इति सम्प्रदानत्वाच्चतुर्थी, शकुन्तला किं वा कथं वा। वक्ष्यति कथयिष्यति।

शकुन्तला - सखी नियोगोऽपि विकल्प्यते[87]॥

---

84 'तं सुमनोगोपितं कृत्वा ...' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

85 'देवप्रसादस्यापदेशेन' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

86 'तस्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'तस्य राज्ञो' इति 'C' इति प्रकाशने पाठान्तरम्।

87 'को नियोगो विकल्प्यते' इति 'A' इति प्रकाशने पाठान्तरम्।
'किं नियोगो विकल्प्यते' इति 'B' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। सखीनियोगोऽपि प्रियसहचर्याज्ञापि, विकल्प्यते अन्यथासम्भाव्यते, किं न सम्भाव्यत एवेत्यर्थः।

प्रियंवदा - तेन ह्यात्मन उपन्यासपूर्वं चिन्तय [88]तावत्किमपि ललितपदबन्धनम्॥

प्रियंवदेति। तेन हेतुना, आत्मनस्स्वस्य, उपन्यासपूर्वं वाङ्मुखपुरस्सरं, किमपि भवदिष्टानुसारि, ललितपदबन्धनम् कोमलवागुम्फनं, तावदिदानीं चिन्तय अनुसन्धेहि, हि प्रसिद्धौ।

शकुन्तला - हला। [89]चिन्तयाम्यहम्। अवधीरणभीरुकं पुनर्वेपते मे हृदयम्॥

शकुन्तलेति। हला सखि, अहं चिन्तयामि पर्यालोचयामि, ललितपदबन्धनमित्यनुषज्यते, मे मम, हृदयं पुनः चित्तन्तु, अवधीरणभीरुकं राज्ञा बहुवल्लभतया आश्रमवासिनीं मामवधीरयतीति भीतं सत्, वेपते सङ्कोचे कम्पते।

राजा - (सहर्षम्[90])

श्लो॥ अयं स ते तिष्ठति सङ्गमोत्सुको
विशङ्कसे भीरु यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा [91]श्रियं
श्रिया दुरापः कथमीप्सितो भवेत्॥15॥

'किं नियोगो वां विकल्प्यते' इति 'C' इति प्रकाशने पाठान्तरम्।

88 'तावत्' इत्येव पाठः 'A' प्रकाशने दृश्यते।

89 'चिन्तयामि। किन्त्वधीरणा.....पुनर्वे.... ' 'C' इति प्रकाशने पाठान्तरम्।

90 'आत्मगतम्' इति 'C' इति प्रकाशने पाठान्तरम्।

91 'श्रियो' इति 'A' इति प्रकाशने पाठान्तरम्।

राजेति। सहर्षं सन्तोषसहितम्, आह- अयमिति, हे भीरु भयशीले, यतः यस्मात्। अवधीरणां न्यक्कारं, विशङ्कसे विशेषेण तर्कयसि, अयं स राजा, ते तव, सङ्गमोत्सुकः सङ्गमे सङ्घटनोत्कण्ठितस्सन्, तिष्ठति वर्तते तथा हि, प्रार्थयिता प्रार्थको जनः, श्रियं सम्पदं, लभेत प्राप्नुयाद्वा, न वा न प्राप्नुयाद्वा, श्रिया सम्पदा ईप्सितः आप्तुमिष्टः जनः, दुरापः प्राप्तुमशक्याः कथं भवेत् केन प्रकारेण स्यात् न कथमपि स्यादिति भावः। "न रत्नमन्विष्यति मृग्यते हि त"दिति न्यायादिति भावः।

[92]सख्यौ - अयि आत्मगुणावमानिनि। [93]क इदानीं शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति॥

सख्याविति। अयि आत्मगुणावमानिनि स्वसौन्दर्यावमाननशीले हे शकुन्तले, इदानीमद्य, शरीरनिर्वापयित्रीं देहतापशान्तिकारिणीं, शारदीं ज्योत्स्नां चन्द्रिकां, पटान्तेन चेलाञ्चलेन, को जनः वारयति परिहरति।

शकुन्तला - (सस्मितम्) नियोजितेदानीमस्मि। (इत्युपविष्टा चिन्तयति)

शकुन्तलेति। सस्मितं मन्दहासयुक्तम्, इदानीमद्य, नियोजिता आज्ञप्तास्मि युवाभ्यामिति शेषः, इत्युक्त्वा उपविष्टा निषण्णा सती, चिन्तयति पर्यालोचयति पदबन्धमिति शेषः।

राजा – स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि। [94]यतः -

श्लो॥ उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
[95]कण्टकितेन प्रथयति मय्यनुरागं कपोलेन॥16॥

---

92 'प्रियंवादा' इति 'C' इति प्रकाशने पाठान्तरम्।

93 'को वेदानीं.....र्वापयितृकां ......निवारयिष्यति?' इति 'C' इति प्रकाशने पाठान्तरम्।

94 'तथाहि' इति 'C' इति प्रकाशने पाठान्तरम्।

95 'पुलकाचितेन कथयति' इति 'A' इति प्रकाशने पाठान्तरम्।

राजेति। विस्मृतनिमेषेण परिहृतपक्ष्माधःपातेन चक्षुषा नेत्रेण नेत्राभ्यामित्यर्थः, जातावेकवचनं, प्रियां शकुन्तलाम्, अवलोकयामि पश्यामि, स्थाने खलु युक्तमेव, नि॥ "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः। यतः यस्मात्, उन्नमितेति, पदानि सुप्तिङन्तानि, रचयन्त्याः ग्रथयन्त्याः, अस्याः शकुन्तलायाः, उन्नमितैकभ्रूलतम् ऊर्ध्वप्रसारितैकभ्रूवल्लि, आननं मुखं, कण्टकितेन, कपोलेन गण्डस्थलेन, मयि विषये अनुरागं प्रेम, प्रथयति प्रकाशयतीत्यर्थः।

शकुन्तला - हला। चिन्तिता मया गीतिका[96]। [97]न खलु सन्निहितानि पुनर्लेखनसाधनानि॥

शकुन्तलेति। हला सख्यौ, मया गीतिका पद्यविशेषः, चिन्तिता आलोचिता, लेखनसाधनानि लेखिनीवर्त्यादीनि तु, न सन्निहितानि नासन्नानि।

प्रियंवदा - [98]अस्मिन् शुकोदर सुकुमारे नलिनीपत्रे नखैर्निक्षिप्तवर्णं कुरु॥

प्रियंवदेति। शुकोदरसुकुमारे कीरगर्भकोमले, अस्मिन्पुरोवर्तिनि नलिनीपत्रे पद्मिनीदले, नखैः कररुहैः, निक्षिप्तवर्णं लिखिताक्षरं, कुरु पदबन्धमिति शेषः।

शकुन्तला - (यथोक्तं रूपयित्वा) हला। श्रृणुतमिदानीं [99]सङ्गतार्थं न वेति॥

शकुन्तलेति। यथोक्तं सखीभ्यामिति शेषः। रूपयित्वा अभिनीय,हला सख्यौ, इदानीमद्य, सङ्गतार्थं सम्बद्धाभिधेयं वा, न वा, शृणुतमाकर्णयतम्।

उभे – अवहिते स्वः॥

---

96 'हला, चिन्तितं मया गीतवस्तु' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'सख्यौ! चिन्तिता मया गीतिः' इति 'C' इति प्रकाशने पाठान्तरम्।

97 'असन्निहितानि' इति 'B' इति प्रकाशने पाठान्तरम्।

98 'एतस्मिन्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

99 'सङ्गतार्थां' इति 'C' इति प्रकाशने पाठान्तरम्।

उभे इति। अवहिते अप्रमत्ते, स्वः भवावः।

शकुन्तला - (वाचयति)

श्लो॥ तव न जाने हृदयं मम
पुनः [100]कामो दिवापि [101]रात्रिमपि।
निर्घृण तपति [102]बलीयस्त्वयि
वृत्तमनोरथान्यङ्गानि[103] ॥17॥

शकुन्तलेति। वाचयति पठति, स्वरचितपदबन्धनमिति शेषः, तत्प्रकारमाह, तवेत्यादि, हे निर्घृण दयाविहीन, तव हृदयं मनः, न जाने न वेद्मि, मम पुनः मम तु हृदयमिति सम्बध्यते, कामः मन्मथः, त्वयि विषये वृत्तमनोरथानि प्रवर्तिताभिलाषानि, अङ्गान्यवयवान् मुखस्तनजघनादीन्, दिवा दिवसेपि, रात्रिं रात्रावपि, अत्यन्तसंयोगे द्वितीया, बलीयः बलवत्तरं, तपति पीडयति, मां यथा बाधते तथा त्वां न बाधत इत्यर्थः।

राजा - सहसोपसृत्य।

श्लो॥ तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥18॥

राजेति। राजा सहसा अतर्कितमेव उपसृत्य समीपं प्राप्य, आह किमिति, तपतीत्यादि, हे तनुगात्रि कृशाङ्गि, मदनः मन्मथः, त्वाम् अनिशं सर्वदा, तपति तापं करोति, मां पुनः मां तु, दहत्येव अतीव सन्तापयतीत्यर्थः, एतदेव दृष्टान्तेन

---

100 'मदनो' इति 'C' इति प्रकाशने पाठान्तरम्।
101 'रात्रावपि' इति 'B' इति प्रकाशने पाठान्तरम्।
102 'बलवत्वयि' इति 'C' इति प्रकाशने पाठान्तरम्।
103 'मनोरथाया अङ्गानि' इति 'B' इति प्रकाशने पाठान्तरम्।
'मुक्तमनोरथान्यङ्गानि' इति 'C' इति प्रकाशने पाठान्तरम्।

स्फुटयति, ग्लपयतीति, दिवसः वासरः, शशाङ्कं चन्द्रं, यथा येन प्रकारेण, ग्लपयति म्लापयति, तथा तेन प्रकारेण, कुमुद्वतीं कुमुदिनीं, न ग्लपयति हि न बाधते हि।

सख्यौ - ([104]विलोक्य सहर्षमुत्थाय) स्वागतमविलम्बिनो मनोरथस्य॥

सख्याविति। सख्यौ सहचर्यौ, विलोक्य दृष्ट्वा, राजानमिति शेषः, सहर्षं ससन्तोषमुत्थाय उद्गम्य, अविलम्बिनः शीघ्रमुपनतस्य, मनोरथस्य अभिलाषस्य, स्वागतं शोभनमागमनम्, अत्र मनोरथशब्देन तद्विषयो राजा सूच्यते।

शकुन्तला - (अभ्युत्थातुमिच्छति)

शकुन्तलेति। शकुन्तला अभ्युत्थातुं प्रत्युत्थानं कर्तुम् इच्छति।

राजा - अलमलमायासेन।

श्लो॥ सन्दष्टकुसुमशयनान्याशुक्लान्तबिसभङ्गसुरभीणि[105]।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति॥19॥

राजेति। आयासेन प्रत्युत्थानप्रयुक्तप्रयासेन, अलमलं मास्तु आयासो न कर्तव्य इत्यर्थः, नि। "अलं भूषणपर्याप्ति शक्तिवारणवाचक"मित्यमरः। तथाहि, सन्दष्टेति, सन्दष्टकुसुमशयनानि संसक्तपुष्पास्तरणानि, आशु शीघ्रं, क्रियाविशेषणमेतत्, क्लान्तबिसभङ्गसुरभीणि म्लानमृणालखण्डसौरभ्यवन्ति, गुरुपरितापानि दुर्भरविरहवेदनानि, ते तव, गात्राणि करचरणादीनि, उपचारं सेवां प्रति नार्हन्ति न युज्यन्ते, अतो न प्रत्युत्थानं कर्तव्यमित्यर्थः।

अनसूया - इतश्शिलातलैकदेशम् [106]अनुगृह्णातु वयस्यः॥

---

104 '(अवलोक्य सहर्षम्)' इति 'A' इति प्रकाशने पाठान्तरम्।

105 'आशुविमर्दित (विवर्णित), मृणालवलयानि' इति पाठान्तराण्युपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

106 'अलङ्करोतु' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

अनसूयेति। इतः अत्र विद्यमानं, शिलातलैकदेशं, शिलातलस्य पाषाणप्रदेशस्य, एकदेशम् एकभागं, वयस्यस्सखा, अनुगृह्णातु सम्भावयतु शिलातले उपविशेत्यर्थः।

राजा - (उपविशति)

शकुन्तला - (सलज्जा[107] तिष्ठति)

राजेति। राजा उपविशति निषीदति, शकुन्तला सलज्जा व्रीडायुता, तिष्ठति वर्तते।

प्रियंवदा - द्वयोरपि युवयोरन्योन्यानुरागः प्रत्यक्षः। सखीस्नेहः [108]पुनर्मां पुनरुक्तवादिनीं करोति॥

प्रियंवदेति। युवयोर्द्वयोरपि शकुन्तलायास्तव चेत्यर्थः, अन्योऽन्यानुरागः परस्परविषयाभिलाषः, प्रत्यक्षः सर्वैर्विदित एव, सखीस्नेहः पुनः शकुन्तलायां प्रवृत्तस्नेहस्तु, मां पुनरुक्तवादिनीं द्विरुक्तभाषिणीं, करोति कुरुते।

राजा - भद्रे। नैतत्परिहार्यम्। विवक्षितं ह्यनुक्तमनुतापं जनयति॥

राजेति। हे भद्रे कल्याणि, एतत्त्वयोक्तं, न परिहार्यं नाग्रहणयोग्यं, किं तु ग्राह्यमेवेत्यर्थः, विवक्षितं वक्तुमिष्टं वाक्यं, अनुक्तम् अभाषितं सत्, अनुतापं पश्चात्तापं, नि। "पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि" इत्यमरः।। जनयति उत्पादयति।

प्रियंवदा - आपन्नस्य [109]विषयवासिनो जनस्यार्तिहरेण राज्ञा भवितव्यमित्येव[110] [111]वो धर्मः॥

---

107 'सलज्जं' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

108 'मां' इति 'A' 'C' इति प्रकाशनयोःपाठान्तरम्।

109 'निवासिनो' इति 'B' इति प्रकाशने पाठान्तरम्।

प्रियंवदेति। आपन्नस्य विपद्युतस्य, विषयवासिनः स्वदेशस्थितस्य, जनस्य नरस्य, आर्तिहरेण दुःखहारिणा, राज्ञा पृथिवीपतिना, भवितव्यं भाव्यम्, इत्यनेनैव प्रकारेण, वः युष्माकं, धर्मः न्यायः।

राजा - नास्मात्परम्[112] ॥

राजेति। अस्मात् आपन्नार्तिप्रशमनात्, परम् उत्कृष्टं, नास्ति न भवति।

[113]प्रियंवदा - तेन हीयमावयोः प्रियसखी त्वामुद्दिश्येदमवस्थान्तरं भगवता [114]मदनेनारोपिता। तदर्हस्यभ्युपपत्त्या जीवितम् [115]अस्या अवलम्बितुम्॥

प्रियंवदेति। तेन आर्तत्राणस्य उत्कृष्टधर्मत्वेन हेतुना, इयं पुरस्थिता आवयोः मम अनसूयायाश्चेत्युभयोः, प्रियसखी प्रियसहचरी, त्वां भवन्तमुद्दिश्य अभिसन्धाय, भगवता शक्तिसम्पन्नेन, मदनेन कामेन, इदमनुभूयमानम्, अवस्थान्तरं दशाविकारम्, आरोपिता प्रापिता, तत्तस्मात्, अभ्युपपत्त्या अनुग्रहेण, अस्याश्शकुन्तलायाः,जीवितं जीवनम्, अवलम्बितुं धारयितुम्, आर्हसि समर्थोऽसि।

राजा - भद्रे। साधारणोऽयं[116] प्रणयः। सर्वथानुगृहीतोऽस्मि॥

---

110 'भवितव्यमित्येष' इति 'B' इति प्रकाशने पाठान्तरम्।
'भवितव्यमिति' इति 'C' इति प्रकाशने पाठान्तरम्।

111 'युष्माकं' इति 'A' इति प्रकाशने पाठान्तरम्।
'नन्वेष वो...' इति 'C' इति प्रकाशने पाठान्तरम्।

112 'अस्मात्परं किं तत्?' इति 'A' इति प्रकाशने पाठान्तरम्।

113 अनसूयायाः वाक्यमिदम् इति 'B' इति प्रकाशने पाठान्तरेत्वेन लभ्यते इति निर्दिष्टम्।

114 'मन्मथेन' इति 'C' इति प्रकाशने पाठान्तरम्।

115 'तस्याः' इति 'A' इति प्रकाशने पाठान्तरम्।

राजेति। भद्रे मङ्गलशीले, अयं प्रणयः प्रार्थना, साधारणः ममापि तुल्य एव, सर्वथा समस्तप्रकारैः, अनुगृहीतः अङ्गीकृतोऽस्मि।

शकुन्तला – (प्रियंवदामवलोक्य[117]) हला। किमन्तःपुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन॥

शकुन्तलेति। शकुन्तला प्रियंवदां सखीमवलोक्य दृष्ट्वा, हला सखि, अन्तःपुरविरहपर्युत्सुकस्य अन्तःपुरस्य अवरोधवधूजनस्य विरहेण विश्लेषेण, पर्युत्सुकस्य उत्कण्ठितस्य, राजर्षेः राजश्रेष्ठस्य, उपरोधेन प्रतिबन्धेन, किं प्रयोजनं किमपि प्रयोजनं नास्तीत्यर्थः।

राजा - सुन्दरि![118]

श्लो॥ इदमनन्यपरायणमन्यथा
हृदयसन्निहिते हृदयं मम।
यदि समर्थयसे मदिरेक्षणे
मदनबाणहतोऽस्मि[119] हतः पुनः॥20॥

राजेति। हे हृदयसन्निहिते मनोदेशनिहिते, सुन्दरि सौन्दर्यनिधानभूते शकुन्तले, अनन्यपरायणं भवदेकायत्तं, मम हृदयं मनः, अन्यथा कान्तान्तरानुरक्तत्वेन, समर्थयसे यदि परिशङ्कसे चेत्, हे मदिरेक्षणे लोलाक्षि, अहं मदनबाणहतः मन्मथसायकपीडितोऽपि, पुनर्हतः त्वद्वाक्छरैरिति शेषः।

---

116 'एषः' इति 'A' इति प्रकाशने पाठान्तरम्।

117 'सप्रणयकोपस्मितम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'अनसूयाम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

118 'सुन्दरि' इत्येषः पाठः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

119 'हतोऽपि' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

अनसूया - वयस्य बहुवल्लभा राजानः श्रूयन्ते। यथा नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा [120]निर्वाहय॥

अनसूयेति। हे वयस्य सखे, नि। "स्निग्धोवयस्यस्सवया अथमित्रं सखासुहृत्" इत्यमरः।। राजानः भूनायकाः, बहुवल्लभाः बह्वीषु नायिकासु, वल्लभाः प्रियाः, श्रूयन्ते श्रुता भवन्ति, नौ आवयोः, प्रियसखी यथा येन प्रकारेण, बन्धुजनशोचनीया सम्बन्धिजननिन्दनीया, न भवति न स्यात्, तथा तेन प्रकारेण, निर्वाहय उद्धरस्व।

राजा - भद्रे! किं बहुना।

श्लो॥ परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।
समुद्ररशना[121] चोर्वी सखी च युवयोरियम्॥21॥

राजेति। हे भद्रे कल्याणशीले, किं बहुना बहुनोक्तेन किं प्रयोजनमित्यर्थः, निश्चितमर्थमाह- परिग्रहेति। परिगृह्यन्त इति परिग्रहाः कलत्राणि, नि। "पत्नीपरिजनादानमूलशापाः परिग्रहा" इत्यमरः, तेषां बहुत्वे बाहुल्येऽपि, मे मम, कुलस्य वंशस्य, समुद्ररशना उदधिमेखला, उर्वी महिश्च, इयं पुरोवर्तिनी, युवयोः सखी चेति द्वे उभे एव, प्रतिष्ठे स्थितिकारणीभूते, आयुर्घृतमितिवल्लाक्षणिकोऽयं प्रयोगः। अनेन शकुन्तलापरिग्रहस्य धर्मार्थत्वमेव न तु केवलकामार्थत्वमिति सूच्यते।

उभे - निर्वृते स्वः॥

उभे इति। निर्वृते स्वः आवां सुखितेभवावः, हृष्टे इत्यर्थः।

---

120 'निर्वर्तय' इति 'A' इति प्रकाशने पाठान्तरम्। 'निर्वहस्व' इत 'C' इति प्रकाशने पाठान्तरम्।

121 'समुद्रवसना' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'समुद्ररसना' इति 'B' इति प्रकाशने पाठान्तरम्।

प्रियंवदा – (सदृष्टिक्षेपम्) अनसूये। [122]यथैष इतोदत्तदृष्टिरुत्सुको मृगपोतको मातरमन्विष्यति। एहि। संयोजयाव एनम्॥ (इत्युभे प्रस्थिते)

प्रियंवदेति। सदृष्टिक्षेपं दृग्विभ्रमसहितं यथा तथा, आह किमिति। हे अनसूये उत्सुकः मातुरदर्शनेनोत्कण्ठितः, एष पुरस्थितः, मृगपोतकः कुरङ्गशाबकः इतः अस्मिन्प्रदेशे, दत्तदृष्टिः प्रसारितनयनस्सन्, यथा अनकूलं, मातरं जननीम् अन्विष्यति मृगयते, एनं मृगशिशुं, संयोजयावः सङ्घटयावः मात्रेति शेषः, एहि आगच्छ, इत्युक्त्वा उभे अनसूयाप्रियंवदे, प्रस्थिते निर्गते।

शकुन्तला - हला। अशरणास्मि। अन्यतरा [123]युवयोरागच्छतु॥

शकुन्तलेति। हला सख्यौ, अहम् अशरणा निराश्रया अस्मि, युवयोर्मध्ये अन्यतरा एका, आगच्छतु मत्समीपं प्राप्नोतु।

उभे – पृथिव्या यश्शरणं स तव समीपो[124] वर्तते। (इति निष्क्रान्ते)

उभे इति। यः राजा, पृथिव्याः मेदिन्याः, शरणं रक्षकः, नि। "शरणं गृहरक्षित्रो"रित्यमरः। स राजा, तव समीपे निकटे, वर्तते तिष्ठति, तस्मादशरणा न भवसीति भावः, इत्युक्त्वा निष्क्रान्ते आयाताम्।

शकुन्तला - कथं गते एव॥

शकुन्तलेति। सख्यौ गते निष्क्रान्ते एव, कथं का गतिरित्यर्थः।

---

122 'एषः' इत्येव पाठः 'B' इति प्रकाशने उपलभ्यते।
'एष...इतस्ततो दत्तदृष्टिः पर्युत्सुको ....अन्वेषते। ......एवम्। (इति प्रस्थिते) ' इति 'C' इति प्रकाशने पाठान्तरम्।

123 'वामा...' इति 'C' इति प्रकाशने पाठान्तरम्।

124 'समीपे' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

राजा - अलमावेगेन। नन्वयमाराधयिता जनस्तव समीपे वर्तते।

श्लो॥ किं शीतलैः[125] क्लमविनोदिभिरार्द्रवातान्
[126]सञ्चारयामि नलिनीदलतालवृन्तैः।
अङ्के [127]निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ॥22॥

राजेति। आवेगेन सम्भ्रमेण, अलं मा, सम्भ्रमो न कर्तव्य इत्यर्थः, आराधयिता सेवकः, अयं जनः अहमित्यर्थः, तव समपे सन्निधौ, वर्तते आस्ते ननु, आराधनप्रकारमेवाह। किं शीतलैरिति। शीतलैः जलसम्पर्कादतिशीतैः, क्लमविनोदिभिः क्लेशहारिभिः, नलिनीदलतालवृन्तैः पद्मपत्रव्यजनैः, आर्द्रवातान् जलसम्पर्कात् शीकरयुक्तवायून्, सञ्चारयामि सर्वावयवेषु सम्यक्चालयामि, किं किमिति प्रश्ने, उत अथवा, हे करभोरु करबहिःप्रदेशतुल्यसक्थिप्रदेशे, नि। "मणिबन्धादाकनिष्ठं करस्य करभो बहि"रित्यमरः, अङ्के उत्सङ्गे, निधाय विधाय, पद्मताम्रौ पङ्कजवल्लोहितौ, ते तव, चरणौ पादौ, यथासुखं यथानुकूलं, संवाहयामि सम्यक्सेवां करोमि। सखीव्यापारमहमेव निर्वहामीत्याशयः।

शकुन्तला - न माननीयेष्वात्मानमपराधयिष्यामि[128]॥ (इत्युत्थाय गन्तुमिच्छति[129])

---

125 'शीकरैः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'विमर्दिभिरार्दवातां, सञ्चालयामि, तालवृन्तम्' इति पाठान्तराण्युपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

126 'संवाहयामि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

127 'विधाय' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

128 '.......अपराधयिष्ये' इति 'B' इति प्रकाशने पाठान्तरम्।

129 'प्रस्थिता' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। माननीयेषु पूज्येषु विषये, आत्मानं स्वं, नापराधयिष्यामि अपराधवन्तं न करोमीत्युक्त्वा, उत्थाय उद्गम्य, गन्तुं यातुमिच्छति।

राजा - सुन्दरि! अपरिनिर्वाणो[130] दिवसः। इयं च ते [131]शरीरावस्था॥

श्लो॥ उत्सृज्य कुसुमशयनं नलिनी-
दलकल्पितस्तनावरणम्[132]।
कथमातपे गमिष्यसि
परिबाधापेलवैरङ्गैः[133] ॥23॥

(इति बलादेनां निवर्तयति॥)

राजेति। हे सुन्दरि लावण्यवति, दिवसः वासरः, अपरिनिर्वाणः अप्रशान्ततापः, ते तव, शरीरावस्था कायस्थितिश्च, इयम् ईदृशीमदनतापविशिष्टेत्यर्थः, उत्सृज्येति। नलिनीदलकल्पितस्तनावरणं पद्मदलकृतपयोधराच्छादनं, कुसुमशयनं पुष्पशय्याम्, उत्सृज्य विसृज्य, परिबाधापेलवैः मन्मथपीडापेशलैः, अङ्गैः अवयवैः, आतपे अरुणकिरणप्रकाशे, कथं केनोपायेन, गमिष्यसि सञ्चरिष्यसि। इत्युक्त्वा एनां शकुन्तलां, बलात् हठात्कारेण, निवर्तयति गमनं प्रतिबध्नाति।

शकुन्तला - पौरव! रक्ष विनयम्। [134]मदनसन्तप्तापि न खल्वात्मनः प्रभवामि॥

---

130 'निर्वाणो' इति 'A' इति प्रकाशने पाठान्तरम्।
'अनिर्वाणो' इति 'B' इति प्रकाशने पाठान्तरम्।
'अपरिनिर्वाणोऽयं' इति 'C' इति प्रकाशने पाठान्तरम्।

131 'समवस्था' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

132 'वरणा' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

133 'कोमलैरङ्गैः' इति 'A' इति प्रकाशने पाठान्तरम्।
'पेशलैरङ्गैः' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। हे पौरव पुरुवंशोत्पन्न, विनयं सौशील्यं, रक्ष पालय, अन्यथा तस्य भङ्गस्स्यादिति भावः, अहं मदनसन्तप्ता मारपीडितापि, त्वद्दर्शनेनेति शेषः, आत्मनः स्वस्य, न प्रभवामि न समर्था भवामि खलु, गुरुजनाधीनत्वादिति भावः।

राजा - भीरु। अलं गुरुजनभयेन। [135]दृष्ट्वा ते [136]विदितधर्मा तत्रभवान्नात्र[137] दोषं ग्रहीष्यति कुलपतिः। अपि च[138]।

श्लो॥ गान्धर्वेण विवाहेन बह्व्यो [139]राजर्षिकन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः[140] ॥24॥

राजेति। हे भीरु भयशीले, गुरुजनभयेन पित्रादिसाध्वसेन, अलं मास्तु, न कर्तव्यमित्यर्थः, विदितधर्मा ज्ञाततत्त्वार्थः, तत्रभवान्पूज्यः, कुलपतिः कण्वमुनिः, दृष्ट्वा ज्ञात्वा, ते तव, दोषं स्वतन्त्रवरणरूपप्रत्यवायं, न ग्रहीष्यति नावलम्बते, किन्त्वनुरूपवरसमावेशात्प्रत्युत सन्तुष्यतीति भावः, उक्तमर्थं निदर्शनेन विवृणोति, अपिचेत्यादिना, अपि च किं च, गान्धर्वेण गान्धर्वनाम्ना विवाहेन परिणयेन, परस्परानुरागकृतो विवाहो गान्धर्व इत्युच्यते, तदुक्तम् याज्ञवल्क्येन- "गान्धर्वस्समयान्मिथ" इति। बह्व्यः अनेकाः, राजर्षिकन्यकाः राजश्रेष्ठपुत्रिकाः, परिणीता विवाहिताः, इति श्रूयन्ते आकर्ण्यन्ते, पितृभिः गुरुजनैः, अभिनन्दिताः अनुमोदिताः, अतोऽङ्गीकर्तव्यमिति भावः।

---

134 'मदनहस्तगताप्यात्मनो न प्रभवामि।' इति 'C' इति प्रकाशने पाठान्तरम्।

135 'दृष्ट्वापि' इति 'C' इति प्रकाशने पाठान्तरम्।

136 'गृहीत...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

137 'न तत्र' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

138 'पश्य' इति 'B' इति प्रकाशने पाठान्तरम्।

139 'राजन्य...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

140 'चानुमोदिताः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शकुन्तला - [141]मुञ्च तावन्माम्। भूयोऽपि सखीजनमनुमानयिष्यामि[142] ॥

शकुन्तलेति। तावदिदानीं, मां मुञ्च त्यज, भूयः पुनरपि, सखीजनं सहचरीगणम्, अनुमानयिष्यामि अनुमतं करिष्यामि।

राजा - भवतु। मोक्ष्यामि ॥

राजेति। भवत्वित्यङ्गीकारे, मोक्ष्यामि त्यक्ष्यामि।

शकुन्तला - कदा ॥

शकुन्तलेति। कदा कस्मिन्काले, त्यक्ष्यसीति शेषः।

राजा –

श्लो ॥ अपरिक्षतकोमलस्य [143]ताव-
त्कुसुमस्येव नवस्य षद्पदेन।
अधरस्य पिपासता मया ते
सदयं सुन्दरि! गृह्यते रसोऽस्य ॥ 25 ॥

(इति मुखमस्यास्समुन्नमयितुमिच्छति[144]।)

शकुन्तला – (परिहरति नाट्येन)

राजेति। हे सुन्दरि शोभनशीले, षट्पदेन भ्रमरेण, अपरिक्षतकोमलस्य अनुपहतमृदुलस्य, नवस्य नूतनस्य, कुसुमस्य पुष्पस्येव, अधरस्य अधरोष्ठस्य, पिपासता पातुमास्वादयितुमिच्छता, सदयं सानुकम्पं यथा तथा, यावत् यावता

---

141 'आर्या! मुञ्च माम्' इति 'C' इति प्रकाशने पाठान्तरम्।

142 'अनुमानयिष्ये' इति 'A' 'B' ति प्रकाशनयोः पाठान्तरम्।

143 'यावत्' इति 'B' इति प्रकाशने पाठान्तरम्।

144 '.....तस्याः समुन्नमयितुमिच्छति' इति 'C' इति प्रकाशने पाठान्तरम्।

कालेन, रसो गृह्यते तावत्तदा मोक्ष्यामीति पूर्वेण सम्बन्धः, इत्युक्त्वा अस्याः शकुन्तलायाः, मुखमाननं, समुन्नमयितुमुद्गमयितुं, इच्छति वाञ्छति, शकुन्तलेति। शकुन्तला तस्मिन्नेवं चिकीर्षति सति। नाट्येन नटव्यापारेण, परिहरति निवारयति।

(नेपथ्ये) चक्रवाकवधूके![145] आमन्त्रयस्व सहचरम्॥ उपस्थिता रजनी॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे सखी प्राहेति शेषः, हे चक्रवाकवधूके कोकाङ्गने, सहचरं प्रियम्, आमन्त्रयस्व आपृच्छस्व, रजनी रात्रिः, उपस्थिता प्राप्ता, अनेन गौतम्यागच्छति दुष्यन्तं मुञ्चेति व्यज्यते।

शकुन्तला - (ससम्भ्रमम्)[146] पौरव। असंशयं [147]मम शरीरवृत्तान्तोपलम्भायार्या गौतमी इत एवागच्छति। तावद्विटपान्तरितो भव॥

शकुन्तलेति। ससम्भ्रमं सावेगं, हे पौरव, स्वयं स्वेनैव मम शरीरवृत्तान्तोपलम्भाय देहवार्तापरिज्ञानाय, आर्या पूज्या, गौतमी इतः इमन्देशमेव, आगच्छति आयाति, असंशयं संशयो नास्ति, तावदिदानीं, विटपान्तरितः शाखाच्छादितः, भव एधि।

राजा - तथा। (इत्यात्मानमावृत्य तिष्ठति)

राजेति।। तथा तेन प्रकारेण करोमीति शेषः, इत्युक्त्वा आत्मानं स्वम्, आवृत्य आच्छाद्य, तिष्ठति वर्तते।

(ततः प्रविशति पात्रहस्ता गौतमी[148] सख्यौ च)

---

145 'चक्रवाकवधूः' इति 'A' इति प्रकाशने पाठान्तरम्।

146 '(कर्णं दत्त्वा)' इति 'C' इति प्रकाशने पाठान्तरम्।

147 'स्वयं मम' इति 'C' इति प्रकाशने पाठान्तरम्।

148 'तापसी' इति 'C' इति प्रकाशने पाठान्तरम्।

तत इति। ततोऽनन्तरं, पात्रहस्ता करकलिताक्षतभाजना सती, गौतमी तन्नाम्नी कण्वस्वसा, प्रविशति अधितिष्ठति रङ्गस्थलमिति शेषः, सख्यौ अनसूया प्रियंवदे च, प्रविशतः इति विभक्तिविपरिणामेनान्वयः।

सख्यौ - इत इत [149]आर्या गौतमी॥

सख्याविति। आर्या पूज्या गौतमी, इत इतः इमं प्रदेशं प्रति आगच्छत्विति शेषः।

गौतमी - (शकुन्तलामुपेत्य) जाते! अपि[150] लघुसन्तापानि तेऽङ्गानि॥

गौतमीति। गौतमी शकुन्तलामुपेत्य प्राप्य, प्राह किमिति, हे जाते बाले, ते तव, अङ्गानि अवयवाः, लघुसन्तापान्यपि प्रशमितपरितापानि किम्।

शकुन्तला - [151]आर्ये। अस्ति मे विशेषः॥

शकुन्तलेति। हे आर्ये गौतमि, मे मम, विशेषः परितापातिशयः, अस्ति विद्यते।

गौतमी - अनेन [152]दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति ([153]इति शिरसि शकुन्तलामभ्युक्ष्य)

गौतमीति। अनेन मत्करगतेन, दर्भोदकेन कुशवारिणा, ते तव, शरीरं स्पष्टोऽर्थः, निराबाधं सन्तापरहितं, भविष्यति भवत्येव, इत्युक्त्वा शिरसि मूर्ध्नि, शकुन्तलाम् अभ्युक्ष्य प्रोक्ष्य।

---

149 'इत इत' इत्येव पाठः 'C' इति प्रकाशने उपलभ्यते।

150 'जाते अपि' इत्यस्य स्थाने 'एहि उटजमेव' इति 'A' इति प्रकाशने पाठान्तरम्।

151 'आर्ये' इति सम्बोधनं 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।

152 'मन्त्रित...' इति 'C' इति प्रकाशने पाठान्तरम्।

153 इदं वाक्यं 'A' इति प्रकाशने नोपलभ्यते।

वत्से! परिणतो दिवसः। एहि। उटजमेव गच्छामः। (इति प्रस्थिताः)

हे वत्से मुग्धे, दिवसो वासरः, परिणतः समाप्तः, एहि आगच्छ, उटजं पर्णशालामेव, नि। "पर्णशालोटजोस्त्रिया"मित्यमरः। गच्छामः प्रविशाम इत्यर्थः। इत्युक्त्वा प्रस्थिताः चलिताः।

शकुन्तला - (आत्मगतम्[154]) हृदय प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि। सानुशयविघटितस्य [155]कथं ते साम्प्रतं सन्तापः। (पदान्तरे स्थित्वा प्रकाशम्) लतावलय सन्तापहारक आमन्त्रये त्वां भूयोऽपि परिभोगाय॥[156]

शकुन्तलेत्यादि। शकुन्तला आत्मगतं स्वगतम्, अनेन अत्यन्ताश्राव्यमुच्यते, हे हृदय चित्त, प्रथममादावेव, सुखोपनते अनायाससम्प्राप्ते, मनोरथे अभिलाषे, कातरभावं भीरुत्वं गुरुजनादिति शेषः, न मुञ्चसि न त्यजसि, सानुशयं पश्चात्तापपूर्वकं, विघटितस्य विश्लेषितस्य, ते तव, साम्प्रतमिदानीं, कथं केन प्रकारेण, सन्तापः पीडा भवतीति शेषः अतीतविषये सन्तापो न युक्तमित्यर्थः, पदान्तरे स्थित्वा मध्ये मार्गम् उषित्वा, प्रकाशं सर्वश्राव्यं यथा तथा, आहेति शेषः, हे सन्तापहर श्रमनिवारक, लतावलय वल्लीवेष्टन, त्वां भवन्तम्, आमन्त्रये अनुज्ञादानाय प्रार्थये, भूयः पुनरपि, परिभोगाय सम्भोगायेति पूर्वेणान्वयः।

राजा – (पूर्वस्थानमुपेत्य सनिश्श्वासम्) अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः। मया हि।

---

154 '(स्वगतम्)' इति 'C' इति प्रकाशने पाठान्तरम्।

155 'कथं नु ते साम्प्रतं प्रतीकारः? लतावलय सन्तापहर आमन्त्रयामि भूयोऽपि परिभोगाय' इति 'C' इति प्रकाशने पाठान्तरम्।

156 '(इति दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः)' इति वाक्यं 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

श्लो॥ मुहुरङ्गुलिसंवृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिरामम्।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं [157]तु॥26॥

क्व नु खलु सम्प्रति गच्छामि। अथवा। इहैव प्रियापरिभुक्तमुक्ते [158]लतावलये मुहूर्तं स्थास्यामि। (सर्वतोऽवलोक्य)

श्लो॥ तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
[159]क्लान्ते मन्मथलेख एष नलनीपत्रे नखैरर्पितः।
हस्ताद्भ्रष्टमिदं विसाभरणमित्यासज्य[160]मानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्तोऽस्मि[161] शून्यादपि॥27॥

राजेति। राजा पूर्वस्थानं शकुन्तलासमावेशप्रदेशम्, उपेत्य प्राप्य, सनिश्श्वासं सोच्छ्वासमप्राह, अहो इति प्रार्थितार्थसिद्धयः अभीप्सितकार्यप्राप्तयः, विघ्नवत्यः अनेकान्तरायविशिष्टा, अहो इति स्वप्रतिकूलविधिप्राबल्यं प्रत्याश्चर्यं, तदेवाह- मया हीत्यादिना, मुहुः पुनः, अङ्गुलिसंवृताधरोष्ठम् अङ्गुलीभिः करशाखाभिः संवृतः सम्यगाच्छादितः अधरोष्ठः यत्र तत्तथोक्तं, प्रतिषेधाक्षरविक्लबाभिरामं प्रतिषेधाक्षरैः निषेधवाचकमामेत्याद्यक्षरैः विक्लवं विवशम् अत एव अभिरामं भ्रूभङ्गादिभिरतिरमणीयम्, अंसविवर्ति भुजशिरस्थितं,

---

157 'तत्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

158 'लतामण्टपे' इति 'C' इति प्रकाशने पाठान्तरम्।

159 'क्लान्तो' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

160 'आसज्ज' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

161 'शक्नोमि' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

पक्ष्मलाक्ष्याः सुजातनेत्र्याः, मुखमाननं, कथमपि भूयसाप्रयत्नेन, उन्नमितम् उद्धृतं, न तु चुम्बितं नास्वादितम्।

क्वनु खलु गच्छामि कम्वाप्रदेशं प्राप्नोमि, अथवा, प्रियापरिभुक्तमुक्ते प्रियया शकुन्तलया परिभुक्ते अनुभूते ततो मुक्ते त्यक्ते, इहास्मिन्नेव, लतावलये व्रततिमण्टपे, मुहूर्ते क्षणमात्रं, स्थास्यामि वर्तिष्ये, सर्वतोऽवलोक्य समन्ताद्वीक्ष्य, तस्या इति, शिलायां पाषाणे स्थिता, पुष्पमयी कुसुमास्तृता, इयं शय्या पुरोवर्तिनी शय्या, तस्याश्शकुन्तलायाः, शरीरलुलिता देहसम्मृदिता, क्लान्ते म्लाने, नलिनीपत्रे पद्मपलाशे, एषोऽयं, मन्मथलेखः मदनलेखः, नखैः कररुहैः, अर्पितो लिखितः, इदं बिसाभरणं मृणालवलयं हस्तात् करात्, भ्रष्टं गलितं, इत्युक्त्वा, आसज्यमानेक्षणः समन्ताद्बद्धदृष्टिस्सन्, अहं सहसा शीघ्रं, शून्यात् प्रियारहितादपि, वेतसगृहात् निचुलनिकुञ्जात्, निर्गन्तुं प्रस्थातुं, शक्तस्समर्थो, नास्मि त्यक्तुं न प्रभवामीत्यर्थः।

(आकाशे) राजन्!

श्लो॥ सायन्तने सवनकर्मणि सम्प्रवृत्ते
वेदीं हुताशनवतीं परितः प्रकीर्णाः[162]।
छायाश्चरन्ति बहुधा भयमादधाना-
[163]स्सन्ध्यापयोदकपिशाः पिशिताशनानाम्॥28॥

आकाश इति। आकाशे रङ्गबहिर्भूतप्रदेशे स्थित्वा मुनय ऊचुरिति वाक्याध्याहारः, हे राजन् सायन्तने सायङ्कालकरणीये, सवनकर्मणि तृतीयसवनाख्यकर्मविशेषे। सम्प्रवृत्ते आरब्धे सति, हुताशनवतीम् अग्निसहितां, वेदीं वेदिकां, परितस्समन्ततः, प्रकीर्णाः व्याप्ताः, सन्ध्यापयोदकपिशाः

---

[162] 'प्रयस्ताः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'प्रवृत्ताः' इति 'C' इति प्रकाशने पाठान्तरम्।

[163] 'सन्ध्याभ्रकूट...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

सान्ध्यमेघचित्राः, अत एव भयमादधानाः भीतिं जनयन्त्यः, पिशिताशनानाम् रात्रिञ्चराणां, छायाः प्रतिबिम्बानि, बहुधा नाना प्रकारेण,चरन्ति सञ्चरन्ति।

राजा – [164]अयमयमागच्छामि।[165] (इति निष्क्रान्तः)

राजेति। राजा श्रुत्वा मुनिवचनमाकर्ण्य, अयमयमागच्छामि एषोहमागमिष्यामि तद्रक्षणार्थमिति शेषः, इत्युक्त्वा निष्क्रान्तो निर्गतः।

इति तृतीयोऽङ्कः॥

इति श्रीमृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तलव्याख्याने पूर्णचन्द्रिकाख्याने तृतीयोऽङ्कः।।

---

164 '(श्रुत्वा)' इति 'C' इति प्रकाशने पाठान्तरम्।

165 '(आकर्ण्य सावष्टमभम्) भो भोस्तपस्विनः! मा भैष्ट मा भैष्ट, अयमयमागच्छामि।' इति 'A' इति प्रकाशने पाठान्तरम्।
'अयमहमागच्छामि' इति 'B' इति प्रकाशने पाठान्तरम्।

अथ चतुर्थाङ्कादौ विष्कम्भः

(ततः प्रविशतः कुसुमापचयमभिनयन्त्यौ[1] सख्यौ)

कविरिदानीं कथान्तरमुपक्रममाणो वस्तुसङ्घटनाय विष्कम्भनामकमर्थोपक्षेपकं प्रस्तौति। ततः प्रविशत इत्यादि। ततोऽनन्तरं, कुसुमापचयं पुष्पलवनम्, अभिनयन्त्यौ व्यञ्जयन्त्यौ, सख्यौ अनसूयाप्रियंवदे, प्रविशतः रङ्गभूमिं प्राप्नुतः।

अनसूया - हला प्रियंवदे। [2]यद्यपि गान्धर्वेण विवाह[3]विधिना निर्वृत्तकल्याणा शकुन्तलानुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयम्। [4]तथापीयच्चिन्तनीयम्॥

अनसूयेति। अनसूया प्राह किमिति, हला सखि प्रियंवदे गान्धर्वेण तन्नामकेन, विवाहविधिना परिणयविधानेन, निर्वृत्तकल्याणा निष्पन्नविवाहा, नि।। "सिद्धेनिर्वृत्तनिष्पन्ना"वित्यमरः। शकुन्तला अनुरूपभर्तृगामिनी जातेति, मे मम, हृदयं चेतः, यद्यपि विचार्यमाणे, निर्वृतं सुखितं, तथापि अनुरूपवरलाभेऽपि, इयत् एतावत्, चिन्तनीयमालोचनीयम्।

प्रियंवदा - कथमिव॥

प्रियंवदेति। कथमिवेति प्रश्ने चिन्तनीयं किं वा भवतीत्यर्थः।

---

1 'नाटयन्त्यौ' इति 'B' इति प्रकाशने पाठान्तरम्।
'अभिनयन्त्यौ' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

2 'गान्धर्वेण विवाहविधिना नि..... ' इति 'C' इति प्रकाशने पाठान्तरम्।

3 'विधिना' इत्येषः एव पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

4 'तथाप्येतावच्चिन्तनीयम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

अनसूया - अद्य स राजर्षिरिष्टिं परिसमाप्यर्षिभिर्विसर्जित[5] आत्मनो नगरं प्रविश्यान्तःपुरसमागत इतोगतं वृत्तान्तं स्मरति वा न वेति॥

अनसूयेति। अद्येदानीं, सराजर्षिर्दुष्यन्तः, इष्टिं यागं, परिसमाप्य साङ्गं कारयित्वा, ऋषिभिः मुनिभिः, विसर्जितः अनुज्ञातस्सन्, आत्मनस्स्वस्य, नगरं पुरं, प्रविश्य अन्तःपुरसमागतः शुद्धान्तस्त्रीजनसङ्गतस्सन्, इतोगतं तपोवनप्रवृत्तं, वृत्तान्तं शकुन्तलासम्बन्धरूपं चरितं, स्मरति विचारयति वा न वा इति पूर्वेण सम्बन्धः।

प्रियंवदा - विस्रब्धा भव। न तादृशा [6]आकृतिविशेषा गुणविरोधिनो भवन्ति। [7]किन्तु तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति॥

प्रियंवदेति। हे अनसूये त्वं विस्रब्धा विश्वासयुक्ता, भव एधि, तादृशाः सर्वलोकविदिताः, आकृतिविशेषाःस्वरूपातिशयाः, गुणविरोधिनः गुणप्रतिपक्षाः, न भवन्ति न निष्पद्यन्ते, किन्तु तातः कण्वः इदानीमद्य, इमं वृत्तान्तं गान्धर्वविवाहप्रवृत्तिं, श्रुत्वा आकर्ण्य, किं प्रतिपत्स्यते किं वा ज्ञास्यति, न जाने न वेद्मि।

अनसूया - यथाहं पश्यामि तथा तस्यानुमतं भवेत्॥

अनसूयेति। अहं यथा येन प्रकारेण, पश्यामि जानामीत्यर्थः, तथा तेन प्रकारेण, तस्य कण्वस्य, अनुमतम् इष्टं, भवेत् स्यात्।

प्रियंवदा - कथमिव॥

---

5 'परिसमाप्य ऋषिभिर्विसर्जित' इति असमस्तपाठः एव 'A' इति प्रकाशने उपलभ्यते।

6 'गुणविरोधिनी प्रकृतिः' इति 'C' इति प्रकाशने पाठान्तरम्।

7 'किन्तु तात इदीनीम्' इत्यस्मिन् स्थाने 'तथा इदानीं' इत्येव 'A' इति प्रकाशने पाठः उपलभ्यते। 'किन्तु' इति पदम् 'B' इति प्रकाशने नोपलभ्यते।

प्रियंवदेति।। कथमिव केन प्रकारेणेत्यर्थः।

अनसूया - गुणवते कन्या[8] प्रतिपादनीयेत्ययं तावत्प्रथमस्सङ्कल्पः। तं यदि दैवमेव सम्पादयति। नन्वल्पायासेन[9] कृतार्थो गुरुजनः॥

अनसूयेति। गुणवते कन्यादानार्हगुणसम्पन्नाय, कन्या कुमारी, प्रतिपादनीया दातव्या, इत्येवंरूपः अयं सङ्कल्पस्तावत् एष मनोरथस्तु, प्रथम आद्यः गुरुजनस्येतिशेषः, दैवं विधिरेव, तं सङ्कल्पं, सम्पादयति यदि, गुरुजनः पित्रादिः, अल्पायासेन सूक्ष्मप्रयासेन, कृतार्थः कृतकृत्यो ननु।

प्रियंवदा – (पुष्पभाजनं विलोक्य) सखि [10]अपचितानि बलिकर्मपर्याप्तानि कुसुमानि॥

प्रियंवदेति। पुष्पभाजनं कुसुमसम्पुटकं, विलोक्य दृष्ट्वा, हे सखि अनसूये, बलिकर्मपर्याप्तानि पूजापरिपूर्णानि, कुसुमानि पुष्पाणि। अपचितानि लूनानि आवाभ्यामिति शेषः।

अनसूया - ननु प्रिय[11]सख्याश्शकुन्तलायास्सौभाग्यदेवतार्चनीया॥

अनसूयेति। ननु प्रियंवदे प्रियसख्याः इष्टसहचर्याः शकुन्तलायाः, सौभाग्यस्य भर्तृवल्लभ्यस्य वर्धनीदेवता, अर्चनीया आराधनीया।

प्रियंवदा – युज्यते। (इति तदेव [12]कर्मारभते)

---

8 'कन्यका' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

9 'नन्वप्रयासेन' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'अल्पायासेन' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

10 'अवचितानि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

11 'प्रिय' इति अधिकः पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

12 'कर्माभिनयतः' इति 'B' इति प्रकाशने पाठान्तरम्।

प्रियंवदेति। प्रियंवदा युज्यते युक्ता भवति, इत्युक्त्वा तत्कर्म सौभाग्यदेवताराधनरूपमेव, आरभते उपक्रमते।

(नेपथ्ये) अयमहं भोः॥

नेपथ्य इति। नेपथ्ये तिरस्करिण्यन्तरे, भो इति आश्रमस्थजनसम्बोधनम्। अयमहम् एषोऽहम् आगत इति शेषः।

अनसूया - (कर्णं दत्वा[13]।) सखि! [14]अतिथिनेव निवेदितम्॥

अनसूयेति। कर्णं दत्वा शब्दमवधार्येत्यर्थः, हे सखि प्रियंवदे, अतिथिना आगन्तुकेन, निवेदितं ज्ञापितमिव।

प्रियंवदा - ननूटजसन्निहिता शकुन्तला। [15](आत्मगतम्) अद्य पुनर्हृदयेनासन्निहिता॥

प्रियंवदेत्यादि। नन्वनसूये, शकुन्तला अस्मत्प्रियसखी, उटजसन्निहिता उटजे पर्णशालायां सन्निहिता उपस्थिता, तस्मादतिथिसत्कारं करिष्यतीति भावः, आत्मगतं स्वगतम्, अद्येति। अद्य पुनः इदानीं तु, हृदयेन मनसा, असन्निहिता असम्बद्धेत्यर्थः, अतश्शकुन्तला स्थितापि अनवस्थितचित्ततया अस्थितप्रायैवेत्याशयः॥

[16]अनसूया - भवतु। अलमियद्भिः[17] कुसुमैः (इति प्रस्थिते)

---

13 'आकर्ण्य' इति 'C' इति प्रकाशने पाठान्तरम्।

14 'तथाप्येतावच्चिन्तनीयम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'अतिथीनामिव' इति 'B' इति प्रकाशने पाठान्तरम्।

15 अनसूयायाः वाक्यमिदमिति इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

16 इदं प्रियंवदायाः वाक्यमिति 'C' इति प्रकाशनयोः निर्दिष्टम्।

17 'अलमेतावद्भिः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

अनसूयेति। भवतु शकुन्तला यथा तथा वास्तु, इयद्भिः एतावद्भिः, कुसुमैः पुष्पैः अलं पर्याप्तं, इत्युक्त्वा प्रस्थिते उटजं प्रतिगते।

(नेपथ्ये।) [18]आः अतिथिपरिभाविनि।

श्लो॥ विचिन्तयन्ती यमनन्यमानसा
[19]तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि स-
न्कथां प्रमत्तः प्रथमं कृतामिव॥1॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, आः इत्यवमानजनितकोपेऽयं निपातः, नि।। "आस्तुस्यात्कोपपीडयो"रित्यमरः। अतिथिपरिभाविनि आगन्तुकावमानिनि, विचिन्तयन्तीति, तपोधनं तपःप्रधानं, उपस्थितम् समीपमागतं, मां न वेत्सि न जानासि, प्रमत्तः उन्मत्तोजनः, प्रथमं पूर्वं, कृतां रचितां, कथां वाक्यजातमिव, सपुरुषः, बोधितः स्मारितोऽपि सन्, त्वां न स्मरिष्यति न प्रत्यभिज्ञास्यति।

[20]प्रियंवदा - हा धिक् हा धिक्। [21]अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला॥

प्रियंवदेति। हा धिक् हा धिगिति शोकार्तकौ निपातौ शोकश्च मुनिशापश्रवणजन्य इति वेदितव्यम्, अप्रियं प्रियाराहित्यमेव, संवृत्तं सिद्धं, कस्मिन् यस्मिन्कस्मिन्नपि। पूजार्हे पूज्यजने विषये, शून्यहृदया विरहविधुरचित्ता शकुन्तला, अपराद्धा अपराधमपचारं कृतवती, अनेन शकुन्तलायाः शापहेतुस्स्पष्टीकृतः।

---

18 'आः कथमतिथिं मां परिभवसि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

19 'तपोनिधिं' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

20 अनसूयायाः वाक्यमिति इति 'C' इति प्रकाशने निर्दिष्टम्।

21 'तदेव संवृत्तम्। यस्मिन् कस्मिन्नपि.....' इति 'C' इति प्रकाशने पाठन्तरम्।

(पुरोऽवलोक्य) न खलु यस्मिन्कस्मिन्नपि एष दुर्वासास्सुलभकोपो महर्षिस्तथा शप्त्वा वेगचटुलोत्फुल्लदुर्वारया[22] गत्या प्रतिनिवृत्तः। [23]कोऽन्यो हुतवहाद्दग्धुं प्रभविष्यति॥

पुरोऽवलोक्येत्यादि। पुरोऽवलोक्य पुरतो दृष्ट्वा, यस्मिन्कस्मिन्नपि, न खलु नापराद्धा हि, परन्तु एष पुरोवर्ती, सुलभकोपः अकारणरोषः। दुर्वासाः तन्नामामहर्षिः, तथा तेन प्रकारेण, शप्त्वा शापं दत्वा, वेगचटुलोत्फुल्लदुर्वारया वेगेन चटुलया तरलया, अत एवोत्फुल्लया विकसितया दुर्वारया निवारयितुम् अशक्यया, गत्या गमनेन, प्रतिनिवृत्तः गृहादपसृतः, हुतवहादग्नेः, अन्यः को वा, दग्धुं भस्मीकर्तुं, प्रभविष्यति समर्थो भविष्यति न कोऽपि समर्थ इत्यर्थः, अनेन दृष्टान्तवाक्येन न कोऽप्येवं समर्थ इति व्यज्यते।

अनसूया – गच्छ। पादयोः प्रणम्य निवर्तयैनम्। यावदहमर्घ्योदकम्[24] [25]उपकल्पयामि॥

अनसूयेति। हे प्रियम्वदे गच्छ याहि, पादयोश्चरणयोः, एनं दुर्वाससं, प्रणम्य नमस्कृत्य, निवर्तय निवृत्तं कुरु, अहं अर्घ्योदकं पूजार्थकं जलं यावदुपकल्पयामि सम्पादयिष्ये।

प्रियंवदा - तथा (इति निष्क्रान्ता)

प्रियंवदेति। प्रियंवदा तथा करोमीति निष्क्रान्ता निर्गता।

---

22 'वेगबलोत्फुल्लया दुर्वारया गत्या' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्। 'चटुलदुर्वारया गत्या' इति 'C' इति प्रकाशने पाठान्तरम्।

23 अनसूयायाः वाक्यमिदमिति इति 'B' इति प्रकाशने निर्दिष्टम्।

24 'अर्घोदकम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

25 'गृहीत्वोपसर्पामि।' इति 'C' इति प्रकाशने पाठान्तरम्।

अनसूया - (पदान्तरे स्खलितं निरूप्य) अहो[26] आवेगस्खलितया गत्या प्रभ्रष्टं मे[27] हस्तात्पुष्पभाजनम्[28]। (इति [29]पुष्पोच्चयं रूपयति॥)

अनसूयेति। पदान्तरे मार्गमध्ये, स्खलितं पादस्खलनं, निरूप्य अभिनीय, आवेगस्खलितया आवेगेन जवेन स्खलितया आकुलितया, गत्या गमनेन, मे मम, हस्तात् करात्, पुष्पभाजनं कुसुमसम्पुटकः, प्रभ्रष्टं गलितं, इत्युक्त्वा पुष्पोच्चयं पुष्पाणामधःपतनं, रूपयत्यभिनयति।

प्रियंवदा - (प्रविश्य) सखि! प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति। किमपि पुनस्सानुक्रोशः कृतः॥

प्रियंवदेति।। प्रियंवदा प्रविश्य समीपमागत्य प्राह- किमिति, हे सखि अनसूये, प्रकृतिवक्रः स्वभावकुटिलः, स मुनिः, कस्य कस्य वा जनस्य, अनुनयं प्रार्थना, प्रतिगृह्णाति स्वीकरोति न कस्यापि गृह्णातीति भावः, किमपि पुनः किन्तु, सानुक्रोशः सदयः, कृतः विहितः।

अनसूया - (सस्मितम्) तस्मिन्बह्वेतदपि। कथय॥

अनसूयेति। सस्मितम् समन्दहासं, सानुक्रोशः कृत इति वाक्यश्रवणजनितहर्षात् स्मितमित्यवगन्तव्यं, तस्मिन् अधिककोपे मुनौ, एतत् सानुक्रोशत्वमपि, बह्वधिकं, इदमेव पर्याप्तमित्याशयः, कथय अनन्तरवृत्तान्तं ब्रूहीत्यर्थः।

---

26 'अतो' इति 'A' इति प्रकाशने पाठान्तरम्।

27 'मम' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

28 'अग्रहस्तात् पुष्पभाजनम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

29 'पुष्पावचयं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

प्रियंवदा - [30]यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया। भगवन्! [31]प्रथममिति प्रेक्ष्याविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो [32]मर्षयितव्य इति॥

प्रियंवदेति। यदा यस्मिन्काले, निवर्तितुं प्रत्यागन्तुम्, आश्रमं प्रतीत्यर्थः, नेच्छति न वाञ्छति, तदा तस्मिन्समये, मया विज्ञापितः प्रार्थितः कथमित्यत आह, भगवन्निति, हे भगवान् महर्षे, प्रथमम् आदौ कृतमिति शेषः, इति प्रेक्ष्य एवं विचार्य, अविज्ञाततपःप्रभावस्य अविज्ञातः अनवबुद्धः तपसः प्रभावो महिमा येन तस्य, दुहितृजनस्य पुत्रिकाजनस्य, भगवता त्वया, एकः अपराधो मन्तुः। नि।। "अगोऽपराधोमन्तुश्चे"त्यमरः।। मर्षयितव्यस्सोढव्यः,क्षन्तव्य इत्यर्थः, इत्येवं प्रकारेण विज्ञापित इति पूर्वेणान्वयः।

अनसूया - ततस्ततः॥

ततस्तत इति। ततस्ततः अनन्तरं तेन किमुक्तमिति भावः, तदुत्तरवृत्तान्तश्रवणादरातिशयाद्विरुक्तिः।।

प्रियंवदा - ततो मे वचनमन्यथा भवितुं नार्हति[33]। किन्त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयमाणः[34] [35]स्वयमन्तर्हितः॥

---

30 'यदानुनीतोऽपि निवर्तितुं ने.....मया। ...प्रथमभक्तिमवेक्ष्य अविज्ञातप्रभावस्य दु....मर्षितव्य इति' इति 'C' इति प्रकाशने पाठान्तरम्।

31 'प्रथम इति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

32 'मर्षितव्य' इति 'A' इति प्रकाशने पाठान्तरम्।

33 'ततो न मे वचनमन्यथा भवितुमर्हीति' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

34 'मन्त्रयन्' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

35 'एवान्तर्हितः' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

प्रियंवदेत्यादि। ततोऽनन्तरं, मे मम, वचनं वाक्यं, शापरूपं, अन्यथा इतरथा, भवितुं नार्हति योग्यं न भवति, किन्तु परन्तु, अभिज्ञानाभरणदर्शनेन अभिज्ञानार्थम् अविस्मरणाय यदाभरणं स्वनाममुद्राङ्कितमङ्गुलीयकं स्वेनैव दत्तमित्यर्थः, तस्य दर्शनेन प्रेक्षणेन, शापः भवद्विस्मरणरूप उपालम्भः, निवर्तिष्यते निर्मोक्ष्यति, इत्येवं प्रकारेण मन्त्रयमाणः गूढं भाषमाणस्सन्, स्वयं स्वेनैव, अन्तर्हितस्तिरोहितः।

अनसूया – शक्यमिदानीमाश्वसितुम्[36] अस्ति तेन राजर्षिणा [37]सम्प्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम्। तस्मिन्स्वाधीनोपाया शकुन्तला भविष्यति॥

अनसूयेति। इदानीमद्य, आश्वासितुम् उज्जीवितुं, शक्यं सुलभम्, आश्वासकारणमाह अस्तीत्यादिना, सम्प्रस्थितेन इतः स्वनगरं प्रतिनिवृत्तेन, तेन राजर्षिणा दुष्यन्तेन, स्मरणीयं स्मृतिजननार्हं, इत्युक्त्वा स्वंय स्वेन, पिनद्धं प्रियाङ्गुल्यामासञ्जितं, स्वनामधेयाङ्कितं दुष्यन्तेति संलिखितनामाक्षरसहितं, अङ्गुलीयकं करशाखाभरणं, अस्ति विद्यते, तस्मिन् राजनि विषये, शकुन्तला स्वाधीनोपाया सुलभप्राप्तिसाधना, भविष्यति सम्पत्स्यते।

प्रियंवदा - सखि! एहि देवकार्यं [38]तावन्निर्वर्तयावः॥ (इति परिक्रामतः)

प्रियंवदेति। हे सख्यनसूये, तावत् इदानीं, देवकार्यं सौभाग्यदेवताराधनम् निर्वर्तयावः साधयावः, इत्युक्त्वा परिक्रामतः पर्णशालां प्राप्नुतः।

---

36 'आश्वासयितुम्' इति 'A' इति प्रकाशने पाठान्तरम्।

37 'प्रस्थितेन' इति 'A' इति प्रकाशने पाठान्तरम्।

38 'तावदस्या निर्वर्तयावः' इति 'B' इति प्रकाशने पाठान्तरम्।

प्रियंवदा – (अवलोक्य[39]) अनसूये! प्रेक्षस्व[40] तावत्। [41]वामहस्तोपहितवदनालिखितेव प्रियसखी भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति। किं पुनरागन्तुकम्॥

प्रियंवदेति। प्रियंवदा अवलोक्य दृष्ट्वा शकुन्तलामिति शेषः प्राह किमिति, हे अनसूये वामहस्तोपहितवदना सव्यकरनिक्षिप्तमुखी, प्रियसखी शुकन्तला, भर्तृगतया प्रियानुगतया, चिन्तया आध्यानेन। नि।। "स्याच्चिन्तास्मृतिराध्यान" मित्यमरः। आत्मानं स्वमपि, एषा शकन्तला, न विभावयति न विचारयति, आगन्तुकमतिथिम्, किं पुनः न विभावयतीति किमु वक्तव्यमिति भावः, प्रेक्षस्व पश्य तावत्, वाक्यार्थः कर्म।

अनसूया - प्रियंवदे! द्वयोरेव [42]नौ मुख[43] एष वृत्तान्तस्तिष्ठतु। रक्षणीया[44] खलु प्रकृतिपेलवा प्रियसखी[45]॥

अनसूयेति। हे प्रियंवदे एष वृत्तान्तः अयं दुर्वासशापरूप उदन्तः, द्वयोरुभयोः नौ आवयोरेव, मुखे वदने, तिष्ठतु विद्यतां, प्रकृतिपेलवा स्वभावमृदुला प्रियसखी शकुन्तला, रक्षणीया परिपालनीया खलु, शापश्रवणे शकुन्तला अमितभया भवेदित्याशयः।

---

39 'विलोक्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

40 'पश्य' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

41 'वामहस्तो......मालिकामिव प्रियसखीम्।....मप्रैषा न विभा...' इति 'C' इति प्रकाशने पाठान्तरम्।

42 'ननु नौ' इति 'A' इति प्रकाशने पाठान्तरम्।

43 'मुखे' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

44 'रक्षितव्या' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

45 'सखी' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रियंवदा - क इदानीम्[46] उष्णोदकेन नवमालिकां सिञ्चति॥ (इत्युभे निष्क्रान्ते[47])

प्रियंवदेति। प्रियंवदा प्राह किमिति, इदानीमद्य, उष्णोदकेन वह्नितप्तजलेन नवमालिकां सप्तलालतां, नि। "सुमनामालती जातिस्सप्तलानवमालिके"त्यमरः। कः को वा, सिञ्चति आर्द्रीकरोति कोऽपि तथा न करोतीत्यर्थः। इत्युक्त्वा निष्क्रान्ते निर्गते।

॥इति विष्कम्भः॥

(ततः प्रविशति सुप्तोत्थितश्शिष्यः)

शिष्यः - वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता [48]प्रवासादुपावृत्तेन काश्यपेन। प्रकाशं [49]निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति॥

ततः प्रविशतीत्यादि। ततः पूर्वपात्रनिर्गमानन्तरं, सुप्तोत्थितः शयितप्रतिबुद्धस्सन्, प्रविशति प्रयाति रङ्गस्थलमिति शेषः, शिष्य इति, तत्रभवता पूज्येन, प्रवासात् देशान्तरात्, उपावृत्तेन प्रत्यागतेन, काश्यपेन कण्वमुनिना, वेलोपलक्षणार्थं कालपरिज्ञानार्थम्, आदिष्टः आज्ञप्तः, अस्मि भवामि प्रकाशं विवृतस्थानम्प्रति, निर्गतः प्रस्थितस्सन्, तावदिदानीम्, रजन्याः रात्र्याः कियत् यावत्, अवशिष्टं परिशेषभागः, वर्तत इति अवलोकयामि पश्यामि।

(परिक्रम्यावलोक्य च) हन्त! प्रभातम्। तथाहि -

---

46 'को नाम' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

47 'इति निष्क्रान्ते' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

48 'प्रभासात्प्रतिनिवृत्तेनोपाध्यायका..., तत्प्राकाश्यं निर्गत्य, ... सात्प्रतिविवृत्तेन कण्वेन.' इत्येवं पाठान्तराण्युपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

49 'नर्गत्यावलो..., प्रभातप्राया रजनी' इत्येवं पाठान्तराण्युपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

श्लो॥ यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरस्सर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत [50]इवात्मदशान्तरेषु॥2॥

परिक्रम्येत्यादि। परिक्रम्य परिभ्राम्य, अवलोक्य दृष्ट्वा च, आह हन्तेति विषादे नि।। "हन्तहर्षेऽनुकम्पायां वाक्यारम्भविषादयो"रित्यमरः। प्रभातं अहर्मुखम् आसीदितिशेषः, तथाहि तदेवोपपादयति, यात्येकत इति, ओषधीनां पतिश्चन्द्रः, 'सोम ओषधीनामधिपति'रिति श्रुतेः। एकतः एकस्मिन्दिग्विभागे, अस्तशिखरं अस्ताचलशृङ्गं, याति गच्छति, अर्कः सूर्यः, अरुणपुरस्सरः अनूरुसारथिस्सन्, एकतः प्राचीदिग्भागे, आविष्कृतः आविर्भूतः उदित इति यावत् युगपदेकदा, ज्योतिर्द्वयस्य चन्द्रसूर्यद्वितयस्य, व्यसनोदयाभ्यां अस्तमयप्रादुर्भावाभ्यां, लोको जनः, आत्मदशान्तरेषु स्वसुखदुःखावस्थाभेदेषु नियम्यते उपदिश्यत इव स्थितः, सुखदुःखयोरनियतत्वात्तयोः प्राप्तयोः तदनुभवप्रयुक्तविकारो न कर्तव्य इति बोध्यत इवेत्याशयः।।

अपि च।

श्लो॥ अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुस्सहानि॥3॥

पुनः प्रभातमेव वर्णयति। अपिचेत्यादिना। अपि च किञ्च, शशिनि चन्द्रे, अन्तर्हिते अस्तमिते सति सैव कुमुद्वती कुमुदुनी, सू। 'कुमुदनडवेतसेभ्योड्मतुप्' इति ड्मतुप्। या रात्रौ तथा विकासयुक्ता सैवेत्यर्थः, संस्मरणीयशोभा

50 'इवैष दशान्तरेषु' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

सम्यग्विचारणीयप्रभासती वीतशोभेति यावत्। मे मम, दृष्टिं दर्शनं, न नन्दयति न प्रीणयति, उक्तमर्थमर्थान्तरन्यासेन समर्थयति, इष्टेति, अबलाजनस्य स्त्री जनस्य, इष्टप्रवासजनितानि अभिमतजनविप्रयोगोत्पादितानि, दुःखानि विरहवेदना जनितकार्श्यवैवर्ण्यादीनि। अतिमात्रसुदुस्सहानि अतिमात्रं प्रमाणाधिकं सुतरामसह्यानि।

अनसूया - (प्रविश्य [51]पटाक्षेपेण) एवं नाम विषयपराङ्मुखस्याप्यस्य जनस्य नैतन्न विदितम्। [52]तेन राज्ञा शकुन्तलायामनार्यमाचरितमिति[53]॥

अनसूयेति। अनसूया पटाक्षेपेण यवनिकापनोदनेन, प्रविश्य सूचनं विनैव आगत्येत्यर्थः, हर्षादिजनितसम्भ्रमयुक्तस्य पात्रस्य प्रवेशः पटाक्षेपेण कार्य इति नाटकव्यवहारः, विषयपराङ्गुखस्यापि भोगविमुखस्यापि, अस्य जनस्य शकुन्तलाया इत्यर्थः, एतत् इष्टजनप्रवासदुःखं, तेन राज्ञा दुष्यन्तेन, न विदितमिति न किन्तु ज्ञातमेवेत्यर्थः, किमिति शकुन्तलायाम्, अनार्यम् अन्याय्यम्, आचरितं कृतमिति।

शिष्यः - यावदुपस्थितां होमवेलां गुरवे निवेदयामि। (इति निष्क्रान्तः)

शिष्य इति। शिष्यः प्राह किमिति उपस्थितां प्राप्तां, होमवेलां हवनकालं, गुरवे उपाध्यायाय, यावन्निवेदयामि विज्ञापयिष्यामि, इत्युक्त्वा निष्क्रान्तो निर्गतः।

अनसूया - [54]प्रतिबुद्धापि किं करिष्यामि[55]। न मे उचितेष्वपि निजकरणीयेषु हस्तपादाः[56] प्रसरन्ति[57]। काम इदानीं सकामो भवतु।

---

51 'पटीक्षेपेण' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

52 'यत्तथाविधेन' इति 'C' इति प्रकाशने पाठान्तरम्।

53 'यद्यपि नाम विषयपराङ्गुखस्यापि जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

येनासत्यसन्धे जने शुद्धहृदया[58] सखी पदङ्कारिता। अथवा, दुर्वासः शाप[59] एष विकारयति। अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वा एतावतः[60] कालस्य लेखमात्रमपि न विसर्जयति[61]। [62]तस्मादितः अभिज्ञानमङ्गुलीयकम् [63]अस्य विसर्जयावः[64]। दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्[65]। ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य[66] तात काश्यपस्य दुष्यन्तपरिणीतामापन्नसत्वां शकुन्तलां निवेदयितुम्। [67]इत्थङ्गतेऽस्माभिः किं करणीयम्॥

अनसूयेत्यादि। अनसूया प्राह, किमिति प्रतिबुद्धा ज्ञातवत्यपि राज्ञो वञ्चनशीलत्वमिति भावः, किं करिष्यामि किमाचरिष्यामि, उचितेषु एतत्समययोग्येषु निजकरणीयेषु पत्रिकालेखनादि–स्वकार्येषु, मे मम, हस्तपादाः

---

54 'अथवा प्रिति....करणीयेषु। सकाम इदानीं कामो भवतु।' इति 'C' इति प्रकाशने पाठान्तरम्।

55 'करिष्ये' इति 'A' इति प्रकाशने पाठान्तरम्।

56 'हस्तपादं' इति 'B' इति प्रकाशने पाठान्तरम्।

57 'निजकार्ये हस्तपादं प्रसरति' इति 'A' इति प्रकाशने पाठान्तरम्।
'प्रसरति।' इति 'B' इति प्रकाशने पाठान्तरम्।

58 'शून्यहृदया' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

59 'कोप' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

60 'एतावत्कालस्य' इति 'A' इति प्रकाशने पाठान्तरम्।

61 'विसृजति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

62 'तदितः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

63 'तस्य विसृजावः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

64 'विसर्जयामि' इति 'C' इति प्रकाशने पाठान्तरम्।

65 'को वाभ्यर्थ्यते।' इति 'C' इति प्रकाशने पाठान्तरम्।

66 'प्रतिनिवृत्ताय' इति 'C' इति प्रकाशने पाठान्तरम्।

67 'इत्थं गते किं नु खल्वस्माभिः करणीयम्' इति 'C' इति प्रकाशने पाठान्तरम्।

करचरणाः। न प्रसरन्ति न चलन्ति, कामो मन्मथः, इदानीमद्य, सकामस्समनोरथः भवतु अस्तु, येन कामेन, असत्यसन्धे अयथार्थप्रतिज्ञे, जने राजनि विषये, शून्यहृदया कामाकुलचित्ता शकुन्तला, पदम् अभिलषास्पदं, कारिता रचिता, अथवा पक्षान्तरे, एषोऽयं दुर्वासो नाम मुनेश्शापः, विकारयति विस्मरणं जनयति, अन्यथा नो चेत्, स राजर्षिर्दुष्यन्तः, तादृशानि विश्वसनीयानि वचनानि मन्त्रयित्वा सम्भाष्य, एतावतः अतिदीर्घस्य, कालस्य समयस्य, लेखमात्रं पत्रिकां वाऽपि, न विसर्जयति न प्रेषयति, तस्माद्धेतोः इतः प्रदेशात्, अभिज्ञानं स्वसम्बन्धबोधकं अङ्गुलीयकम् ऊर्मिकाम् अस्य राज्ञः, विसर्जयावः प्रेषयावः दुःखशीले आहारादिनियमेन क्लिष्टस्वभावे, तपस्विजने अनागरिकजनविषये, कः को वा जनः, अभ्यर्थ्यतां प्रार्थ्यतां मन्यत इति शेषः, न कोप्यङ्गीकरोतीति भावः, प्रवास प्रतिनिवृत्तस्य देशान्तरात्प्रत्यागतस्य, तातकाश्यपस्य अस्मज्जनकस्य कण्वमुनेः दुष्यन्तपरिणीतां दुष्यन्तेन राज्ञा विवाहिताम्, अत एवापन्नसत्वाम् अन्तर्वत्नीं शकुन्तलां, निवेदयितुं ज्ञापयितुं, व्यवसिता उद्युक्तापि। दोषः शकुन्तलादुष्यन्तसङ्घटनरूपः, सखीगामी सखीगतो भवतीति हेतोः न पारयामि न शक्नोमि, इत्थमेवं, गते अतीते सति, अस्माभिः किं करणीयं किं वा कर्तव्यम्, अनसूया एवं प्रकारेण चिन्तयित्वा इति कर्तव्यतामूढा जातेति भावः।

प्रियंवदा – (प्रविश्य सहर्षम्) सखि, त्वरय त्वरय[68] शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुं॥

प्रियंवदेति। प्रियंवदा रङ्गं प्रविश्य प्राप्य, सहर्षं सन्तोषसहितं प्राह, किमिति हे सखि अनसूये, शकुन्तलायाः अस्मत्सख्याः, प्रस्थानकौतुकं भर्तृगृहं प्रति प्रयाणमङ्गलं निर्वर्तयितुं निष्पादयितुम्, त्वरय त्वरय वेगं कुर्विति सन्तोषातिशयाद्द्विरुक्तिः।

अनसूया - सखि कथमेतत्॥

68 'त्वरय' इति एकवारं पाठः 'A' इति प्रकाशने दृश्यते।

अनसूयेति। हे सखि प्रियंवदे, एतत् शकुन्तलाप्रस्थानं, कथं केन प्रकारेण भविष्यतीति शेषः।

प्रियंवदा - शृणिवदानीं [69]सुखशयितं प्रष्टुं शकुन्तलासकाशं गतास्मि॥

प्रियंवदेति। इदानीमद्य, शृणु तत्कारणमाकर्णय, अहं सुखशयितं सुखनिद्रां, प्रष्टुं पृष्ट्वा ज्ञातुं, शकुन्तलासकाशं शकुन्तलासमीपं, गता प्राप्तास्मि।

अनसूया - ततस्ततः॥[70]

अनसूयेति। ततस्तत इत्यनन्तर कथनीयाकर्णनकौतुकज्ञापिकावीप्सा अनन्तरकथनीयं ब्रूहीति भावः।।

प्रियंवदा - [71]तावदेनां लज्जावनतमुखीं परिष्वज्य स्वयं[72] तातकाश्यपेनैवमभिनन्दितम्। दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता। वत्से सुशिष्यपरिदत्तेव विद्याशोचनीया[73] संवृत्ता। अद्यैव ऋषिप्रतिरक्षितां[74] त्वां भर्तुस्सकाशं विसर्जयामीति॥

---

69 'सुखशयनपृच्छिका' इति 'A' इति प्रकाशने पाठान्तरम्।
'सुखशयितपृच्छिका' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।
'सुखसुप्तिकापच्छनिमित्तम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

70 इदं वाक्यं 'A' इति प्रकाशने नोपलभ्यते।

71 'ततो यावदेनां' इति पाठः 'A' इति प्रकाशने दृश्यते।
'यावदेनां लज्जावनतवदनां' इति 'C' इति प्रकाशने पाठान्तरम्।

72 'स्वयं' इति पाठः 'A' 'B' 'C' इति प्रकाशनेषु न दृश्यते।

73 '...सुशिष्यपरिदत्ता विद्येवाशोचनीयासि ....' इति 'B' इति प्रकाशने पाठान्तरम्
'विद्या अशोचनीयासि मे ...' इति 'C' इति प्रकाशने पाठान्तरम्।

74 'ऋषिप्रतिरक्षितां' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'राजर्षिपरिगृहीतां' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रियम्वदेत्यादि। तावत्तदा यदाहं गता, लज्जावनतमुखीं व्रीडानम्राननां, एनां शकुन्तलां, परिष्वज्य परिरभ्य। नि। "परिरम्भः परिष्वङ्ग आलिङ्ग उपगूहनम्" इत्यमरः, तातकाश्यपेन पित्रा कण्वमुनिना, स्वयं स्वेनैव, एवं वक्ष्यमाणप्रकारेण, अभिनन्दितम् अभिमतं तदेवाह, दिष्ट्येति, धूमाकुलितदृष्टेः धूमावरुद्धनेत्रस्यापि, यजमानस्य आहिताग्नेः, आहुतिः हविर्भागः, दिष्ट्या दैवात्, पावके वह्नावेव, पतिता गमिता, हे वत्से शकुन्तले, सुशिष्यपरिदत्ता सुप्रसिद्धशिष्यायोपदिष्टा, विद्या ज्ञानमिव, अशोचनीया अनालोचनीया, संवृत्ता जाता, अद्येदानीमेव, ऋषिप्रतिरक्षितां मुनिसहायां, त्वां, भर्तुः दुष्यन्तस्य, सकाशं समीपं, विसर्जयामि सम्प्रेषयामि, इत्येवमभिनन्दितमिति पूर्वेणान्वयः।

अनसूया - अथ केन [75]सूचितस्तातकाश्यपस्य वृत्तान्तः॥

अनसूयेति। अथानन्तरं, तातकाश्यपस्य कण्वस्य, वृत्तान्तः शकुन्तलापरिणयोदन्तः, केन सूचितः ज्ञापितः।

प्रियंवदा - अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाचया[76]॥

प्रियंवदेति। पूर्वोक्तस्योत्तरं ददाति अग्निशरणमिति, अग्निशरणं त्रेताग्निशालां, प्रविष्टस्य प्राप्तस्य, कण्वस्येतिशेषः, शरीरं विना अशरीरया छन्दोमय्या छन्दोबद्धया, वाचया वाक्येन सूचित इत्यनुषज्यते, वाचयेत्याकारन्तस्य साधुत्वम् आपं चैव हलन्तानामिति भागुरिवचनादवगन्तव्यम्।

अनसूया – (सविस्मयम्) कथय॥[77]

अनसूयेति। सविस्मयं साश्चर्यं, कथय ब्रूहि।

---

75 'सूचितोऽयं' इति 'C' इति प्रकाशने पाठान्तरम्।

76 'वाण्या' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'वाचा' इति 'C' इति प्रकाशने पाठान्तरम्।

77 इदं वाक्यं 'A' इति प्रकाशने नोपलभ्यते। 'कथमिव' इति 'B' इति प्रकाशने पाठान्तरम्।

प्रियंवदा - (संस्कृमाश्रित्य)

श्लो॥ दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥4॥

प्रियंवदेति। प्रियंवदा संस्कृतं गैर्वाणभाषणं, आश्रित्यावलम्ब्य प्राह, दुष्यन्तेनेति, हे ब्रह्मन् कण्वमुने, अग्निगर्भाम् अन्तस्थिताग्निकां, शमीं वृक्षविशेषमिव, तनयां भवत्पुत्रीं, भुवः भूमण्डलस्य, भूतये समृद्धये, दुष्यन्तेन आहितं निषिक्तं, तेजोवीर्यं, दधानां बिभ्राणाम्, अवेहि जानीहि, जनिष्यमाणशिशोः वह्निसाम्यप्रतिपादनं सर्वात्मना लोकोपकारकत्वप्रसिद्ध्यर्थमिति बोध्यम्।

अनसूया – (प्रियंवदामाश्लिष्य) सखि। प्रियं मे। प्रियं मे।[78] किन्त्वद्यैव शकुन्तला नीयत इत्युत्कण्ठासाधारणं परितोषमनुभवामि॥

अनसूयेति। अनसूया प्रियंवदाम् आश्लिष्य आलिङ्ग्य हे सखि प्रियंवदे, मे मम, प्रियं प्रीतिकरमित्यत्यादराद्द्विरुक्तिः, किन्तु अपितु, अद्येदानीमेव, शकुन्तला नीयते भर्तृगृहं प्राप्यते, इति हेतोः उत्कण्ठासाधारणं औत्सुक्यसम्मिश्रम् परितोषं सन्तोषम्, अनुभवामि उपलभे, नि। "उपलम्भस्त्वनुभव" इत्यमरः॥

प्रियंवदा - सखि। आवां तावदुत्कण्ठां विनोदयिष्यावः। सा तपस्विनी निर्वृता भवतु॥

प्रियंवदेति। हे सखि आवां तावदिदानीम्, उत्कण्ठाम् औत्सुक्यं, विनोदयिष्यावः यथाकथञ्चिदपनेष्यावः, सा तपस्विनी शकुन्तला, निर्वृता सुखिता भवतु अस्तु।

अनसूया - तेनहि एतस्मिन्श्चूतशाखालम्बिते नालिकेरसमुद्गक एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका।[79]तदिमां

---

[78] 'प्रियं मे' इति एकवारपाठः एव 'A' 'B' इति प्रकाशनयोः दृश्यते।

हस्तसन्निहितां कुरु। यावदहमप्यस्या[80] मृगरोचनां[81] तीर्थमृत्तिकां दूर्वाकिसलयानीति मङ्गलसमालम्भनानि विरचयामि॥

अनसूयेति। तेन हेतुना, शकुन्तला प्रस्थानस्यावश्यकत्वेन, चूतशाखावलम्बिते आम्रविटपासञ्जिते, एतस्मिन् पुरोवर्तिनि, नालिकेरसमुद्गके लाङ्गलिपत्ररचितसम्पुटके, नि। "समुद्गकस्सम्पुटक" इत्यमरः। एतन्निमित्तं शकुन्तलाधारणार्थमेव, कालान्तरक्षमा चिरकालावस्थानेऽपि सौरभ्यानुवृत्या धर्तुं योग्या, केसरमालिका वकुलपुष्पदाम, मया निक्षिप्ता निहिता, तत्तस्मात्, इमां मानिकां, त्वं हस्तसन्निहितां करगृहीतां कुरु, अहमपि यावत् यावता कालेन अस्याश्शकुन्तलाया मृगरोचनां गन्धद्रव्यविशेषं, तीर्थमृत्तिकां पुण्यक्षेत्रमृदं, दूर्वाकिसलयानि शतपर्विकाङ्कुरान्, मङ्गलसमालम्भनानि मङ्गलार्थानुलेपनानि, विरचयामि सम्पादयामि तावदिति पूर्वेणान्वयः।

प्रियंवदा - तथा क्रियताम्॥

प्रियंवदेति। तथा तेन प्रकारेण, क्रियतां विधीयताम्, भवत्येति शेषः, कस्तूरिकादि–परिमलद्रव्याण्यानीयन्तामित्यर्थः।

(अनसूया निष्क्रान्ता। प्रियंवदा नाट्येन [82]सुमनसो गृह्णाति)

अनसूयेति। अनसूयानिष्क्रान्ता याता, प्रियंवदा सुमनसः पुष्पाणि। नाट्येनाभिनयेन गृह्णाति स्वीकरोति।

(नेपथ्ये) गौतमि! आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय॥

---

79 'तां त्वं' इति 'C' इति प्रकाशने पाठान्तरम्।

80 'तस्यै' इति 'B' इति प्रकाशने पाठान्तरम्।

81 'गोरोचनां' इति 'C' इति प्रकाशने पाठान्तरम्।

82 'सुमनोभाजनं, कुसुमभा...' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्यम्। 'सुमनोभाजनं' इति 'C' इति प्रकाशने पाठान्तरम्।

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, हे गोतमि शार्ङ्गरवमिश्राः तन्नामानो मुनयः, शकुन्तलानयनाय शकुन्तलामानेतुं, आदिश्यन्ताम् आज्ञाप्यन्ताम्।

प्रियंवदा – (कर्णं दत्वा) अनसूये। [83]त्वरय त्वरय। एते खलु हस्तिनापुरगामिनो ऋषयः शब्दायन्ते[84]॥

प्रियंवदेति। प्रियंवदा कर्णं दत्वा नेपथ्यभाषितश्रवणाय श्रोत्रमुपनीय प्राह, हे अनसूये त्वरय त्वरय आवेगं कुरु हर्षातिशयद्योतनार्थं द्विरुक्तिः, हस्तिनापुरगामिनः हस्तिनगरं प्रतिगमिष्यन्तः एते ऋषयो मुनयः, शब्द्यन्ते शब्दं कुर्वन्ति खलु, सू। "शब्दवैर...." इत्यादिना क्यङ् प्रत्ययः।

अनसूया – (प्रविश्य समालम्भनहस्ता) सखि। एहि गच्छावः। (इति परिक्रामतः)

अनसूयेति। अनसूया समालम्भनहस्ता माङ्गलिकानुलेपनयुक्तकरासती प्रविश्य रङ्गं प्राप्य आह, हे सखि एहि आगच्छ, गच्छावः यावः शकुन्तलां प्रतीतिशेषः, इत्युक्त्वा परिक्रामतः गच्छतः।

प्रियंवदा - (विलोक्य) एषा सूर्योदय एव शिखामार्जिता[85] [86]प्रतिष्ठितनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरनन्द्यमाना शकुन्तला तिष्ठति। उपसर्पाव एनाम्॥ (इत्युपसर्पतः)

---

83 'त्वरस्व' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्। त्वरस्व इति एकवारमेव पाठः 'A' इति प्रकाशने उपलभ्यते।

84 'आकार्यन्ते' इति 'A' इति प्रकाशने पाठान्तरम्।
'शब्दाय्यन्ते' इति 'B' इति प्रकाशने पाठान्तरम्।

85 'शिखामज्जिता' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

86 'प्रतीष्टनी' इति 'B' इति प्रकाशने पाठान्तरम्।
'नीवाराक्षतहस्ताभिः' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रियंवदेति। प्रियंवदा विलोक्य वीक्ष्य, एषा पुरोदृश्यमाना शकुन्तला, सूर्योदये आदित्योदयकाल एव, शिखामार्जिता अभिषेचिता, नीवारहस्ताभिः आशीर्वादार्थं करधृतनीवाराक्षताभिः, स्वस्तिवाचनिकाभिः माङ्गल्यवाक्यान्युच्चरन्तीभिः, तापसीभिः ऋषिपत्नीभिः, अभिनन्द्यमाना श्लाघ्यमाना सती, तिष्ठति वर्तते, एनां शकुन्तलाम्, उपसर्पावः अनुसरावः इत्युक्त्वा उपसर्पतः आसन्नं प्राप्नुतः।

(ततः प्रविशति यथोद्दिष्टव्यापारासनस्था शकुन्तला[87])

तत इति। ततः पात्रसूचनानन्तरं, यथोद्दिष्टव्यापारा पूर्वोक्तप्रकारेण वर्तमाना आसनस्था अलङ्करणोचितपीठे उपविशन्ती, शकुन्तला प्रविशति रङ्गभूमिं प्राप्नोति।

तापसीनामन्यतमा - (शकुन्तलां प्रति) जाते! भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व[88] ॥

तापसीनामिति। तापसीनाम् ऋषिस्त्रीणां मध्ये अन्यतमा एका, शकुन्तलां प्रति ब्रूते किमिति, हे जाते वत्से, भर्तुः विभोः, बहुमानसूचकं बहुमतिप्रख्याकं, महादेवीशब्दं पट्टमहिषीनामधेयं, लभस्व प्राप्नुहि।

द्वितीया - वत्से! वीरप्रसविनी भव ॥

द्वितीयेति। द्वितीया प्राह, किमिति, हे वत्से शकुन्तले, वीरप्रसविनी वीरमाता, भव एधि।

तृतीया - वत्से! भर्तुर्बहुमता भव ॥

---

87 'शकुन्तला गौतमी तापस्यश्च' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

88 'अभिगच्छ' इति 'C' इति प्रकाशने पाठान्तरम्।

तृतीयेति। तृतीया प्राह किमिति, हे वत्से, भर्तुर्वल्लभस्य, बहुमता बहुमानपात्रं भव एधि।

(इत्याशिषो दत्वा गौतमीवर्जं निष्क्रान्ताः)

इतीति। इति पूर्वोक्ताः आशिषः आशीर्वादान्, दत्वा प्रयुज्य, गौतमीवर्जं गौतमीं वर्जयित्वा, निष्क्रान्ताः निर्गताः।

सख्यौ - (उपसृत्य) सखि! सुखमार्जनं[89] ते भवतु॥

सख्याविति। सख्यौ अनसूयाप्रियंवदे उपसृत्य समीपं प्राप्य, हे सखि, ते तव, सुखमार्जनं सुखाभिषेकः, भवतु अस्तु।

शकुन्तला - स्वागतं मे सखीभ्याम्[90] इतो निषीदतम्॥

शकुन्तलेति। मे मम, सखीभ्यां प्रियाभ्यां, स्वागतं शुभामनं किं, इतोऽत्र निषीदतम् उपविशतम्।

उभे – (मङ्गलपात्राण्यादाय उपविश्य) हला! सज्जा भव।
[91]यावन्मङ्गलसमालम्भनं विरचयावः॥

उभे इति। उभे अनसूयाप्रियंवदे, मङ्गलपात्राणि शोभनपुष्पादि–भाजनानि, आदाय गृहीत्वा, उपविश्य निवेश्य, हला सखि, सज्जा सन्नद्धा भव, पतिगृहं गन्तुमुद्यता भव, यावत् यावता कालेन आवां मङ्गलसमालम्भनं माङ्गलिकालङ्कारं,

---

89 'सुखमज्जनं' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

90 'सख्योः' इति 'A' 'B' इति प्रकाशनयोःपाठान्तरम्।
'प्रियं सख्योः' इति 'C' इति प्रकाशने पाठान्तरम्।

91 'यावत्ते' इति 'B' इति प्रकाशने पाठान्तरम्।
'यावत्ते आवां मङ्गलसमालम्भवं' इति 'C' इति प्रकाशने पाठान्तरम्।

विरचयावः कुर्वहे, यद्यपि समालम्भनशब्दे विलेपनपरः तथाप्यत्र अलङ्कारोपलक्षणत्वेन तथा व्याख्यातः।

शकुन्तला - एतदपि[92] बहु मन्तव्यम्। दुर्लभमिदानीं मे[93] सखीमण्डनं भविष्यति। (इति बाष्पं [94]विसृजति)

शकुन्तलेति। शकुन्तला प्राह किमिति, हे सख्यौ एतत् युष्मत्कृतप्रसादनमपि, बहुमन्तव्यम् आदरणीयं, इदानीमद्य, सखीमण्डनं सख्या कृतमलङ्करणं, दुर्लभं दुष्प्रापं, मे मम, भविष्यतीत्युक्त्वा, बाष्पं नेत्रजलं, विसृजति त्यजति।

उभे - सखि! [95]उचितं न ते मङ्गलकाले रोदितुम्। (इत्यश्रूणि प्रमृज्य नाट्येन प्रसाधयतः)

उभे इति। उभे आहतुः किमिति, हे सखि, ते तव, मङ्गलकाले माङ्गलिकप्रसाधनसमये, रोदितुम् अश्रुविमोचनं कर्तुं, नोचितं नार्हं, इत्युक्त्वा अश्रूणि बाष्पजलानि, प्रमृज्य अपसार्य, नाट्येनाभिनयेन, प्रसाधयतः अलङ्कुरुतः।

प्रियंवदा - आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते॥

प्रियंवदेति। प्रियंवदा प्राह किमिति, हे सखि, आभरणोचितम् अलङ्कारार्हं रूपं सौन्दर्यम्, आश्रमसुलभैः आश्रमस्थितऋष्यङ्गनाजनोचितैः, प्रसाधनैरलङ्कारैः विप्रकार्यते वैरूप्यं प्राप्यते।

([96]प्रविश्योपायनहस्तावृषिकुमारकौ।)

---

92 'इदमपि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'इदं खलु' इति 'C' इति प्रकाशने पाठान्तरम्।

93 'दुर्लभं तावन्मे' इति 'C' इति प्रकाशने पाठान्तरम्।

94 'विहरति, विकिरति' इति पाठान्तराण्युपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

95 'न ते उचितं .....' इति 'C' इति प्रकाशने पाठान्तरम्।

[97]उभौ - इदमलङ्करणम्। अलङ्क्रियतामत्रभवती॥

प्रविश्येति। उपायनहस्तौ पाणिगृहीताभरणोपहारौ, नि।। "उपायनमुपग्राह्यमुपहारस्तथोपदे"त्यमरः। ऋषिकुमारकौ मुनिपुत्रौ, प्रविश्य रङ्गस्थलं प्राप्य उभाविति, उभौ इदमलङ्करणम् अस्मदानीतमाभरणजातं, अत्रभवती शकुन्तला, अलङ्क्रियतां प्रसाध्यताम् इत्याहतुः।

(सर्वा विलोक्य विस्मिताः)

सर्वा इति। सर्वाः समस्तास्तत्रत्या गौतम्यादयः, विलोक्य तदानीतमाभरणजातमवेक्ष्य, विस्मिताः अद्भुतरसाविष्टाः।

गौतमी - वत्स! नारद! कुत एतत्॥

गौतमीति। गौतमीनाम कण्वस्य भगिनी प्राह किमिति, हे वत्स नारद एतद्भूषणजातं, कुतः कस्मादानीतमिति शेषः।

प्रथमः - तात काश्यपप्रभावात्॥

प्रथम इति। प्रथमः उभयोराद्यः वक्ति, किमिति, तात काश्यप प्रभावात् तात काश्यपस्य कण्वमुनेः, प्रभावात्तपस्सामर्थ्यात्, आनीतमिति शेषः।।

गौतमी - किं मानसी सिद्धिः[98]॥

गौतमीति। गौतमी पृच्छति मानसी मनस्सम्बन्धिनी, सिद्धिः अभिलाषप्राप्तिः किम्।

द्वितीयः - न खलु। श्रूयताम्। तत्रभवता वयमाज्ञप्ताः। शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति। तत इदानीं।

---

96 'ततः प्रविष्टवुपायन....' इति 'C' इति प्रकाशने पाठान्तरम्।

97 'ऋषिकुमारौ' इति 'C' इति प्रकाशने पाठान्तरम्।

98 'सृष्टिः?' इति 'C' इति प्रकाशने पाठान्तरम्।

श्लो ॥ क्षौमं केनचिदिन्दुपाण्डुतरुणा [99]माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो[100] लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-[101]
र्दत्तान्याभरणानि [102]तत्किसलयोद्भेदप्रतिद्वन्द्विभिः[103] ॥5॥

द्वितीय इति। द्वितीयः प्राह किमिति, न खलु मानसी सिद्धिर्न भवतीत्यर्थः, परन्तु श्रूयतामाकर्ण्यतां, तदागमनकारणमिति शेषः, तत्रभवता पूज्येन काश्यपेन कण्वमुनिना, शकुन्तला हेतोः शकुन्तलार्थं, वनस्पतिभ्यः वृक्षेभ्यः, कुसुमानि पुष्पाणि, आहरत आनयतेति, वयमाज्ञप्ताः आदिष्टाः, ततस्तस्मात्कारणात्, इदानीमद्य, क्षौममिति, केनचित्तरुणा वृक्षेण, इन्दुपाण्डु चन्द्रधवलं, माङ्गल्यं मङ्गलप्रदं, क्षौमं दुकूलम्, आविष्कृतं प्रकाशितं, केनचित्तरुणा, चरणोपभोगसुलभः चरणोपभोगाय पादयोरलङ्करणाय सुलभः सुखेन लभ्यः, लाक्षारसः अलक्तकरागः निष्ठ्यूतः बहिर्निस्सारितः, अन्येभ्यः इतरेभ्यः, आपर्वभागोत्थितैः पर्वभागपर्यन्तं निस्सृतैः, तत्किसलयोद्भेदप्रतिद्वन्द्विभिः तेषां वृक्षाणां किसलयोद्भेदाः पल्लवाङ्कुराः तेषां प्रतिद्वन्द्विभिः तत्सदृशैरित्यर्थः, वनदेवताकरतलैः वनदेवतानां करतलैर्वान्तप्रदेशैः, आभरणानि अलङ्करणानि, दत्तानि प्रतिपादितानि।

प्रियंवदा – (शकुन्तलां विलोक्य) हला। अनयाभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राज्यलक्ष्मीः ॥

---

99 'मङ्गल्य...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

100 'चरणोपरागसुभगः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

101 'मूल...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

102 'नः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

103 '..लयच्छायाप्रति (परि) स्पर्धिभिः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

प्रियंवदेति। प्रियंवदा शकुन्तलां विलोक्य दृष्ट्वा, प्राह हला सखि, अनया पूर्वोक्तया, अभ्युपपत्त्या भूषणप्रदानरूपवनदेवतानुग्रहेण, नि। "अभ्युपपत्तिरनुग्रह" इत्यमरः।। भर्तुर्वल्लभस्य, गेहे गृहे, राजलक्ष्मीः महाराजसम्पत्तिः, ते त्वया, सू। 'कृत्यानां कर्तीरिवे'ति षष्ठी। अनुभवितव्या भोक्तव्या इति, सूचिता ज्ञापिता।

शकुन्तला - (व्रीडां [104]निरूपयति)

शकुन्तलेति। शकुन्तला व्रीडां लज्जां, निरूपयति अभिनयति।

प्रथमः - गौतम। एह्येहि। अभिषेकोत्तीर्णाय[105] काश्यपाय वनस्पतिसेवां निवेदयावः॥

प्रथम इति। प्रथमः प्राह, हे गौतम एह्येहि आगच्छागच्छ, अभिषेकोत्तीर्णाय स्नानार्थमवतीर्णाय, काश्यपाय कण्वमुनये, वनस्पतिसेवां वृक्षकर्तृकसेवनं, निवेदयावः बोधयावः।

द्वितीयः - तथा॥ (इति निष्क्रान्तौ)

द्वितीय इति। तथा तेन प्रकारेण कुर्वहे इति शेषः, इत्युक्त्वा निष्क्रान्तौ निर्गतौ।

सख्यौ[106] - अये। [107]अनुपभुक्तभूषणोऽयं जनः। चित्रकर्मपरिचयेनाङ्गेषु ते आभरणविनियोगं कुर्वः॥

---

104 'रूपयति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

105 'अभिषेकावतीर्णाय' इति 'C' इति प्रकाशने पाठान्तरम्।

106 'अनसूया' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

107 'अनुपयुक्तभूषणोऽयं जनः। तथापि चित्रकर्मपरिचयेनेदानीं ते अङ्गेष्वाभरणविनियोगं कुर्वः' इति 'C' इति प्रकाशने पाठान्तरम्।

सख्याविति। सख्यौ परस्परमालपतः, अये शकुन्तले, अयं जनः सखीजनः, अनुपभुक्तभूषणः आभरणोपभोगरहितः चित्रकर्मपरिचयेन चित्रकर्मणि चित्रलेखने, परिचयेन अभ्यासेन, ते तव, अङ्गेषु करचरणादिषु, आभरणविनियोगं अलङ्कारोपयोगं, कुर्वः रचयावः।

शकुन्तला - जाने वां नैपुण्यम्॥[108]

शकुन्तलेति। शकुन्तला प्राह किमिति, वां युवयोः, नैपुणम् अलङ्करणप्रावीण्यं, जाने अवगच्छामि।

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः[109]**)**

काश्यपः -

श्लो ॥ यास्यत्यद्य शकुन्तलेति हृदयं [110]**संस्पृष्टमुत्कण्ठया** [111]
[112]**कण्ठस्स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**
वैक्लव्यं मम [113]**तावदीदृशमपि स्नेहादरण्यौकसः**
पीड्यन्ते गृहिणः कथं [114]**नु तनयाविश्लेषदुःखैर्नवैः ॥6॥**

---

108 '(उभे नाट्येनालङ्कृतः)' इति अधिकः पाठः 'A' 'B' 'C' इति प्रकाशनेषु उपलभ्यते।

109 'कण्वः' इति 'A' इति प्रकाशने पाठान्तरम्।
'............... स्नानोत्थितः कश्यपः' इति 'C' इति प्रकाशने पाठान्तरम्।

110 'स्पृष्टं समुत्कण्ठया' इति 'A' इति प्रकाशने पाठान्तरम्।

111 'अन्तर्बाष्पभरोपरोधि गदितं चिन्ताजडं दर्शनम्' इति 'A' इति प्रकाशने पाठान्तरम्।

112 'अन्तर्बाष्पभरोपरोधिगदितं चि...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

113 'तावदीदृशमिदं/तावदीदृशमहो' इति 'A' इति प्रकाशने पाठान्तरम्।
'ईदृशपि, ईदृशमहो' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।
'ईदृशमहो' इति 'C' इति प्रकाशने पाठान्तरम्।

114 'न' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

(इति परिक्रामति)

तत इति। ततोऽनन्तरं, स्नानोत्तीर्णः स्नानादुत्थितः, काश्यपः कण्वमुनिः, प्रविशति रङ्गभूमिं प्राप्नोति, काश्यप इत्यादि, अद्य इदानीं, शकुन्तला यास्यति गमिष्यति भर्तृगृहं प्रतीति शेषः, इति हेतोः हृदयं चित्तम्, उत्कण्ठया औत्सुक्येन, संस्पृष्टं संसक्तं, कण्ठो गलः, स्तम्भितबष्पवृत्तिकलुषः स्तम्भितया अवरुद्धया, बाष्पवृत्त्या अश्रुप्रसारेण, कलुष आविलः आकुल इतियावत्, दर्शनं दृष्टिः, चिन्ताजडं चिन्तया पुनर्दर्शनं न भवतीति विचारेण जडं निर्व्यापारं भवतीति शेषः, अरण्यौकसः वनवासिनोऽपि विषयविमुखस्यापीत्यर्थः, मम तावत् ममैव, ईदृशम् उक्तनानाप्रकारं, वैक्लव्यं विह्वलत्वं, स्नेहात् प्रेम्णः जायत इति शेषः, गृहिणो गृहस्थाः, नवैर्नूतनैः, तनयाविश्लेषदुःखैः पुत्रीवियोगजनितव्यथाभिः, कथन्नु केन वा प्रकारेण, पीड्यन्ते बाध्यन्ते, इत्युक्त्वा परिक्रामति आश्रमसमीपं गच्छति।

सख्यौ - हला शकुन्तले! अवसितमण्डनासि। परिधत्स्व साम्प्रतं क्षौमयुगलम्॥

सख्याविति। सख्यौ अनसूयाप्रियंवदे, आहतुः किमिति, हला सखि शकुन्तले, अवसितमण्डना परिसमाप्तालङ्करणा, असि भवसि, साम्प्रतम् अधुना, क्षौमयुगलं दुकूलद्वयं, परिधत्स्व धारय, नि। "क्षौमं दुकूल"मित्यमरः।।

([115]शकुन्तलोत्थाय परिधत्ते)

शकुन्तलेति। शकुन्तला उत्थाय उत्थिता भूत्वा, परिधत्ते धारयति।

गौतमी - जाते! एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः। आचारं तावत्प्रतिपद्यस्व॥

115 'नाट्येन परि..., लतागृहान्निर्गत्य परिधाय पुनः प्रविश्योपविष्टा..' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

गौतमीति। गौतमी शकुन्तलां प्रति व्याहरति, जाते इति।। हे जाते पुत्रिके एष पुरो वर्तमानः, ते तव, गुरुर्जनकः, नि। "गुरूगीष्पतिपित्राद्या"वित्यमरः। आनन्दपरिवाहिणा आनन्दातिशयं प्रवहता, चक्षुषा नेत्रेन्द्रियेण, परिष्वजमानः आलिङ्गन्निव, उपस्थितस्सम्प्राप्तः, त्वां द्रष्टुमिति शेषः, तावदिदानीम्, आचारम् अभिवन्दनादिकं, प्रतिपद्यस्व प्राप्नुहि कुरुष्वेत्यर्थः।

शकुन्तला - (सव्रीडम्) तात! वन्दे ॥

शकुन्तलेति। शकुन्तला सव्रीडं सलज्जं, हे तात वन्दे अभिवादये, तुभ्यमितिशेषः।

[116]काश्यपः - वत्से।

श्लो ॥ ययातेरिव शर्मिष्ठा [117]भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं [118]सेव पूरुमवाप्नुहि ॥7॥

काश्यप इति। हे वत्से कुमारि, ययातेरिति, त्वं भर्तुः प्रियस्य, ययातेर्नाम राज्ञः, ययातिरिति नहुषात्मजः कश्चिच्चन्द्रवंश्यो राजा, शर्मिष्ठेव शर्मिष्ठानाम वृषपर्वनामधेयस्य राक्षसराजस्य तनया, बहुमता प्रेमास्पदीभूता, भव एधीत्याशीरर्थे लोट्, त्वमपि, सा शर्मिष्ठा, पूरुं नाम पुत्रमिव, सम्राजं साम्राज्यलक्षणयुक्तं, सुतं पुत्रम्, अवाप्नुहि लभस्व, नि। "येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञस्ससम्राडि"त्यमरः।।

गौतमी - भगवन्! वरः खल्वेषः। नाशीः[119] ॥

---

116 'काश्यप उपसर्पीति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

117 'पत्युर्बहुमता' इति 'A' इति प्रकाशने पाठान्तरम्।

118 'चक्रवर्तिनमाप्नुहि' इति 'C' इति प्रकाशने पाठान्तरम्।

119 'नाशिषः' इति 'A' इति प्रकाशने पाठान्तरम्।
'वरौ खल्वेतौ, नाशिषौ' इति 'C' इति प्रकाशने पाठान्तरम्।

गौतमीति। हे भगवन् त्रिकालज्ञ कण्वमुने, एषः भवत्प्रयुक्तः आशीर्वादः देवादिभ्यो वृतप्रायः खलु केवलमाशीर्नभवति।

काश्यपः - वत्से। इतस्सद्यो [120]हुताग्नीन्प्रदक्षिणीकुरुष्व॥

काश्यप इति। हे वत्से इतः अस्मिन्प्रदेशे, सद्यः तत्क्षणं, हुताग्नीन् कृतहोमान्वह्नीन्, प्रदक्षिणीकुरुष्व सम्प्रदक्षिणत्वेन सम्भावय।

(सर्वे परिक्रामन्ति)

सर्व इति। सर्वे तत्रत्याः कण्वादयः, परिक्रामन्ति गच्छन्ति।

काश्यपः - (ऋक्छन्दसाशास्ते)

श्लो॥ अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसम्स्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु[121] ॥8॥

[122]प्रतिष्ठस्वेदानीम्। (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः[123] ॥

काश्यप इति। काश्यपः ऋक्छन्दसा ऋग्वेदप्रसिद्धच्छन्दसा, आशास्ते आशिषं प्रयुङ्क्ते, तामेवाह अमी इति, वेदिं परितः वेद्यां सर्वत्र, वा। "अभितः परितः" इत्यादिना द्वितीया क्लृप्तधिष्ट्याः कल्पितस्थानाः, समिद्वन्तः प्रक्षिप्तेध्मप्रकाशिताः, प्रान्तसंस्तीर्णदर्भाः प्रान्तेषु चतुर्दिक्षु, संस्तीर्णाः आच्छादिताः, दर्भाः कुशा येषां ते तथोक्ताः, हव्यगन्धैः आहुत्यामोदैः, दुरितं दुष्कृतम्, अपघ्नन्तः नाशयन्तः, वैताना यागसम्बन्धिनः, अमी पुरतस्थिताः, वह्नयः पावकाः, त्वं पतिगृहगामिनीं भवतीं, पावयन्तु पवित्रां कुर्वन्तु, दुरितनिबर्हणेन श्रेयस्करा

---

120 'हुतानग्नीन्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

121 'पालयन्तु' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

122 एतत्पूर्वम् 'शकुन्तला प्रदक्षिणं करोति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

123 'क्व ते शार्ङ्गरवशारद्वतमिश्राः' इति 'A' इति प्रकाशने पाठान्तरम्।

भवन्त्विवर्थः, एनमाशिषं प्रयुज्य गमनाय प्रेरयति, प्रतिष्ठस्वेति, हे पुत्रि इदानीमद्य, प्रतिष्ठस्व प्रस्थानं कुरु, सदृष्टिक्षेपं सदृग्व्यापारं, तत्र दृष्टिं प्रसार्येत्यर्थः, ते प्रसिद्धाः, शार्ङ्गरवमिश्राः शार्ङ्गरव प्रभृतयशिशष्याः, क्व कुत्र स्थिता इति शेषः।

[124]शिष्यः - (प्रविश्य) भगवन्। इमे स्मः॥

शिष्य इति। शिष्यः प्रविश्य कण्वनिकटं प्राप्य, हे भगवन्, इमे वयं स्मः आगता भवामः, आज्ञापयेति शेषः।

काश्यपः - [125]भगिन्यास्ते मार्गमादेशय॥

काश्यप इति। काश्यपः प्राह किमिति, हे शिष्य, ते तव, भगिन्याः स्वसुश्शकुन्तलायाः, मार्गं पन्थानम्, आदेशय प्रदर्शय।

शार्ङ्गरवः - इत इतो भवती। (सर्वे परिक्रामन्ति)

शार्ङ्गरव इति। भवती इत इतः अनेनानेन मार्गेण गच्छतु, सर्वे परिक्रामन्ति गच्छन्ति शकुन्तलया सहेति भावः।

काश्यपः - [126]भो भोः [127]सन्निहितास्तपोवनतरवः॥

श्लो॥ पातुं न प्रथमं व्यवस्यति जलं [128]युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
[129]आद्ये वः [130]कुसुमप्रसूतिसमये यस्या भवत्युत्सवः

---

124 'शिष्याः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

125 'शार्ङ्गरव!' इति 'C' इति प्रकाशने पाठान्तरम्।

126 'अहो!' इति 'C' इति प्रकाशने पाठान्तरम्।

127 'सन्निहितावनदेवतास्तपोवनतरवः' इति 'A' इति प्रकाशने पाठान्तरम्।
'हितदेवताः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

128 'युष्मास्वसिक्तेषु या' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

129 'आदौ' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्

सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥9॥

(कोकिलरवं सूचयित्वा)

श्लो॥ अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं [131]यथा
प्रतिवचनीकृतमेभिरीदृशम्[132] ॥10॥

काश्यप इति।। काश्यपः प्राह, भो भो इति, सन्निहीतास्समीप स्थिताः, भो भोस्तपोवनतरवः हे तपोवनवृक्षाः, पातुमिति, या शकुन्तला, युष्मासु अपीतेषु जलमपिबत्सु सत्सु, प्रथमम् आदौ, जलं सलिलं, पातुं पानं कर्तुं, न व्यवस्यति न काङ्क्षते, या शकुन्तला प्रियमण्डना अभिमतालङ्कारापि स्नेहेन प्रेम्णा, भवतां युष्माकं, पल्लवं किसलयं, नादत्ते न गृह्णाति, यस्याश्शकुन्तलायाः, वः युष्माकं, आद्ये प्रथमे, कुसुमप्रसूतिसमये पुष्पोत्पत्तिकाले, उत्सवः हर्षातिशयः, भवति जायते, सा एतादृश, इयं शकुन्तला, पतिगृहं भर्तृभवनं प्रति, याति गच्छति, सर्वैर्युष्माभिः अनुज्ञायताम् अनुमतिः क्रियताम्, कोकिलरवं परभृतस्वरं, सूचयित्वा ज्ञापयित्वा, अनुमतेति, इयं शकुन्तला, वनवासबन्धुभिः वननिवासपरिचितैः तरुभिर्वृक्षैः, अनुमतगमना अनुज्ञातपतिगृहयाना, यथा येन हेतुना, एभिस्तरुभिरीदृशमेवंविधं, कलमव्यक्तमधुरं, परभृतविरुतं कोकिलध्वनितं प्रतिवचनीकृतं प्रत्युत्तरीकृतम्।

[133](आकाशे)

---

130 'कुसुमप्रवृत्तिसमये' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

131 'यतः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

132 '...रात्मनः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

133 '(नेपथ्ये)' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

श्लो॥ रम्यान्तरः कमलिनीहरितैस्सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः[134]।
भूयात्कुशेशयरजो मृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः॥11॥

आकाश इति। आकाशे गगने काचिद्वाक् निस्सृता, तत्प्रकारमाह, रम्यान्तर इत्यादि, कमलिनीहरितैः कमलिनीभिः पद्मिनीभिः हरितैः पलाशसच्छायैः रम्यान्तरः कमनीयान्तरालप्रदेशः, छायाद्रुमैः छायाप्रधानवृक्षैः नियमितार्कमयूखतापः निवारितसूर्यकिरणसन्तापः कुशेशयरजोमृदुः, पद्मपरागमृदुलः, पश्चाद्गतिश्च पवनो वायुर्यस्मिन्सः, अस्याश्शकुन्तलायाः, पन्था मार्गः, शिवः कल्याणप्रदो भूयात् भवतादित्याशीरर्थे लिङ्।

(सर्वे सविस्मयमाकर्णयन्ति)

सर्व इति। सर्वे तत्रत्याः, सविस्मयं साश्चर्यम्, आकर्णयन्ति शृण्वन्ति, आकाशभाषणाद्विस्मय इति बोध्यम्।

गौतमी - जाते! ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः। प्रणम भगवतीभ्यः[135]॥

गौतमीति। हे जाते वत्से। ज्ञातिजनस्निग्धाभिः बान्धवाभिःस्नेहयुक्ताभिः, तपोनवदेवताभिः आश्रमवनाधिष्ठानदेवताविशेषैः, अनुज्ञातगमना अभिमतयाना, असि भवसि, भगवतीभ्यः वनदेवताभ्यः, प्रणम अभिवादयस्व।

---

134 'मयूखतापैः' इति 'A' इति प्रकाशने पाठान्तरम्।
अपि च 'मरीचितापः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

135 'भगवतीः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

शकुन्तला - (सप्रणामं परिक्रम्य) (जनान्तिकम्) हला प्रियंवदे! [136]नन्वार्यपुत्रदर्शनोत्सुकाया अप्याश्रमं[137] परित्यजन्त्या दुःखेन मे चरणौ [138]पुरतः प्रवर्तेते॥

शकुन्तलेति। शकुन्तला सप्रणामं सनमस्कारं, परिक्रम्य प्रदक्षिणीकृत्य, जनान्तिकं नियतश्राव्य आह किमिति हला प्रियंवदे, आर्यपुत्रदर्शनोत्सुकाया भर्तृप्रेक्षणोत्कण्ठिताया अपि, आश्रमं तपोवनं, परित्यजन्त्याः जहत्याः, मे मम, चरणो पादौ, दुःखेन वियोगजनितक्लेशेन, पुरतः पुरः प्रदेशे, न प्रवर्तेते नु कुतो वा न प्रसरतः, नि। "सुप्रच्च्यां वितर्के च" इत्यमरः॥

प्रियंवदा - न केवलं तपोवनविरहकातरा सख्येव। त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते[139]।

श्लो॥ उद्गलितदर्भकवला मृगाः[140] परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥12॥

प्रियंवदेति। सखी शकुन्तलैव, केवलमत्यन्तं, तपोवनविरहकातरा आश्रमवियोगभीरुः, न न भवति, किन्तु त्वया, उपस्थितवियोगस्य सम्प्राप्तविरहस्य, तपोवनस्य आश्रमस्यापि, समवस्था अनुभूयमानदशा, दृश्यते साकल्येन वीक्ष्यते, तथाहि, उद्गलितेति, मृगाः कुरङ्गाः, उद्गलितदर्भकवलाः भ्रंशितकुशग्रासाः, मयूरा बर्हिणः, परित्यक्तनर्तना उत्सृष्टताण्डवाः, लताः वल्लयः,

136 'ननु' इति पाठः 'B' 'C' इति प्रकाशनयोः नोपलभ्यते।
137 'आश्रमपदं' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।
138 'पुरमुखौ वर्तेते' इति 'C' इति प्रकाशने पाठान्तरम्।
139 'तावत्समवस्थां पश्य' इति 'C' इति प्रकाशने पाठान्तरम्।
140 'मृग्यः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

अपसृतपाण्डुपत्राः गलितधवलपर्णास्सत्यः, अश्रूणि बाष्पान्, मुञ्चन्ति त्यजन्तीव स्थिताः।

शकुन्तला – (स्मृत्वा) तात। लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये॥

शकुन्तलेति। शकुन्तला स्मृत्वा स्मरणमभिनीयाह, हे तात काश्यप, लताभगिनीं लतारूपस्वसारं, वनज्योत्स्नां तन्नाम लतां, तावदिदानीं, आमन्त्रयिष्ये आपृच्छिष्ये, वा। 'आङि नु पृच्छयो'रित्यात्मनेपदम्।

काश्यपः - अवैमि ते तस्यां [141]सोदर्यस्नेहम्। [142]इयं तावद्दक्षिणेन॥

काश्यप इति। काश्यपः कण्वः ब्रवीति, हे शकुन्तले ते तव, तस्यां वनज्योत्स्नायां, सोदर्यस्नेहं सहजप्रेम, अवैमि जानामि, इयं तावदेषा लता तु, दक्षिणेन दक्षिणस्मिन्नदूरदेशे वर्तत इति शेषः, तां पश्येति योजना।

शकुन्तला - (लतामुपेत्य[143]) वनज्योत्स्ने! चूतसङ्गतापि [144]मां प्रत्यालिङ्गतो गताभिश्शाखाबाहुभिः। अद्यप्रभृति दूरपरिवर्तिनी ते खलु[145] भविष्यामि॥[146]

शकुन्तलेति। शकुन्तला लतामुपेत्य प्राप्य, प्राह, हे वनज्योत्स्ने चूतसङ्गता आम्रवृक्षसम्बद्धापि, इतो गताभिः इतः प्रसारिताभिः, शाखाबाहुभिः शाखाभुजैः, मां प्रत्यालिङ्ग परिष्वजस्व, अद्यप्रभृति इमं दिनमारभ्य, ते तव,

---

141 'सोदर्यास्नेहम्' इति 'B' इति प्रकाशने पाठान्तरम्।
'सौहार्दम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

142 'इयं तावत्...' इति 'C' इति प्रकाशने नोपलभ्यते।

143 'लतामुपेत्य आलिङ्ग्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

144 'मामितो गताभिः शाखाबाहाभिः' इति 'C' इति प्रकाशने पाठान्तरम्।

145 'ते खलु' इति पाठः 'A' इति प्रकाशने नोपलभ्यते।

146 'तात, अहमिवेयं त्वया चिन्तनीया' इत्येषः अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

दूरवर्तिनी दूरदेशस्थायिनी, भविष्यामि खलु, इतः परं तव परिष्वङ्गो मम दुर्लभ इति भावः, एतेन शकुन्तलायाः तस्यां प्रेमातिशयो व्यज्यते।

काश्यपः –

श्लो॥ सङ्कल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।
[147]चूतेन [148]संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति वीतचिन्तः॥13॥
इतः पन्थानं प्रतिपद्यस्व॥

काश्यप इति। तवार्थे त्वयि विषये, प्रथमं पूर्वमेवत्वदानयनसमय एवेत्यर्थः, सङ्कल्पितं सम्यगालोचितम्, अनुकूल वरप्रदानायेति शेषः, आत्मसदृशं कुलशीलवयस्सौन्दर्यादिभिरात्मना तुल्यं, भर्तारं प्रियं, सुकृतैः जन्मान्तरकृत पुण्यविशेषैः, त्वं गता प्राप्तासि, इयं पुरोवर्तिनी, नवमालिका सप्तलाख्यालता, नि। "सप्तलानवमालिके"त्यमरः, चूतेन सहकारवृक्षेण, संश्रितवती सङ्गतवती, त्वयि अस्यां नवमालिकायां च, अहं वीतचिन्तः निर्विचारः अनुरूपाश्रयलाभादिति भावः, इतः अस्मिन्देशे, पन्थानं मार्गं, प्रतिपद्यस्व प्राप्नुहि प्रतिष्ठस्वेत्यर्थः।

शकुन्तला – (सख्यौ प्रति) हला! एषा द्वयोर्वां[149] हस्ते निक्षेपः॥

शकुन्तलेति। शकुन्तला सख्यौ प्रति प्राह किमिति, हला हे अनसूयाप्रियंवदे, द्वयोरुभयोर्वां युवयोः, हस्ते करे, एषा लता निक्षेपः न्यासः।

---

147 'अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः। कान्तं समीपसहकारमहं करिष्ये॥' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

148 'सङ्गतवती' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

149 'द्वयोर्युवयोर्नन्' इति 'A' इति प्रकाशने पाठान्तरम्।
'द्वयोर्युवयोर्हस्ते' इति 'B' इति प्रकाशने पाठान्तरम्।

सख्यौ - अयं जनः[150] कस्य हस्ते समर्पितः। (इति बाष्पं [151]विकिरतः)

सख्याविति। अयं जनः सखीजनः, कस्य जनस्य, हस्ते पाणौ, समर्पितः न्यासः कृतः इत्युक्त्वा बाष्पमश्रुजलं, विकिरतः प्रसारयतः, नि। "बाष्पो नेत्रजलोष्मणो"रिति विश्वः॥

काश्यपः - अनसूये! अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला॥

काश्यप इति। हे अनसूये, अलं रुदित्वा रोदनं न कर्तव्यमित्यर्थः, भवतीभ्यां युवाभ्यामेव, शकुन्तला स्थिरीकर्तव्या दृढीकर्तव्या ननु।

(सर्वे परिक्रामन्ति)

सर्व इति। सर्वे कण्वादयः परिक्रामन्ति गच्छन्ति।

शकुन्तला - तात! एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदा [152]अनघप्रसवा भवति तदा मे[153] कमपि प्रियनिवेदयितारं[154] [155]विसर्जयिष्यथ॥

शकुन्तलेति। शकुन्तला प्राह, किमिति, हे तात पितः, उटजपर्यन्तचारिणी पर्णशालाप्रान्तवर्तिनी, गर्भमन्थरा गर्भधारणेनमन्दगमना, एषा मृगवधूः कुराङ्गना, यदा यस्मिन्समये, अनघप्रसवा क्लेशरहितसन्ताना, भवति जायते, तदा तस्मिन्समये, प्रियनिवेदयितारम् इष्टसमाचारज्ञापकं, कमपि कश्चित्पुरुषं,

---

150 'त्वयेदानीम्' इति 'C' इति प्रकाशने अधिकः पाठः।

151 'विहरतः, विसृजतः' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

152 'नवप्रसवा' इति 'A' इति प्रकाशने पाठान्तरम्। 'अनर्घ' इति 'C' इति प्रकाशने पाठान्तरम्।

153 'मह्यं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

154 'प्रियनिवेदयितृकं' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

155 'विसर्जय' इति 'C' इति प्रकाशने पाठान्तरम्।

विसर्जयिष्यथ प्रेषयिष्यथ, एतेन आश्रमस्थितेषु सर्वेषु मृगेषु शकुन्तलायाः प्रेमातिशयोऽतीव सूच्यते।

काश्यपः - [156]नेदं विस्मरिष्यामः ॥

काश्यप इति। इदं भवदुक्तं प्रियवार्तावह प्रेषणं न विस्मरिष्यामः विस्मृतिं न प्राप्स्यामः।

शकुन्तला - (गतिभङ्गं रूपयित्वा) को नु खल्वेष निवसने मे सज्जति[157]। (इति परावर्तते)

शकुन्तलेति। शकुन्तला गतिभङ्गं गमनप्रतिबन्धं, रूपयित्वा अभिनीय, को नु खलु को वा, एषोऽत्रस्थितः, मे मम, निवसने निवासे, सज्जति आसक्तो भवति स्थापयतीत्यर्थः, इत्युक्त्वा परावर्तते निवर्तते।

काश्यपः - वत्से!

श्लो॥ यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ 14॥

काश्यप इति। हे वत्से यस्य मृगपोतस्य, कुशसूचिविद्धे दर्भाग्रव्रणिते, मुखे आनने, व्रणविरोपणं व्रणापनोदनं, इङ्गुदीनां तापसतरूणां, तैलं स्नेहः, न्यषिच्यत आलिप्यत, श्यामाकमुष्टिपरिवर्धितकः श्यामाकानां धान्यविशेषाणां मुष्टिभिः मुष्टिप्रदानैः, परिवर्धितकः परिपोषितः, स प्रसिद्धः पुत्रकृतकः कृत्रिमपुत्रः

---

156 'भवतु' इति अधिक पाठः उपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

157 'सज्जते' इति 'A' इति प्रकाशने पाठान्तरम्।
'किं नु खल्वेष पुनः पुनरपि निवसनं मे सज्जति' इति 'C' इति प्रकाशने पाठान्तरम्।

पुत्रत्वेनाभिमन्यमान इत्यर्थः, अयं पुरोवर्ती मृगः, ते तव, पदवीं मार्गं, न जहाति न त्यजति, प्रेमातिशयेनेति भावः।

शकुन्तला - वत्स! किं सहवासपरित्यागिनीं मामनुसरसि। अचिरप्रसूतया जनन्या विना [158]विवर्धित एव। इदानीमपि मया [159]विरहितं त्वां तातश्चिन्तयिष्यति। निवर्तस्व तावत्॥ (इति रुदन्ती[160] प्रस्थिता)

शकुन्तलेति। हे वत्स मृगपोत, सहवासपरित्यागिनीं सहचरं परित्यज्य गच्छन्तीं मां, किमनुसरसि किमर्थमनुगच्छिसि, अचिर प्रसूतया शीघ्रप्रजातया, जनन्या मात्रा विना मातरं विहाय, विवर्तितः पोषित एव मयेति शेषः, इदानीमद्यापि, मया विरहितं विश्लिष्टं त्वां, तातः कण्वमुनिः, चिन्तयिष्यति संरक्षिष्यतीत्यर्थः तावदिदानीं, निवर्तस्व पश्चाद्गच्छ इत्युक्त्वा, रुदन्ती अश्रूणि मुञ्चन्ती प्रस्थिता प्रयाता।

[161]काश्यपः –

श्लो॥ उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया [162]विरतानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति॥15॥

---

158 ‘वर्धित’ इति ‘A’ ‘B’ ‘C’ इति प्रकाशनेषु पाठान्तरम्।

159 ‘विरहितां तात....’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

160 ‘रुदती’ इति ‘A’ ‘B’ ‘C’ इति प्रकाशनेषु पाठान्तरम्।

161 ‘काश्यपः – अलं रुदितेन’ इति पाठान्तरमुपलभ्यते इति ‘B’ इति प्रकाशने निर्दिष्टम्।

162 ‘विहतानुबन्धम्’ इति ‘A’ ‘B’ इति प्रकाशनयोः पाठान्तरम्। अपि च ‘शिथिलानुबन्धम्’ इति ‘A’ इति प्रकाशने पाठान्तरम्।

काश्यप इति। उपरुद्धवृत्तिं निवारितदर्शनव्यापारं, बाष्पमश्रुजलं, उत्पक्ष्मणोः उन्नमितनेत्रलोम्नो नि। "पक्ष्माक्षिलोम्नि किञ्जल्के तं त्वाद्यंशेऽप्यणीयसी" इत्यमरः, नयनयोर्नेत्रयोः, विरतानुबन्धं समाप्तसन्ततिं, स्थिरतया निश्चलत्वेन धैर्येणेति यावत्, कुरु सम्पादय, खलु यतो हेतोः अलक्षित नतोन्नतभूमिभागे अनवलोकितनिम्नोन्नतमहीप्रदेशे, अस्मिन्मार्गे पथि, ते तव, पदानि पादविन्यासाः, विषमीभवन्ति स्खलन्ति ततो बाष्पं निवारयेति पूर्वेणान्वयः।

शार्ङ्गरवः - भगवन्! [163]ओदकान्तात्स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य [164]प्रतिगन्तुमर्हसि॥

शार्ङ्गरव इति। हे भगवन्, स्निग्धजनः बन्धुजनः, ओदकान्तात् उदकसमीपदेशपर्यन्तम्, अनुगन्तव्यः अनुसरणीयः इत्येवं प्रकारेण, श्रूयते श्रुत्या प्रतिपाद्यते, तत्तस्मात् इदं पुरोवर्ति, सरस्तीरं पद्माकरकूलं वर्तत इति शेषः, अत्र सरस्तीरे सन्दिश्य सम्यगुपदिश्य, प्रतिगन्तुम् आश्रमं प्रति पुनर्गन्तुम् अर्हसि युक्तो भवसि।

काश्यपः - तेन हीमां क्षीरवृक्षच्छायामाश्रयामः॥ (सर्वे परिक्रम्य स्थिताः)

काश्यप इति। तेन हेतुना, इमां पुरस्थिताम्, क्षीरवृक्षच्छायां तन्नामकवृक्षस्यच्छायामनातपप्रदेशम् आश्रयामः अनुसरामः, इति सर्वे परिक्रम्य तत्रत्यास्समस्तजनाः वृक्षच्छायां प्राप्य, स्थिताः वर्तन्ते स्म।

काश्यपः - (आत्मगतम्) किं नु खलु तत्र भवतो दुष्यन्तस्य युक्तरूपमस्माभिस्सन्देष्टव्यम्। (इति चिन्तयति)

---

163 'ओदकान्तं स्निग्धो' इति 'A' इति प्रकाशने पाठान्तरम्।
'उदकान्तं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

164 'नः' इति 'C' इति प्रकाशने अधिकः पाठः।

काश्यप इति। काश्यपः कण्वः, आत्मगतं स्वगतं तत्र भवतः पूज्यस्य, दुष्यन्तस्य तन्नामकस्य राज्ञः, युक्तरूपम् अनुकूलम्, अस्माभिः सन्देष्टव्यं प्रेषितव्यम्, सन्देशार्हं वचनजातमित्यर्थः, किं नु किं वा भवेत्खलु, इत्येवं प्रकारेण चिन्तयति पर्यालोचयति।

शकुन्तला - (जनान्तिकम्) हला! [165]प्रेक्षस्व। नलिनीपत्रान्तरितं प्रियसहचरमपश्यन्त्यातुरा चक्रवाक्यारटति दुष्करमहं करोमीति॥[166]

शकुन्तलेत्यादि। शकुन्तला जनान्तिकं रहसीत्यर्थः, हला सखि अनसूये नलिनीपत्रान्तरितं पद्मपर्णनिलीनं, प्रियसहचरं सहचारिणं वल्लभम्, अपश्यन्ती अनवलोकमाना, अत एवातुरा दुःखितासती, चक्रवाकी आरटति ध्वनति, प्रेक्षस्व पश्य, अहं दुष्करं दुस्साधं कार्यमिति शेषः, करोमि साधयामीति पूर्वेणान्वयः।

अनसूया - सखि! मैवं मन्त्रयस्व[167]।

श्लो॥ एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।
गुर्वपि विरहदुःखमाशाबन्धस्सहयति[168] ॥16॥

अनसूयेति। हे सखि शकुन्तले, एवमनेन प्रकारेण, मामन्त्रयस्व मा विचारय एषेति, एषा चक्रवाक्यपि, प्रियेण विना भर्त्रा विना, रजनीं रात्रिं विषाददीर्घतरां विषादेन दुःखेनदीर्घतरां, दीर्घत्वेन प्रतीयमानां, गमयति यापयति

---

165 'पश्य' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

166 'हला पश्य। नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्या रौति दुष्करमहं करोमीति तर्कयामि।' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'सखि! पश्य दक्षिणतो नलिनीपत्रान्तरितमपि सहचरमपश्यन्ती आतुरा चक्रवाकी आरवति। दुष्करं खल्वहं करोमि।' इति 'C' इति प्रकाशने पाठान्तरम्।

167 'मन्त्रय' इति 'A' इति प्रकाशने पाठान्तरम्।

168 'साहयति' इति 'B' इति प्रकाशने पाठान्तरम्।

तथाहि आशाबन्धः आशारूपसम्बन्धः, गुरु दुर्भरमपि, विरहदुःखं विप्रयोगखेदं, सहयति मर्षयति।

काश्यपः - शार्ङ्गरव! त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ॥

काश्यप इति। हे शार्ङ्गरव! त्वया सराजा दुष्यन्तः, शकुन्तलां पुरस्कृत्य अग्रे निधाय, मद्वचनात् मम भाषणात्, वक्तव्यः भाषणीयः।

शार्ङ्गरवः - आज्ञापयतु भवान्[169] ॥

शार्ङ्गरव इति। भवान् आज्ञापयतु दुष्यन्तं प्रति यद्वक्तव्यं तदादिशत्वित्यर्थः।

काश्यपः -

श्लो॥ अस्मान्साधु विचिन्त्य[170] संयमधनानुच्चैःकुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥17॥

काश्यप इति। काश्यपः प्राह, किमिति, अस्मानित्यादि, अस्मान् संयमधनान् तपोधनान्, साधु सम्यग्विचिन्त्य विचार्य, उच्चैरुन्नतम्, आत्मनस्स्वस्य, कुलं वंशं च, विचिन्त्य त्वयि विषये अस्याश्शकुन्तलायाः, कथमपि कृच्छ्रेण, अबान्धवकृताम् बन्धुजनासम्मत्या कृतां, ताम् अनिर्वचनीयां स्नेहप्रवृत्तिं प्रेमप्रसारं च विचिन्त्य, दारेषु जायासु, इयं निर्धारणसप्तमी[171],

---

169 'भगवान्' इति 'B' इति प्रकाशने पाठान्तरम्।

170 'परीक्ष्य संयमपरान्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

171 यतश्च निर्धारणम्।। अष्टाध्यायी <2.3.41>

सामान्यप्रतिपत्तिपूर्वकं कलत्रान्तरसाम्यग्ज्ञानपुरस्सरम् इयं शकुन्तला, त्वया दृश्या प्रेक्ष्यणीया, अतःपरं अतोऽधिकं, भाग्यायत्तं दैवाधीनं, वधूबन्धुभिः पित्रादिभिः, तत् विशेषदर्शनादिकं, न वाच्यं न कथनीयं खलु।

शार्ङ्गरवः - गृहीतस्सन्देशः ॥

शार्ङ्गरव इति। सन्देशः वाचिकार्थः, गृहीतः अवगतः।

काश्यपः - वत्से! त्वमिदानीमनुशासनीयासि। [172]वनौकसोऽपि सन्तो लौकिकज्ञा[173] वयम् ॥

काश्यप इति। हे वत्से बाले, इदानीम् अस्मिन्समये पतिगृहयानकाल इति यावत्, त्वम् अनुशासनीया शिक्षणीया, असि भवसि, वनौकसः तपस्विनोऽपि, वयं लौकिकज्ञाः बहुविधलोक वृत्तान्ताभिज्ञाः तपोमहिम्नेतिभावः।

शार्ङ्गरवः - न खलु धीमतां कश्चिदविषयो नाम ॥

शार्ङ्गरव इति। धीमतां बुद्धिमतां, अविषयः अगोचरो नाम, कश्चित् कश्चनापि पदार्थो, न खलु नास्ति हि, सर्वोऽपि विद्वद्भिर्ज्ञायत एवेति भावः।

काश्यपः – सा त्वमितः पतिकुलं प्राप्य।

श्लो ॥ शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने [174]भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥18॥

---

[172] 'पश्य वनौ...' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

[173] 'लोकज्ञा' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

[174] 'भोगेष्वनुत्सेकिनी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

कथं वा गौतमी मन्यते॥

काश्यप इति। काश्यपः कण्वमुनिः प्राह, किमिति, हे शकुन्तले सा प्रसिद्धा त्वम्, इतोऽस्मद्गृहात्, पतिकुलं भर्तृगृहं, प्राप्य प्रविश्य, शुश्रूषस्वेति त्वं गुरून् पूजार्हान्, शुश्रूषस्व परिचर, सपत्नीजने स्वभर्तुरितरभार्यासु विषये, प्रियसखीवृत्तिम् इष्टसहचरीव्यापारं प्रियसम्भाषणादिकमिति यावत्, कुरु विधेहि, विप्रकृता कोपिताऽपि, रोषणतया क्रोधस्वभावेन, भर्तुः प्रियस्य, प्रतीपं प्रातिकूल्यं मास्मगमः मा प्राप्नुहि, सू। 'स्मोत्तरे लङ्चे'ति चकाराल्लुङ्, परिजने भृत्येषु विषये भूयिष्ठमत्यन्तं, दक्षिणा समानव्यापारा, भव एधि, भाग्येषु सम्पत्सु, अनुत्सेकिनी गर्वशून्या, भवेत्यत्रापि सम्बध्यते, एवमुक्तप्रकारेण, युवतयः स्त्रियः, गृहिणीपदं गृहस्था शब्दं, यान्ति प्राप्नुवन्ति, वामाः उक्तविपरीताः, कुलस्य वंशस्य, आधयः मनोव्यथाप्रायाः, नि। "पुंस्याधिर्मानसीव्यथे"त्यमरः। गौतमी कथं केन वा प्रकारेण, मन्यते जानीते।

गौतमी - एतावान्वधूजनस्योपदेशः। जाते एतत्खलु सर्वमवधारय॥

गौतमीति। हे जाते वत्से, वधूजनस्य स्त्रीजनस्य उपदेशशिक्षणं, एतावान् एतत्परिमाणकः, एतत् तदुक्तं, सर्वं समस्तं वाक्यजातम्, अवधारय खलु हृदये धारय॥

काश्यपः - वत्से! परिष्वजस्व मां सखीजनं च॥

काश्यप इति। हे वत्से तनये, मां सखीजनं अनसूयाप्रियंवदे च, परिष्वजस्व परिरम्भणं कुरुष्व।

शकुन्तला - तात! इत एव किं [175]प्रियंवदामिश्रास्सख्यो [176]निवर्तिष्यन्ते॥

---

[175] 'प्रियः सख्यौ' इति 'A' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। हे तात इतोऽस्मात्प्रदेशादेव, प्रियंवदामिश्राः प्रियंवदासहिताः, सख्यः प्रियाः, निवर्तिष्यन्ते परावर्तन्ते किम्।

काश्यपः - वत्से। इमे अपि प्रदेये। [177]न युक्तमनयोस्तत्र गन्तुम्॥ त्वया सह गौतमी [178]यास्यति॥

काश्यप इति। हे वत्से कुमारि, इमे अनसूयाप्रियंवदे अपि, प्रदेये अर्पणीये, इति काकुः नार्पणीये इति भावः, अनयोस्सख्योस्तत्र तस्मिन्प्रदेशे, गन्तुं न युक्तं नार्हं नोचितमित्यर्थः, त्वया सह भवत्या साकं, गौतमी मद्भगिनी, यास्यति गमिष्यति।

शकुन्तला - (पितरमाश्लिष्य[179]) कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि[180]॥

शकुन्तलेति। शकुन्तला पितरं तातम्, आश्लिष्य आलिङ्ग्य, प्राह इदानीमद्य, तातस्य कण्वमुनेरङ्कादुत्सङ्गात्परिभ्रष्टा परिच्युता, अहं मलयतटोन्मूलिता मलयपर्वतसानूद्धृता, चन्दनलता मलयजशाखेव, देशान्तरे अन्यदेशे जीवितं प्राणं, कथं केन वा प्रकारेण, धारयिष्यामि स्थापयिष्यामि।

काश्यपः - वत्से! किमेवं कातरासि।

श्लो॥ अभिजनवतो भर्तुश्श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः [181]कृत्यैस्तस्य प्रतिक्षणमाकुला।

'प्रियंवदानुसूये' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

176 'निवर्तिष्येते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

177 'तन्न' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

178 'गमिष्यति' इति 'A' इति प्रकाशने पाठान्तरम्।

179 'पितुरङ्कमाश्लिष्य' इति 'A' इति प्रकाशने पाठान्तरम्।

180 'धरयिष्ये' इति 'A' इति प्रकाशने पाठान्तरम्।

तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥19॥

काश्यप इति। हे वत्से एवमनेन प्रकारेण, कातरा अधीरा नि। "अधीरेकातर"इत्यमरः, किं किमर्थमसि भवसि, अधैर्यं न कार्यमति भावः। किं च अभिजनवत इति, अभिजनवतः सत्कुलप्रसूतस्य, भर्तुः प्रियस्य, श्लाघ्ये पूजनीये, गृहिणीपदे पट्टमहिषीस्थाने, स्थिता वर्तमाना, तस्य भर्तुः, विभवगुरुभिः वैभवेन महद्भिः, कृत्यैः कार्यैः, प्रतिक्षणं सर्वदा, आकुला व्याप्ता अचिराच्छीघ्रमेव, पावनं पवित्रचारित्रं, तनयं पुत्रं, प्राची दिक्, अर्कं सवितारमिव, प्रसूय जनयित्वा च हे वत्से त्वं मम विरहजां भर्तृगृहे सर्वसम्पदः प्राप्य नास्मान् स्मरिष्यस्येवेति भावेः।

शकुन्तला - (पितुः पादयोः पतति)[182]

शकुन्तलेति। शकुन्तला पितुस्तातस्य, पादयोश्चरणयोः, पतति।

काश्यपः - यदिच्छसि[183] **ते तदस्तु॥**

काश्यप इति। काश्यपः प्राह किमिति, हे कुमारि त्वं, यदिच्छा यद्विषयकेच्छावती, असि भवसि, ते तुभ्यं, तदस्तु भवत्वित्याशीरर्थेलोट्।

शकुन्तला - (सख्यावुपेत्य) हला। द्वे अपि मां सममेव परिष्वजेथाम्॥

शकुन्तलेति। शकुन्तला सख्यौ अनसूयाप्रियंवदे, उपेत्य प्राप्य प्राह, किमिति, हला सख्यौ, द्वे उभे अपि मां, सममेकदेव, परिष्वजेथाम् आश्लिष्यतम्।

---

181 'कृत्यैरहस्य' इति 'A' इति प्रकाशने पाठान्तरम्।

182 'पितस्त्वां वन्दे' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

183 'यदिच्छामि' इति 'A' इति प्रकाशने पाठान्तरम्।
'यदिच्छास्ति' इति 'C' इति प्रकाशने पाठान्तरम्।

सख्यौ – (तथा कृत्वा) सखि! यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्। ततोऽस्मायिदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय[184] ॥

सख्याविति। सख्यौ द्वे, तथाकृत्वा आलिङ्गनं कृत्वा, हे सखि शकुन्तले, स राजा दुष्यन्तः, प्रत्यभिज्ञानमन्थरः प्रत्यभिज्ञाने पूर्वस्मृत्यां, मन्थरः मन्दःभवेद्यदि नाम, तदा तस्मिन्काले, ततोऽनन्तरम्, अस्मै दुष्यन्ताय, स्वनामधेयाङ्कितं स्वाभिधानचिह्नितम्, इदं त्वदङ्गुलीनिषक्तमङ्गुलीयकं, दर्शय प्रेक्षय।

शकुन्तला - अनेन सन्देहेन वामाकम्पितास्मि ॥

शकुन्तलेति। हे सख्यौ वां युवयोः, अनेन सन्देहेन परिग्रहसंशयेन, आकम्पिता चलितास्मि भवामि।

सख्यौ - मा बिभीहि[185]। अतिस्नेहः[186] पापशङ्की ॥

सख्याविति। सख्यौ प्राहतुः, किमिति, हे शकुन्तले त्वं मा बिभीहि भयं न प्राप्नुहि, अति स्नेहः उत्कटमैत्री, पापशङ्की अनर्थदर्शी।

शार्ङ्गरवः - [187]युगान्तरमारूढस्सविता। त्वरतामत्रभवती।

शार्ङ्गरव इति। सविता सूर्यः, युगान्तरं युगमात्रान्तरितं प्रदेशं, आरूढः अधिष्ठितः, अत्रभवती पूज्या, त्वरतां सत्वरं गच्छतु।

शकुन्तला - (आश्रमाभिमुखी स्थित्वा) तात! कदा नु भूयस्तपोवनं प्रेक्षिष्ये[188] ॥

---

[184] एतस्य वाक्यस्यानन्तरम् 'अङ्गुलीयकं दत्तः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'भवेत् अस्मै इदं स्वनाम......' इति 'C' इति प्रकाशने पाठान्तरम्।

[185] 'भैषीः' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

[186] 'स्नेहः' इत्येव पाठः 'A' इति प्रकाशने लभ्यते।

[187] 'युगान्तरमधिरूढः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शकुन्तलेति। शकुन्तला आश्रमाभिमुखी तपोवनोन्मुखी, स्थित्वा निविश्य, प्राह, किमति, तात कदा कस्मिन्काले, भूयः पुनः, तपोवनमाश्रमं, प्रेक्षिष्ये द्रक्ष्यामि।

काश्यपः - श्रूयताम्।

श्लो॥ भूत्वा चिराय [189]चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य[190]।
भर्त्रा तदर्पितकुटुम्बभरेणसार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥20॥

काश्यप इति। काश्यपः प्राह, हे वत्से श्रूयताम् आकर्ण्यतां भवदागमनसमय इति शेषः, तमेवाह, भूत्वेति, चिराय चिरकालं, चतुरन्तमहीसपत्नी चत्वारो अन्ता यस्यास्सा समस्तेत्यर्थः, सा चासौ मही च तस्यास्सपत्नी भूत्वा पट्टमहिषीत्वं प्राप्येत्याशयः, अप्रतिरथं प्रतिभटरथिकरहितं, अत्र रथशब्देन रथिको लक्ष्यते यद्वा रथशब्द आर्षः आद्यजन्तः दौष्यन्तिम् दुष्यन्तापत्यं, तनयमात्मजं, निवेश्य राज्ये प्रतिष्ठाप्य, तदर्पितकुटुम्बभरेण तस्मिन् दुष्यन्तापत्ये अर्पितो निहितः, कुटुम्बभरः त्वदितरपत्न्यादि-भरणं येन तेन, भर्त्रा पत्या सार्धं, शान्ते रागद्वेषादिवर्जिते, अस्मिन्नाश्रमे मम तपोवने, पदं स्थानं, करिष्यसि विधास्यसि, पुनरित्यप्राथम्यवाचकमव्ययम्, त्वयि विषये उक्त वैभवानन्तरमिति भावः।

गौतमी - जाते! परिहीयते गमनवेला। निवर्तय पितरम्। अथवा चिरेणापि पुनः पुनरेषैवं मन्त्रयिष्यते। निवर्ततां भवान्॥

---

188 'द्रक्ष्यामि?' इति 'C' इति प्रकाशने पाठान्तरम्।

189 'सदिगन्त...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

190 'प्रसूय' इति 'C' इति प्रकाशने पाठान्तरम्।

गौतमीत्यादि। हे जाते वत्से, गमनवेला प्रयाणसमयः, परिहीयते परिक्षीणो भवति अतिक्रामतीत्यर्थः, पितरं कण्वमुनिं, निवर्तय पश्चात्प्रेषय, अथवा पक्षान्तरे चिरेण चिरकालेनापि, पुनः पुनः प्रतिक्षणम् एषा शकुन्तला, एवं पूर्वोक्तप्रकारेण, मन्त्रयिष्यते गूढं सम्भाषिष्यते, भवान् निवर्ततां पश्चाद्गच्छतु।

काश्यपः - वत्से! उपरुध्यते [191]तपोऽनुष्ठानम्॥

काश्यप इति। हे वत्से कुमारि, तपोऽनुष्ठानं तपश्चरणम्, उपरुध्यते प्रतिबध्यते त्वयेति शेषः, वियोगेनेति भावः।

शकुन्तला - (भूयः पितरमाश्लिष्य) [192]तपश्चरणपीडितं तातशरीरम्। [193]तन्नातिमात्रं मम कृते उत्कण्ठस्व[194]॥

शकुन्तलेति। शकुन्तला भूयः पुनः, पितरं तातकण्वं, आश्लिष्यालिङ्ग्य प्राह, किमिति, हे तात, शरीरमङ्गम्, तपश्चरणपीडितं तपोऽनुष्ठानकृशं, तत्तस्मान्ममकृते मदर्थम्, अतिमात्रमत्यन्तं, नोत्कण्ठस्व उत्कण्ठां न प्राप्नुहि।

[195]काश्यपः - ([196]सनिश्श्वासम्)

श्लो॥ [197]शममेष्यति मम शोकः कथन्नु वत्से त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः॥21॥

---

191 'तपोवनानुष्ठानम्' इति 'A' इति प्रकाशने पाठान्तरम्।

192 'भोयोऽपि तपश्चरणपीडितं मम कृते तातस्य शरीरमतिमात्रम् उत्कण्ठितं भविष्यति।' इति 'C' इति प्रकाशने पाठान्तरम्।

193 'तन्मातिमात्रं' इति 'A' इति प्रकाशने पाठान्तरम्।

194 'उत्कण्ठितुम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

195 'काश्यपः – अयि किं मां जडीकरोषि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

196 'निःश्वस्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

197 'अपयास्यति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

गच्छ। शिवास्ते पन्थानस्सन्तु॥

काश्यप इति। काश्यपः सनिश्वासम् क्लेशप्रयुक्तनिश्वाससहितं प्राह, शममिति, हे वत्से त्वया रचितपूर्वं पूर्वं निर्मितम्, उटजद्वारविरूढं पर्णशालाद्वारसंस्थापितं, नीवारबलिं नीवारतण्डुलचूर्णकृत बलिकर्मविचित्रतररङ्गवल्लीमित्र्थः, विलोकयतः पश्यत इत्यर्थः, मे मम, शोकः दुःखं, कथन्नु केन वा प्रकारेण, शमं शान्तिमेष्यति गमिष्यति न कथञ्चिदपित्यर्थः, अथ श्वशुरगृहगमनसन्तोषं सूचयन् शकुन्तलाया गमनम् अनुजानाति, गच्छेति, हे कुमारि त्वं गच्छ याहि, ते तव, पन्थानः मार्गाः, शिवाः भद्रप्रदाः सन्तु भवन्तु।

(इति निष्क्रान्ता शकुन्तला सहयायिनश्च)

इतीति। इत्युक्त्वा शकुन्तला निष्क्रान्ता निर्गता, सहयायिनः अनुचराश्च, निर्गता इति विभक्तिविपरिणामेन योजना।

सख्यौ - (शकुन्तलां विलोक्य) हा धिक्! हा धिक्! अन्तर्हिता [198]शकुन्तला वनराज्या॥

सख्याविति। सख्यौ अनसूयाप्रियंवदे, शकुन्तलां विलोक्य दृष्ट्वा, प्राहतुः हा धिक् हाधिगितिनिर्वेदे, शकुन्तला वनराज्या वनपङ्क्त्यान्तर्हिता आच्छादिता।

काश्यपः - (सनिश्श्वासम्।) अनसूये! गतवती[199] वां सहधर्मचारिणी[200]। निगृह्य शोकमनुगच्छतं[201] मां प्रस्थितम्॥

---

198 'प्रयसखी' इति 'C' इति प्रकाशने अधिकः पाठः।

199 'गता वां सहचरी, सहधर्मचा...' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

200 'सहचारिणी' इति 'B' इति प्रकाशने पाठान्तरम्।

201 '...गच्छ माम् (प्रस्थितः, सर्वे प्रस्थिताः)' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

काश्यप इति।। काश्यपः कण्वमुनिः सनिश्वासं निश्वाससहितं, हे अनसूये, वां युवयोः, सहधर्मचारिणी सखी गतवती, शोकं दुःखं, निगृह्य निवार्य, प्रस्थितं प्रयातं, माम् अनुगच्छतम् अनुसरतम्।

उभे - तात! शकुन्तलाविरहितं शून्यमिव तपोवनं कथं[202] प्रविशावः[203]॥

उभे इति। उभे अनसूयाप्रियंवदे, आहतुः, हे तात शकुन्तला विरहितं शकुन्तलया विसृष्टम्, अत एव शून्यं निर्जनमिव स्थितं, तपोवनम् आश्रमवनं कथं केन वा प्रकारेण, प्रविशावः गाहावहे।

काश्यपः - [204]स्नेहप्रवृत्तिरेवंदर्शिनी[205]। (सविमर्शं परिक्रम्य) हन्त! भो! शकुन्तलां [206]पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः।

श्लो॥ अर्थो हि कन्या परकीय एव
[207]तामद्य सम्प्रेष्य परिग्रहीतुः।
[208]जातो ममाऽयं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा॥22॥

(इति निष्क्रान्तास्सर्वे[209])

---

202 'कथं' इति एषः पाठः 'A' इति प्रकाशने नोपलभ्यते।

203 'प्रविशामः?' इति 'C' इति प्रकाशने पाठान्तरम्।

204 'वृत्तिः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

205 'शंसिनी' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

206 'प्रति' इति 'C' इति प्रकाशने पाठान्तरम्।

207 'तामेवं' इति 'A' इति प्रकाशने पाठान्तरम्।
'तामेव' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

208 'जातो ममायं विशदः प्रकामम्। प्रत्यर्पितन्यास इवान्तरात्मा।।' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

॥ इति चतुर्थोऽङ्कः ॥

काश्यप इति। स्नेहप्रवृत्तिः प्रेमप्रसारः, एवं दर्शिनी पूर्वोक्तप्रकारदर्शिका, सविमर्शं सविचारं, परिक्रम्य आश्रमं गत्वा, हन्तेति हर्षे, भोः आश्रमवासिनः। शकुन्तला नाम मत्पुत्रीं, पतिकुलं भर्तृगृहं, विसृज्य सम्प्रेष्य, इदानीमद्य, स्वास्थ्यम् अव्याकुलत्वं, लब्धं प्राप्तम्, कुतः कस्मादितिचेत्, अर्थ इति, कन्या अविवाहपुत्रिका, परिकीयः अन्यदीय एव, अर्थो धनं हि, अद्येदानीं, तां कन्यां, परिग्रहीतुः वरस्य, सम्प्रेष्य सम्प्राप्य, ममायमन्तरात्मा, प्रत्यर्पितन्यासः प्रत्यर्पितः प्रतिसमर्पितः, न्यासः उपनिधिर्येन स तथोक्तः, स इव, प्रकाममत्यन्तं, विशदः अतीव स्वच्छः जातः, इत्युक्त्वा, सर्वे कण्वादयः, निष्क्रान्ता निर्गताः।

इति श्रीमृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तल व्याख्याने पूर्णचन्द्रिकाख्याने चतुर्थोऽङ्कः। श्री शुभं भवतु।

209 'प्रस्थिताः सर्वे' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अथ पञ्चमोऽङ्कः

(ततः प्रविशत्यासनस्थो राजा विदूषकश्च)

कविरिदानीं शापजविरहं वर्णयिष्यमाने कथान्तरमारभते, ततः प्रविशतीत्यादि, ततोऽनन्तरम् आसनस्थः सिंहासने उपविष्टस्सन्, प्रविशति, आगच्छति रङ्गस्थलमिति शेषः विदूषकश्च प्रविशतीत्यत्राप्यनुषज्यते।

विदूषकः - (कर्णं दत्वा।) भो! भो![1] वयस्य! सङ्गीतशालान्तरेऽवधानं देहि। कलविशुद्धायां गीत्यां[2] स्वरसंयोगश्श्रूयते। जाने तत्रभवती हंसपदिका वर्णपरिचयं करोतीति॥

विदूषक इति। विदूषकः कर्णं दत्वा–श्रोत्रं तद्वाक्यप्रवणं कृत्वा प्राह, किमिति, भो भो वयस्य भो भो इत्यादरातिशयाद्विरुक्तिः, वयस्य सखे, सङ्गीतशालान्तरे सङ्गीतस्य तौर्यत्रिकस्य या शाला तस्या अन्तरे मध्यदेशे, अवधानं देहि सावधानो भव, कलविशुद्धायां कलेनाव्यक्तमधुरस्वरेण विशुद्धायां, स्वच्छतरायां, गीत्यां गाने, स्वरसंयोगः स्वराणां सम्बन्धश्श्रूयते आकर्ण्यते, तत्रभवती पूज्या, हंसपदिका नाम काचित् योषित्, वर्णपरिचयं वर्णानां कृतिविशेषगीतानां परिचयम् अभ्यासं, करोति विदधातीति, जाने बोधामि।

राजा - तूष्णीं भव। यावदाकर्णयामि॥

राजेति। राजा विदूषकं प्राह, किमिति, तूष्णीम् अवचनः, भव एधि, यावदाकर्णयामि श्रोष्यामि स्वरयुक्तगानमिति शेषः।

(आकाशे गीयते।)

---

1 'भो' इति एकवारमेव पाठः 'A' इति प्रकाशने उपलभ्यते।

2 'कालविशुद्धाया गीतेः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

श्लो॥ अभिनवमधुलोलुपस्त्वं[3]
तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो
मधुकर विस्मृतोऽस्येनां कथम्॥1॥

आकाश इति। आकाशे वियति नेपथ्यव्यतिरिक्तस्थाने, गीयते गानं क्रियते, तत्प्रकारमेवाह, अभिनवेत्यादि, हे मधुकर भृङ्ग, अभिनवमधुलोलुपः नूतनपुष्परसास्वादनासक्तः, त्वं, चूतमञ्जरीं रसालवल्लरीं, तथा तेन प्रकारेण, परिचुम्ब्य आस्वाद्य, कमलवसतिमात्रनिर्वृतः कमले पद्मे, वसतिमात्रेण केवलनिवासेन, निर्वृतस्सुखितः, एनां चूतमञ्जरीं, कथं केन हेतुना, विस्मृतः स्मरणाभावं प्राप्तोऽसि, अत्राप्रकृतमधुकरोपालम्भेन प्रकृतस्य राज्ञ उपालम्भो व्यज्यते।

राजा - अहो रागपरिवाहिनी गीतिः।।

राजेति। राजा प्राह, गीतिर्गानं, रागपरिवाहिनी अनुरागप्रस्राविणी, अहो इत्याश्चर्ये।

विदूषकः - किं तावद्गीत्या[4] [5]अवगतोऽक्षरार्थः॥

विदूषक इति। गीत्या गानेन, अक्षरार्थः अक्षराणामभिधेयं तावत्साकल्येन, अवगतो बुद्धः किम् इति श्लेषार्थः प्रतिपद्यते।

राजा - (स्मितं कृत्वा) सकृत्कृतप्रणयोऽयं जनः। तदस्या देवीं वसुमतीमन्तरेण [6]महदुपालम्भनं गतोऽस्मि।[7] सखे माधव्य[8]। मद्वचनादुच्यतां हंसपदिका। निपुणमुपालब्धोऽस्मीति[9]॥

---

3 'भवान्' इति 'A' इति प्रकाशने पाठान्तरम्।

4 'तावद्गीतेः' इति 'A' इति प्रकाशने पाठान्तरम्।

5 'भवतावगतो....' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। राजा स्मितं कृत्वा मन्दहासं विधाय, अयं जनः एष गायकजनः, सकृत्कृतप्रणयः एकवारं विहितपरिचयः कृतपरिचय इति यावत्, नि। "प्रणयस्स्यात्परिचये याञ्चायां सौहृदेपि च" इति विश्वः। तत्तस्मात्, वसुमतीं देवीमन्तरेण भूदेवीं विना, अस्याः हंसपदिकायाः, मदुपालम्भं मद्दोषकीर्तनं, अवगतोऽस्मि ज्ञातोऽस्मि, हे सखे माधव्य, अहं निपुणं चतुरं, उपालब्धोऽस्मि निन्दितोऽस्मीति, हंसपदिका नाम गायनी, मद्वचनात् मम भाषणात्, उच्यतां कथ्यताम्।

विदूषकः - यद्भवानाज्ञापयति। (उत्थाय)[10] भो वयस्य! गृहीतस्य तया परकीयैर्हस्तैश्शिखण्डके [11]ताड्यमानस्याप्सरसा वीतरागस्येव नास्तीदानीं मे मोक्षः॥

विदूषक इति। विदूषकः प्राह, भवान् यदाज्ञापयति अनुशास्ति तथा करोमीति शेषः, उत्थाय उत्थितो भूत्वा, भो वयस्य हे सखे, तया हंसपदिकया, परकीयैरन्यदीयैः, हस्तैः करैः, शिखण्डके केशपाशे, गृहीतस्य निरुद्धस्य, ताड्यमानस्य आहन्यमानस्य, मे मम, अप्सरसा स्वर्वेश्यया, वीतरागस्य विरक्तस्येव, मोक्षो मुक्तिर्नास्ति।

राजा - गच्छ। नागरिकवृत्त्या [12]संज्ञापयैनाम्॥

---

6 'मदुपालम्भनं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'मदुपालम्भमवगतोऽस्मि' इति 'C' इति प्रकाशने पाठान्तरम्।

7 'तस्या देवीवसुमतीमन्तरेण मदुपालम्भमवगतोऽस्मि' इति 'A' इति प्रकाशने पाठान्तरम्।

8 'माढव्य' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

9 'निपुणमुपालब्धाः स्मः इति' इति 'B' इति प्रकाशने पाठान्तरम्।

10 '(उत्थाय)' इत्येषः पाठः 'A' इति प्रकाशने नोपलभ्यते।

11 '....अप्सरोभिरिव वीतरागस्य नास्ति मे मोक्षः' इति 'C' इति प्रकाशने पाठान्तरम्।

12 'शान्तयैनाम्' इति एकवारमेव पाठः 'A' इति प्रकाशने उपलभ्यते।

राजेति। राजा प्राह, हे विदूषक, गच्छ याहि, नागरिकवृत्त्या प्रौढव्यापारेण एनां हंसपदिकां, संज्ञापय सम्यगवबोधय।

विदूषकः - का गतिः। (इति निष्क्रान्तः)

विदूषक इति। का गतिः कथनं विना को वा उपायस्स्यात्, इत्युक्त्वा निष्क्रान्तो निर्गतः।

राजा - (आत्मगतम्) किन्नु खलु [13]गीतार्थमाकर्ण्येष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा।

श्लो।। रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
[14]पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
[15]भावस्थिराणि जननान्तरसौहृदानि॥2॥

(इति पर्याकुलस्तिष्ठति)

राजेति। आत्मगतं स्वगतं, गीतार्थं गीतस्याभिधेयम्, आकर्ण्य श्रुत्वा, इष्टजनविरहादृते प्रियजनविप्रयोगं विनापि, बलवदत्यन्तम्, उत्कण्ठितः पर्युत्सकोऽस्मि, किन्नुखलु को वा हेतुर्भवेत्, अथवा तथा नोचेत्, रम्याणीति। यद्यस्मात्, जन्तुर्जनः, सुखितः इष्टजनसहितोऽपि, रम्याणि सुभगानि रूपाणीति शेषः, वीक्ष्य दृष्ट्वा, मधुरान् श्राव्यान् शब्दांश्च, निशम्य श्रुत्वा, पर्युत्सुकः उत्कण्ठितो भवति, तत्तस्माद्भावस्थिराणि आत्मनिष्ठानि, जननान्तरसौहृदानि जन्मान्तरप्रियाणि, चेतसा मनसा, अबोधपूर्वम् अज्ञातपूर्वं यथा तथा, स्मरति चिन्तयते, नूनं निश्चयः इत्यनेन प्रकारेण, पर्याकुलस्सन् तिष्ठति वर्तते।

---

13 'गीतमेवंविधार्थमाकर्ण्ये.....' इति 'B''C' इति प्रकाशनयोः पाठान्तरम्।

14 'पर्युत्सुकीभवति' इति पाठः 'A' इति प्रकाशने उपलभ्यते।

15 'स्थितानि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

(ततः प्रविशति कञ्चुकी)

कञ्चुकी - अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि।

श्लो॥ आचार [16]इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्थम्[17] ॥3॥

तत इत्यादि। ततोऽनन्तरं, कञ्चुकी सौविदल्लः, प्रविशति प्राप्नोति रङ्गस्थलमिति शेषः, कञ्चुकी प्राह, किमिति, अहम् ईदृशीं वक्ष्यमाणप्रकारां, अवस्थां दशाभेदं, प्रतिपन्नोस्मि प्राप्तो भवामि, अहो नु खलु त आश्चर्यं हि, तामेवाह, आचार इति, आचारः स्वकुलक्रमागतधर्म इति हेतोः, अवहितेन शिक्षितेन मया, राज्ञो दुष्यन्तस्य, अवरोधगृहेषु अन्तःपुरस्त्रीभवनेषु, या वेत्रयष्टिः वेत्रमयदण्डः, गृहीता धृता, सा वेत्रयष्टिरेव, बहुतिथे बहुसंख्यापूरणे, काले शैशवयौवनादिरूपे, गते शुद्धान्तपुरद्वार संरक्षणादिभिर्विभवकृत्यैरनायासेन अतिक्रान्ते सति, प्रस्थानविक्लवगतेः, प्रस्थाने सञ्चारे विक्लवगतेः पराधीनगमनस्य, मम अवलम्बनार्थं धारणाय, जाता सम्पन्ना।

भोः कामं धर्मकार्यमनतिपात्यं देवस्य। तथापीदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवा। [18]अविश्रमोऽयं लोकतन्त्राधिकारः। कुतः।

श्लो॥ भानुस्सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः [19]प्रयाति।

---

16 'इत्यभिहितेन' इति 'C' इति प्रकाशने पाठान्तरम्।

17 'अवलम्बनार्थां' इति पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

18 'अविश्रामो हि' इति 'C' इति प्रकाशने पाठान्तरम्।

शेषस्सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः ॥4॥

भोरिति। भोः काममत्यन्तं, देवस्य राज्ञः, धर्मकार्यं शिष्टजनागमन प्रयोजनश्रवणतत्कार्यकरणादिकम् अनतिपात्यम् नातिक्रमणीयं खलु, तथापि, इदानीमद्यैव, धर्मासनात् धर्मस्थानात्, उत्थिताय उत्थानं कृतवतेऽस्मै राज्ञे, पुनः भूयः, उपरोधकारि निर्बन्धकरं, कण्वशिष्यागमनम् काश्यपच्छात्रप्राप्तिं, निवेदयितुं विज्ञापयितुं, नोत्सहे नेच्छामि, अथवा तथा नो चेत्, लोकतन्त्राधिकारः समस्तजनशिक्षणाधिकारः, अयम् अविश्रमः विश्रान्तिरहितः कुत इति चेत्, भानुरिव, भानुस्सूर्यः, सकृदेकवारमेव, युक्ततुरङ्गस्सन्नद्धाश्वगन्धवहो वायुः, रात्रिन्दिवं सर्वदेत्यर्थः, प्रयाति वाति, शेषः अनन्तः, सदा सर्वदैव, आहितभूमिभारः धृतभूभरणः, षष्ठांशवृत्तेः रक्षाशुकषड्भागजीवनस्य, राज्ञोऽपि, एष धर्मः अयं व्यापारं उचित इति शेषः।

यावन्नियोगमनुतिष्ठामि। (परिक्रम्यावलोक्य च) एष देवः।

श्लो॥ प्रजाः प्रजास्स्वा इव तन्त्रयित्वा
निषेवते [20]शान्तमना विविक्तम्।
यूथानि सञ्चार्य रविप्रतप्त-
श्शीतं [21]दिवास्थानमिव द्विपेन्द्रः ॥5॥

यावदिति। नियोगं शासनम् अवसरप्रदापनरूपं, यावदनुतिष्ठामि अनुष्ठास्यामि करिष्यामीत्यर्थः, परिक्रम्य गत्वा, अवलोक्य दृष्ट्वा च, राजानमिति शेषः, एष देवः अयं राजा, इदं पदद्वयमनन्तरश्लोकस्थनिषेवणक्रिययान्वेति, प्रजा

---

19 ‘प्रवाति’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

20 ‘अशान्तमना’ इति पाठः ‘A’ इति प्रकाशने उपलभ्यते।
‘श्रान्तमनाः’ इति पाठान्तरमुपलभ्यते इति ‘B’ इति प्रकाशने निर्दिष्टम्।

21 ‘गुहा...’ इति पाठान्तरमुपलभ्यते इति ‘B’ इति प्रकाशने निर्दिष्टम्।

इति, प्रजाः जनान्, स्वाः प्रजा इव आत्मीयापत्यानीव, तन्त्रयित्वा तत्तत्समुचित कार्येषु व्यापार्य शान्तमनाः स्वस्थचित्तस्सन्, विविक्तं विजनप्रदेशमन्तःपुरमिति यावत्, निषेवते आश्रयति, वर्तमानसामीप्ये वर्तमानप्रत्ययः, अत्रार्थे दृष्टान्तमाह, यूथानिति, द्विपेन्द्रः गजपतिः, यूथानि गजसमूहान्, सञ्चार्य तदभीष्टाहारविहारेषु व्यापार्य, रविप्रतप्तः सूर्यातपसन्तप्तस्सन्, दिवा मध्याह्ने, शीतं शैत्यापादकं, स्थानं वृक्षच्छायादिकमिव निषेवत इति पूर्वेणान्वयः।

(उपगम्य) जयतु जयतु देवः। एते खलु [22]हिमवतोगिरेरुपत्यकारण्यवासिनः [23]काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनस्सम्प्राप्ताः। श्रुत्वा देवः प्रमाणम्॥

उपगम्येति। उपगम्य उपसर्प्य, देवो राजा, जयतु जयतु सर्वोत्कर्षेण वर्तताम् आदरातिशयाद्विरुक्तिः, हिमवतोगिरेः हिमाचलस्य, उपत्यकारण्यवासिनः आसन्नभूकाननस्थाः, सस्त्रीकाः योषित्सहिताः, एते तपस्विनः इमे मुनयः, काश्यपसन्देशं कण्वमुनिना सन्दिष्टमर्थम्, आदाय गृहीत्वा, सम्प्राप्ताः समागताः खलु, श्रुत्वा तत्सन्देशमाकर्ण्य, देवो राजा, प्रमाणम् अनन्तरकरणीयज्ञः।

राजा - ([24]सादरम्) किं [25]काश्यपसन्देशहारिणः॥

राजेति। राजा सादरम् आदरसहितं प्राह, काश्यपसन्देशहारिणः कण्ववाचिका नेतारः किम्।

कञ्चुकी - अथ किम्॥

---

22 'हिमगिरे.....' इति पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।
'हिमवद्गिरे....' इति 'C' इति प्रकाशने पाठान्तरम्।

23 'कण्वस्य' इति पाठः 'A' इति प्रकाशने उपलभ्यते।

24 'सविस्मयम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

25 'कण्व...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। सस्त्रीकास्तपस्विनः इत्यधिकः पाठः इति 'B' इति प्रकाशने निर्दिष्टम्।

कञ्चुकीति। अथ किं तथैवेत्यर्थः।

राजा - तेन हि मद्वचनाद्विज्ञाप्यताम्[26] उपाध्यायस्सोमरातः। अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव [27]प्रवेशयितुमर्हतीति [28]अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि॥

राजेति। तेन हि कारणेन, उपाध्यायः अध्यापकः, सोमरातः तन्नामकः पुरोहितः, मद्वचनात् मद्वाक्यात्, विज्ञाप्यतां निवेद्यतां, किमिति, अमूनाश्रमवासिनः एतान्मुनीन्, श्रौतेन श्रुतिप्रतिपादितेन, विधिना विधानेन, सत्कृत्य सम्पूज्य, स्वयं स्वेनैव, प्रवेशयितुं प्रापयितुम् अर्हति योग्योऽभवतीति पूर्वेणान्वयः, अहमपि तपस्विदर्शनोचिते तापसजनवीक्षणार्हे, अत्र प्रदेशे स्थितः विद्यमानस्सन्, प्रतिपालयामि प्रतीक्षिष्ये।

कञ्चुकी - यदाज्ञापयति देवः। (इति निष्क्रान्तः)

कञ्चुकीति। देवो राजा, यदाज्ञापयति यदादिशति तत्करिष्यामीति शेषः। इत्युक्त्वा निष्क्रान्तो निर्यातः।

[29]राजा – (उत्थाय) वेत्रवति! अग्निशरणमार्गमादेशय॥

राजेति। राजा उत्थाय सिंहासनादुत्थितो भूत्वा, हे वेत्रवति प्रतिहारी, अग्निशरणमार्गं त्रेताग्निशालापथम् आदेशय प्रदर्शय।

---

26 'मद्व.....दुच्यताम्' इति 'C' इति प्रकाशने पाठान्तरम्।

27 'प्रवेशयितुमर्हसीति' इति पाठः 'A' 'B' 'C' इति प्रकाशनेषु उपलभ्यते।

28 'प्रवेशयितुमर्हसीति... प्येतान्.....स्विजनसन्दर्शनयोग्ये देशे स्थितः प्र......' इति पाठः 'C' इति प्रकाशने पाठान्तरम्।

29 'राजा – कोऽत्र भोः,
प्रतीहारी – (प्रविश्य) आज्ञापयतु देवः' इति 'C' इति प्रकाशने अधिकः पाठः।

प्रतिहारी - इत इतो देवः ॥

प्रतिहारीति। देवो राजा, इत इतः अस्मादस्मान्मार्गादागच्छत्विति शेषः।

राजा - (परिक्रामति। अधिकारखेदं निरूप्य) सर्वः प्रार्थितमर्थमधिगम्य सुखी सम्पद्यते जन्तुः। राज्ञां तु [30]चरितार्थता [31]दुःखोत्तरैव।

श्लो ॥ औत्सुक्यमात्रमवसादयति[32] प्रतिष्ठा
क्लिश्नाति लब्धपरिपालन[33]वृत्तिरेव।
नातिश्रमापनयनाय [34]न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥6॥

राजेति। राजा परिक्रामति गच्छति अग्निशरणमिति शेषः, अधिकारखेदं राजव्यापारप्रयुक्तक्लेशं, निरूप्य अभिनीय आहेतिशेषः, सर्वस्समन्तः, जन्तुः जनः, प्रार्थितम् अभिलषितम्, अर्थं कार्यम्, अधिगम्य प्राप्य, सुखी सुखवान्, सम्पद्यते भवति, राज्ञाम् अस्मादृशां पृथिवीपतीनान्तु, चरितार्थता कृतकृत्यता, दुःखोत्तरा श्रमप्रधानैव, औत्सुक्येति, प्रतिष्ठा आस्पदं राज्यमिति यावत्, औत्सुक्यमात्रं तत्तत्पदार्थेषूत्कण्ठामात्रमावसादयति नाशयति निवर्तयतीत्यर्थः, लब्धपरिपालन वृत्तिः लब्धस्य राज्यस्य परिपालनवृत्तिः रक्षणव्यापारः, क्लिश्नाति क्लेशयुक्तं करोत्येव, यदि सुखं नास्ति तर्हि सर्वैः कथं राज्यं प्रार्थ्यत इत्यत्राह, नेति, राज्यं

---

30 'चरित्राणि दुःखोत्तराण्येव' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

31 'दुःखान्तरैव' इति पाठः 'A' इति प्रकाशने उपलभ्यते।

32 'साययति' इति 'B' इति प्रकाशने पाठान्तरम्।

33 'वृत्तिरेनम्' इति पाठः 'A' इति प्रकाशने उपलभ्यते।
'वृत्तिरेवं, वृत्तिरेनं' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।
'वृत्तिरेवं' इति 'C' इति प्रकाशने पाठान्तरम्।

34 'यथा श्रमाय' इति पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

स्वहस्तधृतदण्डम् आत्मकरगृहीतदण्डम् आतपत्रं छत्रमिव, अतिश्रमापनयनाय आत्यन्तिकखेदनिवृत्तये न भवति, श्रमाय खेदाय च न भवति।

(नेपथ्ये) वैतालिकौ - विजयतां देवः ॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, वैतालिकौ वन्दिनौ आहतुरिति शेषः, देवो राजा, विजयतां सर्वोत्कर्षेण वर्तताम्, सू। 'विपराभ्यां जेः' इत्यात्मनेपदम्।

प्रथमः -

श्लो॥ स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते [35]वृत्तिरेवं विधैव।
[36]अनुभवति हि मुर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया [37]संश्रितानाम्॥7॥

प्रथम इति। प्रथमः तयोराद्यः आहेति शेषः, स्वसुखेत्यादि, प्रतिदनं दिनेदिने, लोकहेतोः जगदर्थं, स्वसुखनिरभिलाषः स्वकीयसौख्ये निरपेक्षस्सन्, खिद्यसे क्लिश्यसे, अथवा तथा नोचेत्, ते तव, वृत्तिः व्यापारः, एवं विधा उक्तप्रकारैव, अत्रार्थे दृष्टान्तमाह, अनुभवतीति, पादपो वृक्षः, मूर्ध्ना शिखरेण, तीव्रं गाढम् उष्णमातपम्, अनुभवति भुङ्क्ते, छायया अनातपेन, संश्रितानां स्वाधः प्रदेशस्थितानां प्राणिनां, परितापं सन्तापं, शमयति निवारयति।

द्वितीयः -

श्लो॥ नियमयसि [38]विमार्गप्रस्थितानात्तदण्डः

---

35 'सृष्टिरेवं' इति पाठः 'A' इति प्रकाशने उपलभ्यते।

36 'ह्यनुभवति' इति पाठः 'A' इति प्रकाशने उपलभ्यते।

37 'चाश्रि...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

38 'कुमार्ग' इति पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

प्रशमयसि विवादं कल्पसे रक्षणाय।
अतनुषु विभवेषु ज्ञातयस्सन्तु[39] नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्॥8॥

द्वितीय इति। द्वितीयः तयोर्द्वितीयः प्राहेति शेषः, हे राजन् त्वं, विमार्गप्रस्थितान् दुष्टमार्गगतान् अन्यायवर्तिन इति यावत्, आत्तदण्डः गृहीतशासनस्सन्, नियमयसि निवारयसि, विवादं कलहं, प्रशमयसि प्रकर्षेण शमनं करोषि, रक्षणाय परिपालनाय कल्पसे समर्थो भवसि, ज्ञातयो बान्धवाः, अतनुषु महत्सु, विभवेषु ऐश्वर्येषु सत्सु, सन्तु भवन्तु नाम, सम्भावनायां लोट्। नामेति प्रसिद्धौ किं तैर्निग्रहानुग्रहासमर्थैरिति भावः, प्रजानां जनानां, बन्धुकृत्यं इष्टप्रापणानिष्टनिवारणादिकं, त्वयि तु त्वय्येव, परिसमाप्तं पर्यवसितं स्थितमित्यर्थः।

राजा - एते क्लान्तमनसः पुनर्नवीकृतास्स्मः। (इति परिक्रामति)

राजेति। राजा प्राह, एते अमी, क्लान्तमनसः राज्यभारेण परिक्लिष्टमानसा वयमिति शेषः, पुनः भूयः, नवीकृतास्स्मः क्लेशान्मुक्ता भवामः, वैतालिकप्रियसत्यवचनेनेति भावः, इत्युक्त्वा परिक्रामति गच्छति।

प्रतिहारी -
[40]अभिनवसम्मार्जनसश्रीकस्सन्निहितहोमधेनुरग्नि[41]शरणालिन्द आरोहतु देवः॥

प्रितिहारीति। प्रतिहारी प्राह अभिनवसम्मर्जनसश्रीकः नूतनपरिलिप्तीकरण –शोभासहितः, सन्निहितहोमधेनुः निकटस्थितक्षीराद्याहुतिसाधनीभूतधेनुसहितः,

---

39 'संविभक्ताः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

40 'एषः' इति अधिकः पाठः 'A' 'B' 'C' इति प्रकाशनेषु उपलभ्यते।

41 'शरनालिन्दः' इति 'A' इति प्रकाशने पाठान्तरम्।
'शरणालिन्दः' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

अग्निशरणालिन्दः त्रेताग्निशालाबहिर्द्वारप्रकोष्ठकः अयमिति शेषः, देवो महाराजः, आरोहतु अधितिष्ठतु, एनमित्यर्थाल्लभ्यते, नि। "प्रघाण प्रघणालिन्दाबहिर्द्वार प्रकोष्ठक" इत्यमरः।

राजा - (आरुह्य परिजनांसावलम्बी [42]तिष्ठति) वेत्रवति। किमुद्दिश्य [43]भगवता काश्यपेन मत्सकाशमृषयः [44]प्रेरितास्स्युः।

श्लो॥ किं तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्।
आहोस्वित्प्रसवो ममापचरितैर्विष्टम्भितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥9॥

राजेति। राजा आरुह्य आरोहणं कृत्वा, अलिन्दमिति शेषः, परिजनांसावलम्बी परिजनस्य परिचारकस्य, अंसं भुजशरः, अवलम्बत इति तथोक्तः, तिष्ठति वर्तते, स्थित्वा च पृच्छति, हे वेत्रवति, ऋषयः मुनयः, भगवता त्रिकालज्ञेन, काश्यपेन कण्वमुनिना, किं प्रयोजनमुद्दिश्यालोच्य, मत्सकाशं मत्समीपं, प्रेरिताः प्रेषिताः, स्युर्भवेयुरिति, सम्भावनायां लिङ्, किमित्यादि, उपोढतपसां सम्प्राप्ततपसां, व्रतिनामृषीणाम्, तपः स्वधर्मानुवर्तनम्, विघ्नैः प्रतिबन्धकैः, तावदिदानीं, दूषितं विनाशितं किम्, उताथवा, धर्मारण्यचरेषु तपोवनवर्तिषु, प्राणिषु जन्तुषु विषये, केनचित् अज्ञाततपःप्रभावेन धूर्तेन, असत् अन्याय्यम्, चेष्टितम् आचरितम्, अहोस्वित् तथा नोचेत्, वीरुधां लतादीनाम् प्रसवः पुष्पफलादिः, ममापचरितैः दुराचारैः, विष्टम्भितः प्रतिबद्धः इत्यनेन प्रकारेण,

---

42 'तिष्ठन्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'स्थित्वा' इति 'C' इति प्रकाशने पाठान्तरम्।

43 'तत्रभवता' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

44 'प्रेषिता...।' इति 'C' इति प्रकाशने पाठान्तरम्।

आरूढबहुप्रतर्कम् अधिगतानेकविकल्पम्, अत एव अपरिच्छेदाकुलम् अनिर्णय विह्वलं, मे मम, मनश्चित्तं जातमिति शेषः।

प्रतिहारी - सुचरितनन्दिन ऋषयो देवं [45]सभाजयितुमागता इति तर्कयामि॥

प्रतिहारीति। प्रतिहारी प्राह, सुचरितनन्दिनः तपसच्चरित्रसन्तुष्टाः, ऋषयः तपस्विनः, देवं स्वामिनं, सभाजयितुं सम्भावयितुम्, आगताः प्राप्ताः, इतीत्थं, तर्कयाम्यालोचयामि।

(ततः [46]प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः। पुरश्चैषां [47]कञ्चुकी पुरोहितश्च)

तत इति। ततोऽनन्तरं, गौतमीसहिताः गौतम्यायुक्ताः, मुनयः शार्ङ्गरवादयः एषां मुनीनां, पुरः अग्रे, कञ्चुकी पुरोहितः पुरोधाश्च, शकुन्तलां तन्नाम्नीं कण्वदुहितरं, पुरस्कृत्य अग्रेकृत्य, प्रविशन्ति प्राप्नुवन्ति रङ्गस्थलमिति शेषः।

कञ्चुकी - इत इतो भवन्तः॥

कञ्चुकीति। कञ्चुकी सौविदल्ल आहेति शेषः, हे मुनयो भवन्तः, इत इतः अत्र आदराद्द्विरुक्तिः आगच्छन्त्विति शेषः।

शार्ङ्गरवः - [48]शारद्वत।

श्लो॥ महाभागः कामं नरपतिरभिन्नस्थितिरसौ[49]
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।

---

45 'सम्भावयितुमागता....' इति 'C' इति प्रकाशने पाठान्तरम्।

46 'प्रविशतः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

47 'पुरोहितः' इति 'C' इति प्रकाशने पाठान्तरम्।

48 'सखे' इति अधिकः पाठः'A' इति प्रकाशने उपलभ्यते।

49 'स्थितिरहो' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥ 10 ॥

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, हे शारद्वत, महाभाग इति, महाभागः महाभाग्यसम्पन्नः, असौ नरपतिः अयं महाराजः, कामम् अत्यन्तम्, अभिन्नस्थितिः अविहतमर्यादः, वर्णानां ब्राह्मणादीनां मध्ये, कश्चिदपकृष्टः अकिञ्चनोऽपि, अपथममार्गं, न भजते न सेवते, तथापि शून्येन, मनसा उपलक्षितः, अहं जनाकीर्णं प्रजासङ्कुलम् इदं स्थानम्, हुतवहपरीतं कृशानुव्याप्तं, गृहं निकेतनमिव प्रवेष्टुं दुस्सहमिति यावत्, मन्ये तर्कयामि।

शारद्वतः - [50]स्थाने भवान्पुरप्रवेशादित्थम्भूतस्संवृत्तः। अहमपि[51]।

श्लो ॥ अभ्यक्तमिव स्नातश्शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥ 11 ॥

शारद्वत इति। शारद्वतः प्राह, भवान् पुरप्रवेशात् पट्टणप्राप्तेः, इत्थम्भूतः ईदृशः, संवृत्तः जातः, स्थाने युक्तं, नि। "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः। अहमपि अहं च, अभ्यक्तमिति, स्नातः अभिषिक्तोजनः, अभ्यक्तं तैलेनलिप्तमिव, प्रबुद्धो जागरूकः, सुप्तं निद्राणमिव, तथा स्वैरगतिः स्वेच्छावशवर्ती, बद्धं काराप्रविष्टमिव, इह अस्मिन् स्थाने, सुखसङ्गिनम् अनुभूयमान सुखं जनं, अवैमि जानामि।

शकुन्तला - ([52]निमित्तं [53]सूचयित्वा) अहो। किं मे[54] वामेतरं नयनं विस्फुरति ॥

---

50 'जाने' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

51 'अहं तु' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

52 'अनिमित्तं' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। शकुन्तला, निमित्तं भविष्यत्क्लेशसूचकं, सूचयित्वा दर्शयित्वा, मे मम, वामेतरं दक्षिणं, नयनं नेत्रं, विस्फुरति स्पन्दते, किं हेतुः कः अहो आश्चर्यम्।

गौतमी - जाते। प्रतिहतममङ्गलम्। [55]शुभानि ते भर्तृकुलदेवता वितरन्तु। (इति परिक्रामति)

गौतमीति। गौतमी आहेति शेषः, हे जाते वत्से, अमङ्गलं दक्षिणाक्षिस्पन्दनप्रयुक्तमशुभं, प्रतिहतं विनाशितमस्त्विति शेषः, भर्तृकुलदेवताः भर्तुर्दुष्यन्तस्य, कुलदेवता गृहदेवताः, ते तव, शुभानि कल्याणानि, वितरन्तु प्रयच्छन्तु इत्याशीरर्थेलोट्, इत्युक्त्वा परिक्रामति गच्छति।

पुरोहितः - (राजानं निर्दिश्य) भो भोस्तपस्विनः! असावत्र भवान्वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो [56]वः प्रतिपालयति। पश्यतैनम्॥

पुरोहित इति। पुरोहितः सोमरातः, राजानं दुष्यन्तं, निर्दिश्य दर्शयित्वा, भो भोस्तपस्विनः हे मुनयः, अत्रभवान् पूज्यः, वर्णाश्रमाणां वर्णानां ब्रह्मणादीनां आश्रमाणां ब्रह्मचर्यादीनां च, रक्षिता पालकः, सू। 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी अत्र मनुः– "वर्णानामाश्रमाणां च राजा सृष्टोभिरक्षिते"ति, असौ राजा, प्राक् युष्मदागमनात्पूर्वमेव, मुक्तासनः परित्यक्तपीठस्सन्, वः युष्मान्, प्रतिपालयति निरीक्षते, एनं राजानं, पश्यत वीक्षध्वम्।

---

53 'दुर्निमित्तं, सूचयन्ती, अभिनीय' इत्येवं पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

54 'मे' इति अधिकः पाठः 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।

55 'सुखानि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

56 'वः' इति अधिकः पाठः 'A' इति प्रकाशने नोपलभ्यते।

शार्ङ्गरवः - भो महाब्राह्मण! काममेतदभिनन्दनीयं तथापि वयमत्र मध्यस्थाः। कुतः।

श्लो॥ भवन्ति नम्रास्तरवः [57]फलागमै-
र्नवाम्बुभि[58]र्भूरिविलम्बिनो घनाः।
अनुद्धतास्सत्पुरुषास्समृद्धिभि-
स्स्वभाव एवैष परोपकारिणाम्॥12॥

शार्ङ्गरव इति। भो महाब्राह्मण हे उत्तमद्विज, काममत्यन्तं, एतत्प्रत्युत्थानादिकम् अभिनन्दनीयं स्तवनीयं, तथापि स्तवनीयत्वेऽपि, वयम् अत्र विषये, मध्यस्थाः निष्पक्षपातिनः वदाम इति शेषः, कुतः कस्मादिति चेत्, भवन्तीति, तरवो वृक्षाः, फलागमैः फलसमृद्धिभिः, नम्राः अवनता भवन्ति, घना मेघाः, नवाम्बुभिः प्रत्यग्रजलैः, भूरि अतीव, विलम्बिनः सन्नताः, भवन्ति, एवं सत्पुरुषाः महात्मानः, समृद्धिभिः सम्पद्भिः, अनुद्धताः दृप्ता न भवन्ति, एषः पूर्वोक्तः, परोपकारिणां परोपकारशीलानां, स्वभावो नैसर्गिक गुण एव।

प्रतिहारी - देव! [59]प्रसन्नमुखवर्णा दृश्यन्ते। जानामि। [60]विस्रब्धकार्या ऋषयः॥

प्रतीहारीति। प्रतिहारी द्वारपालिका आहेति शेषः, हे देव ऋषयः मुनयः, प्रसन्नमुखवर्णाः प्रसादयुक्तमुखकान्तयः, दृश्यन्ते प्रेक्ष्यन्ते, अतो विस्रब्धकार्याः विश्वासयुक्तप्रयोजना इति, जानामि तर्कयामि।

राजा - (शकुन्तलां दृष्ट्वा) अथात्रभवती।

---

57 'फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

58 'दूर' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

59 'प्रसन्नमुखरागा इव ऋषयो दृश्यन्ते। तस्माज्जानामि विस्रब्ध कार्या इति' इति 'C' इति प्रकाशने पाठान्तरम्।

60 'विश्रब्धकार्या' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

श्लो ॥ [61]का स्विदवकुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्॥ 13॥

राजेति। राजा शकुन्तलां दृष्ट्वा वीक्ष्य, अथात्रभवती अथ शब्दो वाक्यारम्भद्योतकः, अत्रभवती पूज्या, इदं पदमनन्तरश्लोकस्थेन कास्विदित्यनेन अन्वेति, कास्विदिति, अवगुण्ठनवती सम्यक्पटमाच्छादितवती, अत एव नातिपरिस्फुटशरीरलावण्या अत्यन्तमनभिव्यक्तशरीरसौन्दर्या, तपोधनानां मध्ये महर्षीणामन्तरे, पाण्डुपत्राणां पक्वपर्णानां मध्ये किसलयं पल्लवमिव वर्तमाना कास्वित् का वा भवेत्।

प्रतिहारी - देव! कुतूहलगर्भः [62]प्रतिहितो न मे तर्कः प्रसरति। ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते॥

प्रतीहारीति। प्रतिहारी प्राह, हे देव मे तर्कः ऊहः, कुतूहलगर्भः एतादृश लावण्यवती किमेभिस्सहागतवतीति गर्भकृतकौतुकः, न प्रतिहतः प्रसरति समाहितस्सन् न प्रसरति न प्रवर्तते, ननु राजन्, अस्याः पुनः शकुन्तलायास्तु आकृतिः आकारः, दर्शनीया प्रेक्षणीया, लक्ष्यते दृश्यते।

राजा - भवतु। अनिर्वर्णनीयं परकलत्रम्॥

राजेति। राजा प्राह, भवतु यादृशी वा अस्तु, परकलत्रम् अन्यक्षेत्रम् अनिर्वर्णनीयम् अदर्शनीयम्।

शकुन्तला - (हस्तमुरसि कृत्वा आत्मगतम्) हृदय। किमेवं वेपसे। आर्यपुत्रस्य भावमवधार्य[63] धीरं तावद्भव॥

---

61 'केयमवगुण्ठ....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

62 'उपहितो' इति 'A' इति प्रकाशने पाठान्तरम्।
'प्रहिता' इति 'B' इति प्रकाशने पाठान्तरम्।
'...गर्भो .... मे तर्क प्रसीदति।' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। शकुन्तला हस्तं करम् उरसि वक्षसि, कृत्वा निक्षिप्य, आत्मगतं स्वगतम्, हे हृदय चित्त, एवमनेन प्रकारेण, किं किमर्थं, वेपसे कम्पसे, आर्यपुत्रस्य राज्ञः, भावमभिप्रायम्, अवधार्य निश्चित्य, धीरं तावद्भव धैर्यं प्राप्नुहीत्यर्थः।

पुरोहितः - (पुरो गत्वा) देव[64] एते विधिवदर्चितास्तपस्विनः।
कश्चिदेषामुपाध्यायसन्देशः[65] तं देवश्श्रोतुमर्हति॥

पुरोहित इति। पुरोहितस्सोमरातः, पुरो गत्वा अग्रतो यात्वा प्राह, हे देव महाराज, एते तपस्विनः महर्षयः, विधिवच्छास्त्रोक्तप्रकारेणार्चिताः पूजिताः, एषां मुनीनां, कश्चित् उपाध्यायसन्देशः किञ्चिद्गुरोर्वाचिकम् अस्तीति शेषः, देवो राजा, तं गुरुप्रेषितं सन्देशं, श्रोतुम् आकर्णयितुम् अर्हति योग्यो भवति।

राजा - अवहितोऽस्मि॥

राजेति। राजा आहेति शेषः, अवहितोऽस्मि सावधानमनस्कोऽस्मि।

ऋषयः - (हस्तानुद्यम्य) विजयस्व राजन्॥

ऋषय इति। ऋषयो मुनयः आहुरिति शेषः, हस्तान् करान्, उद्यम्य उद्धृत्य, हे राजन् प्रकृष्टस्वामिन्, विजयस्व सर्वोत्कर्षविशिष्टो भव।

राजा - सर्वानभिवादये[66]॥

राजेति। राजा ब्रूते, सर्वान् अखिलान् युष्मानिति शेषः, अभिवादये नमस्करोमि।

---

63 '...अनवधार्य' इति 'C' इति प्रकाशने पाठान्तरम्।

64 'देव' इति सम्बोधनयुक्तः अधिकः पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

65 'अस्ति।' इति 'C' इति प्रकाशने अधिकः पाठः।

66 'अखिलानभिवादये वः' इति 'C' इति प्रकाशने पाठान्तरम्।

ऋषयः - [67]इष्टेन युज्यस्व॥

ऋषय इति। ऋषयः कण्वशिष्याः प्राहुरुति शेषः, इष्टेन अभिमतेन युज्यस्व सम्बद्धो भव।

राजा – अपि निर्विघ्नतपसो मुनयः॥

राजेति। राजा प्राह, मुनयः ऋषयः निर्वघ्नतपसोऽपि अन्तरायरहिततपसः किम् अत्रापिः प्रश्ने, नि।। "विघ्नोन्तरायः प्रत्यूह" इत्यमरः।।

ऋषयः -

श्लो॥ कुतो धर्मक्रियाविघ्नस्सतां रक्षितरि त्वयि।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति॥14॥

ऋषय इति। ऋषयः प्राहुः, त्वयि भवति, सतां सन्मार्गप्रवर्तिनां, रक्षितरि परिपालके सति, धर्मक्रियाविघ्नः धर्मक्रियाणां धर्मकार्याणां, विघ्नो विघातः, प्रतिबन्ध इति यावत्, कुतः कस्माद्धेतोः भवतीति शेषः, अस्मिन्नर्थे दृष्टन्तमाह, तम इति, घर्मांशौ सूर्ये, तपति प्रकाशमाने सति, तमः अन्धकारः, कथं केन वा प्रकारेण, आविर्भविष्यति प्रभविष्यति।

राजा - [68]अर्थवान्खलु मे राजशब्दः। [69]अथ भगवाँल्लोकानुग्रहाय कुशली काश्यपः॥

राजेति। राजा प्राह, मे मम, राजशब्दः प्रजारञ्जनवाचकः, अर्थवान् सार्थकः खलु मुनिजनरञ्जनादिति भावः, अथ अनन्तरं, भगवान् कालत्रयवेदी

---

67 'स्वस्ति भवते। इष्टेन युज्यस्व' इति 'C' इति प्रकाशने पाठान्तरम्।

68 '(आत्मगतम्)' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

69 '(प्रकाशम्)' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

काश्यपः कण्वमुनिः, लोकानुग्रहाय लोकाभ्युपपत्त्यै, लोकसंरक्षणार्थमिति भावः, कुशली क्षेमवान् कच्चित्, नि। "अभ्युपपत्तिरनुग्रह" इत्यमरः।।

[70]ऋषयः - स्वाधीनकुशलास्सिद्धिमन्तः। स भवन्तमनामयप्रश्नपूर्वकमिदमाह॥

ऋषय इति। ऋषयः आहुरिति शेषः, किमिति, सिद्धिमन्तः तपस्सिद्धाः स्वाधीनकुशलाः स्ववशंवदक्षेमाः, स कण्वमुनिः, भवन्तं त्वाम् अनामयप्रश्नपूर्वकं आरोग्यपृच्छापुरस्सरं, नि। "अनामयं स्यादारोग्य"मित्यमरः। इदं वक्ष्यमाण प्रकारकं वचनम्, आह ब्रवीति, सू। "ब्रुवः पञ्चानाम्..." इत्यादिना तिपो णलादेशः प्रकृतेराहादेशश्च।

राजा - किमाज्ञापयति भगवान्॥

राजेति। राजा वक्ति, भगवान् सर्वज्ञः, किमाज्ञापयति नियोजयति।

शार्ङ्गरवः - [71]यन्मिथस्समयादिमां मदीयां दुहितरं [72]भवानुपायंस्त। तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः।

श्लो॥ त्वमर्हताम्प्राग्रसरस्स्मृतोऽसि [73]नः
शकुन्तला [74]मूर्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं [75]
[76]चिरस्य वाच्यं न गतः प्रजापतिः॥15॥

---

70 'शार्ङ्गरवः' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

71 'यन्मिथः समवायादिमां' इति 'A' इति प्रकाशने पाठान्तरम्।

72 'भवानुपयेमे' इति 'A' इति प्रकाशने पाठान्तरम्।

73 'यत्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

74 'मूर्तिमतीव सत्क्रिया' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

75 'गुणौ वधूवरो...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

तदिदानीमापन्नसत्त्वा[77] प्रतिगृह्यतां सहधर्मचरणायेति॥

शार्ङ्गरव इति। शार्ङ्गरवो भाषते मिथस्समयात् परस्परकृतसङ्केतात्, नि। "मिथोऽन्योऽन्यं रहस्यपि" इत्यमरः, गान्धर्वविवाहादित्यर्थः, मदीयां मत्सम्बन्धिनीम् इमां दुहितरम् एनां पुत्रिकां, भवान् उपायंस्त परिणीतवानितियत्, तत् विवाहकरणं, प्रीतिमता अनायासेन अनुरूपवरप्राप्त्या, सन्तोषवता मया, युवयोः अनुज्ञातं अङ्गीकृतं, कुतः कस्मादिति चेत्, त्वमिति, त्वं, नोऽस्माकम्, अर्हतां पूज्यमानां, प्राग्रसरः अग्रगण्यः, स्मृतोऽसि प्रतिपादितोऽसि भवसि, शकुन्तला च मूर्तिमती विग्रहधारिणी, सत्क्रिया सौशील्यादिगुणावलिः, तुल्यगुणं समानसौन्दर्यादिकं, वधूवरं जायापती इत्यर्थः, समानयन् सङ्घटयन्, प्रजापतिस्सृष्टा, चिरस्य चिरकालस्य, वाच्यम् अननुरूपघटनाप्रयुक्तनिन्दं, न गतः न प्राप्तः, तत् तस्मात्, इदानीमद्य, आपन्नसत्वा गर्भिणी शकुन्तला, सहधर्मचरणाय तया साकं गृहस्थधर्मान् प्रवर्तयितुं, प्रतिगृह्यतां स्वीक्रियताम् इत्याहेति पूर्वेणान्वयः।

गौतमी - आर्य! किमपि वक्तुकामास्मि। [78]न मे वचनावसरोऽस्ति कथमिति॥

श्लो॥ नापेक्षितो गुरुजनोऽनया [79]न त्वयापि पृष्टो बन्धुः।
[80]एकैकमेवं चरिते किं [81]भणत्वेक एकस्य॥16॥

---

76 'चिराय' इति 'C' इति प्रकाशने पाठान्तरम्।

77 'सत्वेयं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

78 'न खलु मे वचनावकाशोऽस्ति कथमिव?' इति 'C' इति प्रकाशने पाठान्तरम्।

79 'न खलु पृष्टश्च बन्धुजनः' इति 'A' इति प्रकाशने पाठान्तरम्।
'त्वया पृष्टो न बन्धुजनः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'नापेक्षितो गुरुजनस्त्वयानया न पृष्टा बन्धवः।' इति 'C' इति प्रकाशने पाठान्तरम्।

80 'एकैकस्मिन्नेव चरिते भणामि किमेकैकम्' इति 'B' इति प्रकाशने पाठान्तरम्।

81 'भणामि किमेकमेस्य' इति 'A' इति प्रकाशने पाठान्तरम्।
'.... चरिते भणामि किमेकैकस्य' इति 'C' इति प्रकाशने पाठान्तरम्।

गौतमीति। गौतम्याह, हे आर्य राजन्, अहं किमपि किं वा, वक्तुकामा वक्तुमभिलाषवती, अस्मि भवामि, मे मम, वचनावसरः वाक्यस्य समयः, नास्ति, कथमिति चेत्, नापेक्षित इति, अनया शकुन्तलया, गुरुजनः पित्रादिः, नापेक्षितः नेषितः, त्वयापि बन्धुः बान्धवजनः, न पृष्टः न ज्ञापितः, एवमनेन प्रकारेण चरिते विवाहव्यापारे, एकैकं केवलावेव, युवां भवथ इति शेषः, एकः अन्यः, एकस्य तदन्यस्य, नि। "एकेमुख्यान्यकेवला" इत्यमरः, किं भणति किं ब्रवीति।

शकुन्तला - (आत्मगतम्) किन्नुखल्वार्यपुत्रो भणति॥

शकुन्तलेति। शकुन्तला प्राह, आर्यपुत्रः भर्ता, किं नु खलु किं वा प्रत्युत्तरं, भणति ब्रवीतित्यात्मगतं प्राहेतिपूर्वेणान्वयः।

राजा - किमिदमुपन्यस्तम्॥

राजेति। राजा भाषते, इदमुपन्यस्तम् अयं वचनोपन्यासः, किं को वा, न जाने इति शेषः।

शकुन्तला - (आत्मगतम्) पावकः [82]खल्वेष वचनोपन्यासः॥

शकुन्तलेति। शकुन्तला आत्मगतं स्वगतं प्राहेति शेषः, एष वचनोपन्यासः किमिदमुपन्यस्तमिति भर्तुर्वाग्विजृम्भणं, पावकः खलु मनस्सन्तापकरो हि।

शार्ङ्गरवः - कथमिदं नाम[83]। भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः।

श्लो॥ सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते।

---

82 'खलु' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

83 'तत्कथं, किमिदं नाम? ननु भवन्त एव नितरां लोकतन्त्रनिष्णाताः।' इति 'C' इति प्रकाशने पाठान्तरम्।

अतस्समीपे परिणेतुरिष्यते
[84]तदप्रियापि प्रमदा स्वबन्धुभिः ॥17॥

शार्ङ्गरव इति। शार्ङ्गरव प्राह, इदं किमिदमुपन्यस्तमिति वाक्यं, कथं नाम केनोपपद्यते, भवन्त एव, सुतराम् अत्यन्तं, लोकवृत्तान्तनिष्णाताः लोकव्यवहाराभिज्ञाः सतीमित्यादि, सतीं पतिव्रतामपि, भर्तृमतीं सभर्तृकामपि योषितम्, ज्ञातिकुलैकसंश्रयां पितृगृहमात्रवर्तिनीम्, जनः लोकः, अन्यथा असतीम् विशङ्कते ऊहते, अतः कारणात्, प्रमदा युवतिः, तदप्रियापि भर्तृप्रतिकूलापि, स्वबन्धुभिः पितृभ्रात्रादिभिः, परिणेतुर्भर्तुस्समीपे निकटे, इष्यते अङ्गीक्रियते, स्त्रिया पतिसमीप एव अवश्यं स्थातव्यमिति भावः।

राजा - [85]किं चात्रभवती मया परिणीतपूर्वा ॥

राजेति। राजा ब्रूते, अत्रभवती पूज्या शकुन्तला च, मया परिणीतपूर्वा किं पूर्वं जायात्वेन परिगृहीता किम्?

शकुन्तला - (सविषादमात्मगतम्) हृदय। साम्प्रतं [86]त आशङ्का ॥

शकुन्तलेति। शकुन्तला सविषादं सखेदम्, आत्मगतं स्वगतं चाह, हे हृदय, साम्प्रतमिदानीं, ते तव, आशङ्का भीतिः उपस्थितेति शेषः।

शार्ङ्गरवः –

श्लो ॥ [87]किं कृतकार्यद्वेषाद्धर्मं प्रति विमुखतोचिता राज्ञः ॥

---

84 'प्रियाप्रिया वा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

85 'किमत्रभवती' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

86 'युक्तं ते..' इति 'C' इति प्रकाशने अधिकः पाठः।

87 'किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा' इति 'C' इति प्रकाशने पाठान्तरम्।

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, कृतकार्यद्वेषात् कृते निर्वर्तिते, कार्ये शकुन्तलापरिणयरूपे, द्वेषात् असहनात्, धर्मं प्रति सुकृतं प्रति, विमुखता पराङ्मुखत्वम्, राज्ञः धर्माधिकारिणः तवेति शेषः, उचिता न्याय्या किम्।

राजा - कुतोऽयमसत्कल्पनाप्रश्नः[88] ॥

राजेति। राजा वक्ति, अयमसत्कल्पनाप्रश्नः एष मिथ्याकल्पितोद्वाह-विषयकप्रश्नः, कुतः कस्मात्कारणात्।

शार्ङ्गरवः –

मूर्छन्त्यमी विकाराः [89]प्रायेणैश्वर्यमत्तेषु ॥ 18 ॥

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, अमी विकाराः कृतकार्यविस्मरणादयो दोषाः, ऐश्वर्यमत्तेषु ऐश्वर्येण राज्यादिसम्पदामत्तेषु, मदयुक्तेषु जनेषु, प्रायेण बाहुल्येन, मूर्छन्ति प्रादुर्भवन्ति।

राजा - विशेषेणाधिक्षिप्तोऽस्मि ॥

राजेति। राजा वदति, विशेषेणातिमात्रम् अधिक्षिप्तः आक्षिप्तोऽस्मि।

गौतमी - जाते! मुहूर्तं मा लज्जस्व। अपनेष्यामि तावत्तेऽवकुण्ठनम्[90]। ततस्त्वां भर्ताभिज्ञास्यति॥ (इति यथोक्तं करोति)

गौतमीति। गौतमी प्राह, हे जाते पुत्रि, मुहूर्तं क्षणं मा लज्जस्व लज्जिता न भवेः, तावदिदानीम्, ते तव, अवकुण्ठनं वस्त्रावरणम्, अपनेष्यामि अपसारयिष्यामि ततः तस्मात्, भर्ता पतिः, त्वामभिज्ञास्यति अवगमिष्यति, इत्युक्त्वा यथोक्तं करोति अवकुण्ठनमपसारयति।

---

88 '...कल्पनाप्रसङ्गः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

89 'प्रायेणैश्वर्यमत्तानाम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

90 'अवगुण्ठनम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

राजा – (शकुन्तलां निर्वर्ण्य आत्मगतम्)

श्लो ॥ इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न [91]वेत्यव्यवस्यन्।
भ्रमर इव [92]विभाते कुन्दमन्तस्तुषारं
[93]न च खलु परिभोक्तुं नैव शक्नोमि [94]हातुम्॥19॥

राजेति। राजा शकुन्तलां निर्वर्ण्य दृष्ट्वा, आत्मगतं स्वगतं, इदमिति, इदं प्रत्यक्षीकृतम्, उपनतमुपस्थितम्, अक्लिष्टकान्ति अनवद्यसौन्दर्यम्, एवं रूपं लोकोत्तररूपविशिष्टं वस्तु, प्रथमपरिगृहीतं पूर्वं स्वीकृतं, स्याद्वा न वा, न स्वीकृतं वा, इत्येवम् अव्यवस्यन् अनिश्चिन्वन्, अहम् अन्तस्तुषारम् अन्तर्गतहिमं, कुन्दं माघ्यं पुष्पविशेषं, विभाते प्रातःकाले, भ्रमरो भृङ्ग इव, परिभोक्तुम् अनुभवितुं, न शक्नोमि खलु, हातुं परित्यक्तुं च, न शक्नोम्येव समर्थो न भवाम्येव।

(इति विचारयन् स्थितः)

इतीति। इत्येवं प्रकारेण, विचारयन् पर्यालोचयन् स्थितः।

प्रतिहारी - [95]अहो धर्मावेक्षिता भर्तुः। ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति॥

---

91 'वेति व्यवस्यन्' इति 'A' इति प्रकाशने पाठान्तरम्।
'वेत्यध्यवस्यन्' इति पाठान्तरमुपलभ्यते इति' 'A' 'B' इति प्रकाशनयोः निर्दिष्टम्।

92 'निशान्ते' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

93 'न खलु सपदि भोक्तुं नैव शक्नोमि हातुम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

94 'भोक्तुम्' इति 'A' इति प्रकाशने पाठान्तरम्।

95 '(स्वागतम्)' '(जनान्तिकम्)' इति च पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। '(जनान्तिकम्)' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रतिहारीति। प्रतिहारी प्राह, भर्तुः स्वामिनः, धर्मावेक्षिता धर्मदृष्टिः, अहो आश्चर्यकरी, सुखोपनतम् अनायसेन प्राप्तम्, ईदृशम् एतादृशं, रूपं सौन्दर्यं, दृष्ट्वा वीक्ष्य, अन्यः एतस्माद्राज्ञ इतरः, कः पुरुषः, विचारयति परिशीलयति, न कोऽपि विचारयतीत्यर्थः।

शार्ङ्गरवः - [96]भो राजन्! किमिति जोषमास्यते॥

शार्ङ्गरव इति। शार्ङ्गरवः कथयति, किमिति, हे राजन् किमिति केन हेतुना, जोषं तूष्णीम्, आस्यते स्थीयते।

राजा - [97]भोस्तपोधनाः! चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्यास्स्मरामि। तत्कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं [98]क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये॥

राजेति। राजा भाषते, भोस्तपोधनाः हे तपस्विनः, चिन्तयन्नालोचयन्नपि, अत्रभवत्याः पूज्यतमायाश्शकुन्तलायास्स्वीकरणं भार्यात्वेन ग्रहणं, न स्मरामि खलु न चिन्तयामि हि, तत्तस्मात्, अभिव्यक्तसत्वलक्षणां प्रकटीकृतदौहृदचिह्नां, इमां शकुन्तलां प्रति, आत्मानं मां, क्षेत्रिणं कलत्रवन्तम् आशङ्कमानः आसमन्ताद्विशङ्कमानः, कथं केन प्रकारेण, प्रतिपत्स्ये ज्ञास्यामि।

शकुन्तला - ([99]अपवार्य) आर्यस्य परिणय एव सन्देहः। कुत इदानीं मे दूराधिरोहिण्याशा॥

---

96 'किमिदं जोषमास्यते' इति 'C' इति प्रकाशने पाठान्तरम्।

97 'भोस्तपस्विन्' इति 'A' इति प्रकाशने पाठान्तरम्।

98 'क्षेत्रियमिव मन्यमानः' इति 'A' इति प्रकाशने पाठान्तरम्।
'क्षेत्रियम्, अक्षेत्रियम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शकुन्तलेति। शकुन्तला, अपवार्य परेषामज्ञातं यथा तथा आच्छाद्य, आर्यस्य राज्ञः, परिणये विवाह एव, सन्देहः संशयः, इदानीमद्य मे मम, दूराधिरोहिणी दूरगामिनी, आशा अतितृष्णा, कुतः कस्माज्जातेति शेषः।

शार्ङ्गरवः - मा तावत्।

श्लो ॥ [100]कृताभिमर्शामनुमन्यमान-
स्सुतां त्वया नाम मुनिर्विमान्यः।
[101]मुष्टं प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि येन॥20॥

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, मा तावत्, मेति निषेधे, तावदिति साकल्ये, इदं सर्वं न भवतीत्यर्थः, परन्तु, कृताभिमर्शामिति, सुतां पुत्रिकां, त्वया कृताभिमर्शां कृतपरिग्रहाम्, अनुमन्यमानः अनायासेन अनुरूपवरप्राप्तिर्जातेति बहुमन्वानः, मुनिः कण्व एव, विमान्यः असद्वृत्त इति तिरस्कार्यः, येन कण्वमुनिना, मुष्टं चोरितं, स्वं स्वकीयम्, अर्थं धनं, प्रतिग्राहयता दानरूपेणाङ्गीकारयता, धनिना पात्रीकृतः दानर्हीकृतः, दस्युः बहुविधदण्डार्हश्चोर इव, असि भवसि।

शारद्वतः - शार्ङ्गरव। विरम त्वमिदानीम्। शकुन्तले! वक्तव्यमुक्तमस्माभिः। सोऽयमत्रभवानेवमाह। दीयतामस्मै [102]प्रत्ययप्रतिवचनम्॥

---

[99] '(सविषादम्, आत्मगतम्) परिणय एव ......। कुतो मे ....' इति 'C' इति प्रकाशने पाठान्तरम्।

[100] 'कृतान्मर्शामिनुन्यमाना' इति 'A' इति प्रकाशने पाठान्तरम्।
'कृतावमर्षं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[101] 'दुष्टं' इति 'A' इति प्रकाशने पाठान्तरम्।

[102] 'प्रतिवचनम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'प्रत्ययरूपं प्रति...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शारद्वत इति। शारद्वतः प्राह, हे शार्ङ्गरव त्वम् इदानीमद्य, विरम तूष्णीमास्व सू। 'व्याङ्परिभ्योरम' इति परस्मैपदं, हे शकुन्तले अस्माभिः वक्तव्यं तव भर्तीरि राजनि विषये, वाच्यम् उक्तं भाषितम् अत्रभवान् पूज्यः, सोऽयं दुष्यन्तः, एवम् अनेन प्रकारेण, आह ब्रवीति, अस्मै राज्ञे, प्रत्ययप्रतिवचनं विश्वसनीयप्रतिवाक्यं, दीयताम् उच्यताम्।

शकुन्तला - ([103]अपवार्य) इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन। आत्मेदानीं मे शोचनीय इति व्यवसितम्[104] ॥

शकुन्तलेति। शकुन्तला, अपवार्य अन्यैरज्ञातं यथा तथा आच्छाद्य, आह तादृशे निरुपमानेऽनुरागे, इदम् एवं विधम्, अवस्थान्तरं प्रकारान्तरं, गते प्राप्ते सति, स्मारितेन स्मरणं गमितेन अनुरागेणत्यनुषज्यते, किं वा प्रयोजनम्, इदानीं, मे मम, आत्माशोचनीयः गर्हणीयः, इत्येवं, व्यवसितं निश्चितं मयेति शेषः।

(प्रकाशम्) आर्यपुत्र। (इत्यर्धोक्ते) संशयित इदानीं परिणये नैष समुदाचारः। पौरव! न युक्तं नाम ते तथा पुरा आश्रमपदे स्वभावोत्तानहृदयमिमं जनं समयपूर्वं प्रतार्येदृशैरक्षरैः [105]प्रत्यादेष्टुम्॥

प्रकाशमिति। प्रकाशं सर्वश्राव्यं यथा तथा आहेति शेषः, आर्यपुत्रेत्यादि, हे आर्यपुत्र, इति अनेन प्रकारेण, अर्धोक्ते वाक्यैकदेशे, उक्ते सति, इदानीमस्मिन्समये, परिणये मत्पाणिग्रहणे, संशयिते सन्देहग्रस्ते सति, एषः आर्यपुत्रेत्यामन्त्रणरूपः, समुदाचारे व्यवहारः, न नार्हः, इति विचिन्त्य प्रकारान्तरेण आमन्त्रयते, पौरवेति, हे पौरव पुरुवंशोत्पन्न, ते तव, पुरा पूर्वस्मिन्काले, आश्रमपदे

---

103 'आत्मगतं' इति पाठान्तरमुपलभ्यते इति 'B''C' इति प्रकाशनयोः निर्दिष्टम्।

104 'व्यवसितमेतत्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

105 'प्रत्याख्यातुम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'ईदृशैरक्षरैः प्रत्याख्यातुम्' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

मामित्यर्थः, समयपूर्वं सङ्केतपूर्वकं, प्रतार्य वञ्चयित्वा, ईदृशैः एवंविधैः, अक्षरैर्वर्णैः, प्रत्यादेष्टुं निराकर्तुं, न युक्तं नाम अनुचितमेव।

राजा - (कर्णौ पिधाय।) शान्तम् पापम्।

श्लो॥ [106]व्यपदेशमाविलयितुं [107]किमीहसे जनमिमं च पातयितुम्।
कूलङ्कषेव सिन्धुः [108]प्रसन्नमम्भस्तटतरुं च॥21॥

राजेति। राजा, कर्णौ श्रोत्रे, पिधाय हस्ताभ्यामाच्छाद्य, आहेति शेषः शान्तं पापं दुरितं शाम्यतात्, व्यपदेशमिति, व्यपदेशं कुलप्रसिद्धिम् आविलयितुं मलिनीकर्तुं, इमं जनं मामित्यर्थः, पातयितुं पातकिनं कर्तुं, कूलङ्कषा पूर्णप्रवाहा सिन्धुः नदी, प्रसन्नं स्वच्छम्, अम्भः पयः, तटतरुं तटे रूढं तरुं वृक्षमिव च, ईहसे प्रयत्नं करोषि किम्।

शकुन्तला - भवतु। यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं [109]प्रवृत्तं तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि॥

शकुन्तलेति। शकुन्तला ब्रूते, भवतु यथा तथा वा अस्तु, परमार्थतः तत्त्वतः, परिग्रहशङ्किना परिणये संशयवता, त्वया भवता, एवम् उक्तप्रकारेण, प्रवृत्तं व्यापृतं यदि, अनेन वक्ष्यमाणेन, अभिज्ञानेन पूर्ववृत्तान्तज्ञापनेन, तव आशङ्कां सन्देहम्, अपनेष्यामि परिहरिष्यामि।

राजा - [110]उदारः कल्पः॥

---

106 'आलपन्ती' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

107 'समीहसे मां च पातयितुं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

108 'प्रसन्नमोघं तटतरुं च' इति 'A' इति प्रकाशने पाठान्तरम्।

'तटतरुं च' इति 'C' इति प्रकाशने पाठान्तरम्।

109 'वक्तुं' इति 'A' इति प्रकाशने पाठान्तरम्।

110 'प्रथमः कल्पः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

राजेति। राजा प्राह, कल्पः अयं पक्षः, उदारः उत्कृष्टतमः।

शकुन्तला - (मुद्रास्थानं परामृश्य।) हा धिक्! हा धिक्![111] अङ्गुलीयकशून्या मेऽङ्गुलिः॥

शकुन्तलेति। शकुन्तला वक्ति। किमिति। मुद्रास्थानम् अङ्गुलीयकस्थानं, परामृश्य स्पृष्ट्वा, हा धिक् हा धिक् हा धिगिति विषादे, मे मम, अङ्गुलिः अङ्गुलीयकशून्या मुद्रिका रहिता।

(इति सविषादं [112]गौतमीमवेक्षते)

इतीति। इति पूर्वोक्तप्रकारेणोक्त्वा, सविषादं सखेदं यथा तथा, गौतमीं तन्नाम्नीं पितृष्वसारम्, अवेक्षते पश्यति।

गौतमी - नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः [113]प्रभ्रष्टमङ्गुलीयकम्॥

गौतमीति। गौतम्याह, शक्रावताराभ्यन्तरे शक्रावतारस्य कस्यचित्तीर्थस्य, अभ्यन्तरे अन्तःप्रदेशे, स्थितस्येति शेषः, शचीतीर्थसलिलं शचीतीर्थोदकं, वन्दमानायाः नमस्कुर्वाणायाः, ते तव, अङ्गुलीयकं करशाखाभरणं, प्रभ्रष्टम् परिच्युतम्, नूनं निश्चयः।

राजा - (सस्मितम्।) इदं तत्प्रत्युत्पन्नमतिस्त्रैणमिति यदुच्यते॥

राजेति। राजा, सस्मितं समन्दहासं यथा तथा आह, किमिति, स्त्रैणं स्त्रीकदम्बकं, प्रत्युत्पन्नमति समयोचिततत्कालबुद्धिविशिष्टम्, इति यदुच्यते अभिधीयते, तत् इदम् एतदेवेत्यर्थः।

---

111 'हा धिक्' इति एकवारमेव पाठः 'A' इति प्रकाशने दृश्यते।

112 'गौतमीमुखमीक्षते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

113 'तव हस्तात्' इति 'C' इति प्रकाशने अधिकः पाठः।

शकुन्तला - अत्र तावद्विधिना दर्शितं प्रभुत्वम् अपरं ते कथयिष्यामि॥

शकुन्तलेति। शकुन्तला वदति, अत्र अस्मिन्विषये, विधिना दैवेन, प्रभुत्वं स्वसामर्थ्यं, दर्शितं प्रत्यक्षीकृतं, ते तव, अपरम् अन्यत् अभिज्ञाम्, कथयिष्यामि वक्ष्यामि।

राजा - श्रोतव्यमिदानीं संवृत्तम्॥

राजेति। राजा प्राह, इदानीमद्य, श्रोतव्यं श्रोतुमुचितं, संवृत्तं जातम्।

शकुन्तला - नन्वेकस्मिन्दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितमासीत्॥

शकुन्तलेति। शकुन्तला भणति, नन्विति सम्बोधने, ननु राजन्, एकस्मिन् दिवसे कस्मिंश्चिद्दिने, नवमालिकामण्डपे सप्तलाविरचितलतागृहे, नलिनीपत्र भाजनगतं पद्मच्छदसम्पुटिकास्थितम्, उदकं जलं, तव हस्ते करे, सन्निहितं सम्यङ्निक्षिप्तम्, आसीत् अभवत्।

राजा - शृणुमस्तावत्॥

राजेति। राजा प्राह, तावत्सर्वं, शृणुमः आकर्णयामः।

शकुन्तला - तत्क्षणं स मे पुत्रकृतको दीर्घापाङ्गो नाम [114]मृगपोतक उपस्थितः। त्वयायं तावत्प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन। न पुनस्तेऽपरिचयाद्धस्ताभ्याशमुपगतः। पश्चात्तस्मिन्नेव मया गृहीते सलिलेऽनेन कृतः प्रणयः। तदा त्वमित्थं प्रहसितोऽसि। सर्वस्सगन्धेषु विश्वसिति। द्वावप्यत्रारण्यकाविति॥

114 'हरिणपोतक.....। तदा त्वया तावत्प्रथममेष.....। न पुनरेष ते। ..... सलिले कृतस्तेन .....। ततः त्वमित्थं.....' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। शकुन्तला आहेति शेषः, तत्क्षणं तस्मिन्नेव क्षणे, मे मम, पुत्रकृतकः कृत्रिमपुत्रः, दीर्घापाङ्गो नाम दीर्घापाङ्गनामधेयः, सप्रसिद्धः मृगपोतकः हिरणशिशुः, उपस्थितः सम्प्राप्तः, अयं तावत् मृगपोतस्तु, प्रथमम् अग्रे, पिबतु जलपानं करोतु, इत्यनुकम्पिना एवं दयालुना, त्वया भवता, उदकेन वारिणा, उपच्छन्दितः परिसान्त्वितः, आदृत इति यावत्, अपरिचयात् परियावात्, स पुनः मृगपोतस्तु, ते तव, हस्ताभ्याशं करोपकण्ठं, नोपगतः न प्राप्तः, पश्चादनन्तरं, तस्मिन्नेव सलिले, मया गृहीते धृते सति, तेन मृगपोतेन, प्रणयः स्नेहः कृतः, तदा तस्मिन्समये, त्वम् इत्थं वक्ष्यमाण प्रकारेण, प्रहसितोऽसि हसितवानसि, सर्वो जनः, सगन्धेषु बन्धुषु, नि। "गन्धोगन्धकामोदे लेशे सम्बन्धगर्वयोः" इति विश्वः। विश्वसिति विश्वासं प्राप्नोति, अत्र सम्बन्धे, द्वावपि युवाम्, आरण्यकौ आरण्यजातौ, इत्यनेन प्रकारेण, प्रहसित इति पूर्वेणान्वयः, आरण्यक इति शब्दस्तु सू। 'अरण्यान्मनुष्य' इति सूत्रेण व्युत्पन्नः।

राजा - [115]एवमादिभिरात्मकार्यनिर्वर्तिनीनाम्
[116]अनृतमयवाङ्मधुभिराकृष्यन्ते विषयिणः॥

राजेति। राजा प्राह, आत्मकार्यनिर्वर्तिनीनां स्वप्रयोजननिष्पादनशीलानां स्त्रीणाम्, एवमादिभिः ईदृशप्रकरैः, अनृतमयवाङ्मधुभिः मिथ्याभूतवचनामृतैः विषयिणः विषयाभिलाषिणो जनाः, आकृष्यन्ते वशीक्रियन्ते।

गौतमी - महाभाग! नार्हस्येवं मन्त्रयितुम्। तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य॥

गौतमीति। गौतमी वदति, हे महाभाग राजन्, एवमनेन प्रकारेण, मन्त्रयितुम् आलोचयितुं, नार्हसि न योग्योऽसि, कुत इति चेत्, तपोवनसंवर्धितः

---

115 '....र्तिनीनां योषतां, ...वर्तिनीनां, ...र्तिनीभिर्मधुराभिरनृतवाग्भिः, ...राभिर्गीर्भिः' इत्येवं पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

116 'योषितां' इति 'C' इति प्रकाशने अधिकः पाठः।

आश्रमपरिपोषितः, अयं जनः शकुन्तलेत्यर्थः, कैतवस्य कपटस्य, अनभिज्ञः अपरिचितः तस्मान्महाभागशब्दवाच्यस्त्वं शकुन्तलाविषये एवं वक्तुं न युक्तमित्याशयः, महान्भाग ईश्वरांशो यस्य स तथोक्तः॥,

राजा - तापसवृद्धे।

श्लो ॥ स्त्रीणामशिक्षितपटुत्वममानुषीषु[117]
सन्दृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः [118]खलु पोषयन्ति॥22॥

राजेति राजा आहेति शेषः, हे तापसवृद्धे गौतमि, स्त्रीणां योषितां न तु शकुन्तलाया एकस्या एवेति भावः, अशिक्षितपटुत्वम् उपदेशराहित्येनैव वञ्चना-करणनैपुण्यम्, अमानुषीषु मनुष्येतर स्त्रीष्वेव, सन्दृश्यते लोकसम्मत्या सम्यक् परिभाव्यते, याः स्त्रियः, बोधवत्यः ज्ञानवत्यः ज्ञानसमेताः, ताः प्रति किमुत किं वक्तव्यम्, अर्थापत्त्यासिद्धोयमर्थ इति भावः, उक्तमर्थं दृष्टान्तेन स्पष्टीकरोति। प्रागिति, परभृताः कोकिलाः, स्वं स्वकीयम्, अपत्यजातं पुत्रसमुदायमन्यैर्द्विजैः वायसपक्षिभिः, अन्तरिक्षगमनात्प्राक् उत्पतनात्पूर्वं, पोषयन्ति खलु वर्धयन्ति हि।

शकुन्तला - (सरोषम्) अनार्य! आत्मनो हृदयानुमानेन [119]प्रेक्षसे। क इदीनीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतं[120] [121]प्रतिपत्स्यते॥

---

117 '...षीणां' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

118 'किल' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

119 'पश्यसि' इति 'A' इति प्रकाशने पाठान्तरम्।
'सर्वं पश्यसि।' इति 'C' इति प्रकाशने पाठान्तरम्।

120 'तवानुकृतिं' इति 'A' इति प्रकाशने पाठान्तरम्।

121 'पश्यति' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। शकुन्तला, सरोषं दुष्यन्तकृतोपालम्भजनितक्रोधसहितं यथा तथा भाषते, हे अनार्य परदुःखकरणशील, आत्मनस्स्वस्य, हृदयानुमानेन मनो वितर्केण, प्रेक्षसे आलोचयसे, इदानीं साम्प्रतम्, अन्यः इतरः, कः पुमान्, धर्मकञ्चुकप्रवेशिनः बहिर्धर्मावरणधारिणः, अत एव तृणच्छन्नकूपोपमस्य घासावृतोदपानसदृशस्य, तव अनुकृतं सादृश्यं, प्रतिपत्स्यते प्राप्स्यते।

राजा - (आत्मगतम्) सन्दिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते। तथा ह्यनया।

श्लो॥ [122]मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य॥23॥

राजेति। राजा आत्मगतं स्वगतम्, अस्याश्शकुन्तलायाः, कोपः रोषः, मां सन्दिग्धबुद्धिम्, इयं पूर्वपरिगृहीता न वा इति संशयाविष्टचेतसं, कुर्वन् विदधानः, अकैतवः कपटरहित इव, लक्ष्यते वीक्ष्यते तथा हि, कोपमेवोपपादयति, अनया शकुन्तलया, मयीति, विस्मरणदारुणचित्तवृत्तौ विस्मरणेन स्मृतिराहित्येन, दारुणा क्रूरा चित्तवृत्तिः मनोव्यापारो यस्य तस्मिन्, रहः एकान्ते, वृत्तं कृतं, प्रणयं सौहृदं, अप्रतिपद्यमाने अजानाने, मय्येव कुटिलयोर्वक्रयोः, भ्रवोर्नेत्रोपरिभागयोः, भेदात् भङ्गात्, अतिलोहिताक्ष्याः प्रकृष्टरक्तिमविशिष्टनेत्राया अपि, रुषा अत्यर्थकोपतया, स्मरस्य मन्मथस्य, शरासनं बाणासनं, भग्नं त्रुटितमिव स्थितमिति शेषः।

(प्रकाशम्) [123]भद्रे। प्रथितं दुष्यन्तस्य चरितम्। [124]तथापीदं न लक्षये॥

---

122 'वमस्म...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

123 'आर्ये' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

124 'नापीदं दृश्यते' इति 'A' इति प्रकाशने पाठान्तरम्।

प्रकाशमिति। प्रकाशम् प्रकटं यथा तथा आह, हे भद्रे, दुष्यन्तस्य चरितम् व्यापारः, प्रथितं प्रसिद्धं, तथापि तेन प्रकारेण विद्यमानत्वेऽपि, इदं गान्धर्वविवाह रूपचरितं, न लक्षये न तर्कयामि।

शकुन्तला - [125]सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि। याहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयस्थितविषस्य हस्ताभ्याशमुपगता। (इति पटान्तेन मुखमावृत्य रोदिति)

शकुन्तलेति। शकुन्तला प्राह, अत्र अस्मिन्समये, सुष्ठुतावत् भृशं, स्वच्छन्दचारिणी स्वाभिप्रायानुसारेण सञ्चरणशीला, कृतास्मि विहितास्मि, याहं मुखमधोः मधुरवचनरचनस्य, हृदयस्थितविषस्य मनोगतकालकूटस्य, अस्य राज्ञः हस्ताभ्याशं करसमीपं, पुरुवंशप्रत्ययेन पुरोरिति कस्यचिद्राज्ञः वंशोऽयमिति, विश्वासेन, उपगता सम्प्राप्ता, इत्युक्त्वा पटान्तेन चेलाञ्चलेन, मुखमाननम्, आवृत्याच्छाद्य, रोदिति क्रन्दति।

शार्ङ्गरवः - [126]इत्थमात्मकृतमप्रतिहतं चापलं दहति॥

श्लो॥ अतः [127]परीक्ष्य कर्तव्यं विशेषात् सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्॥24॥

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, इत्थम्, अनुभूयमानप्रकारेण, आत्मकृतं पित्राद्यनुज्ञां विना स्वकृतम्, अप्रतिहतं निष्प्रतिबन्धं, चापलम् अनालोचितं कर्म,

---

'प्रजास्वपीदं न दृश्यते, दुष्यन्तस्य चरितं प्रजासु प्रथि....तथापीदं न दृश्यते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

'न लक्ष्यते।' इति 'C' इति प्रकाशने पाठान्तरम्।

125 '... तावत्स्वच्छन्द....। याहमस्य प्रत्ययेन ....' इति 'C' इति प्रकाशने पाठान्तरम्।

126 'इत्थमप्रतिहतं' इति 'A' इति प्रकाशने पाठान्तरम्।

'...कृतं चापलमप्रतिहतम् आत्मानं दहति।' इति 'C' इति प्रकाशने पाठान्तरम्।

127 'समीक्ष्य' इति 'A' इति प्रकाशने पाठान्तरम्।

दहति बाधते, फलितार्थमाह, अत इति, अतः उक्तकारणात्, रहः एकान्ते, सङ्गतं सम्बन्धः, विशेषात् विशेषेण, परीक्ष्य संशोध्य, कर्तव्यं कर्तुमर्हम्, अज्ञातहृदयेषु अनवगताशयेषु जनेषु विषये, सौहृदं मित्रत्वम्, एवम् अनेन प्रकारेण, वैरीभवति विद्वेषी भवति।

राजा - अयि भोः! किमत्रभवती प्रत्ययादेवास्मान् [128]सम्भृतदोषैः [129]अधिक्षिपथ॥

राजेति। राजा प्राह, अयिभोः शार्ङ्गरवमिश्राः, अत्रभवती प्रत्ययात् शकुन्तलावचनविश्वासात्, अस्मानेव, सम्भृतदोषैः कल्पितदोषोपन्यासैः, किमधिक्षिपथ आक्षेपं किमर्थं कुरुथ।

शार्ङ्गरवः - (सासूयम्) श्रुतं भवद्भिरधरोत्तरम्।

श्लो॥ आजन्मनश्शाठ्यमशिक्षितो य-
स्तस्याप्रमाणं वचनं जनस्य।
परातिसन्धानमधीयते [130]यै-
र्विद्येति ते सन्तु किलाप्तवाचः॥25॥

शार्ङ्गरव इति। शार्ङ्गरवः, सासूयम् असूया सहितं प्राह, भवद्भिः युष्माभिः, अधरोत्तरम् अधरस्य निकृष्टस्य ममेत्यर्थः, उत्तरं प्रतिवचनम्, श्रुतमाकर्णितम्,

---

128 'संयुतदोषाक्षरैः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'क्षरेण, ...स्मानतिबलेन क्षिण्वन्ति भवन्तः, ...रधिक्षिपथ, ...स्मान्सम्भृतदोषैरधिक्षिपन्ति भवन्तः, संवृतदोषा...., रोषक्षरेणाधिक्षिपथ, ...रोषाक्षरेण वचसाधि.....' इत्येवं पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।
'सम्भृतरोषाक्षरेण क्षिणुथ।' इति 'C' इति प्रकाशने पाठान्तरम्।

129 'क्षिणुथ' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

130 'पराभि..., ...यैः, ये' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

आजन्मन इति, यो जनः, आजन्मनः जन्मतः प्रभृति, शाठ्यम् अनार्जवम् अशिक्षितः अनुपदिष्टः, तस्य जनस्य, वचनं वाक्यम्, अप्रमाणमग्राह्यं, यैः जनैः, परातिसन्धानं परजनवञ्चनं, विद्या अन्वीक्षक्यादिरिति अधीयते अध्ययनं कुर्वन्ति, ते जनाः, आप्तवाचः यथार्थवक्तारः, सन्तु भवन्तु किल।

राजा - [131]भोस्सत्यवादिन्! अभ्युपगतं तावदस्माभिरेवम्। किं पुनरिमामतिसन्धाय[132] लभ्यते॥

राजेति। राजा वदति, भोस्सत्यवादिन् यथार्थवादिन्, अस्माभिः, एवम् पूर्वोक्तं, तावत्सर्वम् अभ्युपगतम् अङ्गीकृतं, वयं तादृशा एव भवाम इति भावः इमां शकुन्तलां पुनः, अतिसन्धाय प्रतार्य, किं लभ्यते प्राप्यते, शकुन्तलावञ्चनया किं प्रयोजनमिति तात्पर्यार्थः।

शार्ङ्गरवः - विनिपातः॥

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, विनिपातः प्रत्यवायः।

राजा - विनिवातः पौरवैः प्रार्थ्यत इति न श्रद्धेयमेतत्[133]॥

राजेति। राजा प्राह, पौरवैः पुरुवंशजैर्राजभिः, विनिपातः प्रत्यवायः प्रार्थ्यते इष्यते इत्येतत्, न श्रद्धेयं न विश्वसनीयम्।

[134]शारद्वतः - शार्ङ्गरव। [135]किमुत्तरेण। अनुष्ठितो गुरोस्सन्देशः[136]। प्रतिनिवर्तामहे वयम्। (राजानं प्रति)

---

131 'हन्त भोः सत्य.... दस्माभिः। एवंविधा वयम्। किं पुनरिमाम.....' इत्येवं पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

132 'अतिसन्धाय' इति 'A' इति प्रकाशने पाठान्तरम्।

133 'श्रद्धेयम्' इति 'A' इति प्रकाशने पाठान्तरम्।

134 '(शार्ङ्गरवः – भो राजान्!)' इति 'C' इति प्रकाशने पाठान्तरम्।

135 'उत्तरोत्तरेण...' इति पाठान्तरमुपलभ्यते इति 'B''C' इति प्रकाशनयोः निर्दिष्टम्।

श्लो॥ तदेषा भवतः [137]कान्ता त्यज वैनां गृहाण वा।
[138]उपपन्ना हि दारेषु प्रभुता [139]सर्वतोमुखी॥26॥

शारद्वत इति। शारद्वतः प्राह, हे शार्ङ्गरव उत्तरेण अनन्तरकृत्येन, किं प्रयोजनम्, गुरोः काश्यपस्य, सन्देशः वाचिकम्, अनुष्ठितः निर्वर्तितः, वयं प्रतिनिवर्तामहे प्रतिगच्छामः, राजानं प्रति दुष्यन्तमुद्दिश्य आहेति शेषः, तदिति, तत्तस्मात्, एषा शकुन्तला, भवतस्तव, कान्ता प्रिया, एनां त्यज परिहर वा, गृहाण स्वीकुरुष्व वा, दारेषु कलत्रेषु विषये, सर्वतोमुखी नानाप्रकारा, प्रभुता स्वातन्त्र्यम्, उपपन्ना युक्ता हि, बहुनोक्तेन न किं प्रयोजनमिति भावः।

गौतमी गच्छाग्रतः। (इति प्रस्थिताः)

गौतमीति। गौतमी प्राह, अग्रतः पुरतः, गच्छ याहि, इत्युक्त्वा, प्रस्थिताः याताः सर्वे इति शेषः।

शकुन्तला - कथमनेन कितवेन विप्रलब्धास्मि। यूयमपि मां परिदेविनीं[140] परित्यजथ। (इत्यनुप्रतिष्ठते)

शकुन्तलेति। शकुन्तला ब्रूते, अनेन कितवेन धूर्तेन, विप्रलब्धा वञ्चिता, अस्मि भवामि, कथं केन वा प्रकारेण, मम गतिस्स्यादिति वाक्याध्याहारो बोध्यः, यूयमपि परिदेविनीं विलापं कुर्वन्तीं, मां परित्यजथ परिहरथेति काकुः, इत्युक्त्वा अनुप्रतिष्ठते अनुसृत्यगच्छति, सू। 'समवप्रविभ्यस्थ' इत्यात्मनेपदम्॥

---

136 'निदेशः, गुरुसं...., नियोगः...., ' इत्येवं पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्। 'गुरुसन्देशः' इति 'C' इति प्रकाशने पाठान्तरम्।

137 'पत्नी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

138 'उपयन्तुर्हि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

139 'विश्वतो...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

140 'परिदेविनीं' इत्येषः अधिकः पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

गौतमी - (स्थित्वा[141]) वत्स शार्ङ्गरव। अनुगच्छतीयं खलु नः करुणपरिदेविनी शकुन्तला। प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्री करिष्यति[142] ॥

गौतमीति। गौतमीस्थित्वा स्थिता सती, हे वत्स शार्ङ्गरव करुणपरिदेविनी दैन्येन विलपन्ती, इयं शकुन्तला, नोऽस्मान्, अनुगच्छति अनुसरति खलु, भर्तरि प्रिये प्रत्यादेशपरुषे प्रत्याख्यानक्रूरे सति, मे मम पुत्री शकुन्तला, किं वा करिष्यति विधास्यते।

शार्ङ्गरवः - (सरोषं निवृत्य) किं पुरोभागिनि![143] स्वातन्त्र्यमवलम्बसे।

(शकुन्तला भीता वेपते)

शार्ङ्गरव इति। शार्ङ्गरवः, सरोषं सकोपं, निवृत्य परावृत्य प्राह, हे पुरोभागिनी पतितिरस्काररूपदोषमात्रदर्शिनि, स्वातन्त्र्यं स्वच्छन्दवृत्तिम्, अवलम्बसे गृह्णासि किम्, शकुन्तला इत्युक्ता सती, भीता भयङ्गता, वेपते कम्पते।

शार्ङ्गरवः - शकुन्तले।

श्लो॥ यदि यथा वदति क्षितिपस्तथा
त्वमसि किं [144]पितुरुत्कुलया त्वया।
अथ [145]तु वेत्सि [146]शुचि व्रतमात्मनः
[147]पतिकुले तव दास्यमपि क्षमम्॥27॥

---

141 ‘स्थित्वा परिवृत्यावलोक्य च’ इति पाठान्तरमुपलभ्यते इति ‘B’ इति प्रकाशने निर्दिष्टम्।

142 ‘करोतु’ इति ‘A’ ‘B’ इति प्रकाशनयोः पाठान्तरम्।
‘करोति?’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

143 ‘पुरोभागे’ इति ‘A’ ‘B’ इति प्रकाशनयोः पाठान्तरम्।

144 ‘पितुरुत्पथया’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

145 ‘च, नु’ इति पाठान्तराण्युपलभ्यन्ते इति ‘B’ इति प्रकाशने निर्दिष्टम्।

146 ‘शुचिं व्रतमात्मनः’ इति ‘A’ इति प्रकाशने पाठान्तरम्।

तिष्ठ! साधयामो वयम्॥

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, हे शकुन्तले, क्षितिपः राजा, यथा येन प्रकारेण, वदति त्वं मम भार्या न भवसीति भाषते, तथा तेन प्रकारेण, त्वम् असि यदि भवसि चेत्, उत्कुलया अतिक्रान्तकुलाचारया त्वया, पितुर्जनकस्य, किं प्रयोजनम् अथ अथवा, आत्मनस्स्वस्य, व्रतं चरितं, शुचि शुद्धम् अव्यभिचरितं इति यावत्। वेत्सि जानासि यदि, पतिकुले भर्तृगृहे, तव दास्यं दासीत्वमपि, क्षमम् उचितं, स्त्रीणां भर्तृगृहावस्थानमेवन्याय्यं विधिनेति भावः, तिष्ठ अत्रैवेति शेषः वयम् साधयामो गच्छामः।

राजा - भोस्तपस्विन्! किमत्रभवतीं [148]विप्रलम्भसे। कुतः।

श्लो॥ कुमुदान्येव शशाङ्कस्सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः॥28॥

राजेति। राजा प्राह, भोस्तपस्विन् हे शार्ङ्गरवमुने, अत्रभवतीं पूज्यां शकुन्तलां, किं किमर्थं, विप्रलम्भसे अधिक्षिपसि, कुतः कस्मादिति चेत् कुमुदानीति, शशाङ्कश्चन्द्रः, कुमुदानि कैरवाण्येव, बोधयति प्रोत्फुल्लयति, वशिनां जितेन्द्रियाणां मुनीनामित्यर्थः, वृत्तिः व्यापारः, परपरिग्रहसंश्लेषपरङ्गुखी पराङ्गनालिङ्गनविमुखी, नि। "पत्नीपरिजनादानमूलपाशाः परिग्रहा" इत्यमरः॥

शार्ङ्गरवः - [149]यदा तु पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवान्। तदा कथमधर्मभीरुः[150]॥

---

147 'पतिगृहे' इति 'A' इति प्रकाशने पाठान्तरम्।

148 'विप्रलपसे' इति 'B' इति प्रकाशने पाठान्तरम्।
'विप्रलम्भने' इति 'C' इति प्रकाशने पाठान्तरम्।

149 'राजन् अथ पूर्ववृत्तं व्यासङ्गाद्विस्मृतं भवेत्तदा कथमधर्मभीरोदरिपरित्यागः, अन्यासं...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शार्ङ्गरव इति। शार्ङ्गरवः प्राह, भवान् यदा तु यस्मिन्समये, पूर्ववृत्तं भूतकालकृतचरित्रम्, अन्यसङ्गात् कलत्रान्तरसम्बन्धात्, विस्मृतः विस्मरणं गतः, तदा तस्मिन्समये, अधर्मभीरुः अधर्माद्भीतः, कथं केनप्रकारेण, भवतीति शेषः।

राजा - [151]भवन्तमेवात्र गुरुलाघवं पृच्छामि।

श्लो॥ मूढस्स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः[152] ॥29॥

राजेति। राजा प्राह, अत्र परिग्रहापरिग्रहविषये, भवन्तं त्वामेव, गुरुलाघवं गुरुत्वलघुत्वे इत्यर्थः, पृच्छामि प्रश्नं करोमि, तदेवाह, मूढ इति, अहं मूढः कृतकार्यस्मरणाभावादज्ञो वा, एषा शकुन्तला, मिथ्या स्वकार्यार्थमसत्यं, वदेत् भाषेत वा, इत्यनेन प्रकारेण, संशये सन्देहे सति, दारत्यागी परित्यक्तभार्यः भवामि वा, अहो अथवा, परस्त्रीस्पर्शपांशुलः पराङ्गनासंसर्गपातकी भवामि वा, इति पृच्छामीति पूर्वेणान्वयः।

पुरोहितः - (विचार्य) यदि तावदेवं क्रियताम्॥

पुरोहित इति। पुरोहितः, विचार्य आलोड्य, यदि तावत् शकुन्तला परिणये सन्देहश्चेत्, एवं वक्ष्यमाणप्रकारेण, क्रियताम् विधीयताम्।

राजा - अनुशास्तु मां [153]भवान्॥

राजेति। राजा प्राह, भवान् माम् अनुशास्तु आज्ञापयतु।

---

150 'अधर्मभीरोर्दारपरित्यागः' इति 'A' इति प्रकाशने पाठान्तरम्।
'भीरुता' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

151 '(पुरोहितं प्रति)' इत्येषः अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

152 'पांसुलः' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

153 'पुरोहितः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'पुरोहितः' इति 'C' इति प्रकाशने पाठान्तरम्।

पुरोहितः - अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु। [154]कुत इदमुच्यत इति चेत्। त्वं साधुभिरुद्दिष्टः[155]। प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति। स चेन्मुनिदौहित्रस्तल्लक्षणोपपनन्नो भविष्यति[156]। [157]अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि। विपर्यये तु पितुरस्याः [158]समीपनयनमवस्थितमेव॥

पुरोहित इत्यादि। पुरोहितः प्राह, अत्रभवती तावत्, पूज्या शकुन्तला च, आप्रसवात् पुत्रोत्पत्तिपर्यन्तमस्मद्गृहे अस्माकं भवने, तिष्ठतु निवसतु, इदं वचनं, कुतः कस्मात्, उच्यते परिभाष्यते, इति चेत्, साधुभिः सद्भिः, त्वं प्रथमं पूर्वमेव चक्रवर्तिनं सार्वभौमं, पुत्रम् आत्मजं, जनयिष्यति सम्भावयिष्यसि, इत्येवमुद्दिष्टः अभिहितः, समुनिदौहित्रः कण्वस्य दुहितुश्शकुन्तलायाः पुत्रः, तल्लक्षणोपपन्नश्चेत् चक्रवर्तिलक्षणयुक्ते भविष्यति यदि, अभिनन्द्य सन्तुष्टो भूत्वा, एनां शकुन्तलां शुद्धान्तमन्तःपुरं, प्रवेशयिष्यसि प्रापयिष्यसि विपर्यये तु चक्रवर्तिलक्षणोपेतपुत्रस्य अजनने सति, अस्याः शकुन्तलायाः, पितुर्जनकस्य, समीपनयनं सविधप्रापणम्, अवस्थितं सिद्धमेवेत्यर्थः।

राजा - यथा गुरुभ्यो रोचते॥

राजेति। राजा प्राह, गुरुभ्यः आचार्येभ्यः, यथा येन प्रकारेण, रोचते रुचिर्भवति तथा करवाणीति शेषः।

154 'राजा – कुत इदम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

155 '....रादिष्टपूर्वः' इति 'B''C' इति प्रकाशनयोः पाठान्तरम्।

156 'भवेत्ततः' इति 'C' इति प्रकाशने पाठान्तरम्।

157 'ततः प्रतिनन्द्य' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

158 'समीपगमनमस्थितमेव' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

पुरोहितः - [159]वत्से! अनुगच्छ माम्॥

पुरोहित इति। हे वत्से शकुन्तले, मामनुगच्छ अनुसृत्य आयाहि।

शकुन्तला - भगवति वसुधे! देहि मे विवरम्॥ (इति रुदती प्रस्थिता[160])

(निष्क्रान्ता सह पुरोधसा सहतपस्विभिश्च)

शकुन्तलेति। शकुन्तला प्राह, हे भगवति षड्गुणैश्वर्यसम्पन्ने, वसुधे भूदेवि, मे मह्यं, विवरम् अवकाशं, देहि वितर, इत्युक्त्वा, रुदती रोदनं कर्वन्ती, प्रस्थिता प्रयाता, पुरोधसा सह पुरोहितेन साकं, सह तपस्विभिश्च शार्ङ्गरवादि-मुनिभिश्च साकं, निष्क्रान्ता निर्गता।

(राजा शापव्यवहितस्मृतिश्शकुन्तलागतमेव[161] चिन्तयति)

राजेति। राजा दुष्यन्तः, शापव्यवहितस्मृतिः दुर्वासश्शापान्तरितशकुन्तला स्मरणस्सन्, शकुन्तलागतं शकुन्तलाप्रकारमेव, चिन्तयति आलोचयति।

(नेपथ्ये) आश्चर्यम्[162]॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, आश्चर्यमद्भुतम्।

राजा - (आकर्ण्य) किन्नु खलु स्यात्॥

राजेति। राजा आकर्ण्य श्रुत्वा, किन्नु खलु स्यात् इदं किं वा भवेत्, इति पर्यालोचयन् राजा स्थितः।

---

159 '(उत्थाय)' इत्येषः अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

160 'रुदती निष्क्रान्ता सह पु....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'(रुदती निष्क्रान्ता सह पु.....तपस्विजनैश्च)' इति 'C' इति प्रकाशने पाठान्तरम्।

161 'शकुन्तलामेव' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'शकुन्तलामेव' इति 'C' इति प्रकाशने पाठान्तरम्।

162 'आश्चर्यमाश्चर्यम्' इति 'B''C' इति प्रकाशनयोः पाठान्तरम्।

पुरोहितः – (प्रविश्य, सविस्मयम्) देव! अद्भुतं खलु [163]संवृत्तम्॥

पुरोहित इति। पुरोहितः, प्रविश्य रङ्गस्थलं प्राप्य, सविस्मयं साश्चर्यं यथा तथा वदति, हे देव स्वामिन्, अद्भुतम् आश्चर्यं, संवृत्तम् जातं खलु।

राजा - किमेवम्॥

राजेति। किमेवम् एवं भूतम् आश्चर्यकरं किम्।

पुरोहितः - देव! परावृत्तेषु कण्वशिष्येषु।

श्लो॥ सा निन्दन्ती स्वानि भाग्यानि बाला
बाहूत्क्षेपं [164]क्रन्दितुं च प्रवृत्ता॥

पुरोहित इति। पुरोहितो ब्रूते, हे देव महाराज, कण्वशिष्येषु काश्यपच्छात्रेषु, परावृत्तेषु इतः प्रतिगतेषु सत्सु, सेति सा बाला शकुन्तला, स्वानि स्वकीयानि, भाग्यानि भागधेयानि, निन्दन्ती निन्दां कुर्वती सती, बाहूत्क्षेपं बाहू उत्क्षिप्य भुजावूर्ध्वं प्रसार्य, क्रन्दितुम् आक्रोशं कर्तुं, प्रवृत्ता उपक्रान्तवती च।

राजा - किं च[165] ॥

राजेति। किं च ततश्च किं जातमित्यर्थः।

पुरोहितः –

स्त्रीसंस्थानं चाप्सरस्तीर्थमारा-
दुत्क्षिप्यैनां[166] ज्योतिरेकं जगाम[167] ॥30॥

---

163 'वृत्तम्' इति 'A' इति प्रकाशने पाठान्तरम्।

164 'रोदितुं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

165 'किमन्यत्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'किं ततस्ततः' इति 'C' इति प्रकाशने पाठान्तरम्।

166 'दाक्षिण्ये...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

(सर्वे विस्मयं रूपयन्ति॥)

पुरोहित इति। पुरोहितः प्राह, अप्सरस्तीर्थमारात् अप्सरस्तीर्थस्यान्तिके, अप्सरस्तीर्थमिति तत्रत्यस्य कस्यचित्तीर्थस्य नाम, स्त्रीसंस्थानं स्त्री रूपम् एकं ज्योतिः तेजः, एनां शकुन्तलाम्, उत्क्षिप्य ऊर्ध्वमाकृष्य, जगाम ययौ, इत्याकर्ण्य, सर्वे तत्रत्या जनाः, विस्मयम् आश्चर्यं, रूपयन्ति अभिनयन्ति।

राजा - भगवन्! प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव। किं वृथा [168]तर्केणान्विष्यते। विश्राम्यतु भवान्॥

राजेति। राजा प्राह हे भगवन् पूज्यतम, अस्माभिः प्राक्पूर्वमपि, सोऽर्थश्शकुन्तलारूपः, प्रत्यादिष्टो निराकृत एव, वृथा व्यर्थं, तर्केण चिन्तया, किमन्विष्यते किमर्थं मृग्यते, भवान् विश्राम्यतु विश्रामं लभताम्।

पुरोहितः - (विलोक्य) विजयस्व। (इति निष्क्रान्तः)

पुरोहित इति। पुरोहितः, विलोक्य दृष्ट्वा, आशिषं प्रयुङ्क्ते, हे राजन् त्वं विजयस्व विजयी भव, इत्युक्त्वा, निष्क्रान्तो निर्गतः।

राजा - [169]वेत्रवति! पर्याकुलोऽस्मि। [170]शयनभूमिमार्गमादेशय॥

राजेति। राजा प्राह, हे वेत्रवति प्रतिहारी, पर्याकुलः कलुषीभूतचेतस्कः, अस्मि भवामि, शयनभूमिमार्गं निद्रास्थानस्य पन्थानम्, आदेशय प्रदर्शय।

प्रतिहीरी - इत इतो देवः। (इति प्रस्थिता)

---

167 'तिरोऽभूत्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'तिरोऽभूत्' इति 'C' इति प्रकाशने पाठान्तरम्।

168 'तर्केणाकृष्यते' इति 'C' इति प्रकाशने पाठान्तरम्।

169 'वसुमति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

170 'शयनीयगहमार्ग....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

प्रतिहारीति। प्रतिहारी द्वारपालिका प्राह, देवो महाराजः, इतः अनेन मार्गेण, आदराद्द्विरुक्तिः आगच्छत्विति शेषः, इत्युक्त्वा, प्रस्थिता प्रयाता।

राजा –

श्लो ॥ कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम्।
बलवत्तु दूयमानं प्रत्याययतीव [171]मे हृदयम्॥31॥

(इति निष्क्रान्तास्सर्वे)

॥ इति पञ्चमोऽङ्कः॥

राजेति। राजा प्राह, काममिति, प्रत्यादिष्टां प्रत्याख्यातां, मुनेः कण्वस्य, तनयां पुत्रीं, परिग्रहं कलत्रं, कामम् अत्यन्तं, न स्मरामि न चिन्तयामि, तथापि बलवत् भृशं, दूयमानं परितप्यमानं, हृदयं मनस्तु, प्रत्याययति बोधयतीव स्थितं, इत्युक्त्वा, सर्वे राजप्रभृतयः, निष्क्रान्ता निर्गताः, अङ्कान्ते सर्वनिर्गम इत्युक्तत्वादिदमुक्तम्, किञ्च, यद्यपि श्रीमन्महाभारते राज्ञस्साक्षाच्छकुन्तला विस्मरणं वर्णितं तन्नातीव हेत्वभावान्नाटकशैल्यर्हम् अतो दुर्वासश्शापहेतुकत्वं कविना प्रकल्पितमिति ज्ञेयम्,

इति श्रीमृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तलाख्ये व्याख्याने पूर्णचन्द्रिकाख्याने पञ्चमोऽङ्कः॥

---

171 'मां' इति 'A' इति प्रकाशने पाठान्तरम्।
'मे, मे चेतः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अथ पञ्चमषष्ठाङ्कमध्ये[1] प्रवेशकः

(ततः प्रविशति नागरिकश्श्यालः [2]पश्चाद्बद्धपुरुषमादाय रक्षिणौ च)

कविरिदानीं कथान्तरमारभमाणो विशेषतः प्रवेशकं नामार्थोपक्षेपकं प्रस्तौति। ततः प्रविशतीत्यादिना। ततोऽनन्तरम्, नागरिकः नगरे नियुक्तः नगरपालक इति यावत्, सू। "तत्र नियुक्त" इति ठक्प्रत्ययः, तस्य श्यालः पत्नीभ्राता, यद्यपि स्यालशब्दोऽमरकोशे दन्त्यादित्वेन प्रयुक्तः तथापि रभसकोशे दन्त्यादित्वेन तालव्यादित्वेन च उभयोः प्रयोगदर्शनादत्र कविना तालव्यादित्वेन प्रयोगः कृतः। पश्चात् पृष्ठभागे, बद्धपुरुषं श्रृङ्खलासन्दानितं कञ्चन पुमांसं, रक्षिणौ भटौ च, आदाय गृहीत्वा, प्रविशति रङ्गस्थलं प्राप्नोति।

रक्षिणौ - ([3]ताडयित्वा) अरे [4]कुम्भीलक! कथय। कुत्र त्वयैतन्मणिबन्धनोत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम्॥

रक्षिणावित्यादि रक्षिणौ भटौ, ताडयित्वा दण्डयित्वा पुरुषमिति शेषः, आहतुः किमिति, अरे कुम्भीलक चोर, अरे इति नीच सम्बोधने, मणिबन्धनोत्कीर्णनामधेयं मणिबन्धनस्थाने लिखितमहाराजाह्वयं राजकीयं राज्ञस्सम्बन्धि। सू। 'राज्ञः क च' इति छप्रत्ययः कादेशश्च एतदङ्गुलीयकं इयमूर्मिका, त्वयाकुत्र समासादितं कस्मिन्स्थले सम्प्राप्तं कथय ब्रूहि।

पुरुषः - ([5]भीतिनाटितकेन) प्रसीदन्तु भावमिश्राः। [6]अहं नेदृश कर्मकारी॥

---

1 अयं प्रयोगः 'B' इति प्रकाशने नोपलभ्यते।

2 'पश्चात्' इत्यधिकः पाठः 'B' इति प्रकाशने नोपलभ्यते।

3 'पुरुषं ताडयित्वा' इति 'B' इति प्रकाशने पाठान्तरम्।

4 'कुम्भीरक' इति 'B' इति प्रकाशने पाठान्तरम्।

5 'भीतिं नाटयित्वा' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

पुरुष इति। पुरुषः। भीतिनाटितकेन भयाभिनयेन आहेति शेषः, भावमिश्राः आर्यमिश्राः, प्रसीदन्तु प्रसादं कुर्वन्तु, मयीति शेषः अहम् ईदृश कर्मकारी एतादृश क्रिया कर्ता, चौर्यकारीति यावत् न भवामि ।

प्रथमः - किं खलु[7] शोभनो ब्राह्मण इति कृत्वा[8] राज्ञा प्रतिग्रहो दत्तः ॥

प्रथम इति। प्रथमः रक्षिणोर्मध्ये आद्यः प्राह राज्ञा दुष्यन्तेन, शोभनः पात्रभूतः, ब्राह्मणः द्विज इति कृत्वा विचार्य, प्रतिग्रः परिग्रहः स्वीकार्य इति यावत्, दत्तः किं विश्राणितः किम् ।

पुरुषः - श्रृणुतेदानीम्। अहं शक्रावताराभ्यन्तरवासी[9] धीवरः ॥

पुरुष इति। पुरुषः प्राह इदानीमद्य, शृणुत आकर्णयत, मदुक्तं सर्वमिति शेषः, अहं शक्रावताराभ्यन्तरवासी शक्रावतारस्य तन्नामकस्य तीर्थविशेषस्य अभ्यन्तरे मध्यप्रदेशे, वसति तिष्ठतीति तथोक्तः। धीवरः कैवर्तः।

द्वितीयः - पाटच्चर! किमस्माभिर्जातिं[10] पृष्टः ॥

द्वितीय इति द्वितीयो ब्रूते, हे पाटच्चर चोर, अस्माभिः जातिं कुलं, पृष्टः अनुयुक्तः किम्।

श्यालः - सूचकः[11]! कथयतु सर्वमनुक्रमेण। मैनमन्तरा प्रतिबध्नीतम्[12] ॥

---

6 'नाहमीदृशकर्मकारी' इति 'B' इति प्रकाशने पाठान्तरम्।

7 'खलु' इति पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

8 'कलयित्वा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

9 'शक्रावताराभ्यन्तरालवासी' इति 'A' इति प्रकाशने पाठान्तरम्।
'शक्रावतारतीर्थवासी' इति 'C' इति प्रकाशने पाठान्तरम्।

10 'जातिः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'जातिस्ते पृष्टा' इति 'C' इति प्रकाशने पाठान्तरम्।

श्याल इति। श्यालः प्राह सूचकः चोरः, सर्वं समस्तं, विवक्षितम् अनुक्रमेण परिपाट्या, कथयतु ब्रवीतु, एनं चोरमन्तरा मध्ये मा प्रतिबध्नीतं प्रतिबद्धं मा कुरुतम्।

उभौ - यदावुत्त आज्ञापयति। [13]कथय॥

उभाविति। उभौ रक्षिणौ, आहतुरुति शेषः कथय ब्रूहि, चोरम्प्रतीयमुक्तिः।

पुरुषः - अहं [14]जालोद्गारादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि॥

पुरुष इति। पुरुषः प्राह अहं जालोद्गारादिभिः आनायलोहमयादिभिः मत्स्यबन्धनोपायैः मत्स्यग्रहणसाधनैः, कुटुम्बभरणं दारपुत्रादिपरिपोषणं, करोमि कुर्वे।

श्यालः - (विहस्य) विशुद्ध इदानीमाजीवः[15]॥

श्याल इति श्यालः प्राह विहस्य हासं कृत्वा, इदानीमद्य, आजीवो जीवनं, विशुद्धः विशेषेण परिशुद्धः।

पुरुषः - भर्तः! मैवं भण।[16]

श्लो॥ सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः॥1॥

---

11 'सूचक' इति 'A' इति प्रकाशने पाठान्तरम्।

12 'मैनमन्तरे प्रतिबन्धय' इति 'A' इति प्रकाशने पाठान्तरम्।

13 'स्यालः – कथय कथय' इति 'C' इति प्रकाशने पाठान्तरम्।

14 'जालोद्गालादिभि....' इति 'B' इति प्रकाशने पाठान्तरम्।

15 'विशुद्धस्तावत्त आजीवः।' इति 'C' इति प्रकाशने पाठान्तरम्।

16 'भर्तः मैवं भण' इत्ययं पाठः 'A' इति प्रकाशने नोपलभ्यते।
'भर्तः शृणोतु' इति 'C' इति प्रकाशने पाठान्तरम्।

पुरुष इति पुरुषः प्राह। हे भर्तः त्वम् एवम् अनेन प्रकारेण, मा भण मा वद, सहजमिति विनिन्दितं गर्हितमपि सहजं स्वतस्सिद्धम्, यत्कर्म वर्तते तत्कर्म, विवर्जनीयं परिहरणीयं, न खलु न भवति हि, तथा हि पशुमारणकर्मदारुणः पशूनां यज्ञीयानां मारणकर्मणा विशसनक्रियया, दारुणः क्रूरः, श्रोत्रियः वेदाध्यायी, अनुकम्पामृदुः दयापेशल एव ।

श्यालः - ततस्ततः ॥

श्याल इति। श्यालः प्राह, ततस्ततः अनन्तरं किं वृत्तमिति शेषः, आदरादि्द्वरुक्तिः।

पुरुषः - एकस्मिन्दिवसे खण्डशो रोहितमत्स्यो मया कल्पितो यावत् तस्योदराभ्यन्तर एतद्[17] रत्नभासुरमङ्गुलीयकं दृष्टम्[18]। पश्चादहमस्य विक्रयाय दर्शयन् गृहीतो भावमिश्रैः। मारयत वा। मुञ्चत वा। [19]अयमस्यागमवृत्तान्तः।

पुरुष इति। पुरुषः प्राह एकस्मिन्दिवसे कस्मिंश्चिद्दिने, मया रोहितमत्स्यः रोहितनामा झषः, खण्डशः खण्डा यथा भवन्ति तथा कल्पितः कृतः खण्डित इति यावत् यावदिति साकल्ये, तस्य मीनस्य उदराभ्यन्तरे कुक्षेरन्तराले रत्नभासुरं मणिखचितम्, एतदङ्गुलीयकं इदं करशाखाभरणम्, दृष्टं वीक्षितम्, पश्चादनन्तरमहमस्याङ्गुलीयकस्य, विक्रयाय धनविनिमयाय, दर्शयन् धनिकानां प्रदर्शयन्, भावमिश्रैः आर्यमिश्रैः, गृहीतः करगतः, यूयं मारयत वा प्राणांस्त्याजयत वा, मुञ्चत वा त्यजत वा, अस्याङ्गुलीयकस्य आगमवृत्तान्तः प्राप्तिप्रकारः अयं मदुक्तः।

---

17 'इदं' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।
'प्रेक्षे तावदिदं' इति 'B' इति प्रकाशने पाठान्तरम्।

18 'दृष्ट्वा' इति 'A' इति प्रकाशने पाठान्तरम्।

19 'अयमस्यागमः' इत्येव पाठः 'C' इति प्रकाशने लभ्यते।

श्यालः - [20]जानुक! विस्रगन्धिर्गोघाती[21] मत्स्यबन्ध एव निस्संशयम्। अङ्गुलीयकदर्शनमस्य विमर्ष्टव्यम्[22]। राजकुलमेव गच्छामः॥

श्याल इति। श्यालः कथयति हे जानुक रक्षिणोर्मध्ये एकस्य सम्बोधनमिदं विस्रगन्धि आमिषगन्धः गोघाती गोहन्तृतुल्यः, अयं चोरः, मत्स्यबन्ध एव धीवर एव, निस्संशयम् संशयो नास्ति, परन्तु अस्य चोरस्य अङ्गुलीयकदर्शनमूर्मिकाप्रेक्षणं, विमर्ष्टव्यं विचारणीयं, राजकुलं राजगृहमेव, गच्छामः यामः।

रक्षिणौ - तथा। गच्छ अरे ग्रन्थिभेदक[23]॥ (इति सर्वे परिक्रामन्ति)

रक्षिणाविति रक्षिणौ भटौ आहतुरिति शेषः। तथा तेन प्रकारेण, क्रियतामिति शेषः, अरे ग्रन्थिभेदक चोर, गच्छ याहि इत्युक्त्वा, सर्वे समस्ताः परिक्रामन्ति सह गच्छन्ति।

श्यालः - सूचक! इमं [24]पुरद्वारेऽप्रमत्तौ प्रतिपालयतम्। यावदिदमङ्गुलीयकं यथागमनं [25]भर्तुर्निवेद्य ततश्शासनं [26]प्रतीक्ष्य निष्क्रामामि[27]॥

---

20 '(अङ्गुलीयकमाघ्राय)' इत्यधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

21 'विस्रगन्धी गोधादी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

22 'विमर्शयितव्यम्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

23 'गण्डभेदक' इति 'A' इति प्रकाशने पाठान्तरम्।

24 'गोपुरद्वारेऽप्रमत्तौ' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

25 'भर्त्रे' इति 'B' इति प्रकाशने पाठान्तरम्।

'भ....ततोऽस्य शासनं' इति 'C' इति प्रकाशने पाठान्तरम्।

26 'प्रतीष्य' इति 'B' इति प्रकाशने पाठान्तरम्।

27 'निष्क्रमामि' इति 'A' इति प्रकाशने पाठान्तरम्।

श्याल इति। श्यालः प्राह हे सूचक तन्नामक भटम् इमं चोरं, पुरद्वारे नगरप्रतीहारे, युवामप्रमत्तौ सन्तौ प्रमादरहितौ सन्तौ, प्रतिपालयतं प्रतीक्षेथाम्, इदमङ्गुलीयकम् अङ्गुल्यलङ्कारं, यथा गमनम् आगमनहेतुमनतिक्रम्य भर्तुः स्वामिनः निवेद्य प्रतिबोध्य, ततस्तस्मात्, शासनं दण्डं, प्रतीक्ष्य निरीक्ष्य, यावन्निष्क्रामामि यावता कालेन निर्गच्छामि, तावत्प्रतिपालयतमिति पूर्वेणान्वयः।

उभौ - प्रविशत्वावुत्तस्स्वामिप्रसादाय। (इति निष्क्रान्तः श्यालः)

उभाविति आवुत्तः श्यालः, स्वामिप्रसादाय स्वामिनं प्रसादयितुं राजानमनुग्राहयितुमित्यर्थः, प्रविशतु गच्छतु, राजनिकटमिति शेषः। इत्युक्तस्सन्, श्यालः निष्क्रान्तो निर्गतः।

प्रथमः - जानुक! चिरायति[28] खल्वावुत्तः ॥

प्रथम इति प्रथमः रक्षिणोर्मध्ये आद्यः प्राह हे जानुक, आवुत्तः श्यालः, चिरायति आलस्यं करोति खलु।

द्वितीयः - नन्ववसरोपसर्पणीया राजानः ॥

द्वितीय इति। द्वितीयस्समाधत्ते, राजानः भूपतयः, अवसरोपसर्पणीयाः समयं प्रतीक्ष्य अनुसर्तव्या ननु ।

प्रथमः - जानुक! [29]स्फुरतो मे[30] हस्तावस्य वध्यस्य[31] सुमनसः पिनद्धुम्। (इति पुरुषं निर्दिशति)

---

[28] 'चिरायते' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

[29] 'प्रस्फुरतो' इति 'A' इति प्रकाशने पाठान्तरम्।

[30] 'मम' इति 'B' इति प्रकाशनयोः पाठान्तरम्।

[31] 'वध्यस्य' इत्येषः पाठः 'A' इति प्रकाशने नोपलभ्यते।

प्रथम इति प्रथमः प्राह, हे जानुक, मे मम, हस्तौ करौ, अस्य वध्यस्य एतस्य वधार्हस्य पुंसः, सुमनसः पुष्पाणि, पिनद्धुं बन्धनं कर्तुं, स्फुरतः चलतः इत्युक्त्वा, पुरुषं चोरं निर्दिशति सञ्ज्ञायति।

पुरुषः - नार्हति भावोऽकारणमारणो भवितुम्[32] ॥

पुरुष इति। पुरुषः प्राह, भावः पूज्यः, अकारणमारणः निर्हेतुकमारयिता, भवितुं तथा कर्तुं, नार्हति न योग्यो भवति।

द्वितीयः - (विलोक्य) [33]एष नौ स्वामी पत्रहस्तो राजशासनं प्रतीष्य[34] इतो मुखो दृश्यते। गृध्रबलिर्भविष्यसि शुनो मुखं वा द्रक्ष्यसि॥

द्वितीय इति द्वितीयः। विलोक्य दृष्ट्वा, नौ आवयोः, एष स्वामी अयं प्रभुः, पत्रहस्तः करस्थितपत्रिकः, राजशासनं राजाज्ञां, प्रतीष्य गृहीत्वा, इतोमुखः एतत्प्रदेशाभिमुखस्सन् दृश्यते वीक्ष्यते, हे चोर त्वं, गृध्रबलिः गृध्राणां भागः भविष्यसि, शुनश्शुनकस्य, मुखमास्यं वा, द्रक्ष्यसि प्रेक्षिष्यसे।

श्यालः - (प्रविश्य) सूचक! मुच्यतामेष जालोपजीवी। उपपन्नः किलायम्[35] अङ्गुलीयकस्यागमः ॥

श्याल इति। श्यालो भगिनीपतिः, प्रविश्य रङ्गस्थलं प्राप्य प्राह, हे सूचक एष जालोपजीवी अयं जालिकः, मुच्यतां बन्धनात्त्यज्यताम्, अयम् एषः,

---

32 'नार्हति भावोऽकारणमारणं भावयितुम्' इति 'A' इति प्रकाशने पाठान्तरम्।

33 'एषोऽस्माकं स्वामी गृहीत्वा राजशासनमितो मुखं पश्यति। ततस्त्वं गृद्ध्रबलिर्भविष्यसि।' इति 'C' इति प्रकाशने पाठान्तरम्।

34 'प्रतीक्ष्य' इति 'A' इति प्रकाशने पाठान्तरम्।

35 'खलु' इति 'A' इति प्रकाशने पाठान्तरम्।
'खल्वस्य' इति 'B' इति प्रकाशने पाठान्तरम्।
'किलास्यां' इति 'C' इति प्रकाशने पाठान्तरम्।

अङ्गुलीयकस्य ऊर्मिकायाः, नि॥ "अङ्गुलीयकमूर्मिके"त्यमरः॥ आगमः प्राप्तिः, उपपन्नः सहेतुकः किल।

सूचकः - यथावुत्तो भणति॥

सूचक इति सूचकः प्राह, आवुत्तश्श्यालः, यथा येन प्रकारेण, भणति वदति।

द्वितीयः - एष यमसदनं प्रविश्य प्रतिनिवृत्तः॥

द्वितीय इति। द्वितीयः प्राह, एष चोरः, यमसदनं दण्डधरनिकेतनं, प्रविश्य प्राप्य, प्रतिनिवृत्तः पुनः प्रत्यागतः।

(इति पुरुषं परिमुक्तबन्धनं करोति)

इतीति। इत्युक्त्वा पुरुषं पाटच्चरं, परिमुक्तबन्धनं परित्यक्तनिगलं, करोति विदधाति।

पुरुषः - (श्यालं प्रणम्य) भर्तः! [36]अथ कीदृशो मे आजीवः॥

पुरुष इति। पुरुषो वदति, हे भर्तः, मे मम, आजीवो जीविका, कीदृशः कथं भूतः, अथेति वाक्यालङ्कारे।

श्यालः - एष भर्त्राङ्गुलीयकमूल्य[37]सम्मितः प्रसादोऽपि दापितः॥ (इति पुरुषायार्थं[38] प्रयच्छति॥

श्याल इति। श्यालः प्राह, भर्त्रा राज्ञा, एष चोरः, अङ्गुलीयकमूल्यसम्मितः अङ्गुलीयकस्य मुद्रिकायाः,यन्मूल्यं धनं, तत्सम्मितः तत्तुल्यः, प्रसादोऽनुग्रहोऽपि

---

36 'युष्मदीयं मे जीवितम्' इति 'C' इति प्रकाशने पाठान्तरम्।

37 'सम्मितार्थः पारितोषिकः प्रदापितः।' इति 'C' इति प्रकाशने पाठान्तरम्।

38 'पुरुषाय स्वं' इति 'B' इति प्रकाशनयोः पाठान्तरम्।

इत्युक्त्वा, पुरुषाय तस्कराय, अर्थं धनं, प्रयच्छति ददाति, दापितः प्रतिपादितः इत्युक्त्वा, पुरुषाय तस्कराय अर्थं धनं प्रयच्छति ददाति।

पुरुषः - (सप्रणामं परिगृह्य) भर्त्रा[39] अनुगृहीतोऽस्मि॥

पुरुष इति। पुरुषस्सप्रणामं परिगृह्य सनमस्कारं स्वीकृत्य, वदति भर्त्रा राज्ञा, अनुगृहीतः अभ्युपपन्नोऽस्मि।

सूचकः - एष नामानुगृहीतो यः[40] शूलादवतार्य हस्तिस्कन्धे प्रतिष्ठापितः॥

सूचक इति। सूचकः प्राह, अनुगृहीतो नाम एष चोरः, एष क इति चेत् यः चोरः शूलात् दण्डसाधनात् अवतार्य अवरोप्य, हस्तिस्कन्धे मतङ्गजोपरिभागे, प्रतिष्ठापितः आरोपितः।

जानुकः - आवुत्त! पारितोषिकं कथयति[41]। तेनाङ्गुलीयकेन भर्तुस्सम्मतेन भवितव्यम्॥

जानुक इति जानुकः प्राह हे आवुत्त श्याल, पारितोषिकं परितोषाय दत्तं धनं, कथयति ज्ञापयति, किमिति तेनाङ्गुलीयकेन अङ्गुल्याभरणेन, भर्तुस्स्वामिः सम्मतेन प्रीतिविशिष्टेन, भवितव्यं भाव्यम्।

श्यालः - न तस्मिन्महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि। तस्य दर्शनेन [42]भर्तुरभिमतो जनस्स्मृतः। मुहूर्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकमना[43] आसीत्॥

---

39 'भर्तः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

40 'एष नामानुग्रहो यत्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

41 'आवुत्त परितोषं कथय' इति 'A' इति प्रकाशने पाठान्तरम्।
'आवुत्त पारितोषिकमेव कथयति।' इति 'C' इति प्रकाशने पाठान्तरम्।

श्याल इति। श्यालो वदति तस्मिन्विषये पारितोषिकविषय इत्यर्थः, महार्हं बहुमूल्यं, रत्नं भर्तुः स्वामिनः, बहुमतं सम्मतमिति न तर्कयामि ऊहां न करोमि, किन्तु तस्य रत्नस्य दर्शनेन प्रेक्षणेन, भर्तुः राज्ञः, अभिमतः प्रीतिपात्रं जनः, स्मृतः स्मृतिङ्गतः मुहूर्तं क्षणमात्रं, प्रकृतिगम्भीरः स्वभावधीरोऽपि, पर्युत्सुकमनाः उत्कण्ठितचित्तः, आसीत् अभवत् ।

सूचकः - सेवितं नामावुत्तेन॥

सूचक इति। सूचकः प्राह, आवुत्तेन श्यालेन, सेवितं नाम दृष्टं हि सर्वोपि राजव्यापारो भवता ज्ञात इति भावः।

जानुकः - ननु भण। अस्य कृते मत्स्यिकाभर्तुरिति[44]। (इति पुरुषमसूयया पश्यति।)

जानुक इति। जानुकः प्राह, ननु सूचक, अस्य मत्स्यिकाभर्तुः कृते एतस्य धीवरस्यार्थे, भण वद, इत्युक्त्वा, पुरुषं चोरं, असूयया ईर्ष्यया, पश्यति अवलोकयति।

पुरुषः - भट्टारकाः[45]! इतोऽर्धं युष्माकं सुमनो मूल्यं भवतु॥

पुरुष इति। पुरुषः प्राह, हे भट्टारकाः स्वामिनः, इतोऽर्धम् अस्मिन् पारितोषिकधने अर्धभागः, युष्माकं, सुमनोमूल्यं सौमनस्यक्रयः, भवतु अस्तु।

---

42 'भर्त्रीं' इति 'B' इति प्रकाशने पाठान्तरम्।
'कोऽप्यभिमतो भर्त्रा जनः स्मृतः।' इति 'C' इति प्रकाशने पाठान्तरम्।

43 'पर्युत्सुकनयन' इति 'A' इति प्रकाशने पाठान्तरम्।
'पर्यश्रुनयन' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

44 'मात्स्यिकभर्तुरिति' इति 'A' इति प्रकाशने पाठान्तरम्।
'मत्स्य शत्रोरिति' इति 'C' इति प्रकाशने पाठान्तरम्।

45 'भट्टारक' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

जानुकः - एतावद्युज्यते॥

जानुक इति। जानुकः प्राह, एतावत् एतन्मात्रं, युज्यते युक्तं भवति।

श्यालः - धीवर! महत्तरस्त्वं प्रियवयस्यक इदानीं मे संवृत्तः। कादम्बरीसाक्षिकमस्माकं प्रथमसौहृदमिष्यते[46]। [47]तच्छौण्डिकापणमेव गच्छामः॥

श्याल इति। श्यालः प्राह, हे धीवर कैवर्त, इदानीमद्य, त्वं मे मम महत्तरः अतीव, महान् प्रियवयस्यकः प्रियसखः, संवृत्तो जातः, अस्माकं प्रथमसौहृदम् आदिममैत्री, कादम्बरीसाक्षिकं मद्यसाक्षिकं यथा तथा, इष्यते अङ्गीक्रियते, तत्तस्मात्, शौण्डिकापणं मद्यक्रायिकविपणिमेव, गच्छामः यामः।

सर्वे - तथा। (इति निष्क्रान्ताः)[48]

सर्व इति। सर्वे श्यालादयः, तथा तेन प्रकारेण कुर्म इति शेषः, इत्युक्त्वा, निष्क्रान्ताः निर्गता, अत्र प्रवेशके राज्ञोऽङ्गुलीयक प्रदर्शनार्थो धीवरवृत्तान्तो वर्णितः। इति प्रवेशकः।

अथ षष्ठोऽङ्कः

(ततः प्रविशत्याकाशयानेन सानुमती[49] नामाप्सराः)

तत इति। ततोऽनन्तरं, सानुमती नाम सानुमत्यभिधाना, अप्सराः स्वर्वेश्या, आकाशयानेन विमानेन, प्रविशति प्राप्नोति।

---

46 ‘प्रथमशोऽभिमतमिष्यते’ इति ‘A’ इति प्रकाशने पाठान्तरम्।
‘मिष्यताम्’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

47 ‘तस्माच्छौण्डि....प्रविशामः।’ इति ‘C’ इति प्रकाशने पाठान्तरम्।

48 ‘(इति निष्क्रान्ताः सर्वे)’ इति ‘A’ ‘B’ इति प्रकाशनयोः पाठान्तरम्।

49 ‘मिश्रकेशी’ इति पाठान्तरमुपलभ्यते इति ‘B’ इति प्रकाशने निर्दिष्टम्।

सानुमती - निर्वर्तितं मया पर्यायनिर्वर्तनीयमप्सरस्तीर्थसान्निध्यम्। यावत्साधुजनस्याभिषेककाल इति साम्प्रतमस्य राजर्षेरुदन्तं[50] प्रत्यक्षीकरिष्यामि। ननु[51] मेनकासम्बन्धेन शरीरभूतेदानीं[52] मे शकुन्तला। तया च दुहितृनिमित्तमादिष्टपूर्वास्मि॥

सानुमतीत्यादि। सानुमती आहेति शेषः, किमिति, मया पर्यायनिर्वर्तनीयं क्रमेण निष्पाद्यं, अप्सरस्तीर्थसान्निध्यम् अप्सरस्तीर्थस्य तन्नामकस्य कस्यचित् पुण्यतीर्थस्य, सान्निध्यं समीपावस्थानं, साधुजनस्य सज्जनसङ्घस्य, यावदभिषेककालः स्नानकालपर्यन्तमित्यर्थः, निर्वर्तितं निष्पादितं, इति हेतोः, साम्प्रतमद्य, अस्य राजर्षेः दुष्यन्तस्य, उदन्तं वार्तां, प्रत्यक्षीकरिष्यामि प्रत्यक्षं विधास्यामि, शकुन्तला, मेनकासम्बन्धेन मेनकासङ्गत्या, मे मम, शरीरभूता देहसदृशी, तया मेनकया, दुहितृनिमित्तं पुत्रिकाकारणेन, आदिष्टपूर्वा पूर्वमाज्ञप्ता चास्मि।

(समन्तादवलोक्य)[53] किन्नु खलु ऋतूत्सवेऽपि निरुत्सवारम्भमिव एतत्[54] राजकुलं दृश्यते। अस्ति मे विभवः प्रणिधानेन सर्वं परिज्ञातुम्। किन्तु सख्या आदरो मया मानयितव्यः। भवतु। अनयोरेवोद्यानपालिकयोस्तिरस्करिणा[55] परिच्छन्ना पार्श्वपरिवर्तिनी भूत्वोपलप्स्ये। (इति नाट्येनावतीर्य स्थिता)

---

50 'वृत्तान्तं' इति 'C' इति प्रकाशने पाठान्तरम्।

51 'ननु' इति पाठः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

52 'इदानीं' इति पाठः 'A' 'B' 'C' इति प्रकाशनेषु नोपलभ्यते।

53 एषः पाठः 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।

54 एषः पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

55 'तिरस्करिणा' इति पाठः 'A' इति प्रकाशने नोपलभ्यते। 'तिरस्कारिणी' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

समन्तादवलोक्येत्यादि। सानुमती समन्तात् सर्वतः, अवलोक्य वीक्ष्य, ऋतूत्सवेऽपि वसन्तोत्सवसमयेऽपि, एतद्राजकुलम् इदं राजगृहं, निरुत्सवारम्भमिव सन्तोषप्रारम्भरहितमिव, दृश्यते वीक्ष्यते, किन्नु खलु को वा हेतुर्भवेत्, मे मम, प्रणिधानेन ध्यानमयदृष्टिपातेन, सर्वं समस्तं, जिज्ञासितं, परिज्ञातुम् अवगन्तुं, विभवस्सामर्थ्यम्, अस्ति विद्यते, किन्तु अपितु, मया सख्या मेनकायाः आदरः सत्कारः, मानयितव्यः बहुमन्तव्यः, भवतु अस्तु, अनयोः पुरोवर्तिन्योः, उद्यानपालिकयोः उपवनपरिरक्षिकयोरेव, पार्श्वपरिवर्तिनी समीपावस्थिता, तिरस्करिणा परिच्छन्ना तिरस्करिणा विद्ययान्तर्हिताभूत्वा, उपलप्स्ये जानामि, इत्युक्त्वा नाट्येनाभिनयेन, अवतीर्य अवरुह्य, स्थिता तिष्ठति स्म।

(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी। अपरा च पृष्ठतस्तस्याः)

तत इति। ततोऽनन्तरं, चूताङ्कुरं रसालपल्लवम्, अवलोकयन्ती पश्यन्ती, चेटी काचिद्राजपरिचारिका, प्रविशति प्राप्नोति रङ्गभूमिमिति शेषः, तस्याः चेट्याः, पृष्टतः पश्चाद्भागे, अपरा अन्या च प्रविशतीत्यत्राप्यनुषज्यते।

प्रथमा

श्लो॥ [56]आताम्रहरितपाण्डुर वसन्तमासस्य जीवसर्वस्व।[57]
दृष्टोऽसि चूतकोरक! ऋतुमङ्गलं[58] त्वां प्रसादयामि॥2॥

प्रथमेति। प्रथमा तयोर्मध्ये आद्या प्राह, आताम्रेति, हे आताम्र हरितपाण्डुर ईषदरुणपालाशहरिणवर्ण, वसन्तमासस्य चैत्रमासस्य, जीवसर्वस्व जीवितसारभूत,

---

56 'चूतं हर्षितपिककं जीवितसदृशं वसन्तमासस्य।
षट्चरणचरणभग्नम् ऋतुमङ्गलमिव पश्यामि॥' इति 'C' इति प्रकाशने पाठान्तरम्।

57 'आताम्रहरितपाण्डुर जीवितर्वस्व वसन्तमासस्य' इति 'A' इति प्रकाशने पाठान्तरम्।
'आताम्रहरितपाण्डुर जीवितसर्वं वसन्तमासस्य (योः)' इति 'B' इति प्रकाशने पाठान्तरम्।

58 'ऋंतुमङ्गल' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

एवंविध हे चूतकोरक आम्रमुकुल, त्वं दृष्टो वीक्षितोऽसि, ऋतुमङ्गलं वसन्तर्तुकल्याणं, त्वां प्रसादयामि प्रसन्नं करोमि।

द्वितीया - परभृतिके! [59]किमेकाकिनी मन्त्रयसे॥

द्वितीयेति। द्वितीया प्रथमां प्रत्याह, हे परभृतिके तन्नामिके सखि, एकाकिनी असहाया सती, किं किमर्थं, मन्त्रयसे आलोचयसि।

प्रथमा - मधुकरिके! चूतकलिकां दृष्ट्वोन्मत्ता परभृतिका भवति॥

प्रथमेति। प्रथमा प्राह, हे मधुकरिके चूतकलिकां रसालकोरकं, दृष्ट्वा वीक्ष्य, परभृतिका कोकिला, उन्मत्ता उन्मादवती, भवति जायते हि।

द्वितीया - (सहर्षं त्वरयोपगम्य।) कथमुपस्थितो मधुमासः॥

द्वितीयेति। द्वितीया, सहर्षं ससन्तोषं, त्वरयोपगम्य शीघ्रमागत्य, प्राह, मधुमासः चैत्रमासः, उपस्थितः सम्प्राप्तः, कथमित्याश्चर्ये।

प्रथमा - मधुकरिके! तवेदानीं काल एष मदविभ्रमगीतानाम्॥

प्रथमेति। प्रथमा प्राह, हे मधुकरिके तव इदानीमद्य, एष मधुमासः, मदविभ्रमगीतानां मदेन मधुपानजनितेन यानि विभ्रमगीतानि विलासगानानि, तेषां कालः समयः।

द्वितीया - सखि! अवलम्बस्व माम्। यावदग्रपादस्थिता भूत्वा [60]चूतकलिकां गृहीत्वा कामदेवार्चनं करोमि॥

द्वितीयेति। द्वितीया प्राह, हे सखि परभृतिके, माम् अवलम्बस्व धारय, अग्रपादस्थिता अग्रपादयोः पादाग्रयोः स्थिता सती, चूतकलिकां आम्रकुड्मलं, गृहीत्वा स्वीकृत्य, कामदेवार्चनं मन्मथदेवपूजां, यावत्करोमि करिष्यामि।

---

59 'किमेतदेकाकिनी' इति 'C' इति प्रकाशने पाठान्तरम्।

60 'कामदेवार्चनाय चूताङ्कुरापचयं करोमि।' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रथमा - यदि ममापि [61]खल्वर्धमर्चनफलस्य॥

प्रथमेति। प्रथमा प्राह, ममापि अर्चनफलस्य कामदेवार्चनफलस्य, अर्ध अर्धभागः, यदि अस्ति यदि, तदात्वामवलम्बे इति पूर्वेणान्वयः।

द्वितीया - [62]अकथितेऽपि एतत्सम्पद्यते। यत एकमेव नौ जीवितम्। द्विधा स्थितं शरीरम्। (सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णाति)

द्वितीयेति। द्वितीया वदति, हे सखि अकथिते तवाप्यर्थं फलं भवतीत्यनुक्तेऽपि, एतत् भवदीप्सितं, सम्पद्यते सिध्यति, यतः कारणात्, नौ आवयोः, जीवितम् जीवनं एकमेव, शरीरं वपुस्तु, द्विधा प्रकारद्वयेन स्थितं, उक्त्वेति, सखीं सहचरीम्, अवलम्ब्य अवलम्बनं कृत्वा, स्थिता सती, चूताङ्कुरं सहकारपल्लवं, गृह्णाति लुनाति।

अये अप्रतिबुद्धोऽपि चूतप्रसवोऽत्र बन्धनभङ्गसुरभिर्भवति॥

अये मधुकरिके। अप्रतिबुद्धः अविकसितोऽपि, चूतप्रसवः चूतकलिका, अत्र स्थले, बन्धनभङ्गसुरभिः बन्धनभङ्गेन वृन्तलवनेन सुरभिः सुगन्धयुक्तः भवति।

(कपोतहस्तकं कृत्वा।)[63]

श्लो॥ त्वमसि मया चूताङ्कुर दत्तः कामस्य[64] गृहीतधनोः[65]।
[66]पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकश्शरो भव॥3॥

---

[61] 'खलु' इति पाठः 'C' इति प्रकाशने नास्ति।

[62] 'अफणितेऽप्ये.....' इति 'C' इति प्रकाशने पाठान्तरम्।

[63] 'नमो भगवते मकरध्वजाय' इति 'A' इति प्रकाशने पाठान्तरम्।
'कपोतकं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[64] 'कामाय' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

[65] 'गृहीतधनुषे' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

[66] 'परिकुपितयुव......' इति 'C' इति प्रकाशने पाठान्तरम्।

(इति चूताङ्कुरं क्षिपति)

कपोतहस्तकं कृत्वेति। कपोतहस्तकं नाम संयुतहस्तेष्वन्यतमं हस्तं, कृत्वा विधाय, तल्लक्षणं भरतशास्त्रे, उभाभ्यामपि हस्ताभ्यामन्योन्यं पार्श्वसंग्रहात्, हस्तः कपोतको नाम कर्म चास्यनिबोधत, विनयोपगमे चैव प्रणामकरणे तथा, गुरोस्सम्भाषणे चैव कपोतः परिकीर्तित इति, त्वमिति, हे चूताङ्कुर रसालकिसलय, त्वं गृहीतधनोः करधृतशरासनस्य, कामस्य मन्मथस्य, मया दत्तः प्रतिपादितोऽसि, पथिकजनयुवतिलक्ष्यः पथिकजनानां पान्थानां या युवतयो जायाः ता एव लक्ष्यं, यस्य स तथोक्तस्सन्, पञ्चाभ्यधिकः पञ्चभ्यश्शरेभ्योऽतिरिक्तः, भव एधि, इत्युक्त्वा, चूताङ्कुरम् आम्रपल्लवं, क्षिपति समर्पयति कामदेवायेति शेषः।

कञ्चुकी - (प्रविश्य पटाक्षेपेण कुपितः)[67] मा तावदनात्मज्ञे! देवेन प्रतिषिद्धे[68] वसन्तोत्सवे त्वमाम्रकलिकाभङ्गं किमारभसे॥

कञ्चुकीति। कञ्चुकी कश्चनसौविदल्लः, कुपितस्सन् क्रुद्धस्सन्, पटाक्षेपेण यवनिकापनोदनेन, प्रविश्य रङ्गस्थलं प्राप्य, प्राह, हे अनात्मज्ञे वस्तुतत्वानभिज्ञे, त्वं देवेन राज्ञा, प्रतिषिद्धे अस्वास्थ्येन निवारिते वसन्तोत्सवे, आम्रकलिकाभङ्गं चूतकोरकाभिलवनं, किं किमर्थमारभसे उपक्रमसे मा तावत्तथा न कर्तव्यमित्यर्थः।

उभे - (भीते) प्रसीदत्वार्यः। अगृहीतार्थे आवाम्॥

उभे इति। उभे परभृतिकामधुकरिके, भीते भयं प्राप्ते सत्यौ, आहतुः, आर्यः कञ्चुकी, प्रसीदतु प्रसन्नो भवतु, आवाम् अगृहीतार्थे अज्ञातनिमित्तेऽतः प्रसादः कर्तव्य इति भावः।

---

67 '(प्रविश्य पटीक्षेपेण कुपितः)' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'(प्रविश्य पटाक्षेपेण कुपितः कञ्चुकी)' इति 'C' इति प्रकाशने पाठान्तरम्।

68 '...षिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमार...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

कञ्चुकी - न किल श्रुतं युवाभ्यां [69]यद्वासन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्त्रिभिश्च[70]। तथाहि।

श्लो ॥ चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि[71] स्थितं कुरवकं तत्कोरकावस्थया।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम्॥4॥

कञ्चुकीति। कञ्चुकी प्राह, वासन्तिकैः वसन्ते पुष्प्यद्भिः, तरुभिः वृक्षैरपि, देवस्य राज्ञश्शासनमाज्ञा, प्रमाणीकृतम् अङ्गीकृतं, तदाश्रयिभिः तन्निष्ठैः पत्त्रिभिः पक्षिभिश्च, प्रमाणीकृतमिति यत्, तद्युवाभ्यां, न श्रुतं किल नाकर्णितं वा किं, तथाहि तदेवोपपादयति, चूतानामिति, चूतानामाम्रवृक्षाणां, चिरनिर्गता चिरकालेन बहिर्गतापि, कलिका कुड्मलः, स्वं स्वकीयं, रजः परागं, न बध्नाति न प्रकाशयति, यत्कुरवकं कुरवकाख्यपुष्पविशेषः, सन्नद्धं सिद्धमपि तत् कोरकावस्थया मुकुलनावस्थया स्थितं, शिशिरे शिशिरर्तौ, गते अतिक्रान्तेऽपि, पुंस्कोकिलानां पुम्परभृतानां, रुतं ध्वनितं, कण्ठेषु गलेषु, स्खलितं गद्गदितं, स्मरः मन्मथोऽपि, चकितः राज्ञो भीतस्सन्, तूणार्धकृष्टं निषङ्गादर्धोद्धृतं, शरं बाणं, संहरति प्रतिक्षिपति, इति शङ्के तर्कयामि।

उभे[72] - नास्ति[73] सन्देहः। महाप्रभावो [74]राजर्षिः॥

---

[69] 'यदा' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'यथा' इति 'C' इति प्रकाशने पाठान्तरम्।

[70] 'पतत्रिभिश्च' इति 'A' इति प्रकाशने पाठान्तरम्।
'अलिभिः पत्रि..' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[71] 'यदवस्थि...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[72] सानुमतीवाक्यमिदमिति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

[73] 'अत्र' इति अधिकः पाठः 'A' 'C' इति प्रकाशनयोः उपलभ्यते।

उभे इति। उभे द्वे आहतुः, राजर्षिः दुष्यन्तः महाप्रभावः महामहिमसम्पन्नः, अत्रार्थे, सन्देहस्संशयो नास्ति।

प्रथमा - आर्य! कति दिवसान्यावयोर्मित्रावसुना राष्ट्रियेण भर्तुः[75] पादमूलं प्रेषितयोः। [76]इत्थं च नौ प्रमदवनस्य पालनकर्म समर्पितम्। तदागन्तुकतया अश्रुतपूर्व आवाभ्यामेष वृत्तान्तः॥

प्रथमेति। प्रथमा प्राह, हे आर्य कञ्चुकिन्, मित्रावसुना तन्नामकेन, राष्ट्रियेण राजश्यालेन, भर्तुः स्वामिनः, पादमूलं चरणमूलं विहायेति शेषः, प्रेषितयोः प्रस्थापितयोः आवयोः, कति दिवसानि कियन्ति दिनानि गतानीति शेषः, इत्थं च एवं सति, प्रमदवनस्य उद्यानवनस्य, पालनकर्म रक्षणव्यापारः नौ आवाभ्यां, समर्पितं निवेदितं, तत्तस्मात्, आवाभ्याम् आगन्तुकतया नूतनत्वेन हेतुना, एष वृत्तान्तः वसन्तोत्सवप्रतिबन्धरूपः, आवाभ्याम् अश्रुतपूर्वः इतः पूर्वं नाकर्णितः।

कञ्चुकी - भवतु। न पुनरेवं प्रवर्तितव्यम्॥

कञ्चुकीति। कञ्चुकी प्राह भवतु अस्तु, एवम् अनेन प्रकारेण पुनः न प्रवर्तितव्यम् न व्यापारितव्यम्।

उभे - आर्य! कौतूहलं नौ[77]। यद्यनेन जनेन श्रोतव्यम्। कथयतु भवान्[78]। किन्निमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः॥

---

74 'खलु' इति 'C' इति प्रकाशने अधकः पाठः।

75 'भट्टिनी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'राष्ट्रियेण प्रेषितयोः भर्तुः पादमूलादत्र चरन्त्योः' इति 'C' इति प्रकाशने पाठान्तरम्।

76 'अत्र च' इति 'B' इति प्रकाशने पाठान्तरम्।
'इदं च नाम प्रमदवनस्य सकलं प्रतिकर्मार्पितम्। तस्मादश्रुतपूर्व आवा....' इति 'C' इति प्रकाशने पाठान्तरम्।

77 'कुतूहलं नौ भवति।' इति 'C' इति प्रकाशने पाठान्तरम्।

उभे इति। उभे आहतुः, हे आर्य पूज्य, नौ आवयोः, कौतूहलं श्रवणेच्छा भवतीति शेषः, अनेन जनेन आवाभ्यामित्यर्थः, श्रोतव्यं यदि श्रवणार्हं चेत्, भवान् कथयतु आख्यातु, भर्त्रा राज्ञा, वसन्तोत्सवः वसन्ततौं क्रियमाणमहोत्सवः, किन्निमित्तं केन हेतुना, प्रतिषिद्धः निवारितः।

सानुमती - उत्सवप्रियाः खलु मनुष्याः। गुरुणा कारणेन भवितव्यम्॥

सानुमतीति। सानुमती प्राह, मनुष्याः मर्त्याः, उत्सवप्रियाः उत्सवेषु वसन्तोत्सवादिषु प्रियाः प्रीतविशिष्टाः खलु, गुरुणा महता, कारणेन हेतुना, उत्सवप्रतिषेधस्येति शेषः, भवितव्यम् भाव्यम्।

कञ्चुकी - बहुलीभूतमेतत्किं न कथ्यते। किमत्र भवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेशकौलीनम्॥

कञ्चुकीति। कञ्चुकी वदति, एतत् उत्सवप्रतिषेधकारणं, बहुलीभूतं प्रचुरीकृतं, किं किमर्थं, न कथ्यते नाभिधीयते, किन्तु कथ्यत एवेत्यर्थः, अत्र भवत्योः पूज्ययोर्युवयोः, शकुन्तला प्रत्यादेशकौलीनं शकुन्तलानिराकरणजनित-लोकपवादः, नि। "स्यात्कौलीनं लोकवादे युद्धे पश्वहि पक्षिणाम्" इत्यमरः। कर्णपथं श्रोत्रमार्गं, नायातं नागतं किम्।

उभे - श्रुतं राष्ट्रियस्य[79] मुखाद्यावदङ्गुलीयकदर्शनम्॥

उभे इति। उभे परभृतिकामधुकरिके, आहतुः, राष्ट्रियस्य राजश्यालस्य, मुखात् वदनात्, यावदङ्गुलीयकदर्शम् ऊर्मिका वीक्षणपर्यन्तं, श्रुतम् आकर्णितम्।

---

78 'अयं' इति 'A' इति प्रकाशने पाठान्तरम्।
'आर्यः' इति 'B' 'C' इति प्रकाशनयोः पाठान्तरम्।

79 'राष्ट्रिय' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

कञ्चुकी - [80]तेन ह्यल्पं कथयितव्यम्। [81]यदैव खलु स्वाङ्गुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मया[82] तत्रभवती रहसि शकुन्तला मोहात्प्रत्यादिष्टेति। तदा प्रभृत्येव पश्चात्तापमुपगतो देवः। तथाहि।

श्लो॥ रम्यं द्वेष्टि यथा पुरा[83] प्रकृतिभिर्न प्रत्यहं सेव्यते
[84]शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च [85]व्रीडाविलक्षश्चिरम्॥5॥

कञ्चुकीति। कञ्चुकी ब्रवीति, तेन हेतुना अङ्गुलीयकदर्शनपर्यन्तं श्रुतत्वेन हेतुना, अल्पं सूक्ष्मं, कथयितव्यं वक्तव्यं हि, यदा यस्मिन्समय एव, स्वङ्गुलीयकदर्शनात् आत्मीयोर्मिकावीक्षणात्, तत्रभवती पूज्या शकुन्तला, मया रहस्येकान्ते, सत्यं याथार्थ्येन, ऊढपूर्वा परिणीतपूर्वा, तदपि, मोहादज्ञानात्, प्रत्यादिष्टा निरस्ता इति, देवेन राज्ञा, अनुस्मृतं परिज्ञातं, तदा प्रभृति तदारभ्यैव, देवो राजा, पश्चात्तापम् अनुतापम्, उपगतः प्राप्तवान्, तथाहि तमेवोपपादयति, रम्यमिति। रम्यं नृत्तगीतस्रक्चन्दनवनितादिकं, द्वेष्टि द्वेषी भवति न सहत इत्यर्थः, प्रकृतिभिरमात्यैः, यथा पुरा पूर्वमिव, प्रत्यहम् अनुदिनं, न सेव्यते सेवावसरं न ददातीत्यर्थः, शय्याप्रान्तविवर्तनैः शयनोपान्तपर्यावर्तनैः, क्षपाः चन्द्रमलयानिलादिभिर्भोग्यारात्रीः, उन्निद्रः उत्सृष्टनिद्र एव, विगमयति यापयति,

---

80 '(आत्मगतं)' इत्यधिकः पाठः 'A' इति प्रकाशने दृश्यते।

81 '(प्रकाशम्)' इत्यधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

82 'मे' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

83 'यथापुरं' इति 'C' इति प्रकाशने पाठान्तरम्।

84 'शय्याप्रान्त' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

85 'व्रीडावरम्र...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अन्तःपुरेभ्यः अवरोधवधूजनेभ्यः, दाक्षिण्येन सर्वासु समभावेन, यदा यस्मिन्काले, उचितां तत्कालयोग्यां वाचं , ददाति, तदा तस्मिन्समये, गोत्रेषु नामसु, स्खलितः विपर्यस्तः, चिरं चिरकालं व्रीडाविलक्षः व्रीडया लज्जया विलक्षः निश्चेष्टो भवति।

सानुमती - प्रियं मे ॥

सानुमतीति। सानुमती प्राह, मे मम, प्रियमिष्टं, राज्ञः शकुन्तलायामनुरागदर्शनादिति भावः।

कञ्चुकी - अस्मात्प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः ॥

कञ्चिकीति। कञ्चुकी वदति, अस्मात् शकुन्तलाविरहजनितात्, प्रभवतो राज्ञः, वैमनस्यात् विकलमनस्कत्वात्, उत्सवः प्रत्याख्यातो निरस्तः अनादृत इति यावत्।

उभे - युज्यते ॥

उभे इति। उभे आहतुः युज्यते युक्तं भवति।

(नेपथ्ये) एतु एतु भवान् ॥

नेपथ्य इति। नेपथ्ये यवनिकान्तरितप्रदेशे आहेति शेषः, भवान् एतु इत आगच्छतु अत्यादरादिद्वरुक्तिः।

कञ्चुकी - (कर्णं दत्वा) अये! इत एवाभिवर्तते देवः।
[86]स्वकर्मानुष्ठीयताम् ॥

कञ्चुकीति। कञ्चुकी कर्णं दत्वा नेपथ्योक्तश्रवणाय श्रोत्रं तत्प्रवणीकृत्य प्राह, अये हे परभृतिकामधुकरीके, देवो राजा, इत एव अमुं देशमेव, अभिवर्तते आगच्छति, स्वकर्म स्वप्रयोजनमनुष्ठीयतां क्रियताम्।

86 'तद्गच्छतं स्वकर्मानुष्ठानाय' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

उभे - तथा। (इति निष्क्रान्ते)

उभे इति। उभे आहतुः। तथा तेन प्रकारेण कुर्व इति शेषः। इत्युक्त्वा। निष्क्रान्ते निर्गते।।

(ततः [87]प्रविशति पश्चात्तापसदृशवेषो राजा, विदूषकः प्रतीहारी च)[88]

तत इति। ततोऽनन्तरं। पश्चात्तापसदृशवेषः अनुतापानुगुणनेपथ्यः। राजा प्रविशति रङ्गस्थलमिति शेषः। विदूषकः प्रतीहारी च प्रविशतीति प्रत्येकं पूर्वेणैव अन्वयः।।

कञ्चुकी - (राजानमवलोक्य) अहो सर्वास्ववस्थासु [89]रमणीयत्वमाकृतिविशेषाणाम्। एवमुत्सुकोऽपि प्रियदर्शनो देवः। तथाहि।

श्लो॥ प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं[90]
बिभ्रत्काञ्चनमेकमेव वलयं श्वासापरक्ताधरः[91]।
चिन्ताजागरण[92]प्रताम्रनयनस्तेजोगुणादात्मनः[93]
संस्कारोल्लिखितो महामणिरिव [94]क्षीणोऽपि नालक्ष्यते॥6॥

कञ्चुकीति। कञ्चुकी, राजानमवलोक्य दृष्ट्वा, आकृति विशेषाणां रम्यरूपाणां, सर्वास्ववस्थासु सन्तोषासन्तोषावस्थास्वपि, रमणीयत्वं मनोहरत्वं,

---

87 'प्रविष्टः' इति 'C' इति प्रकाशने पाठान्तरम्।

88 'विदूषकः – एत्वेतु भवान्' इति 'C' इति प्रकाशने अधिकः पाठः।

89 'रमणीयकं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

90 'विधिर्वामप्रकोष्ठे श्लथं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

91 'श्वासोपरक्ताधरः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

92 'प्रतान्तनयन' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

93 'गुणैः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

94 'क्षामः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अहो आश्चर्यम्, एवमुक्तप्रकारेण, उत्सुकः उत्कण्ठायुक्तोऽपि, उत्कण्ठा नाम "रागेत्वलभ्यविषये वेदनामहती च या। सशोषणीतु गात्राणां तामुत्कण्ठां विदुर्बुधा" इत्युक्तलक्षणा, देवो राजा, प्रियदर्शनः रम्याकृतिः, तथा हि तदेवोच्यते, प्रत्यादिष्टेति, प्रत्यादिष्टविशेष मण्डनविधिः निरस्तविशिष्टालङ्कारकरणः, वामप्रकोष्ठार्पितं सव्यकूर्पराधः प्रदेशन्यस्तं, काञ्चनं सौवर्णं, एकमेव वलयं कङ्कणं, बिभ्रत् धारयन्, श्वासापरक्ताधरः श्वासैः उच्छ्वासानिलैः अपरक्ताधरः रागरहिताधरोष्ठः चिन्ताजागरणप्रताम्रनयनः चिन्ताजागरणाभ्यां उत्कण्ठाप्रजागराभ्यां प्रताम्रे अतिलोहिते नयने नेत्रे यस्य स तथोक्तः, एवं भूतो राजा, क्षीणः कृशोपि, आत्मनस्स्वस्य, तेजोगुणात् कान्तिविशेषात्, संस्कारोल्लिखितः शाणोल्लीढः, महामणिः सद्रत्नमिव, नालक्ष्यते न दृश्यते, अरमणीयत्वेनेति शेषः, किन्तु रम्यत्वेनैव दृश्यत इति भावः।

सानुमती - (राजानं [95]दृष्ट्वा) स्थाने खलु प्रत्यादेशविमानिताप्यस्य कृते शकुन्तला क्लाम्यति॥

सानुमतीति। सानुमती राजानं दृष्ट्वा वीक्ष्य प्राह, प्रत्यादेश विमानिता निराकरणावमानितापि, शकुन्तला, अस्य राज्ञः कृते, क्लाम्यति ग्लायति क्षीणा भवतीत्यर्थः, स्थाने खलु युक्तमेव हि, नि॥ "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः, शकुन्तला ग्लानिकारणं राज्ञोऽतिसौन्दर्यमेवेति भावः।

राजा - (ध्यानमन्दं परिक्रम्य)

श्लो॥ प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्॥7॥

राजेति। राजा ध्यानमन्दं ध्यानेन शकुन्तलाविषयकचिन्तया मन्दम् अलसं, परिक्रम्य गत्वा, प्रथममिति, प्रथममादौ, सारङ्गाक्ष्या भयचकितनेत्रया, प्रियया

95 'विलोक्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

कान्तया, प्रतिबोध्यमानं ज्ञाप्यमानमपि, सुप्तम् अप्रतिबुद्धम्, इदं मदीयं, हतहृदयं नष्टमानसं, अनुशयदुःखाय पश्चात्तापखेदाय, सम्प्रति इदानीं, विबुद्धं प्रतिबुद्धम्।

सानुमती - नन्वीदृशानि तपस्विन्या भागधेयानि॥

सानुमतीति। सानुमती प्राह, तपस्विन्याः शकुन्तलायाः, भागधेयानि भाग्यानि, ईदृशानि एतादृशानि ननु।

विदूषकः - (अपवार्य) लङ्घित एष भूयोऽपि शकुन्तलाव्याधिना। न जाने कथं चिकित्सितव्यो भविष्यतीति॥

विदूषक इति। विदूषकः अपवार्य हस्तादिना तिरोधाय, यथा राज्ञा न ज्ञायते तथा कृत्वेत्यर्थः, आह, भूयः पुनरपि, शकुन्तलाव्याधिना शकुन्तलारूपरोगेण, एष राजा, लङ्घितः पीडितः, कथं केन वा प्रकारेण, चिकित्सितव्यः प्रतिकार्यः, भविष्यतीति न जाने न जानामि।

कञ्चुकी - (उपगम्य) जयतु जयतु देवः। महाराज! प्रत्यवेक्षिताः प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि महाराजः॥

कञ्चुकीति। कञ्चकी, उपगम्य समीपं गत्वा प्राह, देवो राजा, जयतु सर्वोत्कर्षेण वर्तताम् आदराद्द्विरुक्तिः, हे महाराज प्रमदवनभूमयः उद्यानवनप्रदेशाः, प्रत्यवेक्षिताः सर्वतः परिशीलिताः, महाराजः, यथाकामं यथेच्छं, विनोदस्थानानि रम्यस्थलानि, अध्यास्ताम् अधितिष्ठतु।

राजा - वेत्रवति! मद्वचनादमात्यमार्यपिशुनं[96] ब्रूहि। [97]चिरप्रबोधान्नसम्भावितमस्माभिरद्य धर्मासनमध्यासितुम्। यत्प्रत्यवेक्षितं पौरकार्यमार्येण तत्पत्रमारोप्य दीयतामिति[98]॥

---

96 'दमात्यपिशुनं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'अमात्यं वसुमन्तं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

राजेति। राजा प्राह, हे वेत्रवति आर्यपिशुनं पिशुननामकम्, अमात्यं मन्त्रिणं, मद्वचनात् मम भाषणात्, ब्रूहि वद, किमिति, चिरप्रबोधनात् चिरकालज्ञापनात्, अस्माभिः धर्मासनं धर्मकार्यविचारणास्थानम्, अध्यासितुम् अधिष्ठातुं, न सम्भावितं नोत्प्रेक्षितम्, आर्येण अमात्येन, यत्पौरकार्यं पुरजनानां वादरूपं कार्यं, प्रत्यवेक्षितं सम्यग्विचारितं, तत् पौरकार्यं, पत्रमारोप्य पत्रे लिखित्वा दीयतां वितीर्यताम् इति ब्रूहीति पूर्वेणान्वयः।

[99]प्रतीहारी - यद्देव आज्ञापयति। (इति निष्क्रान्ता)

प्रतीहारीति। प्रतीहारी प्राह। देवः स्वामी, यदाज्ञापयति अनुशास्ति तथा करोमीति शेषः, इत्युक्त्वा निष्क्रान्ता निर्गता।

राजा - [100]वातायन! त्वमपि स्वं नियोगमशून्यं कुरु॥

राजेति। राजा वदति, हे वातायन! वातायनेति कञ्चुकिनो नामधेयं, त्वमपि, स्वं स्वकीयं, नियोगं नियुज्यमानप्रयोजनम् अशून्यं सफलं, कुरु विधेहि।

कञ्चुकी - [101]यदाज्ञापयति देवः। (इति निष्क्रान्तः)

कञ्चुकीति। कञ्चुकी यदाज्ञापयति देव इत्युक्त्वा, निष्क्रान्तो निर्गतः।

विदूषकः - कृतं भवता[102] निर्मक्षिकम्। साम्प्रतं शिशिरातपच्छेदरमणीयेऽस्मिन्प्रमदवनोद्देश [103]आत्मानं रमयिष्यसि॥

---

97 'अद्य चिरप्रबोधनान्न' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

98 'प्रस्थप्यतामिति' इति 'A' इति प्रकाशने पाठान्तरम्।

99 प्रतीहारी, प्रतिहारीति प्रयोगद्वयं कोषे दृश्यत इत्यततः अमुष्मिन् व्याख्याने द्विधा प्रयोगः दर्शितः।

100 'पार्वतायन' इति 'A' इति प्रकाशने पाठान्तरम्।

101 'तथा' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

102 'भवतेदानीं' इति 'C' इति प्रकाशने पाठान्तरम्।

विदूषक इति। विदूषकः प्राह, भवता त्वया, निर्मक्षिकं मक्षिकाणामप्यभावः, कृतं रचितं, निस्सपत्नत्वं कृतमिति भावः, साम्प्रतमिदानीं, शिशिरातपच्छेदरमणीये शिशिरे शीते आतपच्छेदेन रविप्रकाशराहित्येन रमणीये रम्ये, अस्मिन् पुरोवर्तिनि, प्रमदवनोद्देशे उद्यानवनप्रदेशे, आत्मानं स्वं, रमयिष्यसि क्रीडयिष्यसि।

राजा - [104]वयस्य। [105]रन्ध्रोपनिपातिनोऽनर्था इति यदुच्यते।

[106]तदव्यभिचारिवचः। [107]कुतः।

श्लो॥ मुनिसुताप्रणयस्मृतिरोधिना
मम च मुक्तमिदं तमसा मनः।
मनसिजेन सखे प्रहरिष्यता
धनुषि चूतशरश्च निवेशितः ॥8॥

राजेति। राजा प्राह। हे वयस्य सखे! अनर्थाः आपदः, रन्ध्रोपनिपातिनः रन्ध्रे छिद्रे अस्वास्थ्ये सति उपनिपतन्ती सम्प्राप्ता भवन्तीति रन्ध्रोपनिपातिनः, इत्येवं प्रकारेण, यदुच्यते अभिधीयते लोकेनेति शेषः, तद्वचः तद्वाक्यं, अव्यभिचारि अविपर्यस्तं अन्यथा न भवतीत्यर्थः, कुतः कस्मादिति चेत्, उच्यते, मुनिसुतेत्यादिना, मुनिसुता प्रणयस्मृतिरोधिनां मुनिसुतायाश्शकुन्तलायाः, प्रणयो गाढानुरागः, तस्य स्मृतिः स्मरणं, तद्रोधिना तत्प्रतिबन्धकेन, तमसा अज्ञानेन, इदं

---

103 'सुखमात्मानं' इति 'C' इति प्रकाशने पाठान्तरम्।

104 '(निश्वस्य)' इति 'C' इति प्रकाशने अधिकः पाठः।

105 'यदुच्यते रन्ध्रोपनिपातिनोऽनर्था इति' इति 'B' इति प्रकाशने पाठान्तरम्। 'रन्ध्रोपरि पा...' इति 'B' इति प्रकाशने पाठान्तरम्।

106 'तदव्यभिचारि पश्य' इति 'A' इति प्रकाशने पाठान्तरम्।

107 'पश्य' इति 'B' इति प्रकाशने पाठान्तरम्।

मम, मनः चित्तं, मुक्तं परित्यक्तं च, प्रहरिष्यता प्रहारं करिष्यता, मनसिजेन मन्मथेन हे सखे धनुषि शरासने, चूतशरः चूतपुष्परूपो बाणश्च, निवेशितः स्थापितः।

विदूषकः - तिष्ठ तावत्। [108]यावदनेन दण्डकाष्ठेन कन्दर्पबाणं[109] नाशयिष्यामि। (इति [110]दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति)

विदूषक इति। विदूषकः प्राह। हे रजान् तिष्ठ तावत् तावत्पर्यन्तं तिष्ठेत्यर्थः, यावद्यावता कलेन, अनेन मदीयेन, दण्डकाष्ठेन दण्डनिमित्तकदारुणा, कन्दर्पबाणं मन्मथशरं, नाशयिष्यामि ध्वंसयिष्यामि, इत्युक्त्वा, दण्डकाष्ठं दण्डनदारुम्, उद्यम्य उत्थाप्य, चूताङ्कुरम् आम्रपल्लवं, पातयितुं विश्लेषयितुम्, इच्छति यतते।

राजा - (सस्मितम्) भवतु। दृष्टं ब्रह्मवर्चसम्। सखे! क्वोपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विलोभयामि॥

राजेति। राजा, सस्मितं मन्दहासपूर्वकं प्राह, भवत्वित्यङ्गीकारे, ब्रह्मवर्चसं ब्रह्मतेजोविशेषः, दृष्टं वीक्षितं, हे सखे क्व कुत्र स्थाने, उपविष्टः आसीनस्सन्, प्रियायाः प्रेयस्याः, किञ्चिदनुकारिणीषु ईषत्सदृशीषु, लतासु वल्लीषु, दृष्टिं नेत्रेन्द्रियं, विलोभयामि आसक्तिं जनयामि।

विदूषकः - नन्वासन्नपरिचारिका चतुरिका भवता सन्दिष्टा। माधवीमण्डप इमां वेलामतिवाहयिष्यामि[111]। तस्मिन्मे[112]

---

108 'अनेन' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

109 'कन्दर्पव्याधिं' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

110 'दण्डमुद्यम्य' इत्येव पाठः 'C' इति प्रकाशने लभ्यते।

111 'अतिवाहयिष्ये' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

112 'तत्र मे' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'तत्र मम चित्रफलके स्व.....' इति 'C' इति प्रकाशने पाठान्तरम्।

चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याश्शकुन्तलायाः प्रतिकृतिमानयेति॥

विदूषक इति। विदूषक आह, ननु राजन्, भवता त्वया, आसन्नपरिचारका समीपवर्तिनी चेटिका, चतुरिका चतुरिकाख्या, सन्दिष्टा आज्ञप्ता किमिति, माधवीमण्डपे माधवीलतावेष्टितगृहविशेषे, इमां वेलाम् अमुं कालं, अतिवाहयिष्यामि यापयिष्यामि, तस्मिन् माधवीमण्डपे, चित्रफलकगतां आलेख्यस्थां, स्वहस्तलिखितां स्वकीयकरेण विन्यस्तां, तत्रभवत्याः पूज्यायाश्शकुन्तलायाः, प्रतिकृतिं प्रतिबिम्बं, मे मम, आनय आदेशय, इति सन्दिष्टेति पूर्वेणान्वयः।

राजा - ईदृशं हृदयविनोदस्थानम्[113]। तत्तमेव मार्गमादेशय॥

राजेति। राजा प्राह, हृदयविनोदस्थानं मनोरञ्जनस्थानम्, ईदृशम् एतादृशं, तत्तस्मात्कारणात्, तमेव, मार्गं पन्थानम्, आदेशय निर्देशय।

विदूषकः - इत इतो भवान्। ([114]उभौ परिक्रामतः। सानुमत्यनुगच्छति।)

विदूषक इति। विदूषकः प्राह, भवान् इत इतः अनेनानेन मार्गेणागच्छत्विति शेषः, उभौ राजविदूषकौ, परिक्रामतः गच्छतः, सानुमती अनुगच्छति अनुसृत्य चरति।

---

113 'विनोदस्थानं, निवेशस्थानमीदृशमेव, ईदृशं मम हृदयाश्वासनम्, ईदृशं मे हृदयसंस्थानं तत्मेवादेशय माधवीमण्डपम्, ईदृशं मम हृदयस्थानं ननु त्वमेव दर्शय माधवीमण्डपमार्गम्' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

114 'राजा परिक्रामति' इति 'C' इति प्रकाशने पाठान्तरम्।

विदूषकः - एष मणिशिलापट्टकसनाथो माधवीमण्डप [115]उपहाररमणीयतया निस्संशयं स्वागतेनेव नौ प्रतीच्छति। तत्प्रविश्य निषीदतु भवान्। (उभौ प्रवेशं[116] कृत्वोपविष्टौ)

विदूषक इति। विदूषक आह, मणिशिलापट्टकसनाथः रत्नमयोपलफलकसहितः, एष माधवीमण्डपः अयं यूथिका लतावेष्टितगृहविशेषः, उपहाररमणीयतया उपहारैः पुष्पादिबलिभिः, रमणीयतया मनोहरत्वेन, निस्संशयम् असंशयं यथा तथा, स्वागतेन शुभागमनवचनेनैव, नौ आवां, प्रतीच्छति अपेक्षते, तत्तस्मात्, प्रविश्य प्राप्य, भवान् निषीदतु उपविशतु, इत्युक्त्वा, उभौ राजविदूषकौ, प्रवेशं प्राप्तिं, कृत्वा विधाय, उपविष्टौ आसीनौ।

सानुमती - लतासंश्रिता द्रक्ष्यामि तावत्सख्याः प्रतिकृतिम्। [117]ततोऽस्या भर्तुर्बहुमुखमनुरागं निवेदयिष्यामि। (इति तथा कृत्वा स्थिता)

सानुमतीति। सानुमती प्राह, अहं लतासंश्रिता वल्लिका आश्रित्येत्यर्थः, सख्याश्शकुन्तलायाः, प्रतिकृतिम् प्रतिबिम्बं, तावदिदानीं, द्रक्ष्यामि वीक्षिष्ये, ततोऽनन्तरं, भर्तुः प्रियस्य, बहुमुखं नानाविधं प्रवर्तमानं, अस्याः शकुन्तलायाः, अनुरागं प्रेमाणं, निवेदयिष्यामि ज्ञापयिष्यामि, मेनकाया इति शेषः इत्युक्त्वा, तथा तेन प्रकारेण, कृत्वा विधाय, स्थिता तिष्ठति स्म।

---

115 'विविक्ततया उप.... तथा निसर्गमारुतेन च' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

116 'प्रविश्योप...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'रूपयित्वोपविष्टौ' इति 'C' इति प्रकाशने पाठान्तरम्।

117 'ततस्तस्यै' इति 'B' इति प्रकाशने पाठान्तरम्।
'ततोऽस्यै' इति 'C' इति प्रकाशने पाठान्तरम्।

राजा - सखे! सर्वमिदानीं स्मरामि शकुन्तलायाः [118]प्रथमवृत्तान्तम्। कथितवानस्मि भवते[119]। स भवान्प्रत्यादेशवेलायां[120] मत्समीपमुपगतो[121] नासीत्। [122]पूर्वमपि न त्वया [123]कदाचित्सङ्कीर्तितं तत्रभवत्या नाम। कच्चिदहमिव विस्मृतवानसि त्वम्॥

राजेति। राजा प्राह, हे सखे वयस्य, इदानीमद्य, सर्वं शकुन्तलावृत्तान्तं, स्मरामि सञ्चिन्तयामि, शकुन्तलायाः प्रथमवृत्तान्तं गान्धर्वविवाहादिकं, भवते तुभ्यं, कथितवान् आख्यातवान्, अस्मि भवामि, स भवान् तादृशस्त्वमित्यर्थः, प्रत्यादेशवेलायां त्वं मम भार्या नासीति निराकरणसमये, मत्समीपं मन्निकटं, उपगतः प्राप्तः, नासीत् नाभवत्, पूर्वं पुरापि, त्वया कदाचित् कस्मिंश्चिसमयेऽपि, तत्रभवत्याः शकुन्तलायाः, नाम अभिधानं, न सङ्कीर्तितं नोच्चारितं, अहमिव त्वमपि, विस्मृतवानसि कच्चित् विस्मृतिं प्राप्तोऽसि किम्।

विदूषकः - न विस्मरामि। किन्तु सर्वं कथयित्वावसाने पुनस्त्वया परिहासविजल्प एष न भूतार्थ इत्याख्यातम्। मयापि मृत्पिण्डबुद्धिना तथैव गृहीतम्। अथवा भवितव्यता[124] बलवती॥

विदूषक इति विदूषक आह, अहं न विस्मरामि विस्मृतिं न प्राप्नोमि, किन्तु अपितु, सर्वं समस्तं स्ववृत्तान्तं, कथयित्वा उक्त्वा, अवसाने पुनः

---

118 'प्रथमदर्शनवृत्तान्तं यं कथितवाननस्मि भवते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

119 'च' इति अधिकः पाठः 'A' 'B' 'C' इति प्रकाशनेषु उपलभ्यते।

120 'समये' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

121 '..पमुपग...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

122 'किन्तु पू...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

123 'कथाचित्सु कथासु' इति 'C' इति प्रकाशने पाठान्तरम्।

124 'खलु' इति अधिकः पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

स्ववाक्यावसानसमये तु, त्वया भवता, एषः मद्व्याहारः, परिहासविजल्पः परिहासोक्तिः, न भूतार्थः न सत्यः, नि।। "युक्तेक्ष्मादावृते भूतं प्राण्यतीते समे त्रि"ष्वित्यमरः। इत्याख्यातम् एवमभिहितं, मृत्पिण्डबुद्धिना घनीभूतमृच्छकलसदृशमनीषेण, मयापि तथा भवदुक्तप्रकारेणैव, गृहीतं ज्ञातम्, असूक्ष्मबुद्धित्वादिति भावः, अथवा पक्षान्तरेण, भवितव्यता अवश्यभव्यता बलवती निरर्गला।

सानुमती - एवन्न्वैतत्॥[125]

सानुमतीति। सानुमती ब्रूते, एतद्भवदुक्तम् एवन्नु इत्थमेव हि।

राजा - (ध्यात्वा) सखे। [126]त्रायस्व माम्॥

राजेति। राजा ब्रवीति, हे सखे वयस्य, मां त्रायस्व रक्ष।

विदूषकः - भोः! किमेतत्?। अनुपपन्नं खल्वीदृशं त्वयि। [127]कदाचित्सत्पुरुषा [128]शोकपात्रात्मानो न भवन्ति। ननु प्रवातेऽपि निष्कम्पा गिरयः॥

विदूषक इति। विदूषक आह, भो राजन्, किमेतत् इदं किम्, त्वयि धीरोदात्ते भवति, ईदृशं एतादृशं विरहकातरत्वम्, अनुपपन्नं खलु न युक्तं हि, सत्पुरुषाः धीराः, कदाचित् कदापि, शोकपात्रात्मानः दुःखितमनसः, न भवन्ति न

---

125 'एवमेवैतत्' इति 'A' इति प्रकाशने पाठान्तरम्।
'एवं न्विदम्' इति 'B' इति प्रकाशने पाठान्तरम्।
'एवमेतत्' इति 'C' इति प्रकाशने पाठान्तरम्।

126 'परित्रायस्व' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

127 'कदापि सत्पुरुषा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

128 'शोकवक्तव्याः' इति 'A' इति प्रकाशने पाठान्तरम्।
'शोकवास्तव्या' इति 'B' इति प्रकाशने पाठान्तरम्।

सम्पद्यन्ते, अत्र दृष्टान्तमाह, गिरयः पर्वताः, प्रवाते प्रकृष्टवायौ सत्यपि, निष्कम्पा ननु कम्परहिताः खलु।

राजा - वयस्य! निराकरणविक्लवायाः [129]प्रियायास्समवस्थामनुस्मृत्य बलवदशरणोऽस्मि। सा हि।

श्लो॥ इतः [130]प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
[131]मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे[132]।
पुनर्दृष्टिं बाष्प[133]प्रकरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम्॥9॥

राजेति। राजा प्राह, हे वयस्य सखे, निराकरणविक्लवायाः प्रत्याख्यानदुःखपरवशायाः, प्रियायाश्शकुन्तलायाः, समवस्थां शोच्यदशां, अनुस्मृत्य अनुचिन्त्य, बलवद्दृढं यथा तथा, अशरणः प्राणधारणे, उपायरहितोऽस्मि भवामि, सा हि शकुन्तला हि, इत इति, इतः स्वस्मात् प्रत्यादेशात्, व्यपदेशम् आविलयितुमित्यादि वाक्यैर्न्यक्कारं प्राप्य, सू। 'ल्यब्लोपेकर्मण्यधिकरणेचे'ति पञ्चमी। स्वजनं बन्धुजनं, शार्ङ्गरवादीनित्यर्थः, अनुगन्तुम् अनुसर्तुं, व्यवसिता निश्चिता, मुहुः पुनःपुनः, गुरुसमे पितृसदृशे, गुरुशिष्ये पितृशिष्ये, तिष्ठ आःपुरोभागिनीत्यादिना, अत्रैव वस इत्यनेन प्रकारेण, उच्चैरुन्नतं, वदति भाषमाणे सति, पुनः अनन्तरं, क्रूरे कृतकार्यस्मरणाभावेन दारुणे

---

129 'तामव...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'समवस्था...' इति 'B' इति प्रकाशने पाठान्तरम्।

130 'प्रत्यादिष्टा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

131 'स्थिता ति....' इति 'B' इति प्रकाशने पाठान्तरम्।
'ततस्तिष्ठेत्युच्चै...' इति 'C' इति प्रकाशने पाठान्तरम्।

132 'सखे...' इति पाठान्तरमुपलभ्यते इति 'B' 'C' इति प्रकाशनयोः निर्दिष्टम्।

133 'प्रसर' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

मयि, बाष्पप्रकरकलुषां बाष्पप्रकरेण अविच्छिन्ननेत्रजलसमूहेन, कलुषाम् आविलां, अन्धीभूतामिति यावत्, दृष्टिं दर्शनम्, अर्पितवती विन्यस्तवतीति यत्, तद्दृष्टिसमर्पणं, सविषं विषलिप्तं, शल्यं बाण इव, नि। "शल्यं शङ्काशरेवंश" इति विश्वः, मां दहति वह्निरिव बाधते।

सानुमती - अहो! ईदृशी [134]स्वकार्यपरता। अस्य सन्तापेनाहं रमे॥

सानुमतीति। सानुमती प्राह, स्वकार्यपरता स्वकीयप्रयोजनासक्तिः, ईदृशी एतादृशी, अस्य राज्ञः, सन्तापेन विरहपरितापेन, अहं रमे सन्तोषमधिगच्छामि, अहो आश्चर्यम्, शकुन्तलानुरागसूचकत्वादित्याशयः।

[135]विदूषकः - [136]भो! अस्ति मे तर्कः। केनापि तत्र भवत्याकाशचारिणा नीतेति॥

विदूषक इति। विदूषकः प्राह, भो राजन्, तत्रभवती शकुन्तला, आकाशचारिणा अन्तरिक्षसञ्चरणशीलेन, केनापि पुरुषेण, नीता अपहृतेति, मे मम, तर्कः ऊहः, अस्ति विद्यते।

राजा - कः पतिदेवतामन्यः परिमार्ष्टुमुत्सहेत। मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि। तत्सहचारिणीभिस्सखी[137] ते हृतेति मे हृदयमाशङ्कते॥

---

134 'परवशतास्य मामपि सन्तापयति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'स्वकार्यपरता नाम।' इति 'C' इति प्रकाशने पाठान्तरम्।

135 अस्मात्प्राक् 'राजा – वयस्य अपि तर्कयसे येन देवी अपहृता स्यात्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

136 'हा, अस्ति मे तर्कः। केनाप्याकाशचारिणा तत्रभवत्यपनीतेति।' इति 'C' इति प्रकाशने पाठान्तरम्।

137 'तत्सहचारिणीभिस्तां हृतां मे ह.....।' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। राजा प्राह, अन्यः इतरः, कः पुरुषः, पतिदेवतां पतिव्रतां शकुन्तलां, परिमार्ष्टुं नाशयितुमित्यर्थः, उत्सहेत उत्सहितुं शक्नुयात्, किन्तु ते तव, सख्याः शकुतलायाः, मेनकानामाप्सरः कान्ता, जन्मप्रतिष्ठा जन्मकारणं किलेति, श्रुतवानस्मि आकर्णितवानस्मि, तत्सहचारिणीभिः मेनकासहचरीभिः, ते तव, सखी मित्रभूता शकुन्तला, हृता स्वस्थानं प्रापितेति, मे मम, हृदयं चेतः, आशङ्कते आसमन्तादूहति।

सानुमती - सम्मोहः खलु विस्मयनीयो न प्रतिबोधः॥

सानुमतीति। सानुमती प्राह, सम्मोहः अविवेकः, विस्मयनीयः खलु आश्चर्यकरो हि, प्रतिबोधो विवेकस्तु, न विस्मयनीयः आश्चर्यकरो नहि।

विदूषकः - यद्येवमस्ति खलु समागमः कालेन तत्रभवत्या[138]॥

विदूषक इति। विदूषक आह, एवं यदि मेनकासहचारिणीभिर्नीता चेत्, तत्रभवत्या शकुन्तलया, कालेन कियता समयेन, समागमः सङ्गतिः, अस्ति खलु विद्यते हि।

राजा - कथमिव॥

राजेति। राजा प्राह, कथमिव केन प्रकारेण, समागमस्स्यात्।

विदूषकः - न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं [139]द्रष्टुं पारयतः॥

---

138 'तत्रभवत्याः' इति 'C' इति प्रकाशने पाठान्तरम्।

139 'चिरं' इत्यधिकःपाठः उपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'चिरं' इति 'C' इति प्रकाशने अधिकः पाठः।

विदूषक इति। विदूषक आह, मातापितरौ जननीजनकौ, भर्तृवियोगदुःखितां पतिविरहखिन्नां, दुहितरं पुत्रीं, द्रष्टुं वीक्षितुं, न पारयतः खलु न समर्थौ हि, तस्मात्समागमो भविष्यतीत्याशयः।

राजा - वयस्य!

श्लो॥ स्वप्नो नु माया नु मतिभ्रमो नु
[140]क्लिष्टन्नु तावत्फलमेव [141]पुण्यम्।
असन्निवृत्त्यै तदतीतमेव[142]
मनोरथानामतटः [143]प्रपातः ॥10॥

राजेति। राजा भाषते, हे वयस्य सखे, तत् शकुन्तला दर्शनसम्भाषणादिकं स्वप्नो नु सुप्तिदशायामनुभूतपरयुवतिदर्शनसम्भाषणादिकं वा, यथा स्वप्ने तथ्यमिवानुभूतं जाग्रदवस्थायां न दृश्यते तद्वदित्यर्थः, माया नु ऐन्द्रजालिकं वा, यथा यः कश्चिदैन्द्रजालिकविद्यानिपुणः परयुवति सम्भाषणादिकमुत्पाद्य तथ्यमिव अनुभावयति पुनस्तस्मिन् गते तदप्यन्तर्हितं भवति तद्वदित्यर्थः, मतिभ्रमो नु मिथ्याध्यवसायो वा, यथा प्रतिबिम्बिते वस्तुनि याथार्थ्यज्ञानेन प्रवृत्तिनिश्चयन्तद्वत्, पुण्यं जन्मान्तरसम्पादितं सुकृतं, तावत्फलं तावन्मात्रफलजनकमेव, क्लिष्टन्नु परिसमाप्तं वा, असन्निवृत्यै अपुनरागमाय, अतीतम् अतिक्रान्तमेव, मनोरथानाम् इतः परं तत्प्राप्तौ प्रत्यादेशदुःखनिरसनपूर्वकं चुम्बनालिङ्गनादिकमेवं

---

140 'क्लृप्तं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

141 'पुण्यैः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

142 'तदतीतमेते' इति 'A' इति प्रकाशने पाठान्तरम्।
'तदतीव मन्ये, ...तमेव' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

143 'प्रापतं, ...रथानामतटप्र...., रथानामतटाः प्रवाहाः' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।
'प्रवाहाः' इति 'C' इति प्रकाशने पाठान्तरम्।

करिष्यामीतीच्छाविशेषाणां, प्रपातः प्रवाहः, अतटः स्ववेगप्रतिबन्धकसेतुराहित्येन निष्प्रतिबन्धः।

विदूषकः - मैवम्। नन्वङ्गुलीयकमेव निदर्शनम्
[144]अवश्यम्भाविनोऽचिन्तनीयस्समागमो भवतीति॥

विदूषक इति। विदूषकः प्राह, मैवम् एवं भवदुक्तप्रकारेण मा न भवति, अवश्यम्भाविनः नियतं भवितव्यस्य वस्तुनः, अचिन्तनीयः अविचारणीयः, समागमस्सम्बन्धः, भवति सम्पद्यत इत्यस्मिन्नर्थे, अङ्गुलीयकं करशाखाभरणमेव, निदर्शनं ननु दृष्टान्तो हि।

राजा - (अङ्गुलीयकं विलोक्य) अये इदं तावदसुलभस्थानभ्रंशि शोचनीयम्।

श्लो॥ तव सुचरितमङ्गुलीय नूनं
प्रतनु ममेव[145] विभाव्यते फलेन।
अरुणनखमनोरमासु[146] तस्या-
श्च्युतमसि लब्धपदं यदङ्गुलीषु॥ 11॥

राजेति। राजा दुष्यन्तः, अङ्गुलीयकम् ऊर्मिकां, विलोक्य दृष्ट्वा प्राह, अये अङ्गुलीयक, इदं तावत् एतत्त्वन्तु, अनुपलभस्थानभ्रंशि दुर्लभस्थानात् परिच्युतं सत्, शोचनीयं शोच्यं जातं, तवेति, हे अङ्गुलीय अङ्गुलिमुद्रे, ममेव, तव भवतोऽपि, सुचरितं सुकृतविशेषः, फलेन फलनिष्पत्त्या, प्रतनु अत्यल्पं, विभाव्यते ऊह्यते, कुतः, तस्याश्शकुन्तलायाः, अरुणनखमनोरमासु अरुणैश्शोणैः नखैः

---

144 'अवश्यंभाव्यचिन्तनीयः' इति 'A' इति प्रकाशने पाठान्तरम्।

145 'कृशेन' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

146 'मनोहरासु' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

करुहैः मनोरमासु मनोहरासु, अङ्गुलीषु करशाखासु, लब्धपदं प्राप्तस्थानं सत्, च्युतं भ्रष्टम्, असि भवसीति यत्।

सानुमती - यद्यन्यहस्तगतं भवेत्सत्यमेव शोचनीयं भवेत्[147] ॥

सानुमतीति। सानुमती प्राह, इदमङ्गुलीयकम्, अन्यहस्तगतम् इतरेषां करगतं, भवेत्यदि स्याच्चेत्, सत्यं तथ्यमेव, शोचनीयं शोच्यं, भवेत् सम्पद्येत।

विदूषकः - भोः! इयं नाम मुद्रा [148]केनोद्देशेन तत्रभवत्या हस्तसंसर्गं[149] प्रापिता॥

विदूषक इति। वदूषक आह, भो राजन्, इयं नाममुद्रा एषा ऊर्मिका, केनोद्देशेन केन वा अभिप्रायेण, तत्रभवत्याश्शकुन्तलायाः, हस्तसंसर्गं पाणिसम्पर्कं प्रापिता नीता।

सानुमती - ममापि कौतूहलेनाकारित एषः॥

सानुमतीति। सानुमती प्राह, ममापि कौतूहलेन अभिलाषेण, एष राजा, आकारितः पृष्टः।

राजा - श्रूयताम्। तदा[150] स्वनगराय[151] प्रस्थितं मां प्रिया सबाष्पमाह। कियच्चिरेणार्यपुत्रः प्रतिपत्तिं[152] दास्यतीति॥

---

147 अस्मात्परं 'सखि दूरे वर्तसे। एकाकिन्येव कर्णसुखान्यनुभावामि।' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

148 'केनोद्घातेन' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

149 'हस्ताभ्याशं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

150 'तदा' इत्येषः अधिकः पाठः 'A' 'B' इति प्रकाशनयोः नोपलभ्यते।

151 'तपोवनात्स्व....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

152 'पुनरस्माकं स्मरिष्यति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

राजेति। राजा प्राह, हे विदूषक श्रूयताम् आकर्ण्यतां त्वयेति शेषः, तदा तस्मिन्समये, स्वनगराय स्वपुराय, प्रस्थितं प्रयातं मां, प्रिया प्रेयसी शकुन्तलेत्यर्थः, सबाष्पं बाष्पसहितं यथा तथा, आह उक्तवती, किमिति, आर्यपुत्रः भर्ता, कियच्चिरेण कियता चिरकालेन, प्रतिपत्तिं प्राप्तिं, दास्यति कदा प्रयच्छतीति।

विदूषकः - ततस्ततः ॥

विदूषक इति। विदूषकः प्राह, ततस्ततः अनन्तरं किं वृत्तमिति शेषः आदरातिशयाद्विरुक्तिः।

राजा - पश्चादिमां मुद्रां[153] तदङ्गुलौ निवेशयता मया प्रत्यभिहिता।

श्लो ॥ एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय [154]गच्छति यावदन्तम्।
तावत्प्रिये [155]मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति ॥ 12 ॥

[156]तच्च दारुणात्मना मया मोहान्नानुष्ठितम् ॥

---

153 'नाममुद्रां' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'नाममुद्रां' इति 'C' इति प्रकाशने पाठान्तरम्।

154 'यासि न यावदन्तम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'गच्छसि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

155 'मदवरोधनिदेशवर्ती' इति 'A' इति प्रकाशने पाठान्तरम्।

156 'तच्च मोहाद्दारुणमनुष्ठितम्' इति 'A' इति प्रकाशने पाठान्तरम्।
'मोहाद्विस्मृत्य, मया तथा दारुणात्मना वि...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'तच्च दारुणेन मोहान्मया नानुष्ठितम्' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेत्यादि। राजा सम्भाषते पश्चात् अनन्तरम्, इमां मुद्राम् एतां मुद्रिकां, तदङ्गुलौ तस्याः प्रियायाः करशाखायां, निवेशयता स्थापयता, मया प्रत्यभिहिता प्रत्युक्ता, एकैकमिति, अत्र अङ्गुलिमुद्रिकायां, दिवसे दिवसे दिने दिने, मदीयं मत्सम्बन्धि, नामाक्षरं दुष्यन्तेत्यक्षरत्रयं, एकैकं प्रत्येकमेव, गणय संख्यानं कुरु, यावत् यत्परिमाणेन कालेन, अन्तम् अवसानं, गच्छति प्राप्नोति, तावत् तावता कालेन, हे प्रिये शकुन्तले, मदवरोधगृहप्रवेशं मदन्तःपुरस्त्रीनिकेतनप्राप्तिं, नेता प्रापकः, जनः भृत्यजनः, तव समीपं निकटम्, उपैष्यति प्राप्स्यतीति, प्रत्यभिहितमिति पूर्वेणान्वयः, तच्च प्रतिवचनमपि, दारुणात्मना क्रूरस्वभावेन मया, मोहादज्ञानात्, नानुष्ठितं न कृतम्।

सानुमती - रमणीयः खल्ववधिर्विधिना विसम्वादितः॥

सानुमतीति। सानुमती प्राह, अवधिः कालपरिमाणनिरूपणं, रमणीयः युक्त एव खलु, विधिना दैवेन तु, विसंवादितः विपर्यासितः।

विदूषकः - कथं धीवरकल्पितस्य रोहितमत्स्यस्योदराभ्यन्तरे[157] आसीत्॥

विदूषक इति। विदूषक आह, कथं कस्मात्कारणात्, धीवरकल्पितस्य कैवर्तखण्डितस्य, रोहितमत्स्यस्य तदाख्यमीनस्य, उदराभ्यन्तरे कुक्ष्यन्तःप्रदेशे, आसीत् अभवत् अङ्गुलिमुद्रिकेति शेषः।

राजा - [158]शचीतीर्थे [159]वन्दमानायास्सख्यास्ते हस्ताद्गङ्गास्त्रोतसि परिभ्रष्टम्॥

---

157 'मत्स्यस्य बडिशमिव मुखप्रविष्टमेतदासीत्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

158 'शचीतीर्थे सलिलं' इति 'A' इति प्रकाशने पाठान्तरम्।

159 'वन्दमानायास्तव सख्याः परिभ्रष्टम्' इति 'A' इति प्रकाशने पाठान्तरम्।

राजेति। राजा प्राह, शचीतीर्थं शचीनामकं क्षेत्रं, वन्दमानायाः नमस्कुर्वाणायाः, ते तव, सख्याः, हस्तात्करात्, गङ्गास्रोतसि भागीरथीप्रवाहे, परिभ्रष्टं परिच्युतमङ्गुलीयकमिति शेषः।

विदूषकः - युज्यते॥

विदूषक इति। विदूषक आह, युज्यते युक्तम्।

सानुमती - अत एव तपस्विन्याश्शकुन्तलाया[160] अधर्मभीरोरस्य राजर्षेः परिणये सन्देह आसीत्। अथवा ईदृशोऽनुरागोऽभिज्ञानमपेक्षते। कथमिवैतत्॥

सानुमतीति। सानुमती प्राह, अत एव अङ्गुलीयकभ्रंशादेव, अधर्मभीरोः अश्रेयोभीरुकस्य, अस्य राजर्षेः राजश्रेष्ठस्य, तपस्विन्याः दीनायाः नि। "मुनिदीनौतपस्विनावि"त्यमरः।। शकुन्तलायास्सम्बन्धिनि, परिणये गान्धर्वविवाहे सन्देहः संशयः, आसीत् अभवत्, अथवा तथा नोचेत्, ईदृशः एतादृशः, अनुरागः प्रेम, अभिज्ञानं स्मृतिजनकलक्षणम्, अपेक्षते काङ्क्षते, एतत् अपेक्षणं, कथमिव कुतो वा भवति।

राजा - [161]उपालप्स्ये तावदिदमङ्गुलीयकम्॥

राजेति। राजा वक्ति, इदमङ्गुलीयकं मुद्रिकां, तावदिदानीम्, उपालप्स्ये निन्दिष्यामि।

विदूषकः - (आत्मगतम्) गृहीतोऽनेन पन्था उन्मत्तानाम्॥

विदूषक इति। विदूषकः, आत्मगतं स्वगतं वक्ति, अनेन राज्ञा, उन्मत्तानां चित्तविभ्रमवतां जनानां, पन्था मार्गः, गृहीतः स्वीकृतः।

---

160 'शकुन्तलायाम्' इति 'C' इति प्रकाशने पाठान्तरम्।

161 'भवतु, उपालप्स्ये' इति 'A' इति प्रकाशने पाठान्तरम्।

राजा - [162]

श्लो॥ कथन्नुतं [163]बन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि।

अथवा

अचेतनं नाम गुणं न [164]लक्षये-
न्मयैव कस्मादवधीरिता प्रिया॥13॥

राजेति। राजा अङ्गुलीयकमुपालभते, कथन्विति, हे अङ्गुलीयक, बन्धुरकोमलाङ्गुलिं बन्धुराः निम्नोन्नताः कोमला मृदुलाः अङ्गुलयः करशाखा यस्य तं, करं शकुन्तलाप्रकारेण, निमग्नमन्तर्हितमसि भवसि, अथवा पक्षान्तरे, अचेतनं चैतन्यविहीनसम्बन्धिनं, गुणं योग्यतां, न लक्षयेन्नाम निन्दालक्ष्यं न कुर्यात्, कस्माद्धेतोः मयैव चैतन्यविशिष्टेनैवेत्यर्थः, प्रिया प्रेयसी, अवधीरिता निराकृतेति।

विदूषकः - (आत्मगतम्) [165]कथं बुभुक्षया खादितव्योऽस्मि॥

विदूषक इति। विदूषक आत्मगतं स्वगतम् आह, बुभुक्षया क्षुधया, खादितव्यः भक्षितव्यः, अस्मि भवामि, कथं को वा प्रकारस्यात्।

राजा - अकारणपरित्यक्ते।[166] अनुशयतप्तहृदयस्तावदनुकम्प्यतामयं जनः [167]पुनर्दर्शनेन॥

---

[162] '(अङ्गुलीयकं विलोक्य)' इत्यधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

[163] 'कोमलबन्धुराङ्गुलिं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

[164] 'वीक्षते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'लक्षये' इति 'C' इति प्रकाशने पाठान्तरम्।

[165] 'आः अहं खलु' इति 'C' इति प्रकाशने अधिकः पाठः।

[166] 'अकारणपरित्यागा–' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'प्रिये' इति अधिकः पाठः 'B' इति प्रकाशने उपलभ्यते।

राजेति। राजा प्राह, अकारणपरित्यक्ते निर्हेतुकं विसृष्टे जिने विषये, अनुशयतप्तहृदयः पश्चात्तापसन्तप्तचेताः, अयं जनः, तावदिदानीम्, अनुकम्प्यतां दयाविषयः क्रियतां, पुनर्दर्शनेन पुनर्वीक्षणप्रदानेनेत्यर्थः।

(प्रविश्य [168]पटाक्षेपेण चित्रफलकहस्ता)

प्रविश्येति। पटाक्षेपेण यवनिकावस्त्रापकर्षणेन, चित्रफलकहस्ता हस्तविन्यस्त शकुन्तलालेख्यफलका चतुरिका, प्रविश्य प्राप्य, रङ्गस्थलमिति शेषः।

चतुरिका - इयं चित्रगता भर्त्री[169]। (इति चित्रफलकं दर्शयति)

चतुरिकेति। चतुरिका प्राह, किमिति, इयं परिदृश्यमाना, चित्रगता आलेख्यस्थिता युवतिः, भर्त्री स्वामिनी, इत्युक्त्वा, चित्रफलकं चित्रपटं, दर्शयति अवलोकयति।

विदूषकः - [170]साधु वयस्य! मधुरावस्थानदर्शनीयो भावानुप्रवेशः।
स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु॥

विदूषक इति। विदूषक आह, हे वयस्य सखे, साधु सम्यग्वर्तते, भावानुप्रवेशः भावस्य स्वभावस्य अनुप्रवेशः चित्रफलके विन्यासः, मधुरावस्था न दर्शनीयः मधुरावस्थानेन अतिरमणीयस्थित्या दर्शनीयः प्रेक्षणीयः, मे मम, दृष्टिर्दर्शनं, निम्नोन्नतप्रदेशेषु उन्नतानतप्रदेशेषु, स्खलति चलतीव विद्यते।

सानुमती - अहो एषा राजर्षेर्निपुणता। जाने सख्यग्रतो मे वर्तत इति॥

---

167 'स्वदर्शनेन' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

168 'अपटीक्षेपेण' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

169 'भट्टिनी' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

170 '(विलोक्य)' इति अधिकः पाठः 'B' इति प्रकाशने उपलभ्यते।

सानुमतीति सानुमती प्राह, एषा परिदृश्यमाना, राजर्षेर्दुष्यन्तस्य, निपुणता नैपुण्यम्, अहो आश्चर्यकरी, मे मम, सखी सहचरी, अग्रतः पुरतः, वर्तते तिष्ठतीति, जाने अवगच्छामि।

राजा -

श्लो॥ यद्यत्साधु न चित्रे स्यात्क्रियते तत्तदन्यथा।
तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम्॥14॥

राजेति। राजा भाषते, यद्यद्वस्तु चेतना चेतनात्मकं, साधु दर्शनीयं, न स्यात् न भवति, तत्तद्वस्तु, चित्रे आलेख्य कर्मणि, अन्यथा साधु यथा तथा, क्रियते विरच्यते, तथापि चित्रस्य साधुत्वसम्पादकत्वप्रसिद्धावपि, तस्याश्शकुन्तलायाः, लावण्यं सर्वावयवसौन्दर्यं, रेखया लेखेन, किञ्चिदीषदेव, अन्वितं सहितं न तु समग्रलावण्यान्वितमिति भावः।

सानुमती - सदृशमेवं[171] पश्चात्तापगुरोस्स्नेहस्यानवलेपनस्य च॥

सानुमतीति। सानुमती प्राह, एवम् उक्तप्रकारेण, पश्चात्तापगुरोः पश्चात्तापेन अनुतापेन, गुरोः अधिकस्य, स्नेहस्य प्रेम्णः, अनवलेपस्य गर्वाभावस्य च, सदृशं अनुरूपम्।

विदूषकः - भोः! इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते। सर्वाश्च दर्शनीयाः। कतमात्र तत्रभवती शकुन्तला॥

विदूषक इति। विदूषक आह, भो राजन्, इदानीम् अद्य, तिस्रः तत्र भवत्यः पूज्यास्स्त्रियः, दृश्यन्ते प्रेक्ष्यन्ते, चित्रफलक इति शेषः, सर्वाः समस्ताश्च, दर्शनीयाः सौन्दर्यविशिष्टा इत्यर्थः, अत्र आसां मध्ये, तत्र भवती उत्तमा शकुन्तला, कतमा का वा स्यात्।

---

171 'सदृशमेतत्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

सानुमती - अनभिज्ञः खल्वीदृशस्य रूपस्य [172]मोघदृष्टिरयं जनः ॥

सानुमतीति। सानुमती प्राह, ईदृशस्य एतादृशस्य। रूपस्य सौन्दर्यस्य।, मोघदृष्टिः अनिपुणदर्शनः, अयं जनः एष पुरुषः, अनभिज्ञः अप्राज्ञः खलु।

राजा - त्वं तावत्कतमां तर्कयसि ॥

राजेति। राजा प्राह। हे विदूषक, त्वं तावत् त्वन्तु, कतमां कां, तर्कयसि ऊहसे।

विदूषकः - तर्कयामि यैषा शिथिल[173]केशबन्धनोद्वान्तकुसुमेन केशान्तेनोद्भिन्नस्वेदबिन्दुना वदनेन विशेषतोऽपसृताभ्यां [174]बाहुभ्यामवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्तेवालिखिता। [175]एषा शकुन्तला। इतरे सख्याविति ॥

विदूषक इति। विदूषकः प्राह, या कान्ता, शिथिलकेशबन्धनोद्वान्तकुसुमेन शिथिलात् विस्रस्तात् केशबन्धनात् केशपाशात् उद्वान्तकुसुमेन गलितपुष्पेण, केशान्तेन धम्मिल्लेन, उद्भिन्नस्वेदबिन्दुना अङ्कुरितश्रमजलकणेन, वदनेन आननेन, विशेषतः अतिशयेन, अपसृताभ्यां श्रमेणप्रशिथिलाभ्यां, बाहुभ्यां भुजाभ्याम् उपलक्षिता, अवसेकस्निग्धतरुणपल्लवस्य अवसेकेन जलाभिषेकेण स्निग्धा मसृणाः तरुणाः कोमलाः पल्लवाः किसलयानि यस्य तस्य चूतपादपस्य रसालवृक्षस्य, पार्श्वे पक्षभागे, ईषत्परिश्रान्ता किञ्चित्परिश्रमं गतेव, आलिखिता चित्रफलके विन्यस्ता, एषा इयं शकुन्तला, इतरे ततोऽन्ये द्वे, सख्यौ सहचर्याविति, तर्कयामि ऊहे।

---

172 'मोहदृष्टिरयं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

173 'केश' इति पदं 'B' 'C' इति प्रकाशनयोः नोपलभ्यते।

174 'बाहाभ्याम् (उपलक्षिता)' इति 'C' इति प्रकाशने पाठान्तरम्।

175 'सा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'एषा तत्रभवती' इति 'C' इति प्रकाशने पाठान्तरम्।

राजा - निपुणो भवान्। अस्त्यत्र मे भावचिह्नम्॥

श्लो॥ स्विन्नाङ्गुलिविनिवेशो [176]रेखाप्रान्तेषु दृश्यते मलिनः।
अश्रु च कपोलपतितं [177]दृश्यमिदं [178]वर्णिकोच्छ्वासात्॥15॥

चतुरिके! अर्धलिखितमेतद्विनोदस्थानम्। [179]तस्माद्गच्छ। वर्तिकां तावदानय॥

राजेति। राजा भाषते, भवान् निपुणः निष्णातः, नि। "प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता" इत्यमरः, अत्र शकुन्तला प्रतिरूपे, मे मम भावचिह्नं भावस्य तल्लावण्यादिस्मरणजनितसात्त्विकभावस्य चिह्नम् अभिज्ञानम्, अस्ति विद्यते, तदेवोपपादयति, स्विन्नेत्यादि, रेखाप्रान्तेषु अङ्गोपाङ्गादि-विभागवैचक्षण्यसूचक-तत्तद्वर्णोचितारुणशुक्लनीलहरितादि-रेखापर्यन्तभागेषु, स्विन्नाङ्गुलिविनिवेशः स्विन्नाङ्गुलीनां नायिकास्मरणजनितस्वेदयुक्ताङ्गुलीनां विनिवेशः स्पर्शस्थानं, मलिनः स्वेदोदक-सम्पर्कवशात् मलीमसः, दृश्यते स्फुटं विभाव्यते, कपोलपतितं कपोले आलेख्यस्य गण्डस्थले, पतितं प्रसृतम्, अश्रु तदीयप्राप्तिदुर्घटत्वस्मरणजनितं नेत्रजलं च, वर्णिकोच्छ्वासात् वर्णिकानां नीलपीतादीनाम् उच्छ्वासात् उच्छूनत्वात्, इदम् अभिज्ञानं, दृश्यं लक्ष्यम्, अथ चतुरिकामाह, हे चतुरिके, एतत् पुरोवर्ति विनोदस्थानम्, अर्धलिखितं असम्पूर्णत्वेन लिखितं, तस्मात् अर्धलेखनात्, गच्छ याहि, वर्तिकां लेखनसामाग्रीं, तावदिदानीम्, आनय अत्र प्रापय।

---

176 'रेखोपान्तेषु' इति 'C' इति प्रकाशने पाठान्तरम्।

177 'लक्ष्यमिदम्' इति 'C' इति प्रकाशने पाठान्तरम्।

178 'वर्तिकोच्छ्वासात्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

179 'गच्छ' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'तस्माद्वेगाद्गच्छ' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

चतुरिका - आर्य माधव्य! अवलम्बस्व चित्रफलकम्।
[180]यावदागच्छामि॥

चतुरिकेति। चतुरिका प्राह, हे आर्य पूज्य, माधव्य तत्संज्ञिकविदूषक, चित्रफलकं शकुन्तलाया आलेख्यपटम्, अवलम्बस्व गृहाण, अहं यावत् यावता कालेन, आगच्छामि पुनरायामि तावदिति पूर्वेणान्वयः।

राजा - अहमेवैतदवलम्बे। (इति यथोक्तं करोति)

राजेति। राजा प्राह, एतच्चित्रफलकम्, अहमेव अवलम्बे धारयामि, इत्युक्त्वा, यथोक्तं करोति चित्रफलकं गृह्णातीत्यर्थः।

([181]निष्क्रान्ता चेटी)

निष्क्रान्तेति। चेटी चतुरिका, निष्क्रान्ता निर्गता वर्णिकानयानार्थमिति शेषः।

राजा - [182]अहं हि।

श्लो॥ साक्षात्प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां [183]मुहुरिमां बहुमन्यमानः।
स्रोतोवहां पथि निकामजलामतीत्य
जातस्सखे! प्रणयवान्मृगतृष्णिकायाम्॥16॥

---

180 'यावद्वर्णिकासमुद्गकं गृहीत्वागच्छामि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। एषः पाठः 'C' इति प्रकाशने लभ्यते।

181 '(चतुरिका निष्क्रान्ता)' इति 'C' इति प्रकाशने पाठान्तरम्।

182 '(निःश्वस्य)' इति अधिकः पाठः 'A' 'B' इति प्रकानयोः उपलभ्यते।
'अहं हिं' इत्येषः पाठः 'C' इति प्रकाशने नोपलभ्यते।

183 'पुनरिमां' इति 'A' 'B' इति प्रकानयोः पाठान्तरम्।
'महमिमां' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। राजा प्राह, अहं पूर्वम् इतः पूर्वं, साक्षात् प्रत्यक्षम्, उपगतां सम्प्राप्तां प्रियां शकुन्तलामपहाय त्यक्त्वा, चित्रार्पितां चित्रफलकलिखिताम्, इमां प्रियां मुहुः पुनः पुनः, बहुमन्यमानः गौरवास्पदीकुर्वन्, हे सखे मित्र, पथि मार्गे, निकामजलां परिपूर्णसलिलां, स्रोतोवहां नदीम्, अतीत्य अतिक्रम्य, मृगतृष्णिकायां मरुमरीचिकायां, प्रणयवान् प्रेमयुक्तः, जातो हि सम्पन्नोऽस्मि।

विदूषकः - (आत्मगतम्)। एषोऽत्र भवान्नदीमतिक्रम्य मृगतृष्णया[184] सङ्क्रान्तः॥

विदूषक इति। विदूषकः, आत्मगतं स्वगतं ब्रूते, अत्रभवान् पूज्यः, एष राजा, नदीं निम्नगाम् अतिक्रम्य अतीत्य, मृगतृष्णया मरीचकया, सङ्क्रान्त आक्रान्तः।

[185](प्रकाशम्) भोः [186]अपरं किमत्र लेखितव्यम्॥

प्रकाशमिति। विदूषक इत्यनुषज्यते, प्रकाशं प्रकटम् आहेति शेषः, भो राजन्, अत्र चित्रफलके, अपरमन्यत्, किं लेखितव्यं विन्यसनीयम् अस्तीति शेषः।

सानुमती - [187]यो यः प्रदेशस्सख्यामेऽभिरूपः। तं तमालिखितुकामो भवेत्॥

सानुमतीति। सानुमती प्राह, यो यः, प्रदेशो भागः, मे मम, सख्याः सहचर्याः अभिरूपः मनोज्ञः, तं तं प्रदेशम् आलिखितुकामः विन्यसितुमना, भवेत् सम्पद्येतेति सम्भावनायां लिङ्।

---

184 'मृगतृष्णिकां' इति 'A' 'B' इति प्रकानयोः पाठान्तरम्।
'सत्यं मृगतृष्णिकां' इति 'C' इति प्रकाशने पाठान्तरम्।

185 '(प्रकाशम्)' इत्येषः पाठः 'C' इति प्रकाशने नास्ति।

186 'वयस्य' इति 'C' इति प्रकाशने अधिकः पाठः।

187 'असंशयम्' इति 'C' इति प्रकाशने अधिकः पाठः।

राजा - श्रूयताम्।

श्लो॥ कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
[188]पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥17॥

राजेति। राजा ब्रवीति, हे सखे श्रूयताम् आकर्ण्यतां त्वयेति शेषः, कार्येत्यादि। सैकतलीनहंसमिथुना सैकतेषु नानाविधविहारोचितपुलिनेषु लीनानि विहारार्थं सङ्गतानि, हंसमिथुनानि चक्राङ्गद्वन्द्वानि यस्याः सा तथोक्ता, नि॥ "हंसास्तु श्वेतगरुतश्चक्राङ्गामानसौकस" इत्यमरः॥ मालिनी मालिन्याख्या, स्रोतोवहा नदी, कार्या लेखनीया, तां मालिनीं, अभितः पार्श्वप्रदेशेषु, वा। 'अभितः परित' इत्यादिना षष्ठ्यर्थे द्वितीया, निषण्णहरिणाः प्रविष्टमृगाः, पावनाः पवित्राः, गौरीगुरोः पार्वतीजनकस्य हिमाचलस्य, पादाः प्रत्यन्तपर्वताः, कार्या लेख्या इति वचनव्यत्यासेन सम्बन्धः, शाखालम्बितवल्कलस्य शाखासक्तचीरस्य, तरोः वृक्षस्य, अथः अथतत्प्रदेशे, कृष्णमृगस्य कृष्णसारस्य, शृङ्गे विषाणे, वामनयनं स्वकीयदक्षिणेतरनेत्रं, कण्डूयमानां विघर्षन्तीं, मृगीं कुरङ्गीं च, निर्मातुं रचयितुं, इच्छामि अभिलष्यामि।

विदूषकः - (आत्मगतम्)। [189]यथाहं पश्यामि। पूरयितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः॥

188 'पादान्ते निभृतं निषण्णचमरे गौरीगुरोः पावने' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

189 'यथा मन्त्रयति तथा तर्कयामि पूरयितव्यनेन चित्रफलकमाकृतिभिर्लम्बकूर्चानां तापसानामिति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'यद्येवं, नूनमनेन पूरयितव्यं चित्रफलकं लम्बकूर्चानां तापसानां सार्थेन।' इति 'C' इति प्रकाशने पाठान्तरम्।

विदूषक इति। विदूषकः, आत्मगतं स्वगतं प्राह, लम्बकूर्चानां लम्बमानशिखानां, तापसानां मुनीनां, कदम्बैः समूहैः, अनेन राज्ञा, पूरयितव्यं पूरणीयं, चित्रफलकम्, अहं यथा येन प्रकारेण, पश्यामि अवलोकयामि, तथा च करोतीति वितर्कः।

राजा - वयस्य। अन्यच्च शकुन्तलायाः [190]प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः॥

राजेति। राजा वक्ति, हे वयस्य सखे, अभिप्रेतम् अभिलषितम्, अन्यदितरच्च, शकुन्तलायाः प्रसाधनम् आभरणम्, अत्र चित्रफलके, अस्माभिः विस्मृतं स्मृतिं न गतम्।

विदूषकः - किमिव॥

विदूषक इति। विदूषकः प्राह, हे राजन्, किमिव तद्भूषणं किं वा भवेत्।

सानुमती - वनवासस्य [191]सौकुमार्यस्य च [192]यत्सदृशं भविष्यति॥

सानुमतीति। सानुमती ऊहते। वनवासस्य अरण्यनिवासस्य, सौकुमार्यस्य मार्दवस्य च, यत्सदृशम् अनुरूपं, भविष्यति सम्पत्स्यते, तदेव लेखितव्यं विस्मृतमिति वाक्याध्याहारः।।

राजा -

श्लो॥ कृतं न कर्णार्पितबन्धनं सखे!

---

190 'प्रसाधनमभिप्रेतमस्माभिः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
अपि च 'प्रसाधनमभिप्रेतमत्रालिखितुं विस्मृतमस्माभिः' इति 'A' इति प्रकाशने पाठान्तरत्वेनोपलभ्यते।
'प्रसाधनमत्र विस्मृतमस्माभरभिप्रेतम्।' इति 'C' इति प्रकाशने पाठान्तरम्।

191 'सौकुमार्यस्य विनयस्य च' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

192 'यदनुसदृशं' इति 'C' इति प्रकाशने पाठान्तरम्।

शिरीषमागण्डविलम्बिकेसरम्।
न वा शरच्चन्द्रमरीचिकोमलं
मृणालसूत्रं रचितं स्तनान्तरे॥18॥

राजेति। राजा समाधत्ते, कृतमिति, हे सखे मित्र माधव्य, कर्णार्पितबन्धनं कर्णे श्रोते अर्पितं न्यस्तं बन्धनं वृन्तं यस्य तत्तथोक्तम्, आगण्डविलम्बिकेसरम् आगण्डं कपोलपर्यन्तं विलम्बिनि लम्बमानानि केसराणि किञ्जल्का यस्य तत्तथोक्तं, शिरीषं पुष्पं, न कृतं न रचितं, शरच्चन्द्रमरीचिकोमलं शारदचन्द्रकिरणवन्मञ्जुलं, मृणालसूत्रं बिसन्त्वाभरणं, स्तनान्तरे वक्षस्थले वा, न रचितं न लिखितम्, उभयत्रापि चित्रगतप्रतिमाया इति शेषः।

विदूषकः - भोः किं नु [193]तत्रभवती [194]रक्तकुवलयपल्लवशोभिनाग्रहस्तेन मुखमपवार्य चकितचकितेव स्थिता॥

विदूषक इति। विदूषकः प्राह, तत्रभवती पूज्या शकुन्तला, रक्तकुवलयपल्लवशोभिना अरुणोत्पल किलसयतुल्यप्रकाशेन, अग्रहस्तेन हस्ताग्रेण, मुखमाननम्, आवार्य आच्छाद्य, चकितचकितेन भीतभीतेव, स्थिता विद्यते स्म, किं नु किं वा निमित्तं भवेत्।

(सावधानं निरूप्य, दृष्ट्वा) आः एष दास्याः पुत्रः
कुसुमरसपाटच्चरस्तत्रभवत्या वदनमभिलङ्घते[195] मधुकरः॥

---

193 'खलु' इति 'C' इति प्रकाशने अधिकः पाठः।

194 'रक्तकुवलयदलशोभिनाग्रहस्तेन मुखमावृत्य चकितचकिता स्थिता।' इति 'C' इति प्रकाशने पाठान्तरम्।

195 'वदनमभिलङ्घति' इति 'A' इति प्रकाशने पाठान्तरम्।
'दुष्ट' इति 'C' इति प्रकाशने अधिकः पाठः।

सावधानमिति। विदूषकः, सावधानम् अप्रमादं यथा तथा, निरूप्य विमृश्य, दृष्ट्वा प्रेक्ष्य आहेति शेषः, किमिति, दास्याः पुत्रः चेट्यास्सुतः, षष्ठ्या आक्रोश इति अलुक्, कुसुमरसपाटच्चरः मकरन्दचोरः, एष मधुकरः अयं भृङ्गः, तत्रभवत्याश्शकुन्तलायाः, वदनं मुखम्, अभिलङ्घते अभिमुखमागच्छति, आ इति कोपे, नि।। "आस्तुस्यात्कोपपीडयो"रित्यमरः।।

राजा - ननु [196]वार्यतामेष धृष्टः ॥

राजेति। राजा प्राह, ननु विदूषक, धृष्टः प्रगल्भः, एष मधुकरः, वार्यतां ते निरस्यतां त्वयेति शेषः।

विदूषकः - भवानेवाविनीतानां शासितास्य[197] वारणे प्रभविष्यति ॥

विदूषक इति। विदूषकः प्राह, अविनीतानां दुष्टानां, शासिता शिक्षकः, भवानेव, अस्य मधुकरस्य, वारणे निस्सारणे, प्रभविष्यति शक्ष्यति।

राजा - युज्यते। अयि भोः कुसुमलताप्रियातिथे! किमत्र परिपतनखेदमनुभवसि।

श्लो॥ एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति [198]मधुकरी न खलु मधु [199]विना त्वया पिबति॥19॥

राजेति। राजा प्राह युज्यते उपपद्यते, अविनीतानुशासनमस्माकमेवयुक्तमिति भावः, तदेवाह, अयीत्यादिना, कुसुमलताप्रियातिथे कुसुमलतानां पुष्पवल्लीनां प्रियातिथे प्रेमास्पदीभूतागन्तुक,

---

196 'निवार्यतामेष….' इति 'C' इति प्रकाशने पाठान्तरम्।

197 'अविनीतानुशास्यस्य' इति 'C' इति प्रकाशने पाठान्तरम्।

198 'भ्रमरी' इति 'A' इति प्रकाशने पाठान्तरम्।

199 'मधु त्वां विना पिबति' इति 'A' इति प्रकाशने पाठान्तरम्।

अयि भोः पूज्यमधुकर, अत्र शकुन्तला मुखे, परिपतनखेदं प्रसरणश्रमं, किमनुभवसि किमर्थं प्राप्नोषि, एषेति, कुसुमनिषण्णा पुष्पस्थिता, अनुरक्ता प्रेमयुक्ता, एषा मधुकरी पुरोवर्तिनी भृङ्गी, तृषिता पिपासितापि सती, भवन्तं त्वां, प्रतिपालयति प्रतीक्षते खलु यतो हेतोः, त्वया विना भवन्तमन्तरेण, मधु मकरन्दं, न पिबति नास्वादते, ततः प्रतिपालयतीति पूर्वेणान्वयः।

सानुमती - [200]अद्याभिजातं खल्वेष वारितः ॥

सानुमतीति। सानुमती वक्ति, अद्येदानीम्, एष मधुकरः, अभिजातं समञ्जसं, वारितः प्रतिषिद्धः खलु।

विदूषकः - प्रतिषिद्धापि [201]वामैषा जातिः ॥

विदूषक इति। विदूषकः प्राह, एषा जातिः मधुकरजातिः, प्रतिषिद्धा निवारिताऽपि, वामा वक्रस्वभावा।

राजा - एवं भो न मे [202]शासने तिष्ठसि। श्रूयतां तर्हि सम्प्रति।

श्लो ॥ अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं [203]स्पृशसि चेद्भ्रमर! प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥20॥

राजेति। राजा कथयति, किमिति, भोः षट्पद, एवं मृदुमार्गेण, मे मम, शासने नियोगे, न तिष्ठसि न वर्तसे चेत्, तर्हि तस्मिन्पक्षे, सम्प्रति इदानीं, श्रूयताम्

---

200 'आर्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'अद्य खल्वभिजातं वारित एषः' इति 'C' इति प्रकाशने पाठान्तरम्।

201 'वामा खल्वेषा' इति 'C' इति प्रकाशने पाठान्तरम्।

202 'शासनमनुतिष्ठसि' इति 'C' इति प्रकाशने पाठान्तरम्।

203 'दशसि' इति 'A' इति प्रकाशने पाठान्तरम्।

आकर्ण्यतां, तीक्ष्णशासनमिति शेषः, तदेवाह, अक्लिष्टेत्यादि, अक्लिष्टबालतरुपल्लवलोभनीयम् अनुपहततरुणपादपकिसलयरमणीयम् अत एव रतोत्सवेषु नानाविधक्रीडोत्सवसमयेषु, हे भ्रमर भृङ्ग, मया सदयं सकरुणमेव, पीतम् आस्वादितं, प्रियायाः प्रेयस्याः, बिम्बाधरं बिम्बतुल्यमधरोष्ठं, स्पृशसि चेत् सम्मृशसि यदि, तदा त्वां भवन्तं, कमलोदरबन्धनस्थम् कमलोदरं नलिनाभ्यन्तरमेव बन्धनं कारागृहं तस्मिंस्तिष्ठतीति तथोक्तं, कारयामि कर्तुं शक्नोमि, राजा कालस्य कारणमिति न्यायादित भावः।

विदूषकः - एवं तीक्ष्णदण्डस्य किं न भेष्यति।

विदूषक इति। विदूषक आह, एवम् अनेन प्रकारेण, तीक्ष्णदण्डस्य कठिनशासनस्य, किं किमर्थं वा, न भेष्यति भीतिं न प्राप्स्यतीति परिहासोक्तिः।

(प्रहस्य आत्मगतम्) एष तावदुन्मत्तः। अहमप्येतस्य सङ्गेनेदृशवचन[204] इव संवृत्तः॥

प्रहस्येति। विदूषक इत्यनुषज्यते, प्रहस्य हासं कृत्वा, आत्मगतं स्वगतं आहेति शेषः, एष राजा, तावदिदानीम्, उन्मत्तः अस्वस्थचित्तः, अहमपि, एतस्य अमुष्य राज्ञः, सङ्गेन सहवासेन, ईदृशवचनः एतादृषोक्तिरिव, संवृत्तः जातः।

(प्रकाशम्) भोः चित्रं खल्वेतत्॥

प्रकाशमिति। विदूषकः, प्रकाशं प्रकटं सुव्यक्तमिति यावत्, आहेति शेषः, भो राजन्, एतत्पुरोवर्ति भृङ्गादिकं, चित्रं खलु अलेख्यं हि न तु वास्तवमिति भावः।

राजा - [205]कथं चित्रम्॥

---

204 'सङ्गेनेदृशवर्णः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'संसर्गेणेदृशोऽस्मि संवृत्तः।' इति 'C' इति प्रकाशने पाठान्तरम्।

205 'कथम्' इत्येव पाठः 'C' इति प्रकाशने लभ्यते।

राजेति। राजा प्राह, कथं चित्रम् एतच्चित्रमिति भवता कथं ज्ञायत इत्यर्थः।

सानुमती - अहमपीदानीम् अनवगतार्था। किं पुनर्यथा लिखितानुभाव्येषः॥

सानुमतीति। सानुमती वदति, अहमपि अहं दिव्यज्ञानसम्पन्नापि, इदानीम् अद्य, अनवगतार्था अज्ञाततत्त्वार्था अस्मीति शेषः, यथालिखितानुभावी यथालिखितं चित्रविन्यस्तमनतिक्रम्य, अनुभवति जानातीति तथोक्तः, एष राजा, किं पुनः किमु वक्तव्यम्।

राजा - वयस्य! किमिदमनुष्ठितं पौरोभाग्यम्।

श्लो॥ दर्शनसुखमनुभवतस्साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता॥21॥

(इति बाष्पं [206]विहरति)

राजेति। राजा प्राह, हे वयस्य सखे, इदम् एतत्, पौरोभाग्यं दोषैकदर्शित्वं नि।। "दोषैकदृक्पुरोभागी"त्यमरः। किं किमर्थम्, अनुष्ठितं रचितं, दर्शनेति तन्मयेन शकुन्तलामयेन, हृदयेन मनसा, साक्षात् तत्वत इव, दर्शनसुखं वीक्षणानन्दं, अनुभवतः प्राप्नुवतः, मे मम, कान्ता प्रिया, स्मृतिकारिणा स्मरणं जनयता त्वया, पुनरपि, चित्रीकृता चित्ररूपा कृता, इत्युक्त्वा, बाष्पम् अश्रुजलं, विहरति विक्षिपति।

सानुमती - पूर्वापरविरोध्यपूर्व एष [207]विरहमार्गः॥

---

206 'विसृजति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'रोदिति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'विकिरति' इति 'C' इति प्रकाशने पाठान्तरम्।

207 'विधानमार्गः' इति 'C' इति प्रकाशने पाठान्तरम्।

सानुमतीति। सानुमती प्राह, पूर्वापरविरोधी आद्यप्रान्तविसंवादी, एष विरहमर्गः अयं विश्लेषप्रकारम्, अपूर्वः लोकोत्तरः।

राजा - वयस्य! [208]कथमेवमविश्रान्तदुःखमनुभवामि।

श्लो॥ प्रजागरात्खिलीभूतस्तस्यास्स्वप्ने [209]समागमः।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥22॥

राजेति। राजा कथयति, हे वयस्य सखे, अविश्रान्तदुःखं सन्ततखेदम्, एवम् अनया रीत्या, कथं केन प्रकारेण अनुभवामि प्राप्नोमि, तत्प्रकारमेवाह, प्रजागरादिति, स्वप्ने स्वप्नावस्थायां, तस्याः प्रियायाः, समागमः समावेशः, प्रजागरात् निद्राक्षयात्, खिलीभूतः अपरिचितीभूतः, बाष्पः अश्रुजलं तु, चित्रगताम् आलेख्यलिखितामपि, एनां प्रियशकुन्तलां, द्रष्टुं वीक्षितुं, न ददाति न दास्यतीत्यर्थः।

सानुमती - सर्वथा [210]प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः॥

सानुमतीति। सानुमती प्राह, सर्वथा पूर्वोक्तसमस्तप्रकारैः, त्वया भवता, शकुन्तलायाः, प्रत्यादेशदुःखं निरसनप्रयुक्तखेदः, प्रमार्जितं शोधितम्।

चतुरिका - (प्रविश्य) जयतु जयतु भर्ता। वर्तिकाकरण्डकं गृहीत्वेतोमुखं प्रस्थितास्मि॥

चतुरिकेति। चतुरिका प्रविश्य रङ्गस्थलं प्राप्य कथयति, भर्ता पोषकः, जयतु जयतु सर्वोत्कर्षेण वर्तताम् आदरादिद्वरुक्तिः, अहं वर्तिकाकरण्डं

---

208 'कथमविश्रामं दुःखमनुभवामि' इति 'A' इति प्रकाशने पाठान्तरम्।
'कथमविश्रामदुःखमनुभवामि' इति 'C' इति प्रकाशने पाठान्तरम्।

209 'स्वप्नसमागमः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

210 'वयस्य' इति 'C' इति प्रकाशने अधिकः पाठः।

वर्तिकापेटिकां, गृहीत्वा ग्रहणं कृत्वा, इतोमुखं भवदधिष्ठितोद्यानाभिमुखं, प्रस्थितास्मि प्रयातास्मि।

राजा - किं च॥

राजेति। राजा प्राह, किञ्च अनन्तरं किं जातमित्यर्थः, निपातानामनेकार्थत्वाच्चशब्दस्य आनन्तर्यार्थकत्वं बोध्यम्।

चतुरिका - [211]स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्या अहमेवार्यपुत्रस्य उपनेष्यामीति[212] सबलात्कारं गृहीतः॥

चतुरिकेति। चतुरिका प्राह, सः वर्तिकाकरण्डकः, अन्तरा मध्यमार्गे, तरलिकाद्वितीयया तरलिकानामक-परिचारिका-सहिताया, वसुमत्या वसुमत्यभिख्यया, देव्या महिष्या, अहमेव, आर्यपुत्रस्य भर्तुः, उपनेष्यामि प्रापयामि, इति एवमुक्त्वा, मे मम, हस्तात् करात्, सबलात्कारं बलात्कारसहितं यथा तथा, गृहीतः स्वीकृतः।

विदूषकः - दिष्ट्या त्वं मुक्ता॥

विदूषक इति। विदूषकः प्राह, हे चतुरिके, त्वं, दिष्ट्या दैववशेन, मुक्ता त्यक्ता देव्येति शेषः।

चतुरिका - [213]यावद्देव्या विटपलग्नमुत्तरीयं तरलिका मोचयति। तावन्मया निर्वाहित आत्मा॥

चतुरिकेति। चतुरिका वक्ति, तरलिकानाम परिचारिका, विटपलग्नं शाखावसक्तम्, उत्तरीयं संव्यानं, नि।। "संव्यानमुत्तरीयञ्चे"त्यमरः, यावत् यावता

211 'सोऽस्मद्धस्ता....' इति 'C' इति प्रकाशने पाठान्तरम्।

212 'अपनेष्यामीति' इति 'A' इति प्रकाशने पाठान्तरम्।

213 'यावद्विटपलग्नमु.....देव्यास्तर.....निर्वासित .....।' इति 'C' इति प्रकाशने पाठान्तरम्।

कालेन, देव्याः महिष्याः, मोचयति त्याजयति, तावत् तावता कालेन, मया आत्मा देहः, निर्वाहितः संरक्षितः।

राजा - वयस्य! उपस्थिता देवी बहुमानगर्विता च। भवानिमां प्रतिकृतिं रक्षतु॥

राजेति। राजा ब्रूते, हे वयस्य मित्र, बहुमानगर्विता बहुमानेन राज्ञो महादरेण गर्विता अभिमानयुक्ता, देवी च, उपस्थिता समागता, भवान् इमां पुरोवर्तिनीं, प्रतिकृतिं चित्रफलकं, रक्षतु अवतु, देव्याः न दर्शयेत्यर्थः।

विदूषकः - आत्मानमिति [214]भण॥

विदूषक इति। विदूषकः प्राह, हे राजन् आत्मानं स्वम्, इति रक्षत्विति, भण ब्रूहि।

(चित्रफलकमादायोत्थाय च)[215] यदि भवानन्तःपुरकालकूटात्[216] मुच्यते[217]। ततो मां मेघप्रतिच्छन्दे प्रासादे शब्दय[218]। (इति द्रुतपदं निष्क्रान्तः)

चित्रफलकमिति। विदूषकः, चित्रफलकम् आलेख्यस्थानम्, आदाय गृहीत्वा उत्थाय उत्थितो भूत्वा च, आह, भवान् अन्तःपुरकालकूटात्

---

214 'फण' इति 'C' इति प्रकाशने पाठान्तरम्।

215 एषः पाठः 'A' इति प्रकाशने नोपलभ्यते।
'यदि भवानन्तःपुरकूटवागुरातो मोक्ष्यते तदा मां मेघप्रतिच्छन्दे प्रासादे शब्दायय।' इति 'B' इति प्रकाशने पाठान्तरम्।

216 'कलहान्मुच्यते' इति 'C' इति प्रकाशने पाठान्तरम्।

217 'मोक्ष्यते' इति 'A' इति प्रकाशने पाठान्तरम्।

218 'शब्दायस्व, शब्दापय, शब्दय, शब्दायिष्यते' इत्यादि पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।
'शब्दापय' इति 'C' इति प्रकाशने पाठान्तरम्।

अवरोधवधूजनविषात्, मुच्यते यदि विमुक्तश्चेत्, ततः तर्हि, मां मेघप्रतिच्छन्दे तन्नामके प्रासादे महाराजभवने, शब्दय आह्वय, इत्युक्त्वा, द्रुतपदं शीघ्रकृतपादन्यासं यथा तथा, निष्क्रान्तो निर्गतः।

सानुमती - अन्यसङ्क्रान्तहृदयोऽपि प्रथमसम्भावनामपेक्षते।
[219]अतिशिथिलसौहृद इदानीमेषः ॥

सानुमतीति। सानुमती प्राह, अन्यसङ्क्रान्तहृदयोऽपि इतरस्त्रीसक्तचित्तोऽपि, प्रथमसम्भावनां प्राचीनगौरवम्, अपेक्षते इच्छति, इदानीमद्य, एष राजा, अतिशिथिलसौहृदः अतिमात्रक्षीणसौहार्दः।

प्रतीहारी - (प्रविश्य पत्त्रहस्ता) जयतु जयतु देवः ॥

प्रतीहारीति। प्रतीहारी दौवारिकी, पत्त्रहस्ता करधृतपत्रिकासती, प्रविश्य राजनिकटं प्राप्य, प्राह, देवो राजा, जयतु जयतु सर्वोत्कृष्टो भवतु आदराद्द्विरुक्तिः।

राजा - वेत्रवति! न खल्वन्तरा दृष्टा त्वया देवी ॥

राजेति। राजा प्राह, हे वेत्रवति, अन्तरा मध्ये, त्वया देवी वसुमती, न दृष्टा खलु न वीक्षिता किम्।

प्रतीहारी - अथ किम्। [220]पत्त्रहस्तां मां दृष्ट्वा[221] प्रतिनिवृत्ता ॥

प्रतीहीरीति। प्रितीहारी प्राह, अथ किं तथैवेत्यर्थः, देवी, पत्त्रहस्तां करगतपत्रिकां मां, दृष्ट्वा वीक्ष्य, प्रतिनिवृत्ता परावृता।

---

219 'शिथिल' इति 'A' इति प्रकाशने पाठान्तरम्।
'सौहार्दं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'अतोऽशिथिल सौहृद एष इदानीम्' इति 'C' इति प्रकाशने पाठान्तरम्।

220 'भट्टिनी' इति 'C' इति प्रकाशने अधिकः पाठः।

221 'प्रेक्ष्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

राजा - कार्यज्ञा कार्योपरोधं मे परिहरति॥

राजेति। राजा ब्रवीति, कार्यज्ञा कृत्यवेदिनी देवी, मे मम, कार्योपरोधं कार्यप्रतिबन्धं, परिहरति त्यजति।

प्रतीहारी - देव! अमात्यो विज्ञापयति। अर्थजातस्य गणनाबहुलतयैकमेव पौरकार्यमवेक्षितं तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति॥

प्रतीहारीति। प्रतीहारी प्राह, हे देव राजन्, अमात्यः मन्त्री, अर्थजातस्य धनसमूहस्य, गणना बहुशतया गणनया अधिकत्वेन, अद्येदानीम्, एकमेव पौरकार्यं पौराणां विवादपदम्, अवेक्षितं विचारितं, देवः राजा, पत्रारूढं पत्रे लिखितं, तत् पौरकार्यं, प्रत्यक्षीकरोतु स्वयं साक्षात्पश्यतु, इति एवं प्रकारेण, विज्ञापयति विज्ञप्तिं करोति।

राजा - इतः [222]पत्रिकां दर्शय॥

राजेति। राजा प्राह, हे प्रतिहारि, इतोऽत्र, पत्रिकां अमात्यप्रेषितं पत्रं, दर्शय प्रकाशय।

(प्रतीहार्युपनयति)

प्रतीहारीति। प्रतीहारी। उपनयति दर्शयति।

राजा - (अनुवाच्य) कथम्। समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसनेन[223] विपन्नः। अनपत्यश्च किल [224]तपस्वी। 'राजगामी तस्यार्थसञ्चय' इत्येतदमात्येन लिखितम्। कष्टं खल्वनपत्यता।

222 'पत्रं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

223 'नौव्यसने' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

224 'तरस्वी' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[225]बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम्। [226]विचार्यतां यदि काचिदापन्नसत्वापि[227] तस्य [228]भार्यासु स्यात्॥

राजेत्यादि। राजा, अनुवाच्य वाचयित्वा, कथं केन प्रकारेणेति चेत्, समुद्रव्यवहारी नाविकव्यवहारी, धनमित्रो नाम धनमित्राख्यः, सार्थवाहः कश्चन वणिक्, नौव्यसने तरणि विरत्यां, विपन्नः आपन्नः, सः अनपत्यः सन्ततिविहीनः, तपस्वी दीनश्च, तस्य वणिजः, अर्थसञ्चयः धनसमूहः, राजगामी राजानं गमिष्यति, इत्येवं प्रकारेण, अमात्येन सचिवेन, एतत् इदं लिखितम्, अनपत्यता सन्ततिराहित्यं, कष्टं खलु कृच्छ्रं हि, तत्रभवता वणिजा, बहुधनत्वात् महाधनसम्पन्नत्वात्, बहुपत्नीकेन अनेकपत्नी सहितेन, भवितव्यं भाव्यम्, तस्य वणिजः, भार्यासु कलत्रेषु मध्ये, यदि काचिदपि भार्या, आपन्नसत्वा गर्भिणी, स्यात् भवेत्, विचार्यतां परिशील्यताम् अमात्येनेति शेषः।

प्रतीहारी - देव। [229]इदानीमेव साकेतस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायास्य श्रूयते॥

प्रतीहारीति। प्रतीहारी कथयति, हे देव राजन्, इदानीमद्यैव, साकेतस्य साकेतनामकस्य, श्रेष्ठिनो नायकस्य वणिजः, दुहिता पुत्री, अस्य विपन्नस्य, जाया भार्या, निर्वृत्तपुंसवना निष्पन्नपुंसवनाख्यगर्भिणी संस्कारविशेषा, श्रूयते श्रुता भवति।

---

225 'वेत्रवति' इति 'B' 'C' इति प्रकाशनयोः अधिकः पाठः।
'महा...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'महाधन....' इति 'C' इति प्रकाशने पाठान्तरम्।

226 'विचीयताम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

227 'काचिदापन्नसत्वा' इत्येव पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

228 'भार्या' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'भार्या स्यात्।' इति 'C' इति प्रकाशने पाठान्तरम्।

229 'इदानीं तस्य जायानां मध्ये साकेतश्रेष्ठिनो दुहिता निर्वृत्तपुंसवना श्रूयते।' इति 'C' इति प्रकाशने पाठान्तरम्।

राजा - ननु गर्भः पित्र्यं [230]रिक्थमर्हति। गच्छ एवममात्यं ब्रूहि॥

राजेति। राजा प्राह, ननु प्रतीहारि, गर्भः सुतः, पित्र्यं पितृसम्बन्धि, रिक्थं धनं नि।। "रिक्थमृक्थं धनं वस्वि"त्यमरः। अर्हति अनुभवितुं योग्यो भवति, गच्छ याहि, एवमनेन प्रकारेण, अमात्यं मन्त्रिणं, ब्रूहि वद।

प्रतीहारी - यद्देव आज्ञापयति॥ (इति प्रस्थिता[231])

प्रतिहीरीति। प्रतीहारी द्वारपालिका वक्ति, देवो राजा, यत् कार्यम्, आज्ञापयति अनुशास्ति तत्करोमीति वाक्यशेषः, इत्युक्त्वा, प्रस्थिता निर्गता।

राजा - एहि तावत्॥

राजेति। राजा ब्रूते, हे प्रतिहारि, एहि तावत् पुनरागच्छेत्यर्थः।

प्रतीहारी - इयमस्मि॥

प्रतीहारीति। प्रतीहारी वदति, इयमहम्, अस्मि समागता भवामि।।

राजा - किमनेन सन्ततिरस्ति नास्तीति।

श्लो॥ येन येन वियुज्यन्ते प्रजास्स्निग्धेन बन्धुना।
स स पापादृते तासां [232]दुष्यन्त इति घुष्यताम्॥23॥

राजेति। राजा कथयति, सन्ततिः सन्तानः, अस्ति वर्तते, नास्ति न विद्यते, इत्यनेन विचारणेन, किं प्रयोजनम्, येनेति, प्रजाः जनाः, स्निग्धेन प्रेमयुक्तेन, येन येन पुत्रभ्रात्रादिना, बन्धुना स्वजनेन, वियुज्यन्ते कालवशात् विश्लिष्टाभवन्ति, तासां प्रजानां, पापादृते पापकृत्यं विना, स स जनः पुत्रभ्रात्रादिः. दुष्यन्तः दुष्यन्तपार्थिव एवेति, घुष्यतां पटहध्वनिपूर्वकं घोषणा क्रियताम्।

---

230 'अर्थमर्हति।' इति 'C' इति प्रकाशने पाठान्तरम्।

231 'इति निष्क्रान्ता' इति 'C' इति प्रकाशने पाठान्तरम्।

232 'दुःषन्त' इति 'A' इति प्रकाशने पाठान्तरम्।

प्रतीहारी - एवं नाम घोषयितव्यम्॥

प्रतीहारीति। प्रतीहारी प्राह, एवं राजोक्तप्रकारेण, घोषयितव्यं नाम घोषणा कार्या भवेत्॥

(निष्क्रम्य। पुनः प्रविश्य) काले प्रवृष्टमिवाभिनन्दितं देवस्य शासनम्[233]॥

निष्क्रम्येति। प्रतीहारी, निष्क्रम्य राजनिकटान्निर्गत्य, पुनः भूयः, प्रविश्य प्राप्य आहेति शेषः, देवस्य राज्ञः, शासनमाज्ञा, काले योग्यावसरे, प्रवृष्टं प्रकृष्टवर्षमिव, अभिनन्दितं परितोषितं सर्वैरित शेषः।

राजा - ([234]दीर्घमुष्णं च निश्श्वस्य) एवं भोः! सन्ततिच्छेदनिरवलम्बानां [235]कुलानां मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ति[236]। ममाप्यन्ते [237]पुरुवंशश्रीरकाल इवोप्तबीजा भूरेवं वृत्तान्तः॥

राजेति। राजा, दीर्घं विस्तृतम्, उष्णं सतापञ्च, निश्श्वस्य निश्श्वासं कृत्वा प्राह, भोः प्रतिहारि, एवमनेन प्रकारेण, सन्ततिच्छेदनिरवलम्बानां सन्ततिच्छेदेन सन्तानाभावेन निरवलम्बानां निराश्रयाणां, कुलानां वंशानां, मूलपुरुषावसाने मूलपुरुषस्य वंशप्रवृत्तिहेतुभूतस्य जनस्य अवसाने अन्ते, सम्पदः श्रियः, परम् अन्यम्, उपतिष्ठन्ति प्राप्नुवन्ति, मम अन्ते अवसानेऽपि, पुरुवंशश्रीः पुरुराजान्वयसम्पत्तिः, अकाले अयोग्यसमये, उप्तबीजा निक्षिप्तधान्यादिबीजा, भूः पृथिवीव, एवं वृत्ता इत्थं भूतचरित्रा।

---

233 'शासनममात्येन' इति 'C' इति प्रकाशने पाठान्तरम्।

234 'दीर्घं निश्वस्य' इति 'C' इति प्रकाशने पाठान्तरम्।

235 'कुलनां' इत्ययं शब्दः 'C' इति प्रकाशने नोपलभ्यते।

236 '......पतिष्ठन्ते' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

237 'पुरुवंशश्रिय' इति 'B' इति प्रकाशने पाठान्तरम्। 'पूरुवंश श्रियोऽप्येष एव वृत्तान्तः।' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रतीहारी - प्रतिहतममङ्गलम्॥

प्रतीहारीति। प्रतीहारी वक्ति, अमङ्गलं सन्तानाभावरूपमशिवं, प्रतिहतं निवारितम् अस्त्वितिशेषः।

राज - धिङ्मामुपस्थितश्रेयोऽवमानिनम्॥

राजेति। राजा ब्रवीति। उपस्थितश्रेयोऽवमानिनं संसिद्धाभ्युदयपरिभाविनं मां, धिक् अहं निन्दनीय इत्यर्थः।

सानुमती - असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा॥

सानुमतीति। सानुमती प्राह, अनेन राज्ञा, सखीम् अस्मत्सहचरीं शकुन्तलामेव, हृदये मनसि, कृत्वा उद्दिश्येत्यर्थः। आत्मा स्वयं, निन्दितः धिङ्गामित्यादिना गर्हितः, असंशयम् अत्रार्थे संशयो नास्ति ।

राजा -

श्लो॥ संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तबीजा॥24॥

राजेति। राजा प्राह, संरोपित इत्यादि, मया कुलप्रतिष्ठा वंशस्थितिकारणीभूता, अत एव धर्मपत्नी धर्मतो भार्याशकुन्तला, आत्मनि स्वस्मिन् संरोपिते संस्थापिते सत्यपि, काले योग्यकाले, उप्तबीजा संरोपितधान्यादिबीजा, अत एव महते विस्तृताय, फलाय सस्याय, कल्पिष्यमाणा सम्पत्स्यमाना, वसुन्धरा भूमिरिव, त्यक्ता विसृष्टा नाम।

सानुमती - अपरिच्छिन्नेदानीं ते सन्ततिर्भविष्यति॥

सानुमतीति। सानुमती प्राह, ते तव, सन्ततिस्सन्तानः, अपरिच्छिन्ना विच्छेदशून्या, भविष्यति सम्पत्स्यते।

चतुरिका - (जनान्तिकम्) अये! अनेन सार्थवाहवृत्तान्तेन [238]विगुणोद्वेगो भर्ता। एनमाश्वासयितुं मेघप्रतिच्छन्दादार्यं माधव्यं गृहीत्वागच्छ॥

चतुरिकेति। चकुरिका, जनान्तिकम् इतरैर्यथा न श्रुतं भवति तथा आहेति शेषः, अये हे प्रतिहारि, अनेन मन्त्रिज्ञापितेन, सार्थवाहवृत्तान्तेन वणिग्वार्तया, भर्ता राजा, विगुणोद्वेगः विगुणः विशेषावृत्तः उद्वेगो भयं यस्य स तथोक्तम् अतिशयितभय इति यावत्, एनं भर्तारम्, अश्वासयितुं समनसं कर्तुं प्रसादयितुमिति यावत्, मेघप्रतिच्छन्दात् मेघप्रतिच्छन्दनामकप्रासादात्, आर्यं पूज्यं, माधव्यं विदूषकं, गृहीत्वा आदाय, आगच्छ आयाहि।

प्रतीहारी - सुष्ठु भणसि। (इति निष्क्रान्ता)

प्रतीहारीति। प्रतीहारी वक्ति, सुष्ठु सम्यक्, भणसि वदसि, इत्युक्त्वा प्रतीहारी, निष्क्रान्ता निर्गता।

राजा - अहो दुष्यन्तस्य संशयमारूढाः[239] पिण्डभाजः।[240]

श्लो॥ अस्मात्परं बत [241]यथाश्रुति [242]सम्भृतानि
को नः कुले निवपनानि [243]नियच्छतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं

---

238 'विमनायते' इति 'C' इति प्रकाशने पाठान्तरम्।

239 'पितरः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

240 'कुतः' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

241 'यथास्मृति' इति 'A' इति प्रकाशने पाठान्तरम्।

242 'संहितानि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

243 'करिष्यतीति' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

[244]धौताश्रुशेषमुदकं पितरः पिबन्ति॥25॥

(इति मोहमुपागतः[245])

राजेति। राजा ब्रूते, दुष्यन्तस्य पिण्डभाजः पितरः, संशयं सन्देहम्, आरूढाः प्राप्ताः, अहो आश्चर्यम्, अस्मादिति, अस्मात् दुष्यन्तात्, परमन्तरं, नः अस्माकं, कुले वंशे, यथाश्रुति यथाशास्त्रं, सम्भृतानि सम्पादितानि, निवपनानि तर्पणजनानि, कः पुरुषः, नियच्छति ददाति, बतेति खेदे, इत्येवमालोच्य, पितरः कव्याशनाः, प्रसूतिविकलेन सन्ततिरहितेन, मया, प्रसिक्तं प्रस्नुतं, धौताश्रुशेषं धौतं क्षालितम् अश्रु नेत्रजलं येन तत्तथोक्तं, तस्माच्छेषमवशिष्टम्, उदकं तर्पणोदकं, पिबन्ति धयन्ति, इत्युक्त्वा, मोहं मूर्छाम् उपगतः प्राप्तः।

चतुरिका - ([246]ससम्भ्रममवलोक्य) समाश्वसितु समाश्वसितु[247] भर्ता॥

चतुरिकेति। चतुरिका, ससम्भ्रमं सत्वरम्, अवलोक्य मूर्छितं प्रभुं वीक्ष्य प्राह, भर्ता स्वामी, समाश्वसितु प्रकृतिं प्राप्नोतु त्वरातिशयाद्द्विरुक्तिः।

सानुमती - हा धिक् हा धिक्। [248]सति खलु दीपे व्यवधानदोषेणैषोऽन्धकारदोषमनुभवति। अहमिदानीमेव निर्वृतं करोमि[249]। अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखाद्यज्ञभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथा [250]अचिरेण धर्मपत्नीं

---

244 'धौताश्रुसेकमुदकं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

245 'मोहमुपगतः' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

246 'अवलम्ब्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'ससम्भ्रममवलम्ब्य' इति 'C' इति प्रकाशने पाठान्तरम्।

247 'समाश्वसितु' इति एकवारमेव पाठः 'A' इति प्रकाशने उपलभ्यते।

248 'विद्यमानेऽपि दीपे' इति 'C' इति प्रकाशने पाठान्तरम्।

249 'करिष्यामि' इति 'C' इति प्रकाशने पाठान्तरम्।

250 'त्वां धर्मपत्नीमचिरेण....' इति 'C' इति प्रकाशने पाठान्तरम्।

भर्ताभिनन्दिष्यतीति। [251]तस्माद्युक्तमेतं कालं प्रतिपालयितुम्। यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि॥ (इत्युद्भ्रान्तकेन [252]निष्क्रान्ता)

सानुमतीति। सानुमती प्राह, हा धिगितिनिर्वेदे, क्लेशपारवश्याद्द्विरुक्ति, एष राजा, दीपे प्रदीपे सति, खलु विद्यमानेऽपि, व्यवधानदोषेण तिरोधानप्रतिबन्धकेन, अन्धकारं तिमिरम्, अनुभवति उपलभते, अहमिदानीमद्यैव, निर्वृतं प्रियाकुशलवार्ता कथनेन सुखितं, करोमि विधास्यामि, अथवा तथा नोचेत्, शकुन्तलां समाश्वासयन्त्याः प्रसादयन्त्याः, महेन्द्रजनन्या अदितेः, मुखात् वदनात्, यज्ञभागोत्सुकाः यज्ञभागेषु यज्ञदत्तहविर्भागेषु उत्सुकाः सक्ताः, देवाः अमरा एव, तथा तेन प्रकारेण, अनुष्ठास्यन्ति सम्विधास्यन्ति, यथा येन प्रकारेण, भर्ता पतिः, अचिरेण शीघ्रं, धर्मपत्नीं धर्मभार्यां त्वामिति शेषः, अभिनन्दिष्यतीत्येवं प्रकारेण, मया श्रुतम् आकर्णितं, तस्मात् कारणात्, एतं कालम् इमं समयं, प्रतिपालयितुं प्रतीक्षितुं, युक्तं न्याय्यम्, अनेन वृत्तान्तेन शकुन्तलाविषये राज्ञो विरहवेदनावृत्तान्तकथनेन, प्रियसखीम् इष्टसखीं, यावत्समाश्वासयामि विनोदयिष्यामि इत्युक्त्वा, उद्भ्रान्तकेन आकाशं प्रत्युद्गमनेन, निष्क्रान्ता निरागात्, सानुमतीत्यर्थाल्लभ्यते।

(नेपथ्ये) अब्रह्मण्यम् अब्रह्मण्यम्[253]॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, अब्रह्मण्यम् अवध्योहमिति रक्षकं प्रति आपन्नस्याक्रोशः, भयातिशयाद्द्विरुक्तिः, नि।। "अब्रह्मण्यमवध्योक्ता"वित्यमरः।

राजा - (प्रत्यागतप्राणः[254]। कर्णं दत्वा) अये! माधव्यस्येवार्तस्वरः। कः कोऽत्र भोः॥

---

251 'तन्न युक्तं कालं' इति 'A' इति प्रकाशने पाठान्तरम्।

252 'सानुमती' इति 'C' इति प्रकाशने अधिकः पाठः।

253 'अब्रह्मण्यम्' इति एकवारमेव पाठः 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

राजेति। राजा, प्रत्यागतप्राणः लब्धचैतन्यस्सन्, कर्णं दत्वा श्रुत्वेत्यर्थः, प्राह, किमिति, अये परिजन, आर्तस्वरः दीनालापः, माधव्यस्य विदूषकस्येव स्थित इति शेषः, भोः परिजन, अत्र प्रदेशे, कः कः को वा वर्तत इति शेषः। सम्भ्रमातिशयाद्द्विरुक्तिः।

प्रतीहारी - (प्रविश्य) [255]परित्रायतां देवः संशयगतं वयस्यम्॥

प्रतीहारीति। प्रतीहारी, प्रविश्य राजनिकटं प्राप्य ब्रूते, देवो राजा, संशयगतं जीवितसंशयमापन्नं, वयस्यं माधव्यं, परित्रायतां रक्षतु।

राजा - केनात्तगन्धो[256] माणवकः॥

राजेति। राजा प्राह माणवकः बालः, केन पुरुषेण, आत्तगन्धः पराभूतः। नि।। "आत्तगन्धोऽभिभूतस्स्या"दित्यमरः।।

प्रतीहारी - अदृष्टरूपेण केनापि सत्त्वेनातिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः॥

प्रतीहारीति। प्रतीहारी प्राह, हे राजन्, अदृष्टरूपेण अनवेक्षितस्वरूपेण केनापि अनिर्वाच्येन, सत्त्वेन भूतेन, अतिक्रम्य दृढमाक्रम्य, मेघप्रतिच्छन्दस्य एतन्नामकस्य, प्रासादस्य सौधस्य, अग्रभूमिम् अन्त्यभूमिकाम्, आरोपितः प्रापितः, माणवक इत्यध्याहारः।

राजा - (उत्थाय) मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः। अथवा।

---

254 'प्रत्यागतचेतनः' इति 'A' इति प्रकाशने पाठान्तरम्। 'प्रत्यागतः' इति 'B' इति प्रकाशने पाठान्तरम्। 'प्रत्यागतप्राणः' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

255 '(ससम्भ्रमम्)' इति 'B' 'C' इति प्रकाशनयोः पाठाधिक्यम्।
'येन केन च कण्ठे गृहीतं संशयगतं वयस्यम्' इति 'C' इति प्रकाशने पाठान्तरम्।

256 'आर्तकण्ठः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'आत्तकण्ठो....' इति 'C' इति प्रकाशने पाठान्तरम्।

श्लो ॥ अहन्यहन्यात्मन एव ताव-
ज्ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन [257]तथा [258]प्रयाती-
त्यशेषतो [259]वेदितुमस्ति शक्तिः ॥26॥

राजेति। राजा दुष्यन्तः, उत्थाय आसनादुत्थितो भूत्वा प्राह, मा तावत् तथा न भवतीत्यर्थः, कुत इति चेत्, ममापि गृहाः, सत्वैः भूतैः, अभिभूयन्ते तिरस्क्रियन्ते इति काकुः, न तिरस्क्रियन्त इत्यर्थः, ममापीत्यनेन स्वस्य निर्दोषत्वं सूच्यते, अथवा तथा नोचेत्, अहनीत्यादि, अहन्यहनि प्रतिदिनं, वीप्सायां द्विर्भावः, आत्मनः स्वस्यैव, प्रमादस्खलितं प्रमादेन अनवधानेन स्खलितं धर्मव्यत्यासं, तावत्साकल्येन, ज्ञातुं बोद्धुं, न शक्यं न साध्यं, प्रजासु जनेषु, कः जनः, केन पथा मार्गेण असता सतावेत्यर्थः, प्रयाति गच्छति, इतीत्थम्, अशेषतः साकल्येन, वेदितुं ज्ञातुं, शक्तिस्सामर्थ्यम् अस्तीति काकुः।

(नेपथ्ये) भो वयस्य! अविधा अविधा[260] ॥

नेपथ्य इति। नेपथ्ये तिरस्करिण्यन्तःप्रदेशे, भो वयस्य हे सखे, दुष्यन्तमाहाराज, अविधेत्याक्रोश वाचकमव्ययं, राजानं प्रति विदूषकस्यायमाक्रोशः, भयातिशयाद्द्विरुक्तिः।

राजा - (गतिभेदेन परिक्रामन्) सखे! न भेतव्यं न भेतव्यम्[261] ॥

---

257 'प्रथा' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

258 'प्रयातीत्यशेषतः कस्य पुनः प्रभुत्वम्' इति 'A' इति प्रकाशने पाठान्तरम्।

259 'कस्य नु शक्तिरस्ति, अस्त्यशक्तिः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

260 'अविहा अविहा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

261 एकवारमेव पाठः 'B' इति प्रकाशने उपलभ्यते।

राजेति। राजा, गतिभेदेन त्वरितगमनेन, परिक्रामन् गच्छन् प्राह, हे सखे वयस्य, न भेतव्यं न भेतव्यं अस्माददृष्टसत्वात् भयं न कार्यमित्यर्थः, त्वरातिशयाद्द्विरुक्तिः।

(नेपथ्ये) (पुनस्तदेव पठित्वा) कथं न भेष्यामि। एष मां कोऽपि [262]पश्चादवनतशिरोधरमिक्षुमिव [263]तीक्ष्णभङ्गं करोति॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, पुनः भूयः, तत् अविधाविधेत्येव, पठित्वा भाषित्वा, हे राजन्, एषोऽयं, कोऽपि अज्ञातः प्राणी, पश्चादवनतशरोधरं, पश्चादानतकण्ठं माम्, इक्षुं रसालमिव, नि।। "रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादय" इत्यमरः। तीक्ष्णभङ्गं गाढभञ्जनं, करोति विदधाति, कथं केन प्रकारेण, न भेष्यामि भीतिं न प्राप्स्यामि।

राजा - (सदृष्टिक्षेपम्) [264]धनुस्तावत्॥

राजेति। राजा, सदृष्टिक्षेपं दृष्टिप्रसारणसहितं यथा तथा प्राह, धनुस्तावत् शरासनं तावत् आनीयतामिति शेषः।

यवनी - (प्रविश्य शार्ङ्गहस्ता) भर्तः! एतद्धस्तावापसहितं शरासनम्॥

यवनीति। शार्ङ्गहस्ता धनुष्पाणिः, यवनी यवनाङ्गना, प्रविश्य राजनिकटं प्राप्य, प्राह, हे भर्तः प्रभो, हस्तावपसहितं ज्याघातवारणयुक्तं, शरासनं धनुः, एतत् इदम्।

राजा - ([265]सशरं धनुरादत्ते)

राजेति। राजा, सशरं बाणसहितं, धनुः कार्मुकम्, आदत्ते स्वीकरोति।

---

262 'पत्यवनतशिरो' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

263 'त्रिभङ्गः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

264 'धनुर्धनुः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

265 '(सदृष्टिक्षेपं) धनुस्तावत्' इति 'C' इति प्रकाशने पाठान्तरम्।

(नेपथ्ये)

श्लो॥ एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम्।
आर्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम्॥27॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, कश्चिदित्थं वदति, एष इत्यादि, अभिनवकण्ठशोणितार्थी नूतनगलरक्तपानासक्तः, एषोऽहं, चेष्टमानं व्यापारयुक्तं, त्वां, शार्दूलः व्याघ्रः, पशुं गवादिकमिव, हन्मि मारयामि, आर्तानां दीनानां, भयं साध्वसम्, अपनेतुं नाशयितुम्, आत्तधन्वा गृहीतचापः, दुष्यन्तः तन्नामकः पार्थिवः, इदानीमद्य, तव शरणं भवतु रक्षकस्सम्पद्यतां, दुष्यन्त इति नाम ग्रहणेन आक्षेपो व्यज्यते।

राजा - (सरोषम्) कथं मामेवोद्दिशति। तिष्ठ[266] कुणपाशन। त्वमिदानीं न भविष्यसि। (शार्ङ्गमारोप्य) वेत्रवति! सोपानमार्गमादेशय॥

राजेति। राजा, सरोषं सक्रोधं प्राह, मामेव, उद्दिशति निर्दिशति, कथं को वा उपायः, हे कुणपाशन अचेतनकलेबरभक्षक, तिष्ठ वर्तस्व न तु पलायस्व, त्वं इदानीमद्य, न भविष्यसि नष्टोभवसीत्यर्थः, इत्युक्त्वा, शार्ङ्गं धनुः, आरोप्य अधिज्यं कृत्वा, हे वेत्रवति प्रतीहारि, सोपानमार्गम् आरोहणपथं सौधस्येति शेषः, आदेशय प्रदर्शय।

[267]प्रतीहारी - इत इतो देवः॥

प्रतीहारीति। प्रतीहारी वक्ति, देवो राजा, इत इतः अनेन मार्गेण आगच्छत्विति शेषः।

---

266 'तिष्ठ तिष्ठ' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'तिष्ठ तिष्ठ कोणपापशद' इति 'C' इति प्रकाशने पाठान्तरम्।

267 'वेत्रवति' इति 'C' इति प्रकाशने पाठान्तरम्।

(सर्वे सत्वरमुपसर्पन्ति)

सर्व इति। सर्वे समस्ता जनाः, सत्वरं ससम्भ्रमम्, उपसर्पन्ति अनुसरन्ति राजानमिति शेषः।

राजा - (समन्ताद्विलोक्य) शून्यं खल्विदम्॥

राजेति। राजा, समन्तात्सर्वतः, विलोक्य वीक्ष्य, प्राह, इदं पुरस्थितं स्थानं, शून्यं खलु विजनं हि।

(नेपथ्ये) अविधा अविधा[268]। अहमत्र भवन्तं प्रेक्षे[269]। त्वं मां न प्रेक्षसे[270]। बिडालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः॥

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, विदूषकः प्राह, अविधेत्यादि, अविधेत्याक्रोशेद्विरुक्तिः, पूर्ववत्, अहम् अत्र स्थाने, भवन्तं त्वां, प्रेक्षे पश्यामि, त्वं मां न प्रेक्षसे न पश्यसि, बिडालगृहीतः मार्जाराक्रान्तः, मूषक अखुरिव, जीवते प्राणधारणे, निराशः वितृष्णः, संवृत्तः जातोऽस्मि।

राजा - भोस्तिरस्करिणीगर्वित! मदीयमस्त्रं[271] त्वां द्रक्ष्यति। एष तमिषुं सन्धत्ते[272]।

श्लो॥ यो हनिष्यति वध्यं त्वां रक्ष्यं[273] रक्षति[274] च द्विजम्।

---

268 'अविहा अविहा' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

269 'पश्यामि' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

270 'पश्यसि' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

271 'मदीयं शस्त्रं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'....गर्वित किमिदानीं मदीयं सस्त्रमपि त्वां न पश्यति। स्थिरो भव। मा च ते वयस्य संपर्कीद्विश्वासोऽभूत्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

272 'सन्दधे' इति 'A' इति प्रकाशने पाठान्तरम्।

273 'रक्षिष्यति' इति 'A' इति प्रकाशने पाठान्तरम्।

हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥28॥

(इत्यस्त्रं सन्धत्ते)

राजेति। राजा ब्रूते, भोस्तिरस्करिणीगर्वित हे अन्तर्धानविद्याभिमानविशिष्ट, मदीयं मत्सम्बन्धि, अस्त्रं शस्त्रं, त्वां भवन्तं, द्रक्ष्यति प्रेक्षिष्यते, एष जनः, तमिषुं बाणं, सन्धत्ते धनुषि सन्धानं करोति, तं कमित्यत आह, य इति, यो बाणः, वध्यं वधार्हं, त्वां भवन्तं, हनिष्यति हिंसिष्यति, रक्ष्यं रक्षितुं योग्यं, द्विजं विदूषकं, रक्षति अवति च, तथा हि, हंसः मरालः, क्षीरं पयः, आदत्ते गृह्णाति, तन्मिश्राः क्षीरेणैकीभूताः, अपः जलानि, वर्जयति त्यजति, इत्युक्त्वा, अस्त्रं बाणं, सन्धत्ते सन्धानं करोति।

(ततः प्रविशति विदूषकमुत्सृज्य [275]मातलिः)

तत इति। ततोऽनन्तरं, मातलिः तन्नामा इन्द्रसारथिः, विदूषकं माधव्यं, उत्सज्य सन्त्यज्य, प्रविशति स्वस्वरूपेण राजनिकटं प्राप्नोति।

मातलिः - [276]

श्लो॥ **कृताश्शरव्यं[277] हरिणा तवासुरा-**
श्शरासनं तेषु विकृष्यतामिदम्।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाश्शराः ॥29॥

---

274 'रक्षिष्यति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

275 'मातलिविदूषकश्च, प्रविशति मातलिर्विदूषक' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'मातलिः, विदूषकश्च' इति 'C' इति प्रकाशने पाठान्तरम्।

276 'राजन्' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

277 'शरव्याः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'शरव्या' इति 'C' इति प्रकाशने पाठान्तरम्।

मातलिरिति। मातलिराह, हरिणा देवेन्द्रेण, तव अमानुष प्रभावस्य ते, असुरा राक्षसाः, शरव्यं लक्ष्यं, कृताः विहिताः, तेषु रक्षस्सु, इदं भवदुद्यतं, शरासनं धनुः, विकृष्यताम् आकृष्यतां, तथाहि, प्रसादसौम्यानि प्रसन्नतारमणीयानि, सताम् उत्तमानां, चक्षूंषि दृष्टयः, सुहृज्जने मित्रजने विषये, पतन्ति प्रसरन्ति, दारुणाः भीषणाश्शरा बाणास्तु, न पतन्ति न प्रसरन्ति।

राजा - (अस्त्रमुपसंहरन्) अये मातले![278] स्वागतं [279]महेन्द्रसारथे॥

व्या। राजेति। राजा, अस्त्रं शरम्, उपसंहरन् पश्चादाकर्षन् प्राह, महेन्द्रसारथे इन्द्रसूत, अये मातले, स्वागतं शुभागमनं किं तुभ्यमिति शेषः।

विदूषकः - (प्रविश्य) अहं येनेष्टिपशुमारं मारितः। सोऽनेन स्वागतेन अभिनन्द्यते॥

विदूषक इति। विदूषकः, प्रविश्य राजसमीपं प्राप्य प्राह, हे राजन्, अहं येन पुरुषेण, इष्टिपशुमारं मारितः यागपशुरिव हतः, स पुरुषः, अनेन राज्ञा, स्वागतेन शुभागमनवचनेन, अभिनन्द्यते सम्पूज्यते।

मातलिः - (सस्मितम्) आयुष्मन्। श्रूयताम्। [280]यदर्थमस्मि हरिणा [281]भवत्सकाशं प्रेषितः॥

मातलिरिति। मातलिः, सस्मितं समन्दहासं प्राह, हे आयुष्मन् दीर्घजीवितकाल राजन्, श्रूयताम् आकर्ण्यताम्, आगमन प्रयोजनमिति शेषः, यदर्थं यस्मै प्रयोजनाय, हरिणा इन्द्रेण, भवत्सकाशं त्वत्समीपं, प्रेषितः प्रस्थापितोऽस्मि।

---

278 'अये मातलिः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

279 'देवराजसारथे' इति 'A' इति प्रकाशने पाठान्तरम्।
'सारथये' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

280 'यदस्मि' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

281 'त्वत्सकाशं' इति 'A' इति प्रकाशने पाठान्तरम्।
'...सकाशमिह' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

राजा - अवहितोऽस्मि॥

राजेति। राजा प्राह, अवहितः सावधानचित्तोऽस्मि।

मातलिः - अस्ति कालनेमि[282]प्रसूतिर्दुर्जयो नाम दानवगणः॥

मातलिरिति। मातलिः प्राह, कालनेमिप्रसूतिः कालनेमिरिति कश्चित्प्रसिद्धो राक्षसः, तस्मात्प्रसूतिर्यस्य सः, दुर्जयः जेतुमशक्यः, दानवगणः राक्षससङ्घः, अस्ति विद्यते, नाम नामेति प्रसिद्धौ।

राजा - अस्ति। [283]श्रुतपूर्वं मया नारदात्॥

राजेति। राजा प्राह, अस्ति विद्यते दानवगण इति शेषः, मया नारदात् तन्नामकान्मुनेः, श्रुतपूर्वं पूर्वमाकर्णितम्।

मातलिः -

श्लो॥ सख्युस्ते स किल [284]शतक्रतोरजय्य-
स्तस्य त्वं रणशिरसि स्मृतो निहन्ता।
उच्छेत्तुं प्रभवति यन्न सप्तसप्ति-
स्तन्नैशं तिमिरमपाकरोति चन्द्रः॥30॥

स भवानात्तशस्त्र एवमिदानीं [285]तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम्[286]॥

---

282 'प्रभूतिः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

283 'श्रुतपूर्वो' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'C' इति प्रकाशने पाठान्तरम्।

284 'शतक्रतोरवध्यस्तस्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

285 '....नीं तमैन्द्रं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

286 'एव इदानीम्' इति 'A' इति प्रकाशने पाठान्तरम्।

मातलिरिति। मातलिः प्राह, ते तव सख्युर्मित्रस्य, शतक्रतोः मघवतः, स राक्षसगणः, अजय्यः जेतुमशक्यः किल, त्वं रणशिरसि युद्धशीर्षे, तस्य दानवगणस्य, निहन्ता संहर्ता, स्मृतः कथितः, तथाहि। सप्तसप्तिः सूर्यः यत्तिमिरम्, उच्छेत्तुम् उन्मूलयितुं, न प्रभवति समर्थो न भवति, नैशं निशायां भवं, तत्तिमिरं ध्वान्तं, चन्द्रः निशाकरः, अपाकरोति नाशयति, स एवं विधः भवान्, आत्तशस्त्रः गृहीतायुधः, एवम् अनेन प्रकारेण, इदानीमद्य, तं प्रसिद्धम्, ऐन्द्ररथं देवेन्द्रसम्बन्धिनं स्यन्दनम्, आरुह्य अधिष्ठाय विजयाय राक्षसविजयं कर्तुं, प्रतिष्ठताम् प्रस्थानं कुरु।

राजा - अनुगृहीतोऽहमनया मघवतस्सम्भावनया। अथ माधव्यं प्रति भवता किमेवं प्रयुक्तम्॥

राजेति। राजा प्राह, अहम् अनया रथप्रेषणरूपया, मघवत इन्द्रस्य, सम्भावनया गौरवेण, अनुगृहीतः अभ्युपपन्नः, नि।। "अभ्युपपत्तिरनुग्रह" इत्यमरः। अथ, माधव्यं प्रति विदूषकमुद्दिश्य, भवता त्वया, एवम् अनेन प्रकारेण, किं किमर्थं प्रयुक्तं कृतम्।

मातलिः - तदपि कथ्यते। किञ्चिन्निमित्तादपि मनस्सन्तापादायुष्मान्मया विक्लवो [287]दृष्टः। पश्चात्कोपयितुमायुष्मन्तं[288] तथा कृतवानस्मि। कुतः।

श्लो॥ ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः[289] पन्नगः फणं कुरुते।
प्रायस्स्वं महिमानं क्षोभात्प्रतिपद्यते[290] हि जनः ॥31॥

---

287 'विकृतः..' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

288 'आयुष्मन्तम्' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

289 'चरणहतः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

290 '...ते जन्तुः, तेजस्वी संक्षोभात्प्रायः प्रतिपद्यते तेजः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

मातलिरिति। मातलिः प्राह, तदपि तत्कारणमपि, कथ्यते उच्यते मया, आयुष्मान् चिरजीवी भवान्, किञ्चिन्निमित्तादपि कुतश्चिदपि कारणात्, मनस्सन्तापात् मनसस्सञ्ज्वरात्, विक्लबः विवशः, दृष्टः प्रेक्षितः, पश्चात् अनन्तरं, कोपयितुं कोपं जनयितुं, तथा तेन प्रकारेण, कृतवानस्मि अकार्षम्, कुतः कस्मादिति चेत्, ज्वलतीति, चलितेन्धनः कम्पितेध्मः, अग्निः वह्निः, ज्वलति प्रकाशते, विप्रकृतः ताडनादिना अपकृतः, पन्नगः सर्पः, फणं स्फटां कुरुते विदधाति, जनः मनुष्योऽपि, प्रायः भूम्ना, क्षोभात् चित्तविकारात्, स्वं स्वकीयं, महिमानं सामर्थ्यं, प्रतिपद्यते प्राप्नोति।

राजा - ([291]जनान्तिकम्)। वयस्य! अनतिक्रमणीया दिवस्पतेराज्ञा। [292]तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि।

श्लो॥ त्वन्मतिः केवला तावत्परिपालयितुं[293] प्रजाः।
अधिज्यमिदमन्यस्मिन्कर्मणि व्यापृतं[294] धनुः ॥32॥

राजेति। राजा जनान्तिकं यथा तेनैव ज्ञायते तथा प्राह, हे वयस्य सखे, दिवस्पतेः इन्द्रस्य, आज्ञा नियोगः, अनतिक्रमणीया अनुल्लङ्घनीया, तत्तस्मात्, अत्र स्वर्गगमने विषये, अमात्यपिशुनं पिशुन नामकं मन्त्रिणं, परिगतार्थं विज्ञातार्थं, कृत्वा विधाय, मद्वचनात् मम भाषितात्, ब्रूहि कथय, किमिति, त्वन्मतिरिति, प्रजाः जनान्, परिपालयितुं रक्षितुं, केवला एका, त्वन्मतिस्तावत् तव बुद्धिरेव भवत्विति शेषः, अधिज्यम् अधिगतमौर्वीकम्, इदं धनुः कार्मुकम्, अन्यस्मिन्

---

291 'युक्तमिदमनुष्ठितं भवद्भिः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। अयं पाठः 'C' इति प्रकाशने लभ्यते।

292 'तद्गच्छ' इति 'A' इति प्रकाशने पाठान्तरम्।

293 'परिपालयतु' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

294 'व्यावृतम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

इतरस्मिन् कर्मणि राक्षसयुद्धरूपे कार्ये, व्यापृतं व्यापारयुक्तम् अस्त्विति शेषः, इति एवं ब्रूहीति पूर्वेणान्वयः।

विदूषकः - यद्भवानाज्ञापयति। (इति निष्क्रान्तः)

विदूषक इति। विदूषकः प्राह, भवान् यत्कार्यम्, आज्ञापयति नियोजयति तत्करोमीति वाक्यशेषः, इत्युक्त्वा, निष्क्रान्तः निर्गतः।

मातलिः - [295]आयुष्मान्! रथमारोहतु॥

मातलिरिति। मातलिराह, आयुष्मान् राजा, रथं स्यन्दनम्, आरोहतु अधितिष्ठतु।

(राजा रथारोहणं[296] नाटयति)

राजेति। राजा रथारोहणं रथोपरिस्थितिं, नाटयति अभिनयति।

(इति निष्क्रान्तास्सर्वे)

इति षष्ठोऽङ्कः

इतीति। इति अनेन प्रकारेण, सर्वे राजादयः, निष्क्रान्ताः निर्गताः।

इति मृत्युञ्जयनिश्शङ्कभूपालविरचिते शाकुन्तलव्याख्याने पूर्णचन्द्रिकाख्याने षष्ठोऽङ्कः॥

---

295 'इत आयुष्मन् (राजा रथमारोहति।)' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'इत इत आयुष्मन्' इति 'C' इति प्रकाशने पाठान्तरम्।

296 'रथाधिरोहणं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'रथाधिरोहणं' इति 'C' इति प्रकाशने पाठान्तरम्।

अथ सप्तमोऽङ्कः

(ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च)

कविरिदानीं कथासंयोजनार्थमङ्कास्यं नामार्थोपक्षेपकं प्रस्तौति, ततः प्रविशतीत्यादिना, तल्लक्षणं तु, "अङ्कान्तपात्रैरङ्कास्यमुत्तराङ्कार्थसूचना" ततोऽनन्तरं, रथाधिरूढः स्यन्दनमधिष्ठितः, राजा दुष्यन्तनृपतिः, मातलिः देवेन्द्रसारथिश्च, आकाशयानेन वियन्मार्गेण, प्रविशति प्राप्नोति रङ्गभूमिमिति शेषेः।

राजा - मातले! अनुष्ठितनिदेशोऽपि [1]मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये॥

राजेति। राजा भाषते, हे मातले अहम्, अनुष्ठितनिदेशोऽपि निर्वर्तितशासनोऽपि, मघवतः शक्रस्य, सत्क्रियाविशेषात् बहुमानातिशयात्, आत्मानं स्वम्, अनुपयुक्तम् अनुपकारिणमिव, समर्थये निर्वहे।

मातलिः - (सस्मितम्) आयुष्मन्! [2]उभयमप्यपरितोषं समर्थये॥

श्लो॥ [3]प्रथमोपकृतं मरुत्वतः
प्रतिपत्या लघु मन्यते भवान्।
[4]गणयत्यपदानतोषितो[5]
भवतस्सोऽपि न सत्क्रियागुणान्॥1॥

---

1 'मघवता' इति 'A' इति प्रकाशने पाठान्तरम्।

2 'उभयोरप्यपरितोषः' इति 'C' इति प्रकाशने पाठान्तरम्।

3 'उपकृत्य हरेस्तथा भवान् (प्रथमोपकृतिं हरेर्भवान्) लघु सत्कारमवेक्ष्य मन्यते। ....दानसम्मितां..... क्रियामिमाम्।।' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

4 '....त्यपदान...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

5 'गणयत्यवदानविस्मितो' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

मातलिरिति। मातलिः, सस्मितं समन्दहासं प्राह, हे आयुष्मन् चिरजीवितराजन्, उभयमपि भवानिन्द्रश्चेत्यर्थः, अपरितोषम् अन्योऽन्यं सन्तुष्टिरहितं, समर्थये निर्वहे, तथा हि, प्रथमोपकृतमिति, भवान्, प्रथमोपकृतं रक्षोविजयरूपं पूर्वोपकारं, मरुत्वत इन्द्रस्य, प्रतिपत्या गौरवेण, लघु स्वल्पं, मन्यते जानीते, स मरुत्वानपि, भवतः तव, अपदानतोषितः पूर्वकृतपौरुषप्रीणितः, सत्क्रियागुणान् स्वकृतसत्कारविशेषान्, न गणयति न विचारयति।

राजा - मातले! मा मैवम्। स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः। मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य।

श्लो॥ अन्तर्गतप्रार्थन[6]मन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन॥
आमृष्टवक्षो हरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा॥2॥

राजेति। राजा प्राह, हे मातले, मा मैवम् एवं रीत्या न वक्तव्यमित्यर्थः, खलु यतो हेतोः सः प्रसिद्धः, विसर्जनावसरसत्कारः मदुत्सर्गकालिकबहुमानः, मनोरथानाम् इच्छानामपि अभिलाषाणामिति यावत्, अभूमिरविषयः तत्प्रकारमेवाह मम हीत्यादिना, दिवौकसां देवानां, समक्षं पुरतः, अर्धासनोपवेशितस्य पीठार्धभागनिवेशितस्य मम, अन्तर्गतेति, अन्तिकस्थं समीपस्थितम् अन्तर्गतप्रार्थनं निगूढाभिलाषं, जयन्तं तन्नामानं पुत्रम्, उद्वीक्ष्य दृष्ट्वा, कृतस्मितेन विरचितमन्दहासेन, हरिणा इन्द्रेण, आमृष्टवक्षोहरिचन्दनाङ्का आसमन्तान्मृष्टं शोधितं वक्षसि उरस्स्थले यद्धरिचन्दनं चन्दनविशेषः तदेव अङ्कः चिह्नं यस्यास्सा, मन्दारमाला मन्दारपुष्पमयी स्रक् पिनद्धा आसञ्जिता हि कण्ठ इति शेषः।

---

6 'प्रार्थित..' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

मातलिः - किमिव नामायुष्मानमरेश्वरान्नार्हति। पश्य।

श्लो॥ [7]सुरसखस्य हरेरुभयैः कृतं
त्रिदिवमुद्धृतदानवकण्टकम्।
तव शरैरधुना नतपर्वभिः
पुरुषकेसरिणश्च पुरा नखैः ॥3॥

मातलिरिति। मातलिः प्राह, आयुष्मान् महाराजः, अमरेश्वरादिन्द्रात्, किमिव नाम किं वा वस्तु, नार्हति लब्धुं योग्यो न भवति, किन्तु, स्वर्गस्थितानाम् इतरवस्तूनां भूलोकसाधारणत्वादेकैव मन्दारमाला त्वयि विषये आदरेण शक्रेणोपायनीकृता, तस्या भूलोकदुर्लभत्वादिति बोध्यं, पश्य प्रेक्षस्व, सुरसखस्येति, सुरसखस्य देवसहायस्य, हरेः इन्द्रस्य, त्रिदिवं स्वर्गः, उभयैः द्वयैः, उद्धृतदानवकण्टकम् उद्धृता निर्मूलिताः दानवाः राक्षसा एव कण्टकाः क्षुद्रशत्रवो यस्य तत्तथोक्तं, कृतं रचितम्, उभयैः कैरित्यत आह, तवेति, अधुना सम्प्रति, नतपर्वभिः निम्नपर्वस्थानैः अन्यत्र निमग्नकरशाखाग्रन्थिभिः, तव शरैर्बाणैः पुरा पूर्वस्मिन्काले, पुरुषकेसरिणः नरसिंहस्य, नखैः कररुहैश्चेत्युभयैरिति योजना।

राजा - [8]अत्र खलु शतक्रतोरेव महिमा स्तुत्यः।

श्लो॥ सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम्।
किं वाभविष्यदरुणस्तमसां विभेत्ता
तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्॥4॥

राजेति। राजा प्राह, अत्र राक्षसविजयकर्मणि विषये, शतक्रतोः इन्द्रस्य, महिमा सामर्थ्यमेव, स्तुत्यः श्लाघनीयः खलु, तथा हि, सिध्यन्तीति, नियोज्याः

---

7 'सुखपरस्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

8 अस्मात्प्राक् 'मा मैवम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

भृत्याः, महत्सु प्रभूणामसाध्येष्वपि, कर्मसु कार्येषु, सिध्यन्ति साधका भवन्तीति, यत् तम् ईश्वराणां प्रभूणां, सम्भावनागुणं गौरवातिशयम्, अवेहि जानीहि, अत्र दृष्टान्तमाह, अरुणः अनूरुः, तमसाम् अन्धकाराणां, विभेत्ता विच्छेदकः, अभविष्यत् अजनिष्यत् वा किं, सहस्रकिरणः सूर्यः, तमरुणं, धुरि अग्रभागे, नाकरिष्यत् नायोजयिष्यच्चेत्, अत्र क्रियातिपत्तौ लृङ्।

मातलिः - [9]सदृशमेवैतत्। (स्तोकमन्तरमतीत्य) आयुष्मन्। इतः पश्य नाकपृष्ठगतस्य[10] सौभाग्यमात्मयशसः।

श्लो॥ विच्छित्तिशेषैस्सुरसुन्दरीणां
वर्णैरमी कल्पलतांशुकेषु।
सञ्चिन्त्य[11] [12]गीतिक्षममर्थबन्धं
दिवौकसस्त्वच्चरितं लिखन्ति॥5॥

मातलिरिति। मातलिः प्राह, एतत् स्वाहङ्कारपरिहरणं, सदृशम् अनुरूपमेव त्वादृशस्येति शेषः स्तोकमल्पम्, अन्तरमवकाशम्, अतीत्य अतिक्रम्य, हे आयुष्मन् महाराज, नाकपृष्ठस्थितस्य स्वर्गात्पश्चाद्भागस्थितस्य, आत्मयशसः स्वकीर्तेः सौभाग्यं समृद्धिम्, इतः अस्मात्प्रदेशात्, पश्य प्रेक्षस्व, विच्छित्तिशेषैरिति सुरसुन्दरीणां देवतास्त्रीणां, विच्छित्तिशेषैः विच्छितेरवशिष्टैः विच्छित्तिर्नाम कुङ्कुमादिचूर्णस्य अनादरेण स्तोकादानं, वर्णैः श्वेतारुणादिभीरागद्रव्यैः, अमी रक्षोभयाद्दुष्यन्तरक्षिताः, दिवौकसो देवाः, अर्थबन्धं समञ्जसार्थघटितं, त्वच्चरितं विजयादि भवच्चरित्रं, गीतिक्षमं गानोपयुक्तं, सञ्चिन्त्य सम्यगालोच्य विरच्येत्यर्थः,

---

9 'सदृशं तवैतत्' इति 'B' इति प्रकाशने पाठान्तरम्।

10 'नाकपृष्ठप्रतिष्ठितस्य' इति 'A' इति प्रकाशने पाठान्तरम्।

11 'विचिन्त्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

12 'गीतक्षममर्थजातं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

कल्पलतांशुकेषु कल्पशाखावल्कलेषु, लिखन्ति चिरस्थायितासिद्ध्यर्थमक्षराणि निक्षिपन्ति।

राजा - मातले! असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता[13] मया न लक्षितस्स्वर्गमार्गः। [14]कतरस्मिन्मरुतां पथि वर्तामहे॥

राजेति। राजा प्राह, हे मातले, पूर्वेद्युः पूर्वस्मिन्दिने, असुरसम्प्रहारोत्सुकेन राक्षसयुद्धोत्कण्ठितेन, दिवं स्वर्गम्, अधिरोहता उद्गच्छता मया, स्वर्गमार्गः नाकपथः, न लक्षितः सम्यङ्नवीक्षितः, कतरस्मिन् कस्मिन्, मरुतां वायूनां, पथि मार्गे, वर्तामहे सञ्चरामः कथयेति शेषः।

मातलिः -

श्लो॥ त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्तयति [15]च प्रविभक्तरश्मिः।
[16]तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम्॥6॥

मातलिरिति। मातलिः प्राह, यः परिवहाख्यो वायुः, प्रविभक्तरश्मिः प्रसारितप्रग्रहस्सन्, गगनप्रतिष्ठाम् आकाशस्थितां, त्रिस्रोतसं मन्दाकिनीं, वहति धारयति, ज्योतींषि सप्तऋषिमण्डलानि, वर्तयति सञ्चारयति, तस्य परिवहस्य परिवहाख्यस्य, वायोः पवमानस्य, द्वितीयहरिविक्रमनिस्तमस्कं द्वितीयेन हरेः

13 '....हता मया न लक्षितोयं प्रदेशो मया। कतर....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

14 'तत्' इति अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।
'तस्मात्कथय कतमस्मिन्' इति 'C' इति प्रकाशने पाठान्तरम्।

15 'चक्रविभक्तरश्मिः' इति 'A' इति प्रकाशने पाठान्तरम्।

16 'तस्य व्यपेतरजसः प्रवहस्य वायोर्मार्गो द्वितीयहरिविक्रमपूत एषः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

विष्णोः विक्रमेण पादविन्यासेन निस्तमस्कं तमोगुणरहितम्, इमं पुरस्थितं, मार्गं पन्थानं, वदन्ति ब्रुवन्ति, ऋषय इति शेषः।

राजा - मातले! अतः खलु स बाह्यान्तःकरणो[17] ममान्तरात्मा प्रसीदति। (रथाङ्गमवलोक्य) [18]मेघपदवीमवतीर्णौ स्वः॥

राजेति। राजा प्राह, हे मातले, सबाह्यान्तःकरणः बहिरन्तरिन्द्रियसहितः, मम, अन्तरात्मा जीवः, अतः परिवहाख्यवायुमार्गस्थितत्वाद्धेतोः, प्रसीदति खलु प्रसन्नो भवति हि, रथाङ्गं चक्रम्, अवलोक्य दृष्ट्वा, मेघपदवीं मेघमार्गम्, अवतीर्णौ अवरूढौ प्रविष्टाविति यावत्, स्वः भवावः।

मातलिः - कथमवगम्यते॥

मातलिरिति। मातलिराह, कथं केन प्रकारेण, अवगम्यते ज्ञायते मेघमार्गप्रवेश इति शेषः।

राजा -

श्लो॥ अयमरविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते [19]शीकरक्लिन्ननेमिः॥7॥

राजेति। राजा प्राह अयम् एषः, शीकरक्लिन्ननेमिः शीकरैर्जलकणैः क्लिन्ना आर्द्रीभूता नेमयः प्रथमो यस्य स तथोक्तः, ते तव, रथस्स्यन्दनः, अरविवरेभ्यः अराणां नेम्यवष्टम्भचक्रावयवशलाकानां विवरेभ्यः अन्तरालेभ्यः, निष्पतद्भिः निष्क्रामद्भिः, चातकैः स्तोककैः, नि।। "स्तोककश्चातकस्समा"वित्यमरः,

17 'सबाह्यकरणो' इति 'A' इति प्रकाशने पाठान्तरम्।

18 'शङ्के मेघ....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

19 'सीकरक्लिन्ननेमिः' इति 'A' इति प्रकाशने पाठान्तरम्।

अचिरभासां विद्युतां, तेजसा कान्त्या, अनुलिप्तैः उपदिग्धैः, हरिभिरश्वैश्च, वारिगर्भोदराणां वारि सलिलं गर्भे येषां तान्युदराणि कुक्षयो येषां तेषां, घनानां मेघानाम्, उपरि ऊर्ध्वभागे, गतं गमनं, पिशुनयति सूचयति।

मातलिः - क्षणादायुष्मान्स्वाधिकारभूमौ वर्तिष्यते॥

मातलिरिति। मातलिः प्राह, आयुष्मान् महाराजः क्षणात् क्षणपरिमितकालात्, स्वाधिकारभूमौ आत्माधिनायकत्वविशिष्टभूमौ, वर्तिष्यते स्थास्यति।

राजा - (अधोऽवलोक्य) वेगावतरणादाश्चर्यदर्शनस्संलक्ष्यते मनुष्यलोकः। तथा हि।

श्लो॥ शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
[20]पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात्पादपाः।
[21]सन्तानात्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य[22] भुवनं मत्पार्श्वमानीयते॥8॥

राजेति। राजा, अधः अधस्तात्प्रदेशम्, अवलोक्य वीक्ष्य प्राह, मनुष्यलोकः मर्त्यभुवनं, वेगावतरणात् जवावरोहणात्, आश्चर्यदर्शनः अद्भुतप्रेक्षणः, संलक्ष्यते वीक्ष्यते, तथा हि युक्तमेव खलु, शैलानामिति, मेदिनी भूमिः, उन्मज्जताम् ऊर्ध्वं गच्छतामिवस्थितानां, शैलानां पर्वतानां, शिखरात् शृङ्गात्, अवरोहति अधोगच्छतीव स्थिता पादपाः वृक्षाः, स्कन्धोदयात् प्रकाण्डदर्शनात्, वर्णाभ्यन्तरलीनतां वर्णाभ्यन्तरेषु पत्रान्तरालेषु लीनताम्

---

20 'पर्णस्वान्तरलीनतां' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

21 'सन्तानैस्तनुभावनष्टसवलिला' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

22 'मर्त्यभुवनं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। एषः पाठः 'C' इति प्रकाशने पाठान्तरम्।

आच्छादनं, विजहति त्यजन्ति, आपगाः नद्यः, तनुभावनष्टसलिलाः तनुभावेन सूक्ष्मत्वेन, नष्टसलिलाः विरहितजलाः, सन्तानात् सामीप्येन विस्तारात्, व्यक्तिं प्रस्फुटसलिलत्वं, भजन्ति व्रजन्ति, भुवनं भूलोकः, उत्क्षिपता ऊर्ध्वं प्रेरयतेव स्थितेन केनापि पुरुषेण, मत्पार्श्वं मत्समीपदेशम्, आनीयते आकृष्यते, पश्य आलोकय।

मातलिः - साधु[23] दृष्टम्। (सबहुमानं विलोक्य[24]) अहो [25]उदाररमणीया पृथिवी॥

मातलिरिति। मातलिः प्राह, हे राजन्, साधु दृष्टं सम्यग्विलोकितं, सबहुमानं सगौरवं, विलोक्य दृष्ट्वा, पृथिवी भूमिः, उदाररमणीया अतीवरम्या, अहो आश्चर्यम्।

राजा - मातले! कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यन्दीसान्ध्य[26] इव [27]मेघपरिघः सानुमानालोक्यते॥

राजेति। राजा प्राह, हे मातले, पूर्वापरसमुद्रावगाढः प्राक्पश्चिमसागरप्रविष्टः, कनकरसनिष्यन्दी सुवर्णधातुस्रावी, अत एव सान्ध्यः सन्ध्याकालिकः, मेघपरिघः जलदपरिवार इव, अयं पुरोवर्ती, सानुमान् पर्वतः, आलोक्यते दृश्यते, कतमः को वा भवेत् वदेतिशेषः।

---

23 'आयुष्मन् साधु' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

24 'सबहुमानमवलोक्य' इति 'B' इति प्रकाशने पाठान्तरम्।

25 'उदग्ररमणीया पृथ्वी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

26 'कनकरसनिस्यन्दः सान्ध्य' इति 'A' इति प्रकाशने पाठान्तरम्।

27 'मेघः सानुमानवलोक्यते' इति 'A' इति प्रकाशने पाठान्तरम्।
'मेघः सानुमानालक्ष्यते' इति 'C' इति प्रकाशने पाठान्तरम्।

मातलिः - आयुष्मन्! एष खलु हेमकूटो नाम किम्पुरुष पर्वतस्तपसां सिद्धिक्षेत्रं पश्य।

श्लो॥ स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुस्सोऽत्र[28] सपत्नीकस्तपस्यति॥9॥

मातलिरिति। मातलिः प्राह, हे आयुष्मन् राजन्, एष पुरोवर्ती, हेमकूटो नाम हेमकूट इति प्रसिद्धः, किम्पुरुषपर्वतः किम्पुरुषाख्यवर्षनिर्णायकः शैलः खलु, किं च, तपसां मुनिव्रतानां, सिद्धिक्षेत्रं फलप्रापकस्थानं, पश्य आलोकय, स्वायम्भुवादिति, यः प्रजापतिः ब्रह्मा, स्वायम्भुवात् स्वयं भूपुत्रात्, मरीचेः मरीच्याख्यात्, प्रबभूव जज्ञे, सुरासुरगुरुः सुराणां देवानाम् असुराणां रक्षसां च गुरुर्जनकः, स मारीचः, सपत्नीकः सभार्यस्सन्, अत्र गिरा, तपस्यति तपः करोति।

राजा - तेन ह्यनतिक्रमणीयानि श्रेयांसि। प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि॥

राजेति। राजा प्राह, तेन हेतुना, श्रेयांसि भद्राणि, अनतिक्रमणीयानि अनुल्लङ्घनीयानि हि, भगवन्तं षड्गुणैश्वर्यसम्पन्नं मारीचं, प्रदक्षिणीकृत्य प्रदक्षिणत्वेन परिभ्रम्य, गन्तुं स्वस्थानं प्रति यातुम्, इच्छामि अभिलषामि।

मातलिः - प्रथमः कल्पः। ([29]नाट्येनावतीर्णौ)

मातलिरिति। मातलिः प्राह, हे राजन्, प्रथमः कल्पः मुख्यः पक्षः, नि।। "मुख्यस्स्यात्प्रथमः कल्प" इत्यमरः।

राजा - ([30]सविस्मयम्)

---

28 'सोऽस्मिन्' इति 'C' इति प्रकाशने पाठान्तरम्।

29 '(अवतरणं नावयित्वा) एतावक्तीर्णौ स्वः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'एतावक्तीर्णौ स्वः' इति 'C' इति प्रकाशने पाठान्तरम्।

श्लो। उपोढशब्दा न रथाङ्गनेमयः
प्रवर्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतया [31]निरुन्धत-
स्तवावतीर्णोऽपि रथो न लक्ष्यते॥10॥

राजेति। राजा दुष्यन्तः, सविस्मयं साश्चर्यं प्राह, उपोढेत्यादि, रथाङ्गनेमयः स्यन्दनधाराः, उपोढशब्दाः धृतध्वनयः, न भवन्ति, प्रवर्तमानं रथादुत्थितं, रजः परागश्च, न दृश्यते न विलोक्यते। निरुन्धतः बहुगमनान्निवारयतः तव, रथः शताङ्गः, अवतीर्णः गगनाद्भूमिं प्रविष्टोऽपि, अभूतलस्पर्शतया भूमिस्पर्शाभावेन, न लक्ष्यते न ज्ञायते।

मातलिः - एतावानेव शतक्रतोरायुष्मतश्च विशेषः॥

मातलिरिति। मातलिः प्राह, शतक्रतोरिन्द्रस्य, आयुष्मतः भवतश्च, विशेषः भेदः, एतावान् इयानेव भूलोकस्पर्शास्पर्शकृत एवेति भावः।

राजा - मातले! कतमस्मिन्प्रदेशे मारीचाश्रमः॥

राजेति। राजा प्राह, हे मातले, मारीचाश्रमः मारीचस्य काश्यपस्य आश्रमः निवासः, कतमस्मिन् कस्मिन् प्रदेशे वर्तत इति शेषः।

मातलिः - (हस्तेन दर्शयन्)

श्लो॥ [32]वल्मीकार्धनिमग्नमूर्तिरुरसा [33]सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेना[34]त्यर्थसम्पीडितः।

---

30 '(सस्मितम्) मातले!' इति 'C' इति प्रकाशने पाठान्तरम्।

31 'निरुद्ध' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।
'निरुद्धतिः......र्णो न....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

32 'वल्मीकाग्रनिमग्नमूर्तिरुरसा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

33 'उरगत्वग्ब्रह्मसूत्रान्तरः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ॥11॥

मातलिरिति। मातलिः, हस्तेन करेण, दर्शयन् प्रेक्षयन् प्राह, वल्मीकेत्यादि, वल्मीकार्धनिमग्नमूर्तिः वल्मीके वामलूरिनिदरे अर्धेन समांशेनाधोभागेन निमग्नमूर्तिः आच्छादितशरीरः, सन्दष्टसर्पत्वचा सम्बद्धनिर्मोकेन उरसा वक्षस्स्थलेन उपलक्षितः, जीर्णलता प्रतानवलयेन जीर्णलतायाः शुष्कवल्ल्याः प्रतानवलयेन वलयाकारेण सूक्ष्मतन्तुना, कण्ठे गले, अत्यर्थसम्पीडितः भृशं बाधितस्सन्, अंसव्यापि शकुन्तनीडनिचितम्, अंसव्यापिभिः भुजशिरोविलम्बिभिः शकुन्तनीडैः पक्षिकुलायैः, निचितं व्याप्तं जटामण्डलं जटाचक्रं, बिभ्रत् दधानः, असौ मुनिः अयं तापसः, स्थाणुः शाखारहितस्तरुरिव, अचलः स्थिरस्सन्, यत्र स्थाने, अभ्यर्कबिम्बं सूर्यमण्डलाभिमुखं, स्थितः स्थितिङ्गतः तथासनमिदमिति वाक्याध्याहारः।

राजा - [35]नमस्ते कष्टतपसे ॥

राजेति। राजा प्राह, हे मुनिवर्य, कष्टतपसे कृच्छ्रमुनिव्रताय, ते तुभ्यं, नमः नतिः, अस्त्वितिशेषः।

मातलिः - ([36]संयुतप्रग्रहं रथं कृत्वा) [37]महाराज! एतावदिति परिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ॥

---

[34] 'अत्यन्तसम्पीडितः' इति 'A' इति प्रकाशने पाठान्तरम्।
[35] 'नमोऽस्मै' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'नमोऽस्त्वस्मै' इति 'C' इति प्रकाशने पाठान्तरम्।
[36] 'संयतप्रग्रहं कृत्वा' इति 'C' इति प्रकाशने पाठान्तरम्।
[37] 'महराज' इत्येतत्पदं 'B' 'C' इति प्रकाशनयोः नोपलभ्यते।

मातलिरिति। मातलिः, रथं स्यन्दनं, संयतप्रग्रहम् अवरुद्धरश्मिकं, कृत्वा विधाय प्राह, परिवर्धितमन्दारवृक्षं परिपोषितमन्दारमहीरुहं, एतावत् इदं प्रमाणकं, प्रजावतेः मारीचस्य, आश्रमं निवाभूतवनम्, इति अनेन प्रकारेण, प्रविष्टौ प्राप्तौ, स्वः भवावः।

राजा - स्वर्गादधिकतरं निर्वृत्तिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि॥

राजेति। राजा भाषते, स्वर्गात् त्रिदशालयात्, अधिकतरम् उत्कृष्टतरं, निर्वृत्तिस्थानं सिद्धिस्थानम्, अमृतह्रदम् अगाधसुधासर इव, अवगाढः निमग्नः, अस्मि भवामि।

मातलिः - (रथं स्थापयित्वा।) [38]अवतरत्वायुष्मान्॥

मातलिरिति। मातलिः इन्द्रसारथिः, रथं शताङ्गं, स्थापयित्वा निवेश्य, ब्रूते, आयुष्मान् महाराजः, अवतरतु अवरोहतु।

राजा - ([39]अवतीर्य) मातले! भवान्कथमिदानीम्॥

राजेति। राजा दुष्यन्तः, अवतीर्य रथावतरणं कृत्वा प्राह, मातले, इदानीमद्य, भवान्, कथं केन प्रकारेण अवतरतीति शेषः।

मातलिः - संयन्त्रितो मया रथः। वयमप्यवतरामः। (तथा कृत्वा) [40]इत आयुष्मन्! (परिक्रम्य) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः॥

मातलिरिति। मातलिः प्राह, मया रथः स्यन्दनः, संयन्त्रितः नियमितः, वयमपि अवतरामः अवरोहामः, तथा तेन प्रकारेण, कृत्वा विधाय अवतीर्येत्यर्थः, हे आयुष्मन् प्रभो इतः अत्र आगच्छेति शेषः, परिक्रम्य कियद्दूरं गत्वा भाषते,

---

38 'अवतीर्यताम्' इति 'C' इति प्रकाशने पाठान्तरम्।

39 'साभिनयमवतीर्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

40 'इत इति आयुष्मन्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अत्रभवतां पूजनीयानाम्, ऋषीणां मुनीनां, तपोवनभूमयः आश्रमभुवः, दृश्यन्ताम् विलोक्यन्तां भवतेति शेषः।

राजा - ननु विस्मयादवलोकयामि।

श्लो॥ प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये [41]काञ्चनपद्मरेणुकपिशे [42]धर्माभिषेकक्रिया।
ध्यानं [43]रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी॥12॥

राजेति। राजा प्राह, ननु मातले, विस्मयादद्भुतात्, अवलोकयामि पश्यामि, विस्मयकरत्वे हेतुमाह, प्राणानामित्यादि, सत्कल्पवृक्षे कल्पपादपसहिते वने विपिने, प्राणानाम् असूनां, वृत्तिः जीविका, अनिलेन वायुना, उचिता अभ्यस्ता, नि।। "अभ्यस्तेप्युचितं न्याय्य"मित्यमरः। एषामिति सर्वत्राध्याहारः, काञ्चनपद्मरेणुकपिशे सुवर्णपङ्कजपरागपीतवर्णे, तोये जले, धर्माभिषेकक्रिया धर्मार्थं स्नानकरणं, रत्नशिलातलेषु मणिमयप्रस्तरप्रदेशेषु, ध्यानम् इन्द्रियाणां विषयनिवृत्तिपूर्वकं ब्रह्मानुसन्धानं, विबुधस्त्रीसन्निधौ अप्सरस्त्री समीपे, संयमः इन्द्रियनिग्रहः, अमी मुनयः, अन्यमुनयः इतर ऋषयः, यत् पदं, तपोभिः कृच्छ्रचान्द्रायणादिभिः करणैः, काङ्क्षन्ति वाञ्छन्ति, तस्मिन् पदे स्थान इत्यर्थः, तपस्यन्ति तपः कुर्वन्ति।

मातलिः - [44]उत्सर्पिणी खलु महतां प्रार्थना। (परिक्रम्य, आकाशे) अये वृद्धशाकल्य। किमनुतिष्ठति भगवान्मारीचः। किं ब्रवीषि। दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तत्तस्यै महर्षिपत्नीसहितायै कथयतीति॥

---

41 'हैमसहस्रपत्रसुभगे नक्तंदिवं सद्व्रतम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

42 'पुण्याभिषेकक्रिया' इति 'A' 'B' प्रकाशनयोः पाठान्तरम्।

43 'रत्नशिलागृहेषु' इति 'A' 'B' प्रकाशनयोः पाठान्तरम्।

मातलिरिति। मातलिः प्राह, महतां महात्मनां, प्रार्थना अभिलाषः, उत्सर्पिणी खलु ततोप्युन्नतपदाक्रमणशीला हि, परिक्रम्य राजा मातलिश्च कियद्दूरं गत्वा, अये वृद्धशाकल्य हे वयोधिक शाकल्यमुने. भगवन् भूतभविष्यद्वर्तमानज्ञः, मारीचः तन्नामा ब्रह्मर्षिः, किमनुतिष्ठति किं करोति, इति पृष्ट्वा तदुत्तरं श्रुत्वा प्राह, किं ब्रवीषि किं प्रतिवचनं भाषसे, दाक्षायण्या दक्षपुत्रिकया, पतिव्रताधर्मं सतीप्रकृष्टव्यापारं, अधिकृत्य उद्दिश्य, पृष्टः अनुयुक्तः, महर्षिपत्नीसहितायै मुनिभार्यासमेतायै, तस्यै दाक्षायण्यै, तत् पतिव्रताधर्मम्, अत्र 'सामान्ये नपुंसक'मिति नपुंसकत्वं, कथयति उपदिशति, इति एवंविधं मुनिसल्लापम्, आकाशे गगने श्रुतवन्ताविति शेषः।

राजा - ([45]कर्णं दत्वा।) अये! प्रतिपाल्यावसराः खलु मुनयः[46]॥

राजेति। राजा प्राह, कर्णं श्रोत्रं, दत्वा अवहितीकृत्येत्यर्थः, अये मातले, मुनयो महर्षयः, प्रतिपाल्यावसराः खलु प्रतीक्षणीयसमया हि, इदानीं गन्तुं समयोऽवेक्षणीय इत्याशयः।

मातलिः - (राजानमवलोक्य) अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान्। यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि॥

मातलिरिति। मातलिः, राजानं दुष्यन्तम्, अवलोक्य वीक्ष्य, प्राह, किमिति, अस्मिन् पुरस्थिते, अशोकवृक्षमूले वकुलपादपाधः प्रदेशे, आयुष्मान् महाराजः, तावत् तावन्तं समयम्, आस्ताम्, उपविशतु, यावद्यावताकालेन, त्वां भवन्तम्, इन्द्रगुरवे शक्रजनकाय, निवेदयितुं ज्ञापयितुम् आगतमिति शेषः, अन्तरान्वेषी अवसरप्रतीक्षः भवामि।

---

44 'उत्कर्षिणी' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

45 'कर्णं दत्वा' इत्येषः पाठः 'C' इति प्रकाशने नोपलभ्यते।

46 'प्रस्तावः' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

राजा - यथा भवान्मन्यते। (इति स्थितः)

राजेति। राजा भवान् यथा येन प्रकारेण, मन्यते जानाति तथा करोमीत्युक्त्वा, स्थितः उपविष्टः।

[47]मातलिः - आयुष्मन्! साधयाम्यहम्। (इति निष्क्रान्तः)

मातलिरिति। मातलिः प्राह, हे आयुष्मन् राजन्, अहं साधयामि गच्छामि, इत्युक्त्वा, निष्क्रान्तः निरगात्।

राजा - (निमित्तं सूचयित्वा)

श्लो॥ मनोरथाय नाशंसे किं बाहो स्पन्दसे [48]वृथा ।
पूर्वावधीरितं श्रेयो दुःखं हि [49]परिवर्तते॥13॥

राजेति। राजा, निमित्तं शुभशकुनं, सूचयित्वा सम्यग्ज्ञात्वा, प्राह, मनोरथायेति, मनोरथाय अभिलाषविषयाय शकुन्तलारूपायेत्यर्थः, नाशंसे नेच्छामि, हे बाहो दक्षिणभुज, वृथा निरर्थकं, किं किमर्थं, स्पन्दसे स्फुरसि, हि यस्मात्। पूर्वावधीरितं पूर्वं निराकृतं, श्रेयः मङ्गलं, दुःखं व्यथाभूतं सत्, परिवर्तते परिणमति, तस्मादिति पूर्वेणान्वयः।

(नेपथ्ये) मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम्।।

नेपथ्य इति। नेपथ्ये यवनिकाभ्यन्तरे, चापलं चपलकृत्यं, मा खलु कुरु मा कार्षीरित्यर्थः, इति काचित्कश्चिदाह, कथं केन प्रकारेण, आत्मनस्स्वस्य, प्रकृतिं स्वभावं, गतः प्राप्त एव अस्मीति शेषः, कथमित्यस्य चापलमित्यनेनान्वयः इति कश्चिदाह।

---

47 '(निष्क्रान्तो मातलिः)' इत्येव 'C' इति प्रकाशने पाठः।

48 'मुधा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

49 'परिवर्धते' इति 'A' इति प्रकाशने पाठान्तरम्।

राजा - (कर्णं दत्वा) अभूमिरियमविनयस्य। को नु [50]खल्वेष निषिध्यते[51]। (शब्दानुसारेणावलोक्य, [52]सस्मितम्) अये। को नु खल्वयमनुवध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः।

श्लो॥ अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।
[53]प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति॥14॥

राजेति। राजा दुष्यन्तः, कर्णं श्रोत्रं, दत्वा तत्श्रवणं कृत्वा प्राह, इयं आश्रमभूमिः, अविनयस्य दुष्टत्वस्य, अभूमिः अविषयः, एष जनः, निषिध्यते निवार्यते, को नु खलु को वा भवेत्, शब्दानुसारेणावलोक्य शब्दमनुसृत्य वीक्ष्य, सस्मितं समन्दहासं प्राह, तपस्विनीभ्यां तापसस्त्रीभ्याम्, अनुबध्यमानः अनुगम्यमानः, अबालसत्त्वः महाबलसम्पन्नः, अयं बालः एष कुमारः, को नु खलु को वा स्यात्, अये इत्याश्चर्ये, अबालसत्त्वमेवाह, अर्धेति, मातुः जनन्याः, अर्धपीतस्तनम् अर्धग्रस्तपयोधरम्, आमर्दक्लिष्टकेसरम् आमर्देन निपीडनेन क्लिष्टा बाधिताः केसरास्सटासस्यतं, सिंहशिशुं केसरिकिशोरं, प्रक्रीडितुं खेलितुं, बलात्कारेण निर्बन्धेन, कर्षति आकर्षति।

(ततः प्रविशति यथानिर्दिष्टकर्मा [54]तपस्विनीभ्यां बालः)

तत इति। ततोऽनन्तरं यथानिर्दिष्टकर्मा यथोक्तसिंहकिशोराकर्षणकृत्याः, बालः कश्चनमनुष्यशिशुः, तपस्विनीभ्यां तापसपत्नीभ्यां सहितस्सन्, प्रविशति प्राप्नोति रङ्गस्थलमिति शेषः।

बालः - जृम्भस्व सिंह। दन्तांस्ते गणयिष्यामि[55]॥

---

50 'खल्वविनयं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

51 'शिक्ष्यते' इति 'C' इति प्रकाशने पाठान्तरम्।

52 'सविस्मयम्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

53 'विलम्बिनं सिंहशिशुं करेणाहत्य कर्षति' इति 'A' इति प्रकाशने पाठान्तरम्।

54 'बालस्तपस्वीभ्यां सह' इति 'C' इति प्रकाशने पाठान्तरम्।

बाल इति। बाल आह, हे सिंह मृगेन्द्र, जृम्भस्व जृम्भणं कुरु, ते तव दन्तान् रदान्, गणयिष्यामि संख्यास्यामि।

प्रथमा - अविनीत! किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि। हन्त वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृत नामधेयोऽसि॥

प्रथमेति। प्रथमा स्वानुगतयोस्तपस्विन्योराद्या प्राह, हे अविनीत दुष्टव्यापार, नोऽस्माकम्, अवत्यनिर्विशेषाणि पुत्रतुल्यानि, सत्त्वानि प्राणिनः, किं किमर्थं, विप्रकरोषि पीडयसि, ते तव, संरम्भः सम्भ्रमः, वर्धते वृद्धिं प्राप्नेति हन्तेति विषादे, ऋषिजनेन मुनिजनेन, सर्वदमन इति कृत नामधेयः विरचिताभिधानः, असि भवसि, स्थाने खलु सर्वसत्त्वबाधनाद्युक्तमेव हि।

राजा - [56]किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः। नूनमनपत्यता मां[57] वत्सलयति॥

राजेति। राजा प्राह, किं नु खलु केन वा कारणेन, अस्मिन्बाले एतस्मिन् शिशौ, औरसे स्वजाते, पुत्रे तनय इव, मे मम, मनः हृदयं, स्निह्यति प्रेमार्द्रं भवति, अनपत्यता सन्ततिराहित्यं, मां वत्सलयति प्रेमयुक्तं करोति, नूनं निश्चयः।

द्वितीया - एषा खलु केसरिणी त्वां लङ्घयति। यद्यस्याः[58] पुत्रकं न मुञ्चसि॥

---

55 'गणयिष्ये' इति 'A' इति प्रकाशने पाठान्तरम्।
'जृम्भस्व जृम्भस्व सिंह डिम्भ दन्तास्ते गणयिष्यामि।' इति 'C' इति प्रकाशने पाठान्तरम्।

56 '(आत्मगतम्)' इत्येषः अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।

57 'अनपत्यतैवं' इति 'C' इति प्रकाशने पाठान्तरम्।

58 'यदि तस्याः' इति 'A' इति प्रकाशने पाठान्तरम्।

द्वितीयेति। द्वितीया प्राह, एषा पुरोवर्तिनी, केसरिणी मृगराड्वधूः, त्वां भवन्तं, रङ्घयति खलु अभिभवति हि, अस्याः सिंहवध्वाः, पुत्रकं बालपुत्रम् अल्प इत्यल्पार्थेकन्प्रत्ययः, न मुञ्चसि यदि न विसृजसि चेत्।

बालः - (सस्मितम्) अहो! बलीयः खलु भीतोऽस्मि। (इत्यधरं दर्शयति)

बाल इति। बालः माणवकः नि।। "बालस्तुस्यान्माणवक" इत्यमरः, सस्मितं साल्पहासं यथा तथा प्राह, किमिति, बलीयः भृशं, भीतः भयं गतः अस्मि खलु भवामि हि, अहो आश्चर्यम्, इत्युक्त्वा, अधरम् अधरोष्ठं, दर्शयति प्रेक्षयति।

राजा -

श्लो॥ महतस्तेजसो बीजं [59]बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष[60] इव स्थितः॥15॥

राजेति। राजा भाषते, अयं बालः एष शिशुः, महतः सर्वाधिकस्य, तेजसः कस्यचित्तेजस्विनः प्रतापशालिन इति यावत्, तेजश्शब्देन तेजस्वी लक्ष्यते, बीजं शुक्रं, मे मम, प्रतिभाति प्रतिभासते, अत एव स्फुलिङ्गावस्थया कणरूपेण, एधापेक्षः इन्धनाकाङ्क्षी, वह्निरग्निरिव स्थितः।

प्रथमा - वत्स! एतं बालमृगेन्द्रकं मुञ्च। अपरं ते क्रीडनकं दास्यामि॥

प्रथमेति। पुनः प्रथमा प्राह, हे वत्स शिशो, एतम् इमं, बालमृगेन्द्रकं सिंहकिशोरं, मुञ्च त्यज, ते तव, अपरम् अन्यं, क्रीडनकं क्रीडासाधनीभूतप्रतिमाविशेषं, दास्यामि प्रतिपादयिष्यामि।

बालः - कुत्र देह्येनम्[61]॥ (इति हस्तं प्रसारयति)

59 'पुत्रोऽयं' इति 'C' इति प्रकाशने पाठान्तरम्।

60 'एधोपेक्ष' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

61 'देहि तत्' इति 'A' इति प्रकाशने पाठान्तरम्।

बाल इति। बालः कुमारः प्राह, कुत्र कस्मिन्प्रदेशे वर्तत इति शेषः, एनं क्रीडनकं, देहि वितर, इत्युक्त्वा, हस्तं करं, प्रसारयति प्रसृतं करोति।

राजा - [62]कथं चक्रवर्तिलक्षणमप्यनेन धार्यते। तथा ह्यस्य।

श्लो॥ प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः।
अलक्ष्यपत्त्रान्तरमिद्धरागया
नवोषसा भिन्नमिवैकपङ्कजम्॥16॥

राजेति। राजा प्राह, अनेन करेण, चक्रवर्तिलक्षणं सार्वभौमचिह्नमपि, कथं केन वा हेतुना, धार्यते ऊह्यते, तथाहि तदेव प्रतिपादयति, अस्य बालस्य, प्रलोभ्येति, प्रलोभ्यवस्तुप्रणयप्रसारितः प्रलोभ्ये प्रकर्षेणस्पृहणीये वस्तुनि द्रव्ये प्रणयेन याञ्चया प्रसारितः विस्तारितः, जालग्रथिताङ्गुलिः जालेष्ववकाशेषु ग्रथितास्संश्लिष्टा अङ्गुलयः करशाखा यस्य स तथोक्तः, करो हस्तः, इद्धरागया दीप्तरक्तिमया, नवोषसा प्रातस्सन्ध्यया, भिन्नं विकासितम् अलक्ष्यपत्रान्तरं संश्लिष्टदलान्तरालम्, एकपङ्कजं केवलापविन्दमिव, विभाति प्रकाशते।

द्वितीया - सुव्रते! न शक्य एष [63]वाचामात्रेण विरमयितुम्। गच्छ [64] मदीय उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरकस्तिष्ठति[65]॥ तमस्योपहर॥

'देह्येतत्' इति 'B' इति प्रकाशने पाठान्तरम्।

62 '(बालस्य हस्तमवलोक्य)' इत्यधिकः पाठः 'A' इति प्रकाशने उपलभ्यते। '(दृष्ट्वा सविस्मयं)' इति 'C' इति प्रकाशने पाठान्तरम्।

63 'वाङ्मात्रेण' इति 'C' इति प्रकाशने पाठान्तरम्।

64 'त्वं' इति अधिकः पाठः 'A' 'B' इति प्रकाशनयोः उपलभ्यते।

65 'मृत्तिकामयूरस्तिष्ठति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

द्वितीयेति। द्वितीया प्रथमां प्रति सम्बोध्याह, हे सुव्रते शोभनशीले, एष कुमारः, वाचामात्रेण केवलवचनेन, विरमयितुं सिंहकिशोरग्रहणान्निवर्तयितुं, न शक्यः न साध्यः, गच्छ याहि, मदीये मत्सम्बन्धिनि, उटजे पर्णगृहे, मार्कण्डेयस्य तदाख्यस्य, ऋषिकुमारस्य मुनिपुत्रस्य, वर्णचित्रितः वर्णैः नीलशुक्लरक्तादिभिः चित्रितः चित्रीकृतः, मृत्तिकामयूरकः मृण्मयबालमयूरः, तिष्ठति वर्तते, तं मयूरम् अस्य बालकस्य, उपहर प्रयच्छ।

प्रथमा - तथा। (इति निष्क्रान्ता)

प्रथमेति। प्रथमा प्राह, तथा भवदुक्तप्रकारेण करिष्यामीति शेषः, इत्युक्त्वा निष्क्रान्ता निर्जगाम।

बालः - अनेनैव तावत्क्रीडिष्यामि। (इति तापसीं विलोक्य हसति)

बाल इति। बाल आह, तावत् इदानीम्, अनेन एतेन, सिंहकिशोरेणैव, क्रीडिष्यामि खेलनं करिष्यामि, इत्युक्त्वा, तापसीं मुन्यङ्गनां, विलोक्य वीक्ष्य, हसति हसनं करोति।

राजा - स्पृहयामि खलु दुर्ललितायास्मै[66]।

श्लो॥ आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा [67]मलिनीभवन्ति॥17॥

राजेति। राजा प्राह, दुर्ललिताय धूर्ताय, अस्मै बालकाय, स्पृहयामि खलु अभिलषामि हि, एनं दृष्ट्वा कोऽपि सन्तोषो जायत इत्यर्थः, आलक्ष्येति, धन्याः सुकृतिनः, अनिमित्तहासैः निर्हेतुकहसनैः, आलक्ष्यदन्तमुकुलान् ईषद्दृश्यदशन–

66 '(निःश्वस्य)' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

67 'परुषीभवन्ति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

कुड्मलान्, अव्यक्तवर्णैः अस्पष्टोच्चारिताक्षरैः, रमणीया कमनीया, वचः प्रवृत्तिः वाग्व्यापारो येषां तान्, अङ्काश्रयप्रणयिनः उत्सङ्गाक्रमणार्थिनः, तनयान् पुत्रान्, वहन्तः प्रापयन्तस्सन्तः, तदङ्गरजसा तेषां बालानाम् अङ्गेषु करचरणादिषु रजसा पांसुना, मलिनीभवन्ति धूलिधूसरितगात्रा भवन्ति।

तापसी - भवतु। न मामयं गणयति। (पार्श्वमवलोकयति[68]) कोऽत्र ऋषिकुमाराणाम्। (राजानमवलोक्य) भद्रमुख! एहि तावत्। मोचयानेन दुर्मोचहस्तग्राहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रकम्[69] ॥

तापसीति। तापसी वदति, भवतु अस्तु, अयं बालकः, मां न गणयति न संख्याति नाद्रियत इत्यर्थः, इत्युक्त्वा, पार्श्वं पार्श्वप्रदेशम्, अवलोकयति पश्यति, दृष्ट्वा प्राह, अथ प्रदेशे, ऋषिकुमाराणां मुनिपुत्राणां मध्ये, कः को वा वर्तते, राजानं नृपम्, अवलोक्य वीक्ष्य कथयति, किमिति, हे भद्रमुख कल्याणानन, भद्रमुखेति मान्यामन्त्रणे, तावत् इदानीं, एहि आयाहि, अनेन कुमारेण, डिम्भलीलया बालचर्यया, दुर्मोचहस्तग्राहेण दुर्मोचेन मोचयितुमशक्येन हस्तग्राहेण कराकर्षणेन, बाध्यमानं पीड्यमानं, बालमृगेन्द्रकं सिंहकिशोरं, मोचय त्याजय।

राजा - (उपगम्य। सस्मितम्।) अयि भो महर्षिपुत्र!

श्लो॥ एवमाश्रमविरुद्धवृत्तिना
[70]संयमः किमिति [71]जन्मनस्त्वया।
सत्त्वसंश्रयसुखोऽपि[72] दूष्यते

---

68 'अवलोक्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

69 'बालमृगेन्द्रम्' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

70 'संयमी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

71 'जन्मतः' इति 'B' इति प्रकाशने पाठान्तरम्।

72 'गुणोऽपि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

कृष्णसर्पशिशुनेव [73]चन्दनम्॥18॥

राजेति। राजा उपगम्य समीपं गत्वा, सस्मितं समन्दहासं प्राह, अयि भो महर्षिपुत्र हे पूज्यमुनिकुमार, एवमिति, एवमनेन प्रकारेण, आश्रमविरुद्धवृत्तिना आश्रमस्य तपोवनस्य विरुद्धवृत्तिना विपरीतव्यापारेण, त्वया भवता, जन्मनः उद्भवात् सिद्ध इति शेषः, सत्त्वंसंश्रयसुखः सत्वगुणाश्रयणसुलभोऽपि, संयमः शमगुणः, कृष्णसर्पशिशुना कालाहिशावकेन, चन्दनं मलयज इव, किमिति केन हेतुना, दूष्यते नाश्यते।

तापसी - भद्रमुख! न खल्वयमृषिकुमारः॥

तापसीति। तापसी ब्रूते, हे भद्रमुख शुभानन राजन्, अयं पुरवर्ती, बालकः ऋषिकुमारः, न खलु न भवति हि।

राजा - आकारसदृशं चेष्टितमेवास्य कथयति। स्थानप्रत्ययात्तु वयमेवं तर्किणः॥ (यथाभ्यर्थितमनुतिष्ठन्बालस्पर्शमुपलभ्य, आत्मगतम्)

श्लो॥ अनेन कस्यापि कुलाङ्कुरेण
[74]स्पृष्टस्य गात्रेषु सुखं ममैवम्।
कां निर्वृतिं [75]चेतसि तस्य कुर्या-
द्यस्यायमङ्गात्कृतिनः [76]प्ररूढः॥19॥

राजेति। राजा प्राह, आकारसदृशम् आकृत्यनुगुणम्, अस्य बालकस्य चेष्टितं चरित्रमेव, कथयति ऋषिपुत्रो न भवतीति बोधयति, किन्तु वयं स्थानप्रत्ययात् स्थानरूपाद्धेतोः, एवमनेन प्रकारेण, तर्किणः ऊहवन्तः, यथाभ्यर्थितं

---

73 'चन्दनः' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

74 'स्पृष्टेषु' इति 'A' इति प्रकाशने पाठान्तरम्।

75 'तस्य जनस्य कुर्यात्' इति 'C' इति प्रकाशने पाठान्तरम्।

76 'प्रसृतः' इति 'A' इति प्रकाशने पाठान्तरम्।

यथा प्रार्थनम्, अनुतिष्ठन् कुर्वन्, बालस्पर्शं कुमारसम्पर्कम् उपलभ्य प्राप्य, आत्मगतं स्वगतम्, अनेनेति, कस्यापि कस्यचित्पुरुषस्य, अनेन पुरोवर्तिना, कुलाङ्कुरेण कुलस्थितिकारणभूतेन कुमारेण, गात्रेषु अवयवेषु, स्पृष्टस्य प्राप्तस्पर्शस्य मम, एवम् अनुभवैकवेद्यं, सुखं शर्म भवतीति शेषः, अयं कुमारः, कृतिनः धन्यस्य, यस्य पुंसः, अङ्गात् शरीरात्, प्ररूढः जातः, तस्य जनस्य, चेतसि चित्ते, कां कीदृशीं, निर्वृतिं सुखं, कुर्यात् विदध्यात्, सम्भावनायां लिङ्।

तापसी - (उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम्॥

तापसीति। तापसी मुनिवधूः, उभौ राजराजकुमारौ, निर्वर्ण्य विलोक्य, प्राह, आश्चर्यम् अद्भुतं भवतीति शेषः,अत्यादराद्द्विरुक्तिः।

राजा - आर्ये! किमिव॥

राजेति। राजा वक्ति, हे आर्ये पूज्ये, किमिव किमर्थम्, आश्चर्यमित्यनुषज्यते, इवेति वाक्यालङ्कारे।

तापसी - [77]अस्य बालकरूपस्य तेऽपि संवादिन्याकृतिरिति विस्मापितास्मि। अपरिचितस्यापि तेऽप्रतिलोमस्संवृत्त इति॥

तापसीति। तापसी ब्रवीति, अस्य बलकरूपस्य एतस्य कुमाराकारस्य, ते तवापि, आकृतिः संवादिनी अनुरूपा इति हेतोः, विस्मापिता विस्मयं प्रापिता, अस्मि भवामि, अपरिचितस्य असंस्तुतस्यापि, ते तव, अप्रतिलोमः स्नेह इत्यर्थः संवृत्तः जातः, इत्यस्माद्धेतोः आश्चर्यमिति पूर्वेणान्वयः।

राजा - (बालमुपलालयन्।) न चेन्मुनिकुमारोऽयम्। अथ कोऽस्य व्यपदेशः॥

---

77 'अस्य बालस्य तव सम्बन्धसंवादिन्याकृतिरिति विस्मितास्मि। अपरिचितस्याप्यार्यस्य अप्रतिलोमस्संवृत्त इति' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। राजा, बालं कुमारम्, उपलालयन् क्रीडयन् प्राह, अयं बालकः मुनिकुमारः ऋषिपुत्रः, न चेत् न भवति यदि, अत तर्हि, अस्य शिशोः, व्यपदेशः कुलनामकः कीदृशः।

तापसी - पुरुवंशः[78] ॥

तापसीति। तापसी प्राह, पुरुवंशः पुरुरिति कश्चन महाराजः एतेषां पूर्वतमः तस्य वंशः अन्वयः।

राजा - (आत्मगतम्।) कथमेकान्वयो[79] मम। अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम्।

श्लो ॥ भवनेषु [80]रसाधिकेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि पश्चा-
त्तरुमूलानि गृहीभवन्ति तेषाम् ॥20॥

(प्रकाशम्) न पुनरात्मगत्या मानुषाणामेष विषयः ॥

राजेति। राजा, आत्मगतं स्वगतम्, आत्मन एव यथावगतं भवति तथेत्यर्थः, प्राह, अयं शिशुः, मम एकान्वयः एकवंशः सगोत्र इत्यर्थः, कथं केन प्रकारेण भवेत्, अतः खलु अस्मादेव हेतोः, अत्रभवती पूज्या तापसी, एनं बालकं, मदनुकारिणं मत्प्रतिरूपं, मन्यते जानाति, पौरवाणां पुरुवंश्यानां राज्ञां, एतत्प्रसिद्धम्, अन्त्यं चरमं, कुलव्रतं वंशक्रमागतं, व्रतं तपोरूपम्, अस्ति विद्यते, तथाहि, भवनेष्विति, ये पौरवापाजानः, क्षितिरक्षार्थं भूपरिपालनार्थं, रसाधिकेषु अत्यधिकरागास्पदेषु, भवनेषु तत्तदृत् निवासार्हगृहेषु, पूर्वं यावनकाले, निवासं

---

78 'पुरुवंशज एषः' इति 'C' इति प्रकाशने पाठान्तरम्।

79 'कथमेकान्वयोऽस्माकम्।' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

80 'सुधासितेषु' इति 'A' 'B' 'C' इति प्रकाशनेषु पाठान्तरम्।

स्थितिम्, उशन्ति इच्छन्ति, तेषां राज्ञां, पश्चात् वार्धकावस्थायां, नियतैकयतिव्रतानि नियतानि अवश्यं कर्तव्यानि एकानि मुख्यानि यतिव्रतानि कृच्छ्रचान्द्रायणादि-तपांसि येषु तानि, तरुमूलानि वृक्षाङ्घ्रिभागाः, गृहीभवन्ति निवासाभवन्ति, अयं शिशुः तेषां सम्बन्धी भवेत् इत्याशयः, प्रकाशमिति, प्रकाशं प्रकटं यथा तथा प्राह, नेति, एष विषयः अयं देशः, मानुषाणां नराणाम् आत्मगत्या स्वाधीनगमनेन, पुनः न न गम्यः, अतः कथमयं पुरुवंश्य इति भावः।

तापसी - यथा भद्रमुखो भणति। अप्सरस्सम्बन्धेनास्य [81]जनन्यत्र देवगुरोस्तपोवने प्रसूता॥

तापसीति। तापसी मुनिवधूः प्राह, यथा येन प्रकारेण, भद्रमुखः कल्याणवदनः, भणति भाषते, तथैवेति शेषः, यत्तदोर्नित्यसम्बन्धात्, अप्सरस्सम्बन्धेन मेनकासम्बन्धेन, अस्य बालकस्य, जननी माता, अत्र अस्मिन्, देवगुरोः मारीचस्य, तपोवने आश्रमे, प्रसूता जनितवती।

राजा - ([82]आत्मगतम्।) हन्त द्वितीयमिदमाशाजननम्॥ (प्रकाशम्) [83]अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी॥

राजेति। राजा, आत्मगतं स्वगतं, ब्रूते, इदं तापसीवाक्यं, द्वितीयम् आशाजननं पुनश्शकुन्तला प्राप्तितृष्णाजनकं, हन्तेति हर्षे, नि॥ "हन्तहर्षेऽनुकम्पायां वाक्यारम्भविषादयोः" इति विश्वः, प्रकाशम् प्रकटम् प्राह, अथ अनन्तरं, तत्रभवती पूज्या, सा वधूः, किमाख्यस्य किं नामधेयस्य, राजर्षेः राजश्रेष्ठस्य, पत्नी भार्या भवेदिति शेषः।

तापसी - कस्तस्य धर्मदारपरित्यागिनो नाम [84]सङ्कीर्तितुं चिन्तयिष्यति॥

---

81 'बालस्य' इति 'C' इति प्रकाशने अधिकः पाठः।

82 'अपवार्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

83 'अथ सा' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

तापसीति। तापसी प्राह, कः को वा पुरुषः, धर्मदारपरित्यागिनः धर्मपत्नीपरित्यागशीलस्य, तस्य राज्ञः, नाम अभिधानं, सङ्कीर्तितुम् उच्चरितुं, चिन्तयिष्यति स्मरिष्यति, चितिस्मृत्यामिति धातोर्लृट्।

राजा - (स्वगतम्) इयं खलु कथा मामेव लक्षीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छेयम्[85]। (विचिन्त्य) अथवा, अन्यायः परदारपृच्छाव्यापारः[86]॥

राजेति। राजा, स्वगतं स्वमात्रावगतं यथा तथा ब्रवीति, इयं खलु कथा एषापि कथा, मामेव लक्षीकरोति विषयीकरोति, तावदिदानीम् अस्य शिशोः एतस्य बालकस्य, मातरं जननीं, नामतः नाम्ना, सार्वविभक्तिकस्तसिः, पृच्छेयं यदि प्रश्नं करोमि चेत्, इत्युक्त्वा, विचिन्त्य विचार्य, अथवा तथा नोचेत्, परदारपृच्छाव्यापारः अन्यकलत्रनाधेयप्रश्नप्रयत्नः, अन्यायः न्यायव्यतिरिक्तः, अतो न कार्य इति भावः।

तापसी - (प्रविश्य मृण्मयूरहस्ता) सर्वदमन! शकुन्तलावण्यं [87]प्रेक्ष्यस्व॥

तापसीति। तापसी, मृण्मयूरहस्ता करगतमृत्तिकामय बर्हिणा सती, प्रविश्य शिशुसमीपं प्राप्य प्राह, हे सर्वदमन तन्नामधेय बालक, शकुन्तलावण्यं पक्षिसौन्दर्यं, प्रेक्षस्व पश्ये।

बालः - (सदृष्टिक्षेपम्) कुत्र वा मे अम्बा[88]॥

---

84 अस्य शब्दस्य स्थाने 'नाम' इति 'C' इति प्रकाशने पाठान्तरम्।

85 'पृच्छामि' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

86 'अथवा अनार्यः परदारव्यवहारः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'अन्याय्योऽन्य दाराव्यवहारः' इति 'C' इति प्रकाशने पाठान्तरम्।

87 'पश्य' इति 'C' इति प्रकाशने पाठान्तरम्।

बाल इति। बालः कुमारः, सदृष्टिक्षेपं दृक्प्रसारसहितं यथा तथा वक्ति, मे मम, अम्बा माता, कुत्र कस्मिन्वा प्रदेशे स्थितेति शेषः।

उभे - [89]नामसादृश्येन वञ्चितो मातृवत्सलः ॥

उभे इति। उभे द्वे तापस्यौ प्राहतुः, मातृवत्सलः मातर्यीति प्रेमविशिष्टः अयं बालकः, नामसादृश्येन नामधेयसाम्येन, वञ्चितः विप्रलब्धः नि।। "विप्रलब्धस्तु वञ्चित" इत्यमरः।

द्वितीया - वत्स। अस्य मृत्तिकामयूरकस्य रम्यत्वं पश्येति भणितोऽसि॥

द्वितीयेति। द्वितीया प्राह, हे वत्स बालक, अस्यमृत्तिका मयूरकस्य एतस्य मृण्मयबर्हिणस्य, रम्यत्वं लावण्यं, पश्य वीक्षस्वेति, भणितः प्रोक्तोऽसि, न तु शकुन्तलामिति भावः।

राजा - (आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव [90] नाममात्रप्रस्तावो मे विषादाय[91] कल्पते॥

राजेति। राजा दुष्यन्तः, आत्मगतं स्वगतं प्राह, अस्य शिशोः, मातुः जनन्याः, आख्या अभिधा, शकुन्तलेति किं वा भवेदिति शेषः, नामधेयसादृश्यानि पुनः नामसाम्यानि तु, सन्ति वर्तन्ते, लोक इति शेषः, मृगतृष्णिका मरीचिकेव, नाममात्रप्रस्तावः नामधेयमात्र प्रसङ्गः मे मम, विषादाय अपरितोषाय, कल्पतेऽपि नाम समर्थो भवति हि, पिपासातुरस्य मृगतृष्णा यथा वारिभ्रमं सञ्जनयति, तथास्यापि शकुन्तलानामधेयप्रसङ्गः शकुन्तलाभ्रान्तिमुत्पादयतीति भावः।

---

88 'अम्बा' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

89 '(वहस्य)' इति 'C' इति प्रकाशने अधिकः पाठः।

90 'अयमत्र' इति 'C' इति प्रकाशने अधिकः पाठः।

91 'विसंवदाय' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

बालः - आर्यके[92]! रोचते मे एष भद्रमयूरकः[93]। (इति क्रीडनकमादत्ते)

बाल इति। बालः कुमारः प्राह, हे आर्यके पूज्ये, एष भद्रमयूरकः अयं सुभगमृण्मयशिखी, मे मह्यं, रोचते प्रियो भवति, सू। 'रुच्यर्थानां प्रीयमाण' इति सम्प्रदानत्वाच्चतुर्थी इत्युक्त्वा, क्रीडनकं क्रीडासाधनीभूतमयूरप्रतिमाम् आदत्ते गृह्णाति।

प्रथमा - (विलोक्य, सोद्वेगम्) अहो। रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते॥

प्रथमेति। प्रथमा, विलोक्य प्रेक्ष्य, सोद्वेगं सभयं प्राह, रक्षाकरण्डकं रक्षणौषधियुक्ता पेटिका, अस्य शिशोः, मणिबन्धे कङ्कणयोग्यस्थानविशेषे, न दृश्यते नावलोक्यते किं कुर्म इति शेषः, अहो इत्याश्चर्ये।

राजा - [94]अलमलमावेगेन। [95]नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम्। (इत्यादातुमिच्छति)

राजेति। राजा प्राह, आवेगेन उद्वेगेन, अलं पर्याप्तम्, आवेगो न कर्तव्य इत्यर्थः, सम्भ्रमातिशयाद्द्विरुक्तिः, ननु तापसि, अस्य शिशोः, इदं रक्षाकरण्डकं, सिंहशावविमर्दात् पञ्चास्य किशोरपीडनात्, परिभ्रष्टं प्रच्युतम्, इत्युक्त्वा, आदातुं स्वीकर्तुम्, इच्छति वाञ्छति।

उभे - मा खलु मा खलु[96]। एतदवलम्ब्य कथं गृहीतमनेन। (इति विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः)

---

92 'मातः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'अम्ब' इति 'C' इति प्रकाशने पाठान्तरम्।

93 'भद्रमयूरः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

94 'अलमलम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

95 'नन्वयमस्य' इति 'A' इति प्रकाशने पाठान्तरम्।

उभे इति। उभे प्राहतुः, मा खलु रक्षाकरण्डकं न गृहाण त्वरातिशयाद्द्विरुक्ति, एतत् रक्षाकरण्डकम्, अनेन राज्ञा, अविलम्ब्य त्वरया, अस्मत्प्रतिषेधवचनसमकालमेवेत्यर्थः, कथं केन प्रकारेण, गृहीतं निरपायं स्वीकृतं, इत्युक्त्वा, उभे, विस्मयादाश्चर्यात्, उरोनिहित हस्ते वक्षस्थल निक्षिप्तकरे सत्यौ, परस्परमन्योऽन्यम् अवलोकयतः पश्यतः।

राजा - किमर्थं [97]प्रतिषिद्धास्स्मः ॥

राजेति। राजा वदति, वयं किमर्थं किं निमित्तं, प्रतिषद्धाः निवारिताः, स्मः भवामः।

प्रथमा - श्रृणोतु। महाराजः। एषा अपराजिता नामौषधिरस्य[98] जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति ॥

प्रथमेति। प्रथमा प्राह, किमिति, महाराजः राजचूडामणिः, शृणोतु आकर्णयतु, एतद्वृत्तान्तमिति शेषः, एषा पुरोवर्तिनी, ओषधिः, अपराजिता नामा अपराजिता नामधेयवती, अस्य शिशोः, भगवता त्रिकालवेदिना, मारीचेन मारीचाख्यमुनिना, जातकर्मसमये जातकर्माख्य संस्कारविशेषकाले दत्ता प्रतिपादिता, मातापितरौ मातरं पितरम्, आत्मानं स्वं च वर्जयित्वा, अपरः अन्यो जनः, भूमिपतितां मेदिनी गताम्, एताम् ओषधिं, न गृह्णाति किल ग्रहीतुं समर्थो न भवति किलेत्यैतिह्यो।

राजा - अथ गृह्णाति ॥

राजेति। राजा वदति, अथ गृह्णाति अथेति प्रश्ने गृह्णाति चेत्किमित्यर्थः।

---

96 'मा खल्विदमवलम्ब्य' इत्येव पाठः 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

97 'भवतीभ्यां प्रतिषिद्धोऽस्मि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

98 'अस्मै' इति 'C' इति प्रकाशने पाठान्तरम्।

प्रथमा - [99]ततस्तं सर्पो भूत्वा दशति॥

प्रथमेति। प्रथमा प्राह, ततः तर्हि, तं भूपतितौषधिग्राहिणं, सर्पः अशीविषः, भूत्वा सम्पद्य, दशति दष्टं करोति।

राजा - भवतीभ्यां कदाचिदस्या प्रत्यक्षीकृता विक्रिया॥

राजेति। राजा ब्रूते, भवतीभ्यां युवाभ्याम् अस्या ओषध्याः, विक्रिया सर्परूपविकृतिः, कदाचित् कस्मिंश्चित्समये, प्रत्यक्षी कृता निदर्शनेन दृष्टा किम्।

उभे - अनेकशः॥

उभे इति। उभे द्वे तापस्यौ प्राहतुः, अनेकशः बहुवारम् प्रत्यक्षीकृतेति शेषः।

राजा - ([100]सहर्षम्, आत्मगतम्) कथमिव[101] सम्पूर्णमपि मे मनोरथं नाभिनन्दामि। (इति बालं परिष्वजते॥)

राजेति। राजा, सहर्षं ससन्तोषम्, आत्मगतं स्वगतं वक्ति, अहं सम्पूर्णं परिपूर्णमपि, मे मम, मनोरथम्, अभिलाषं, कथं केन प्रकारेण, नाभिन्दामि न सन्तुष्यामि, इवेति वाक्यालङ्कारे, किन्तु सन्तुष्याम्येवेति भावः, इत्युक्त्वा, बालं कुमारं, परिष्वजते आलिङ्गति।

द्वितीया - सुव्रते! एहि। इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः। (इति निष्क्रान्ते॥)

---

99 'ततस्सद्य एव सर्पो भूत्वा दंशति।' इति 'C' इति प्रकाशने पाठान्तरम्।

100 '(आत्मगतम्)' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

101 'कथमिमं पूर्णमपि, तत्किं खलु इदानीं पूर्णमात्मनो मनो..., ' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'किमिदानीम्' इति 'C' इति प्रकाशने पाठान्तरम्।

द्वितीयेति। द्वितीया प्राह, हे सुव्रते सुशीले, एहि आगच्छ, नियमव्यावृतायै तत्तद्व्रतपरायै, शकुन्तलायै एतच्छिशोरम्बायै, इमं वृत्तान्तम् एतम् ओषधिग्रहणवार्ताम्, निवेदयावः विज्ञापयावः, इत्युक्त्वा, निष्क्रान्ते निर्गते।

बालः - मुञ्च माम्। [102]यावदम्बायास्सकाशं गमिष्यामि॥

बाल इति। बालः प्राह, हे राजन्, मां मुञ्च त्यज, अहं यावत् यावता कालेन, अम्बाया मातुः, सकाशं निकटं, गमिष्यामि यास्यामि।

राजा - [103]पुत्रक! मया सहैव मातरमभिनन्दिष्यसि॥

राजेति। राजा प्राह, हे पुत्रक बालक, मया सह मया सममेव, मातरं जननीम्, अभिनन्दिष्यसि हर्षं प्रापयिष्यसि।

बालः - मम खलु तातो दुष्यन्तः। न त्वम्॥

बाल इति। बालः प्राह, मम तातो जनकः, दुष्यन्तः खलु दुष्यन्ताख्यो राजा हि, त्वं न न भवसि।

राजा - (सस्मितम्) एष विवाद एव प्रत्याययति॥

राजेति। राजा, सस्मितं समन्दहासं प्राह, एष विवादः अयं वाक्कलह एव, प्रत्याययति विश्वासयति।

(ततः प्रविशत्येकवेणीधरा शकुन्तला)

तत इति। ततोऽनन्तरम्, एकवेणीधरा एकवेणीभूतकेशपाशधारिणी शकुन्तला, प्रविशति प्राप्नोति, रङ्गस्थलमिति शेषः।

---

102 'यावन्मातुः सकाशं' इति 'A' इति प्रकाशने पाठान्तरम्।
'अम्बायाः सकाशं गच्छामि।' इति 'C' इति प्रकाशने पाठान्तरम्।

103 'पुत्र' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तला - विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न मे आशासीदात्मनो भागधेयेषु। अथवा यथा सानुमत्या आख्यातं तथा सम्भाव्यत एतत्[104]॥

शकुन्तलेति। शकुन्तला वदति, विकारकालेऽपि सर्पभावप्राप्तियोग्य कालेऽपि प्रकृतिस्थां स्वभावेनैवस्थितां, सर्वदमनस्य तदाख्यस्य बालकस्य, ओषधिं श्रुत्वा आकर्ण्याऽपि, आत्मनः स्वस्य, भागधेयेषु भाग्येषु, मे मम, आशा तृष्णा, नासीत् नाभूत्, अथवा तथा नोचेत्, सानुमत्या तदाख्यया मातृसख्या, यथा येन प्रकारेण, आख्यातम् अभिहितं, तथा तेन प्रकारेण, एतत् इदं, सम्भाव्यते ऊह्यते।

राजा - (शकुन्तलां [105]विलोक्य) अये! [106]सेयमत्रभवती शकुन्तला। यैषा।

श्लो॥ वसने परिधूसरे [107]वसाना
नियमक्षाममुखी धृतैकवेणिः[108]।
अतिनिष्करुणस्य [109]शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति॥21॥

राजेति। राजा दुष्यन्तः, शकुन्तलां कण्वपुत्रीं कण्वमुनिना कुमारीवत् पोषितामित्याशयः, विलोक्य वीक्ष्य भाषते, किमिति, सेयम्, अत्रभवती

---

104 'एतत्' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

105 'गच्छामि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'दृष्ट्वा' इति 'C' इति प्रकाशने पाठान्तरम्।

106 'इयमत्रभवती' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

107 'दधाना' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

108 'वेणी' इति 'C' इति प्रकाशने पाठान्तरम्।

109 'दुःख' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

पूज्यशकुन्तला दृश्यत इति शेषः, अये आश्चर्यम्, यैषेति, वसने इति च, परिधूसरे मलिने, वसने वाससी, वसाना दधाना, नियमक्षाममुखी नियमे नोपवासादिना क्षाममुखी कृशवदना, धृतैकवेणी एकवेणीभूतकेशपाशधारिणी, शुद्धशीला अकृत्रिमस्वभावा, यैषा या एषा शकुन्तला, अतिनिष्करुणस्य अत्यन्तनिर्दयस्यय मम, दीर्घं चिरकालिकं, विरहव्रतं वियोगप्रयुक्तनियमं, बिभर्ति धारयति, सेयमिति पूर्वेणान्वयः।

शकुन्तला - (पश्चात्तापविवर्णं राजानं दृष्ट्वा।) न खल्वार्यपुत्र इव। ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति॥

शकुन्तलेति। शकुन्तला, पश्चात्तापविवर्णम् अनुतापवच्छायं, राजानं दुष्यन्तं, दृष्ट्वा विलोक्य प्राह, न खल्वार्यपुत्र इव भर्तेव न स्थितो हि, तत्तस्मात्, कः एषोऽयं पुरुषः, कृतरक्षामङ्गलं मङ्गलार्थं विरचित रक्षाबन्धनं, मे मम, दारकं पुत्रकम् इदानीमद्य, गात्रसंसर्गेण शरीरसम्बन्धेन, दूषयति मलिनयति।

बालः - (मातरमुपेत्य) [110]अम्ब! क एष पुरुषो[111] मां पुत्रेत्यालिङ्गति॥

बाल इति। बालः शिशुः, मातरं जननीमुपेत्य प्राप्य ब्रवीति, हे अम्ब मातः, क एष पुरुषः को वाऽयं जनः, पुत्र तनयेति, माम् आलिङ्गति परिरभते।

राजा - प्रिये! क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम्। [112]यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि॥

राजेति। राजा प्राह, हे प्रिये प्रेयसि, त्वयि विषये, प्रयुक्तं प्रवर्तितं, क्रौर्यं प्रत्याख्यानक्रूरत्वमपि, मे मम, अनुकूलपरिणामं सम्यक्परिपाकं, संवृतं जातं,

---

110 'मातः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

111 'एष कोऽपि पुरुषो' इति 'A' इति प्रकाशने पाठान्तरम्।
'कोऽपि परकीयो' इति 'C' इति प्रकाशने पाठान्तरम्।

112 'तद्....त्मानमिच्छामि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

यद्यस्मात्कारणात्, अहम् इदानीमद्य, आत्मानं मां, त्वया भवत्या। प्रत्यभिज्ञातं शरीरकार्श्यवैवर्ण्यादिभिः स एवाऽयं किमिति कथञ्चिद्ज्ञातं, पश्यामि अवलोकयामि।

शकुन्तला - (आत्मगतम्।) हृदय! [113]समाश्वसिहि समाश्वसिहि। परित्यक्तमत्सरेणानुकम्पितास्मि दैवेन। आर्यपुत्रः खल्वेषः॥

शकुन्तलेति। शकुन्तला, आत्मगतं स्वमात्रावगतं यथा तथा आह, हे हृदय चेतः, समाश्वसिहि समाश्वासं विश्वासं प्राप्नुहि, अत्यादरादिद्वरुक्तिः परित्यक्तमत्सरेण समुत्सृष्टासूयेन, दैवेन भागधेयेन, अनुकम्पितास्मि दयां प्रापितास्मि, एष पुरोवर्ती, आर्यपुत्रः खलु स्वभर्ता हि।

राजा - प्रिये।

श्लो॥ स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि!
उपरागान्ते [114]शशिनस्समुपगतेवाशु[115] रोहिणी योगम्॥22॥

राजेति। राजा सम्भाषते, हे प्रिये प्रेमास्पदीभूते शकुन्तले, स्मृतीति, हे सुमुखि प्रसन्नवदने, स्मृतिभिन्नमोहतमसः स्मृत्या स्मरणेन भिन्नं विनष्टं मोहः स्ववस्तुविषयकपरिज्ञानमेव, तमः तिमिरं यस्य तस्य, मे मम, प्रमुखे पुरतः, दिष्ट्या दैववशेन, उपरागान्ते ग्रहणावसाने, आशु शीघ्रं, शशिनश्चन्द्रस्य, योगं सम्बन्धं, समुपगता सम्प्राप्ता, रोहिणी नक्षत्रविशेष इव, स्थितानि स्थितिं गतासि।

शकुन्तला - जयतु जयत्वार्यपुत्रः। (इत्यर्धोक्ते [116]बाष्पकण्ठी विरमति)

---

113 'आश्वासिहि' इति 'A' इति प्रकाशने पाठान्तरम्।

114 'शशिना' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

115 'शशिनस्समुपगता' इति 'A' इति प्रकाशने पाठान्तरम्।
'...नतो रोहिणीयोगः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

116 'बाष्पसन्न...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शकुन्तलेति। शकुन्तला, आर्यपुत्रः भर्ता, जयतु सर्वोत्कर्षेण वर्ततां त्वरातिशयाद्द्विरुक्तिः, इत्येवं प्रकारेण, अर्धोक्ते अर्धवाक्य एव गदिते सति, बाष्पकण्ठी आनन्दबाष्पप्रतिरुद्धकण्ठस्वरा सती, विरमति तूष्णीं तिष्ठति।

राजा - सुन्दरि।

श्लो॥ बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया।
यत्ते [117]दृष्टमसंस्कारम्पाटलोष्ठपुटं मुखम्॥23॥

राजेति। राजा भाषते, हे सुन्दरि गात्रशोभा प्रकर्षवति, बाष्पेणेति, बाष्पेण सन्तोषजनितनेत्रवारिणा, जयशब्दे जयत्विति शब्दे, प्रतिषिद्धे कण्ठ एव निरुद्धेऽपि, मया जितं सर्वोत्कर्षः प्राप्त इत्यर्थः, जितमिति नपुंसके भावे क्तः। यद्यस्मात्कारणात्, असंस्कारम् उद्वर्तनमार्जनालङ्करणादि शून्यं, पाटलोष्ठपुटम् आलक्तकाभावाच्छ्वेताधरं, ते तव, मुखम् आननं, दृष्टं वीक्षितम्।

बालः - [118]अम्ब! क एषः॥

बाल इति। बालो ब्रूते, हे अम्ब मातः, एष पुरुषः, कः को वा भवेत्।

शकुन्तला - वत्स! ते भागधेयानि पृच्छ॥

शकुन्तलेति। शकुन्तला वदति, हे वत्स कुमार, ते तव, भागधेयानि भाग्यानि, पृच्छ प्रश्नं कुरु।

राजा - (शकुन्तलायाः पादयोः प्रणिपत्य)

श्लो॥ सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसस्सम्मोहो मे तदा बलवानभूत्।

'लज्जया सबाष्पकण्ठम्' इति 'C' इति प्रकाशने अधिकः पाठः।

117 '...संस्कारपाट....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

118 'मातः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

प्रबलतमसामेवं प्रायाश्शुभेषु [119]हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥24॥

राजेति। राजा, शकुन्तलायाः पादयोश्चरणयोः, प्रणिपत्य पतित्वा वदति, सुतन्वित्यादि, हे सुतनु शोभनगात्रि, ते तव, हृदयात् मनसः, प्रत्यादेशव्यलीकं निराकरणजनितमप्रियम्, अपैतु अपगच्छतु, मे मम, मनसश्चित्तस्य, सम्मोहः अविवेकः, तदा त्वदागमनकाले, किमपि केन वा कारणेन, बलवान् पटिष्ठः, अभूत् आसीत्, प्रबलतमसाम् अधिकतमोगुणविशिष्टानां पुंसाम्, एवं प्रायाः एवंविधाः वृत्तयो व्यापाराः, शुभेषु शुभप्राप्तिकालेषु भवन्ति हि, अत्रार्थे दृष्टान्तमाह, अन्धः नेत्रहीनः, शिरसि मूर्ध्नि, क्षिप्तां विन्यस्तां, स्रजं पुष्पमालिकामपि, अहिशङ्कया सर्पसंशयेन, धुनोति क्षिपति परिहरतीत्यर्थः।

शकुन्तला - [120]उत्तिष्ठत्वार्यपुत्रः। नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखमासीत्। येन सानुक्रोशोऽप्यार्यपुत्रो मयि [121]विरसस्संवृत्तः। (राजा उत्तिष्ठति॥)

शकुन्तलेति। शकुन्तला प्राह, आर्यपुत्रः भर्ता, उत्तिष्ठतु पादाभ्यामूर्ध्वस्थितो भवतु, तेषु दिवसेषु वासरेषु, मे मम, सुचिरितप्रतिबन्धकं भवत्समागमपुण्यविघातुकं, पुराकृतं जन्मान्तरसम्पादितं दुष्कृतं, परिणाममुखं परिपाकाभिमुखम्, आसीत् अजनि, नूनं निश्चयः, येन कारणेन, सानुक्रोशः दयासहितोऽपि, नि।। "कृपादयानुकम्पास्यादनुक्रोश" इत्यमरः आर्यपुत्रः प्रियः मयि विषये विरसः विगतानुरागः, संवृत्तः जातः, एवं प्रियया उक्ते सति, राजा उत्तिष्ठति उत्थितो भवति।

---

119 'प्रवृत्तयः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

120 '(सबाष्पं)' इति 'C' इति प्रकाशने अधिकः पाठः।

121 'तथाविधस्संवृत्तः।' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तला - अथ कथमार्यपुत्रेण स्मृतो [122]दुःखभाग्ययं जनः ॥

शकुन्तलेति। शकुन्तला आह, अथ अनन्तरम् आर्यपुत्रेण भर्त्रा, दुःखभागी दुःखोचितः, अयं जनः अहमित्यर्थः, कथं केन प्रकारेण, स्मृतः स्मरणं प्राप्तः, स्वकीयत्वेनेति शेषः।

राजा - उद्धृतविषादशल्यः कथयिष्यामि।

श्लो॥ मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो [123]बाष्पबिन्दुरधरं [124]परिबाधमानः।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
[125]बाष्पं प्रमृज्य विगतानुशयो [126]भवेयम्॥25॥
(इति यथोक्तमनुतिष्ठति)

राजेति। राजा प्राह, उद्धृतविषादशल्यः उत्खातशोकशङ्कुः, कथयिष्यामि वक्ष्यामि, स्मृतिप्रकारमिति शेषः, मोहादिति। हे सुतनु – सुन्दरि। मया। मोहादज्ञानात्। पूर्वं प्रत्याख्यानवेलायां ते तव, अधरम् अधरोष्ठं, परिबाधमानः संक्लेशयन्, यो बाष्पबिन्दुः अश्रुकणः, उपेक्षितः अपरिमृष्टः, आकुटिलपक्ष्मविलग्नं आकुटिलेषु समन्ताद्वक्रेषु पक्ष्मसु अक्षिलोमसु, विलग्नं संसक्तं, तं पूर्वोक्तं बाष्पं नेत्रजलम् अद्य इदानीं, प्रमृज्य अपनीय, दुःखं प्रमृज्येत्याशयः, विगतानुशयः अपगतपश्चात्तापः, तावत्साकल्येन, भवेयं स्याम्, इत्युक्त्वा, यथोक्तं स्वोक्त्यनुसारेण, अनुतिष्ठति करोति।

---

122 'दुःखभागयं' इति 'C' इति प्रकाशने पाठान्तरम्।
123 'बद्ध' इति 'B' इति प्रकाशने पाठान्तरम्।
124 'परिधाव' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
125 'कान्ते' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
126 'भवामि' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

शकुन्तला - ([127]नाममुद्रां दृष्ट्वा) आर्यपुत्र! [128]एतत्तदङ्गुलीयकम्॥

शकुन्तलेति। शकुन्तला, नाममुद्रां राजनामाङ्कितमुद्रिकां, दृष्ट्वा विलोक्य प्राह, हे आर्यपुत्र प्रिय, तदङ्गुलीयकम् अभिज्ञानार्थं पूर्वं मह्यं दत्तं, एतत् एतदेव किम्।

राजा - [129]अस्मादङ्गुलीयोपलम्भात्खलु[130] स्मृतिरुपलब्धा॥

राजेति। राजा प्राह, अस्मात् एतस्मात्, अङ्गुलीयोपलम्भात् मुद्रिकाप्रापणात्, स्मृतिः भवत्या इति शेषः, उपलब्धा खलु उपगता हि।

शकुन्तला - विषमं कृतमनेन। यत्तदार्यपुत्रस्य प्रत्यायनकाले दुर्लभमासीत्॥

शकुन्तलेति। शकुन्तला वदति, अनेन अङ्गुलीयकेन, विषमं कृतं विरुद्धमाचरितं, यद्यस्मात् आर्यपुत्रस्य भर्तुस्तव प्रत्यायनकाले विश्वासप्रापणसमये, दुर्लभं दुष्प्रापम्, आसीत् अभूत्, तत्तस्मादिति पूर्वेणान्वयेः।

राजा - तेन ह्यृतुसमवायचिह्नं प्रतिपद्यतां लताकुसुमम्॥

राजेति। राजा ब्रूते, तेन कारणेन, ऋतुसमवायचिह्नम् ऋतुसम्बन्धसूचकं, लताकुसुमं वल्लीप्रसूनं, प्रतिपद्यतां प्राप्यतां हि, अभिज्ञानार्थमिति शेषः।

---

127 'प्रमृष्टबाष्पाऽङ्गुलीयकं विलोक्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

128 'इदं ते' इति 'A' इति प्रकाशने पाठान्तरम्।
'इदं तदङ्गु....' इति 'B' इति प्रकाशने पाठान्तरम्।
'नन्वेतत्तदङ्गुलीयकम्' इति 'C' इति प्रकाशने पाठान्तरम्।

129 'अथ किम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'C' इति प्रकाशने पाठान्तरम्।

130 'खलु मया' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

शकुन्तला - नास्मै[131] विश्वसिमि। आर्यपुत्र एवैतद्धारयतु॥

शकुन्तलेति। शकुन्तला प्राह, अस्मै पुष्पाय, न विश्वसिमि विश्वासं न करोमि, आर्यपुत्रः पतिरेव, एतत्पुष्पं धारयतु बिभर्तु।

(ततः प्रविशति मातलिः)

तत इति। ततोऽनन्तरं, मातलिः इन्द्रसारथिः, प्रविशति प्राप्नोति, रङ्गस्थलमिति शेषः।

मातलिः - दिष्ट्या धर्मपत्नी समागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्धते॥

मातलिरिति। मातलिर्वदति, हे राजन्, दिष्ट्या दैववशेन, आयुष्मान् दीर्घायुरुपेतः त्वमित्याशयः, धर्मपत्नीसमागमेन धर्मदारसमावेशेन, पुत्रमुखदर्शनेन कुमाराननिरीक्षणेन च, वर्धते अभ्युदयं प्राप्नोति ।

राजा - [132]अभूत्सम्पादितस्वादुफलो मे मनोरथः। मातले! न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात्॥

राजेति। राजा प्रभाषते, मे मम, मनोरथः कामः, सम्पादितस्वादुफलः सम्पादितं सम्यक्प्रापितं, स्वादुफलं माधुर्यविशिष्टफलं येन स तथोक्तः, अभूत् आसीत्, हे मातले, अयं वृत्तान्तः शकुन्तलासमागमप्रवृत्तिः, आखण्डलेन इन्द्रेण न खलु विदितस्स्यात् ज्ञातो न भवेत्किम्।

---

131 'नास्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'नास्ति मेऽत्र विश्वासः।' इति 'C' इति प्रकाशने पाठान्तरम्।

132 'सुहृत्सम्पादितात् साधुतरफलो' इति 'A' इति प्रकाशने पाठान्तरम्।
'सुहृत्सम्पादितत्वात्साधुतरफलः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'C' इति प्रकाशने पाठान्तरम्।

मातलिः - (सस्मितम्।) किमीश्वराणां परोक्षम्। [133]एत्वायुष्मान्। भगवान्मारीचस्ते [134]दर्शनं वितरति॥

मातलिरिति। मातलिः, सस्मितं समन्दहासं यथा तथा ब्रूते, ईश्वराणां प्रभूणां, परोक्षम् अविदितं, किं किं वा भवेत् सर्वमपि विदितमेवेत्यर्थः, आयुष्मान् चिरजीवी, एतु आगच्छतु, भगवान् कालत्रयवेदी, मारीचः कश्यपः, ते तुभ्यं, दर्शनम् अवलोकनं वितरति ददाति दास्यतीत्यर्थः, अत्र वर्तमानसामीप्ये वर्तमानप्रत्ययः।

राजा - शकुन्तले! अवलम्ब्यतां पुत्रः। त्वां पुरस्कृत्य भगवन्तं[135] द्रष्टुमिच्छामि॥

राजेति। राजा प्राह, हे शकुन्तले, पुत्रः सुतः, अवलम्ब्यतां गृह्यतां, त्वां भवतीं, पुरस्कृत्य अग्रे निधाय, भगवन्तं मारीचं, द्रष्टुं वीक्षितुम्, इच्छामि वाञ्छामि।

शकुन्तले - जिह्रेम्यार्यपुत्रेण सह गुरुसमीपं गन्तुम्॥

शकुन्तलेति। शकुन्तला वक्ति, आर्यपुत्रेण सह भर्त्रा साकं, गुरुसमीपं कश्यपनिकटं, गन्तुं प्रयातुं, जिह्रेमि लज्जां प्राप्नोमि।

राजा - [136]अप्याचरितव्यमभ्युदयकालेषु। एह्येहि॥

---

133 'एह्यायुष्मन्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

134 'दर्शनमिच्छति' इति 'A' इति प्रकाशने पाठान्तरम्।

135 'मरीचं' इति अधिकः पाठः पाठान्तरत्वेनोपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

136 'आचरितमेतदभ्युदयकालेषु' इति 'A' इति प्रकाशने पाठान्तरम्।
'अयि काले' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'अलं ह्रिया' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। राजा प्राह, अपि एवमपि लज्जासत्वेपीत्यर्थः, अभ्युदय कालेषु, आचरितव्यं सहैवागन्तव्यं दारैरिति शेषः, एह्येहि आगच्छागच्छ सम्भ्रमाद्द्विरुक्तिः।

(सर्वे परिक्रामन्ति)

सर्व इति। सर्वे राजप्रभृतयः, परिक्रामन्ति गच्छन्ति, मारीचदर्शनार्थमिति शेषः।

(ततः प्रविशत्यदित्या [137]सार्धमासनस्थो मारीचः)

तत इति। ततोऽनन्तरम्, अदित्यासार्धम् अदित्याख्यभार्यया सह, आसनस्थो मारीचः कस्मिंश्चित्पीठे उपविष्टः कश्यपः, प्रविशति प्राप्नोति, रङ्गभूमिमिति शेषः।

मारीचः - (राजानमवलोक्य।) दाक्षायणि!

श्लो॥ पुत्रस्य ते रणशिरस्ययमग्रयायी
[138]दुष्यन्त इत्यभिहितो भुवनस्य [139]भर्ता।
चापेन यस्य विनिवर्तितकर्म जातं
तत्कोटिमत्कुलिशमाभरणं मघोनः ॥26॥

मारीच इति। मारीचः मरीचिपुत्रः कश्यपः, राजानं दुष्यन्तम्, अवलोक्य वीक्ष्य प्राह, हे दाक्षायणि दक्षपुत्रिके, पुत्रस्येति, दुष्यन्त इत्यभिहितः सर्वजनैर्दुष्यन्त इति व्यवहृतः, भुवस्य लोकस्य, भर्ता पोषकः, अयं राजा, रणशिरसि युद्धमूर्धनि, ते तव, पुत्रस्य सुतस्येन्द्रस्य, अग्रयायी अग्रेसरः, यस्य राज्ञः, चापेन धनुषा. विनिवर्तितकर्मजातं निर्वर्तितकार्यसमूहं, कोटिमत् शतकोटि, तत्प्रसिद्धं कुलिशं

---

137 'सार्धमानसस्थो' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

138 'दुःषन्त' इति 'A' इति प्रकाशने पाठान्तरम्।

139 'गोप्ता' इति 'C' इति प्रकाशने पाठान्तरम्।

वज्रायुधं, मघोनः सहस्राक्षस्य, आभरणम् अलङ्कारमात्रं न तु कार्यसाधकमिति भावः।

अदितिः - सम्भावनीयानुभावास्याकृतिः ॥

अदितिरिति। अदितिर्देवमाता प्राह, अस्य राज्ञः, आकृतिः आकारः, सम्भावनीयानुभावा सम्भावनीयः पूजनीयः,अनुभावो महिमा यस्या सा तथोक्ता।

मातलिः - आयुष्मन्। एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः। तावुपसर्प॥

मातलिरिति। मातलिः प्राह, हे आयुष्मन् दीर्घायुस्सहित, एतौ इमौ, दिवौकसां पितरौ देवानां जननीजनकौ, अदिति कश्यपौ, पुत्रप्रीतिपिशुनेन तनयप्रेमसूचकेन, चक्षुषा नेत्रेण, जातावेकवचनम्, आयुष्मन्तं भवन्तं, अवलोकयतः वीक्षते, तस्माद्धेतोः, तौ अदितिकश्यपौ, उपसर्प अनुसर।

राजा - मातले! एतौ।

श्लो ॥ प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम्।
[140]यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं
[141]द्वन्द्वं दक्षमरीचिसम्भवमिदं तत्स्रष्टुरेकान्तरम्॥27॥

राजेति। राजा वदति, किमिति, हे मातले, प्राहुरिति, मुनयः महर्षयः, यद्द्वन्द्वं मिथुनं, द्वादशधा द्वादशात्मना, स्थितस्य स्थितिं गतस्य, तेजसः महसः रव्यात्मकस्येत्यर्थः, कारणं जनकम्, आहुः वदन्ति, यदद्वन्द्वं, यज्ञभागेश्वरं यज्ञेषु यागेषु ये भागाः पुरोडाशादिहविर्भागाः तेषामीश्वरं प्रभुं, भुवनत्रयस्य लोकत्रितयस्य

---

140 'यस्मिन्नात्मभवः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

141 'ब्रह्मानन्तरविश्वयोनिसहितं द्वन्द्वं तदेतद्वशि' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

भर्तारम् इन्द्रं, सुषुवे जनयामास, यस्मिन् द्वन्द्वे, आत्मभुवः ब्रह्मणः, परः श्रेष्ठोऽपि, पुरुषः विष्णुः, भवाय जन्मने, आस्पदं स्थानं, चक्रे कृतवान्, दक्षमरीचिसम्भवं दक्षमरीचिभ्यामुत्पन्नं, स्रष्टुर्ब्रह्मणः, एकान्तरम् एकमन्तरं व्यवधानं यस्य तत्तथोक्तं, इदं पुरोवर्ति, तत् प्रसिद्धं, द्वन्द्वं मिथुनं, एतौ इमावेवहीति योजना, एकान्तरमित्यत्र ब्रह्मणोमरीचिः, मरीचेः मारीचः, कश्यप इत्यन्यनामधेयः, ब्रह्मणो दक्षः, दक्षाद्दाक्षायणी अदितिरित्यन्यनामधेया, इत्येकान्तरत्वमनुसन्धेयम्।

मातलिः - अथ किम्॥

मातलिरिति। मातलिः प्राह, अथ किं तथैवेत्यर्थः, अथ किमित्यङ्गीकारे नि।। "अङ्गीकृतौस्यादथकिमि"त्यमरः।।

राजा - (प्रणिपत्य[142]) उभाभ्यामपि [143]वासवानियोज्यो दुष्यन्तः प्रणमति॥

राजेति। राजा प्रणिपत्य दण्डवत्पतित्वा ब्रूते, वासवानुयोज्यः वासवस्येन्द्रस्य, अनुयोज्यः कुशलप्रश्नार्हः, दुष्यन्तः तदाख्या राजा, उभाभ्यां द्वाभ्यामपि, युवाभ्याम्, प्रणमति नमस्करोति।

मारीचः - वत्स! [144]चिरञ्जीव। पृथिवीं पालय॥

मारीच इति। मारीच आशास्ते, हे वत्स त्वं, चिरञ्जीव दीर्घायुष्मान्भव, पृथिवीं पालय अत्रापि चिरमित्यनुषज्यते दीर्घकालं महीपालनं कुर्वित्यर्थः।

अदितिः - वत्स! अप्रतिरथो भव॥

---

142 '(उपगम्य)' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

143 'वासवनियोज्यो' इति 'B' इति प्रकाशने पाठान्तरम्।

144 'चिरं पृथिवीं पालय' इति 'A' इति प्रकाशने पाठान्तरम्।
'चिरं महीं पालय' इति 'C' इति प्रकाशने पाठान्तरम्।

अदितिरिति। अदितिराशास्ते, हे वत्स त्वम्, अप्रतिरथः अप्रतिहतरथः निस्सपत्न इत्यर्थः, भव एधि।

शकुन्तला - [145]दारकसहिता वां पादवन्दनं करोमि॥

शकुन्तलेति। शकुन्तला प्राह, दारकसहिता सपुत्राहं, वां युवाभ्यां, पादवन्दनं चरणाभिवादनं, करोमि कुर्वे।

मारीचः - वत्से!

श्लो॥ आखण्डलसमो भर्ता जयन्तप्रतिमस्सुतः।
आशीरन्या न ते [146]योग्या [147]पौलोम्या सदृशीभव॥28॥

मारीच इति। मारीच आह, हे वत्से शकुन्तले, भर्ता पतिः आखण्डलसमः इन्द्रतुल्यः, सुतः पुत्रः, जयन्तप्रतिमः पाकशासनितुल्यः, उभयत्रापि तवेति शेषः, अन्या इतरा, आशीः आशासनं, ते तव, न योग्या नार्हा, किन्तु, पौलोम्या इन्द्रपत्न्या, सदृशी समाना महैश्वर्येणेति शेषः, भव एधि।

अदितिः - जाते! भर्तुर्बहुमता भव। अवश्यं दीर्घायुर्वत्स[148] उभयकुलनन्दनो भवतु। उपविशत। (सर्वे [149]प्रजापतिमभित उपविशन्ति)

---

145 'पुत्रसहिता पादयोः...पतति.' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

146 'योज्या' इति 'A' इति प्रकाशने पाठान्तरम्।

147 'पौलोमीसदृशी' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
अपि च 'पौलोमीमङ्गला' इति 'A' इति प्रकाशने पाठान्तरम्।

148 'दीर्घायुर्वत्सको' इति 'A' इति प्रकाशने पाठान्तरम्।
'अयं च दीर्घायुर्वत्सक....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

149 'प्रजापत्यभिमतमासनम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

अदितिरिति। अदितिः देवमाता ब्रूते, हे जाते कुमारि, भर्तुः पत्युः बहुमता अनुमता, भव स्तात्, अवश्यं निश्चितं, वत्सः शिशुः, दीर्घायुः चिरायुः उभयकुलनन्दनः उभयोः कुलयोः मातापितृवंशयोः, नन्दनः प्रमोदकारी, भवतु अस्तु, उपविशत उपविष्टाभवत, सर्व इति, एवमदित्याभाषिते सति, सर्वे राजादयः प्रजापतिमभितः कश्यपब्रह्मणः उभयपार्श्वेषु, वा। 'अभितः परित' इत्यादिना द्वितीया, उपविशन्ति निषीदन्ति।

मारीचः - (एकैकं निर्दिशन्)

श्लो॥ दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं [150]तत्समागतम्॥29॥

मारीच इति। मारीचः एकैकं प्रत्येकं निर्दिशन् हस्तेन दर्शयन् प्राह, दिष्ट्येति, साध्वी सती नि।। "सतीसाध्वी पतिव्रते"त्यमरः। शकुन्तला इदं पुरोवर्ति, सच्छ्रेष्ठम् अपत्यं पुत्रः, भवान् त्वमिति, तत्समागतं समागमः, श्रद्धा आस्तिक्यबुद्धः, वित्तं धनं, विधिरनुष्ठानं चेति, त्रितयं एतत्त्रयसमागमतुल्यं भवति।

राजा - भगवन्! प्रागभिप्रेतसिद्धिः। पश्चाद्दर्शनम्। [151]अतोऽपूर्वः खलु वोऽनुग्रहः। [152]कुतः।

श्लो॥ उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक्तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं [153]क्रम-

---

150 'वस्समा...' इति 'C' इति प्रकाशने पाठान्तरम्।

151 'इत्यपूर्वः, खलु तवानुग्रहः। पश्यतु भवान्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

152 'पश्यतु भवान्' इति 'C' इति प्रकाशने पाठान्तरम्।

153 'विधिस्तव' इति 'A' इति प्रकाशने पाठान्तरम्।

स्तव प्रसादस्य पुरस्तु सम्पदः ॥30॥

राजेति। राजा भाषते, हे भगवन् कालत्रयवेदिन्, अभिप्रेत सिद्धिः शकुन्तलासमागमरूपफलप्राप्तिः, प्राक् प्रथमं लब्धेति शेषः, दर्शनं भवदालोकनं पश्चादनन्तरं लब्धमिति शेषः, अतोऽस्मात्कारणात्, वः युष्माकम्, अनुग्रहः अभ्युपपत्तिः करुणेत्यर्थः, नि॥ "अभ्युपपत्तिरनुग्रह" इत्यमरः, अपूर्वः कार्यकारणभावव्यत्यासकारित्वाद्विलक्षणः खलु, कुतः कस्मादिति चेत्, उदेतीति, कुसुमं पुष्पं, पूर्वम् आदौ, उदेति उत्पद्यते, फलं ततः पश्चात्, उदेतीति सर्वत्र सम्बध्यते, घनोदयः मेघोत्पत्तिः प्रागुदेति, पयो जलं, तदनन्तरं ततःपरं उदेति, अयं क्रमः एषविधिः, निमित्तन्तेनैमित्तिकयोः हेतुहेतुमतोः लोके दृश्यत इति वाक्याध्याहारः, सम्पदः श्रियस्तु, तव प्रसादस्य भवदनुग्रहस्य, पुरः पूर्वमेव भवन्ति, सू। "षष्ठ्यतसर्थप्रत्येने"ति षष्ठी।

मातलिः - एवं विधातारः प्रसीदन्ति॥

मातलिरिति। मातलिः प्राह, विधातारः ब्रह्माणाः, एवम् अनेन प्रकारेण प्रसीदन्ति प्रसन्ना भवन्ति।

राजा - भगवन्! इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बन्धुभिरानीतां स्मृति[154]शैथिल्यात्प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो [155]युष्मत्सगोत्रस्य कण्वस्य। पश्चादङ्गुलीयकदर्शनादूढपूर्वां [156]तद्दुहितरमवगतोऽहम्। तच्चित्रमिव मे प्रतिभाति।

श्लो॥ यथागजो नेति समक्षरूपे

---

154 'वैकल्यात्' इति 'C' इति प्रकाशने पाठान्तरम्।

155 'युष्मद्गोत्रस्य' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

156 'तद्दुहितरं' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

[157]तस्मिन्नतिक्रामति संशयस्स्यात्।
पदानि दृष्ट्वा तु भवेत्प्रतीति-
स्तथाविधो मे मनसो विकारः ॥31॥

राजेति। राजा ब्रूते, हे भगवन् त्रिकालज्ञः, इमामेतां, वो युष्माकम् आज्ञाकरीं परिचारिकां, गान्धर्वेण गान्धर्वाख्येन, विवाहविधिना परिणयविधानेन उपयम्य उद्वाह्य, कस्यचित्कालस्य कियतस्समयस्य, बन्धुभिः शार्ङ्गरवादि-सम्बन्धिभिः, अनीतां मत्समीपं प्रापितां सतीं, स्मृतिशैथिल्यात् स्मरणवैकल्यात्, प्रत्यादिशन् निरस्यन्, तत्रभवतः पूज्यस्य, युष्मत्सगोत्रस्य युष्माभिरेकगोत्रस्य, कण्वस्य तदाख्यस्य महर्षेः, अपराद्धोऽस्मि अपचारं कृतवानस्मि, पश्चादनन्तरं, अङ्गुलीयकदर्शनात् मुद्रिकावेक्षणात्, अहं, तद्दुहितरं कण्वपुत्रीम्, ऊढपूर्वां परिणीतपूर्वाम्, अवगतः ज्ञातवानस्मि, तत् सर्वमिदं, चित्रमाश्चर्यमिव, मे मम प्रतिभाति स्फुरति, यथेति। यथा येन प्रकारेण, कस्यचिदज्ञस्य, समक्षरूपे प्रत्यक्षीकृते गजे, गजः कुञ्जरः, न न भवतीति, प्रत्ययस्स्यात्, तस्मिन् गजे अतिक्रामति चक्षुर्विषयमतीत्य गच्छति सति, संशयः गजो वा न वेति सन्देहः, स्यात् भवेत्, पदानि पादविन्यासान् गजस्येति शेषः, दृष्ट्वा आलोक्य तु, प्रतीतिः गज एवेति निश्चयज्ञानं भवेत्, मे मम, मनसश्चित्तस्य, विकारः परिणामः, तथा विधः तत्तुल्यः, प्राक्सम्वादकाले, किमिदमुपन्यस्तमित्यादिना शकुन्तलायाः परिग्रहाभावः निर्धारणं, ततन्तस्यामतीतायां, कामं प्रत्यादिष्टामित्यादिना परिग्रह संशयः, अनन्तरमङ्गुलीयकदर्शनादियमूढपूर्वेति निरूढप्रत्यय इत्येवंरूप इत्यर्थः।

मारीचः - वत्स! [158]अलमात्मापराधशङ्कया। सम्मोहोऽपि[159] त्वय्यनुपपन्नः। श्रूयताम्[160]॥

---

[157] 'अतिक्राम..., यथा गजे साधुसमक्षरूपे कस्मिन्नपि क्रामति।' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

[158] '...पचार' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

मारीच इति। मारीचः प्राह, हे वत्स दुष्यन्त, आत्मापराधशङ्कया अपराद्धोऽस्मीति भयेन, अलङ्कृतं, न कर्तव्यमित्यर्थः, त्वयि, सम्मोहः अपरिज्ञानमपि, अनुपपन्नः अयुक्तः, किमिति काकुः किन्तु उपपन्न एवेत्यर्थः, श्रूयताम् आकर्ण्यताम् तत्कारणमिति शेषः।

राजा - अवहितोऽस्मि॥

राजेति। राजा प्राह। अवहितोऽस्मि अप्रमत्तोऽस्मि।

मारीचः - यदैवाप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां[161] शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि[162], दुर्वाससश्शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा[163] नान्यथेति। स चायमङ्गुलीयकदर्शनावसानः[164]॥

मारीच इति। मारीचः प्राह, यदा यस्मिन्नेव समये, अप्सरस्तीर्थावतरणात् अप्सरस्तीर्थनामकप्रदेशावरोहणात्, प्रत्यक्षवैक्लव्यां साक्षाद्विवशां शकुन्तलाम् आदाय गृहीत्वा, मेनका तन्माता, दाक्षायणीं मत्प्रियामदितिम्, उपगता प्राप्ता, तदा तस्मिन्नेवसमये, दुर्वाससः तदाख्यमुनेः, शापात् आक्रोशात्, त्वया भवता तपस्विनी दीना, इयं पुरोवर्तिनी, सहधर्मचारिणी भार्या, प्रत्यादिष्टा निराकृता, अन्यथा प्रकारान्तरेण, नेति, ध्यानात् प्रणिधानात्, अवगतोऽस्मि ज्ञातवानस्मि, सचायं शापः, अङ्गुलीयकदर्शनावसानः मुद्रिकाप्रेक्षणान्तः।

---

159 'त्वय्युप...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

160 'श्रूयतां तावत्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

161 'प्रत्याख्यान..., प्रत्यग्र वै....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्। 'विक्लबां' इति 'C' इति प्रकाशने पाठान्तरम्।

162 '...वगतार्थो...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

163 'प्रत्यादिष्टेति' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

164 '...नावधिः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

राजा - ([165]सोच्छ्वासम्) एष वचनीयान्मुक्तोऽस्मि॥

राजेति। राजा। सोच्छ्वासं सनिश्वासं यथा तथा प्राह, एषः अयमहं, वचनीयात् लोकापवादात् अकारणदारपरित्यागरूपादित्यर्थः, मुक्तः त्यक्तोऽस्मि।

शकुन्तला - ([166]स्वगतम्।) दिष्ट्या, अकारणप्रत्यादेशी नार्यपुत्रः। न खलु[167] शप्तमात्मानं स्मरामि। अथवा प्राप्तो मया स हि शापो विरहशून्यहृदयया [168]न विदितः। [169]यतः सखीभ्यां सन्दिष्टास्मि [170]भर्तुरङ्गुलीयकं दर्शयितव्यमिति॥

शकुन्तलेति। शकुन्तला, स्वगतम् आत्मगतं वक्ति, आर्यपुत्रः भर्ता दिष्ट्या दैवात्, अकारणप्रत्यादेशी निर्निमित्तपरित्यागी ममेति शेषः, न न बभूव, अहम् आत्मानं मां, शप्तं शापं प्राप्तं, न स्मरामि खलु न चिन्तयामि हि, अथवा तथा नोचेत्, विरहशून्यहृदयया विरहेण प्रियविप्रयोगेन शून्यहृदयया अस्वस्थचित्तया मया सशापः प्रियविस्मरणरूपः, प्राप्तोहि उपगत एव, यतः कारणात्, सखीभ्याम् अनसूयाप्रियंवदाभ्याम्, अङ्गुलीयकं करशाखाभरणं, भर्तुः प्रियस्य, दर्शीयियितव्यमवलोकयितव्यम्, इत्येवं प्रकारेण, सन्दिष्टा उपदिष्टास्मि।

मारीचः - [171]वत्से! [172]चरितार्थासि। [173]सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः[174]। पश्य।

---

165 'निश्वस्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

166 '(आत्मगतम्)' इति 'C' इति प्रकाशने पाठान्तरम्।

167 'पुनः' इति 'B' इति प्रकाशने पाठान्तरम्।
'न खलु सत्यं तदाहमात्मानं स्मरामि।' इति 'C' इति प्रकाशने पाठान्तरम्।

168 'न विदितः' इति पाठः 'C' इति प्रकाशने नोपलभ्यते।

169 'अतः' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

170 'भर्त्रे' इति 'C' इति प्रकाशने पाठान्तरम्।

171 '(शकुन्तलां विलोक्य)' इति 'C' इति प्रकाशने अधिकः पाठः।

श्लो॥ शापादसि प्रतिहता [175]स्मृतिरोधरूक्षे
भर्तर्यपेततमसि प्रभुता तवैव[176]।
छाया [177]न मूर्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा॥32॥

मारीच इति। मारीचः ब्रूते, हे वत्से शकुन्तले, चरितार्था कृतकृत्यासि, सहधर्मचारिणं भर्तारं प्रति, मन्युः क्रोधः, त्वया भवत्या, न कार्यः न विधेयः, पश्य अवधेहि, शापादिति, शापात् दुर्वाससोदत्तात्, स्मृतिरोधरूक्षे स्मृतिरोधेन स्मरणप्रतिबन्धेन रूक्षे क्रूरे सति, भर्तरि पत्यौ, प्रतिहता निराकृतासि, पुनस्तस्मिन्, अपेततमसि अङ्गुलीयकदर्शनेन अपगतस्मरणप्रतिबन्धे सति, प्रभुता प्रधानमहिषीत्वं, तव भवत्या एव नान्यस्या इति भावः, अस्मिन्नर्थे दृष्टान्तमाह, दर्पणतले आदर्शप्रदेशे, मलोपहतप्रसादे मालिन्यदूषितवैशद्ये सति छाया प्रतिबिम्बं, न विभाति न प्रतिभासते, पुनस्तस्मिन्, शुद्धे निवृत्तदोषे सति तु, सुलभावकाशा सुगमान्तराला।

[178] **राजा - भगवन्! [179]अत्र खलु मे [180]वंशप्रतिष्ठा। (इति बालं हस्तेन गृह्णाति[181])**

---

172 'विदिता...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'विदितार्थासि' इति 'C' इति प्रकाशने पाठान्तरम्।

173 'तदिदानीं' इति 'B' इति प्रकाशने अधिकः पाठः।

174 'करणीयः' इति 'A' इति प्रकाशने पाठान्तरम्।
'कर्तव्यः' इति 'C' इति प्रकाशने पाठान्तरम्।

175 'स्मृतिलोपरूक्षे' इति 'A' इति प्रकाशने पाठान्तरम्।

176 'तवैवं' इति 'C' इति प्रकाशने पाठान्तरम्।

177 'विभति न' इति 'C' इति प्रकाशने पाठान्तरम्।

178 'राजा – यथाह भगवान्।

राजेति। राजा वदति, हे भगवन् षड्गुणैश्वर्यसम्पन्न, मे मम, वंशप्रतिष्ठा अन्वयस्थितिः, अत्र अस्मिन्नेव बालके वर्तत इति शेषः, इत्युक्त्वा बालं कुमारं, हस्तेन पाणिना, गृह्णाति आदत्ते।

मारीचः - तथा भाविनमेनं चक्रवर्तिनमवगच्छतु भवान्। पश्य।

श्लो॥ रथेनानुत्खातस्तिमितगतिना[182] तीर्णजलधिः
पुरा [183]सप्तद्वीपां जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात्सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्॥33॥

मारीच इति। मारीचः कश्यपप्रजापतिः प्राह, किमिति, तथा भवदुक्तप्रकारेण, भाविनं वंशकर्तारं भविष्यन्तम्, एनं कुमारं, भवान्, चक्रवर्तिनं सार्वभौमम्, अवगच्छतु जानातु, पश्य प्रेक्षस्व, रथेनेति, अनुत्खातस्तिमितगतिना अनुत्खातेन निम्नोन्नतप्रदेशाभावेन स्तिमितगतिना निष्कम्पगमनेन अनेन आकाशगामिता रथस्य सूच्यते, रथेन स्यन्दनेन, तीर्णजलधिः अतिक्रान्तसमुद्रः, अत एव अप्रतिरथः अप्रतिबद्धशताङ्गः, अयं बालक इत्युत्तरवाक्यस्थस्य अत्राप्यनुषङ्गः, सप्तद्वीपां द्वीपसप्तकसहितां, वसुधां मेदिनीं, पुरा जयति जेष्यति, सू। 'यावत्पुरानिपातयोर्लडिति' भविष्यदर्थेलट्। इहास्मिन्नाश्रमे, अयं कुमारः, सत्त्वानां

मीरीचः – वत्स कच्चिदभिनन्दितस्त्वया विधिवदस्माभिरनुष्ठितजातकर्मा पुत्रः एष शाकुन्तलेयः' इति वाक्यद्वयं 'A' 'B' इति प्रकाशनयोः दृश्यते।

179 'अयं' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

180 'महतो वंश....' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

181 अयं पाठः 'A' 'C' इति प्रकाशनयोः नोपलभ्यते।
'गृह्णाति' इति 'B' इति प्रकाशने पाठान्तरम्।

182 'गतिनोत्तीर्णं' इति 'A' इति प्रकाशने पाठान्तरम्।
'रथेनानुद्धातस्तिमितगतिना' इति 'B' इति प्रकाशने पाठान्तरम्।

183 'सप्तद्वीपामवति' इति 'A' इति प्रकाशने पाठान्तरम्।

सिंहव्याघ्रादिजन्तूनां, प्रसभदमनात् प्रसभेन बलात्कारेण, दमनात् निग्रहणात् सर्वदमनः, लोकस्य जगतः, भरणात् पोषणात्, भरत इति, आख्यां नामधेयं, पुनः पश्चात् उत्तरत्रेत्यर्थः, यास्यति प्राप्स्यति।

राजा - भगवता कृतसंस्कारे सर्वमस्मिन्वयमाशास्महे॥

राजेति। राजा प्राह, वयं, भगवता त्रिकालवेदिना त्वया, कृतसंस्कारे विरचितोपनयनादि-संस्कारे, अस्मिन्बालके, सर्वं समस्तं भवदुक्तमाशास्महे इच्छामः।

अदितिः - भगवन्! [184]अस्या दुहितृमनोरथसम्पत्तेः[185] कण्वोऽपि तावत् [186]श्रुतविस्तारः क्रियताम्। दुहितृवत्सला [187]मेनकेहैव मां परिचरन्ती तिष्ठति॥

अदितिरिति। अदितिः देवमाता प्राह, हे भगवन् स्वामिन्, अस्याः वर्तमानायाः, दुहितृमनोरथसम्पत्तेः पुत्रिकाभीष्टसिद्धेः, श्रुतिविस्तारः आकर्णित यावद्वृत्तान्तः, तावदिदानीं, कण्वः, तदाख्यमुनिरपि, नि।। "कण्वं पापं मुनौ तु न" इति विश्वः, क्रियतां विधीयतां, दुहितृवत्सला पुत्रिकाप्रेमवती मेनका तन्नामाप्सराः, मां परिचरन्ती सेवमाना, इह अस्मिन्नेवाश्रमे, तिष्ठति वर्तते, अतो न तस्या निवेदनीयमिति भावेः।

शकुन्तला - (आत्मगतम्।) मनोरथः खलु मे भणितो भगवत्या॥

---

184 'अनया' इति 'A' इति प्रकाशने पाठान्तरम्।

185 'दुहितृमनोरथसम्पत्या' इति 'A' 'C' इति प्रकाशनयोः पाठान्तरम्।

186 'परिचारकैः' इति 'C' इति प्रकाशने पाठान्तरम्।

187 'मेनकेहैवोपचरन्ती तिष्ठति' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'अत्रैव' इति 'C' इति प्रकाशने पाठान्तरम्।

शकुन्तलेति। शकुन्तला, आत्मगतं स्वमात्रावगतं यथा तथा ब्रूते, मे मम, मनोरथः खलु अभिलषितार्थ एव, भगवत्या कालत्रयवेदिन्या, भणितः उक्तः।

मारीचः - तपः प्रभावात्प्रत्यक्षं सर्वमेव [188]तत्रभवतः ॥

मारीच इति। मारीचः प्राह, तत्रभवतः पूज्यस्य कण्वमुनेः, सर्वं समस्तं कार्यजातं, तपःप्रभावात् तपोमाहात्म्यादेव, प्रत्यक्षं गोचरं भवतीति शेषः।

राजा - अतः खलु [189]ममानतिक्रुद्धो मुनिः ॥

राजेति। राजा प्राह, अतः खलु अस्मादेव हेतोः, मुनिः कण्वऋषिः, मम अनतिक्रुद्धः भृशं न कुपितः।

मारीचः - तथाप्यसौ प्रियमस्माभिः प्रष्टव्यः[190]। कः कोऽत्र भोः ॥

मारीच इति। मारीचः प्राह, तथापि तपसा सर्वज्ञात्वेऽपि, असौ कण्वमुनिः, प्रियम् इष्टम्, अस्माभिः प्रष्टव्यः जिज्ञासितव्यः, अत्राश्रमे, कः कः को वा परिजनोवर्तत इति शेषः, सम्भ्रमादिद्वरुक्ति, भोरिति परिजन सम्बोधने।

शिष्यः - (प्रविश्य) भगवन्। अयमस्मि॥

शिष्य इति। शिष्यः मारीचच्छात्रः, प्रविश्य तत्समीपं प्राप्य वक्ति, हे भगवन् गुरो, अयं एषोऽहमस्मि।

---

188 'एतत् तत्र कण्वस्य' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'सर्वमेतत् तत्रभवतः' इति 'C' इति प्रकाशने पाठान्तरम्।

189 'नातिक्रुद्धो' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।

190 'श्रावयितव्यः' इति 'A' इति प्रकाशने पाठान्तरम्।
'आप्रष्ठव्यः' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

मारीचः - गालव! इदानीमेव [191]विहायसा गत्वा मम वचनात्तत्रभवते कण्वाय प्रियमावेदय। यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति॥

मारीच इति। मारीचः प्राह, हे गालव, इदानीमद्यैव, विहायसा आकाशमार्गेण, गत्वा यात्वा, मम वचनाद्वाक्यात्, तत्रभवते पूज्याय, कण्वाय मुनये, प्रियं प्रीतिवचनम्, आवेदय विज्ञापय, यथा कथमिति चेत्, पुत्रवती सपुत्रा शकुन्तला, तच्छापनिवृत्तौ दुर्वासश्शापापगमे सति, स्मृतिमता स्मरणं गतेन, दुष्यन्तेन राज्ञा, प्रतिगृहीता स्वीकृतेति पूर्वेणान्वयः।

शिष्यः - यदाज्ञापयति भगवान्! (इति निष्क्रान्तः॥)

शिष्य इति। शिष्यः कश्यपच्छात्रः ब्रूते, भगवान् गुरुस्वामी, यदाज्ञापयति यत्कार्यमनुशास्ति तत्करोमीति वाक्याध्याहारः, इत्युक्त्वा निष्क्रान्तः निर्गतः।

मारीचः - वत्स! त्वमपि [192]स्वापत्यदारसहितः सख्युराखण्डलस्य [193]रथमारुह्य ते राजधानीं प्रतिष्ठस्व॥

मारीच इति। मारीचः कथयति, हे वत्स राजन्, त्वमपिस्वापत्यदारसहितः स्वकीयपुत्रजाया समेतस्सन्, सख्युर्मित्रस्य, आखण्डलस्येन्द्रस्य, रथं स्यन्दनम्, आरुह्य अधिष्ठाय, ते तव, राजधानीं प्रधाननगरीं, नि॥ "प्रधाननगरी राज्ञां राजधानीति कथ्यत" इति शब्दार्णवे। राजानोधीयस्तेऽस्यामिति विग्रहः, करणाधिकरणयोश्चेत्यधिकरणार्थे ल्युट्, प्रतिष्ठस्व प्रयाहि।

राजा - [194]यदाज्ञापयति भगवान्॥

---

191 'वैहायस्या गत्या' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

192 'सापत्यदारः, ...दारसहतः, ते राज....., स्वराज्य.....' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

193 'रथमास्थाय' इति 'A' इति प्रकाशने पाठान्तरम्।

राजेति। राजा वक्ति, भगवान् त्रिकालज्ञः, यदाज्ञापयति यत्कार्यमादिशति तत्करोमीति वाक्यशेषेः।

मारीचः - [195]अपि च।

श्लो॥ [196]तव भवतु बिडौजाः [197]प्राज्यवृष्टिः प्रजासु
त्वमपि [198]विततयज्ञस्स्वर्गिणः[199] प्रीणयालम्[200]।
युगशतपरि[201]वर्तानेवमन्योन्यकृत्यैः
नयतमुभयलोकानुग्रहश्लाघनीयैः ॥34॥

मारीच इति। मारीचः ब्रूते, अपि च किञ्च, तवेति, बिडौजा इन्द्रः, तव प्रजासु जनेषु विषये, प्राज्यवृष्टिः समृद्धवर्षः, भवतु अस्तु, त्वमपि, विततयज्ञः विस्तृतमघस्सन्, स्वर्गिणो देवान्, अलमत्यन्तं, प्रीणय तोषय, एवम् अनेन प्रकारेण उभयलोकानुग्रहश्लाघनीयैः प्रशंसनीयैः, अन्योऽन्यकृत्यैः इतरेतरव्यापारैः युगशतपरिवर्तान् युगानां कृतादीनां शतानि शतसंख्याकसङ्घाः तेषां परिवर्तानावृत्तीः, नयतं यापयतम्।

राजा - भगवन्! यथाशक्ति श्रेयसे [202]यतिष्ये॥

---

194 '(सप्रणणामम्)' इत्येषः अधिकः पाठः 'A' इति प्रकाशने उपलभ्यते।
195 '(राजानं विलोक्य)' इति 'C' इति प्रकाशने अधिकः पाठः।
196 'त्वयि' इति 'C' इति प्रकाशने पाठान्तरम्।
197 'प्राजवृष्टिः' इति 'B' इति प्रकाशने पाठान्तरम्।
198 'विततयज्ञो' इति 'A' इति प्रकाशने पाठान्तरम्।
199 'वज्रिणं' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
200 'प्रीणयस्व' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'भावयालम्' इति 'C' इति प्रकाशने पाठान्तरम्।
201 '....वृत्तैरे...' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।
'.......वर्ता......' इति 'C' इति प्रकाशने पाठान्तरम्।

राजेति। राजा वदति, हे भगवन् प्रजापते, यथाशक्ति शक्त्यनुसारेण, श्रेयसे शुभार्थं, यतिष्ये प्रयत्नं विधास्ये।

मारीचः - वत्स! किं ते भूयः प्रियमुपहरामि[203] ॥

मारीच इति। मारीचः कथयति, हे वत्स राजन्, ते तुभ्यं, भूयः पुनः, किं कीदृशं, प्रियम् इष्टमुपहरामि ददामि।

राजा - अतः परमपि प्रियमस्ति। [204]यदिह भगवान् प्रियं कर्तुमिच्छति। तर्हीदमस्तु (भरतवाक्यम्)

श्लो ॥ प्रवर्ततां प्रकृतिहिताय पार्थिव-
स्सरस्वती [205]श्रुतिमहतां महीयताम्[206]।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं [207]परिगतशक्तिरात्मभूः ॥35॥

(इति निष्क्रान्तास्सर्वे)

राजेति। राजा भाषते, अतः अस्मात्, परमधिकमपि, प्रियमस्ति इष्टं वर्तत इति काकुः, भगवन् षड्गुणैश्वर्यसम्पन्नः स्वामी, प्रियम् इष्टं, कर्तुं विधातुमिच्छति वाञ्छति, यदिह, तर्हि तथा चेत्, इदं वक्ष्यमाणं, भरतवाक्यं नटाध्यक्षवचनम्, अस्तु भवतु, तदेव प्रतिपादयति, प्रवर्ततामित्यादि। पार्थिवो राजा, जातावेकवचनं,

---

202 'प्रयतिष्ये' इति 'C' इति प्रकाशने पाठान्तरम्।

203 'उपकरोमि' इति 'B' इति प्रकाशने पाठान्तरम्।

204 'तथाप्येतदस्तु, यदीह, भगवान् प्रसन्नः' इति पाठान्तराण्युपलभ्यन्ते इति 'B' इति प्रकाशने निर्दिष्टम्।

205 'श्रुत, श्रितिमहती' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

206 'महीयसाम्' इति 'A' 'B' इति प्रकाशनयोः पाठान्तरम्।
'महीय्यतां, न ह्रीयताम्' इति पाठान्तरमुपलभ्यते इति 'B' इति प्रकाशने निर्दिष्टम्।

207 'परिगतभक्तिरात्मभूः' इति 'A' इति प्रकाशने पाठान्तरम्।

प्रकृतिहिताय प्रजानामभीष्टाय, प्रवर्ततां व्यापारं करोतु, श्रुतिमहतां विदुषां, सरस्वती वाणी, महीयतां पूज्यता, परिगतशक्तिः अर्धशरीरे प्राप्तशक्तिः, अत एव नीललोहितः वामभागे नीलः दक्षिणभागे लोहितः, तथाचोक्तं, "अर्धमिन्द्रमणिमोचकमर्धं प्रक्रियां वहति विद्रुमराशे"रिति। आत्मभूः स्वयंजातः परमेश्वरः, ममापि पुनर्भवं पुनर्जन्म, क्षपयतु अपाकरोतु, अत्र पुनर्जन्मक्षपणस्य नित्यानन्दहेतुत्वान्मङ्गलत्वम्, अतस्तदाशंसेति भावः एवमितरनाटकेष्वप्यूह्यम्।

इति श्री कालिदासविरचिते अभिज्ञानशाकुन्तलनाम नाटके सप्तमोऽङ्कः।

इति श्री सङ्गमवलसराजधान्यधिवासीश्वरी
रमणविश्वेश्वरचरणारविन्दमकरन्दास्वादन तुन्दिलेन्दिन्दिरायमाणान्तरङ्गेण
निश्शङ्कवंशपयःपारावारराकासुधाकरेणदामोदरगोत्रपवित्रविचित्रचरित्रेण
श्रीमद्वेङ्कटनिश्शङ्कमहीपालपौत्रेण श्री पेद्दन्ननिश्शङ्कक्ष्मातलाधीशपुत्रेण श्री
सन्यासाम्बा गर्भशुक्तिमुक्ताफलेन संस्कृतादिभाषापञ्चकशास्त्रजन्यपरिज्ञानेन
श्रीमन्मृत्युञ्जयनिश्शङ्कभूपालेन विरचिते शाकुन्तलनाटकव्याख्याने
मृत्युञ्जयभूपालीयद्वितीयाख्याने पूर्णचन्द्रिकाख्याने सप्तमोऽङ्कः॥

समाप्तोयं ग्रन्थः॥

अभिज्ञानशाकुन्तलान्तर्गतश्लोकानाम् अकारदिक्रमसूची

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः *
अकारः				
अक्लिष्टबालतरुपल्लव- ॥6.20॥	294	वसन्ततिलका	अतिशयोक्तिः–समासोक्ती	शङ्कराभरणरागः, आदितालः
अतः परीक्ष्य कर्तव्यं ॥5.24॥	231	अनुष्टुप्	अप्रस्तुतप्रशंसा–अर्थान्तरन्यास–काव्यलिङ्गानि	मोहनरागः
अद्यापि नूनं ॥3.4॥	107	उपजातिः	उत्प्रेक्षा	श्रीरागः
अधरः किसलयरागः ॥1.21॥	31	आर्या	उपमा	नाथनामक्रियारागः
अध्याक्रान्ता ॥2.14॥	90	मन्दाक्रान्ता	व्यतिरेक–काव्यलिङ्ग–श्लेषाः	देवगान्धारिरागः
अनवरतधनुर्ज्या- ॥2.4॥	73	मालिनी	परिकर–श्लेष–उपमा–वृत्तिश्रुतानुप्रासाः	यदुकुलकाम्भोजिरागः
अनाघ्रातं पुष्पं ॥2.10॥	84	शिखरिणी	परिकर–मालोपमा–शोभा–श्रुतिवृत्यनुप्रासाः	भैरविरागः
अनिशमपि मकरकेतुः ॥3.5॥	108	आर्या	स्वभावोक्तिः	श्रीरागः, बिलहरीरागः

* "संस्कृतनाटकप्रदर्शनमार्गदर्शक–प्रथमाचार्यैः श्रीगोमठं श्रीनिवासाचार्यैः श्रीमद्भिः निवृत्तन्यायाधीशैः सि वि कृष्णस्वामि अय्यर् महाशयैश्च एतद्गेयरागानुसन्धानमकारि।" इति वाविल्ल रामस्वामि प्रकाशने टिप्पणी

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
अनुकारिणि पूर्वेषां ॥2.16॥	95	अनुष्टुप्	काव्यलिङम्	कल्याणिरागः
अनुमतगमना शकुन्तला ॥4.10॥	176	अपरवक्त्रम्	अनुमान–रूपक–परिणाम–काव्यलिङ्गाः	आरभिरागः
अनुयास्यन्मुनितनयां ॥1.29॥	53	आर्या	विरोधाभास–काव्यलिङ्ग–वृत्यनुप्रासाः	नाथनामक्रियारागः
अनेन कस्यापि ॥7.19॥	341	उपजातिः	अर्थापत्ति–रूपकौ	सावेरिरागः
अन्तर्गतप्रार्थनम् ॥7.2॥	321	उपजातिः	उदात्त–अनुप्रास–परिकराः	भैरविरागः
अन्तर्हिते शशिनि ॥4.3॥	156	वसन्ततिलका	अर्थान्तरन्यास–समासोक्ति–काव्यलिङ्गाः	बिलहरीरागः
अपरिक्षतकोमलस्य ॥3.25॥	138	मालभारिणी	उपमा–काव्यलिङ्ग–परिकराः	खरहरप्रियरागः, आदितालः
अभिजनवतो भर्तुः ॥4.19॥	189	हरिणी	उपमा–समुच्चय–काव्यलिङ्गाः	आनन्दभैरविरागः
अभिनवमधुलोलुप-॥5.1॥	198	अपरवक्त्रम्	अप्रस्तुतप्रशंसा	यदुकुलकाम्भोजिरागः, त्रिपुटतालः
अभिमुखे मयि ॥2.11॥	85	द्रुतविलम्बितम्		पुन्नागवरालिरागः, आदितालः
अभ्यक्तमिव ॥5.11॥	210	शिखरिणी	मालोपमा	केदारगौलरागः
अभ्युन्नता पुरस्तादवगाढा ॥3.9॥	111	आर्या	अनुमान–स्वभावोक्ति–पर्यायोक्ति–श्रुत्यनुप्रास–समासोक्तयः	हिन्दुस्थान् कापिरागः
अमी वेदिं परितः ॥4.8॥	174	औपच्छन्दसिकम्		गीर्वाणिरागः, सावेरिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
अयं स ते तिष्ठति ॥3.15॥	125	वसन्ततिलका	अप्रस्तुतप्रशंसा–दृष्टान्त–अर्थान्तरन्यासाः	पन्तुवरालिरागः
अयमरविवरेभ्यः ॥7.7॥	325	मालिनी	समुच्चय–काव्यलिङ्ग–अनुमानानि	भैरविरागः
अर्थो हि कन्या ॥4.22॥	195	उपजातिः	उपमा–काव्यलिङ्ग–उत्प्रेक्षाः	मध्यमावतिरागः
अर्धपीतस्तनं ॥7.14॥	335	अनुष्टुप्	उदात्त–स्वभावोक्ती	कल्याणिरागः
असंशयं क्षत्रपरिग्रहक्षमा ॥1.22॥	34	वंशस्थम्	अर्थान्तरन्यास–काव्यलिङ्गे	आरभिरागः
अस्मात्परं बत ॥6.25॥	306	वसन्ततिलका	उत्प्रेक्षा–काव्यलिङ्गे	मुखारिरागः
अस्मान्साधु विचिन्त्य ॥4.17॥	186	शार्दूलविक्रीडितम्	सामान्यनिबन्धना–अप्रस्तुतप्रशंसा–काव्यलिङ्गानि	भैरविरागः
अहन्यहन्यात्मन ॥6.26॥	309	उपजातिः	अर्थापत्तिः–अप्रस्तुतप्रशंसे	शङ्कराभरणरागः
आखण्डलसमो ॥7.28॥	363	अनुष्टुप्		सुरटिरागः
आचार इत्यवहितेन ॥5.3॥	201	वसन्ततिलकम्	अप्रस्तुतप्रशंसा–विभावना–छेक–वृत्ति–श्रुत्यनुप्रासाः	नाथनामक्रियारागः
आजन्मनश्शाठ्य-॥5.25॥	232	उपजातिः	अप्रस्तुतप्रसंसा–वक्रोक्ति–रूपानुप्रासाः	नाटरागः
आताम्रहरितपाण्डुर ॥6.2॥	255	आर्या	स्वभावोक्तिः	
आपरितोषाद्विदुषां ॥1.2॥	4	आर्या	अर्थान्तरन्यासः	हिन्दुस्थान् कापिरागः
आलक्ष्यदन्त- ॥7.17॥	339	वसन्ततिलका	स्वभावोक्ति–अप्रस्तुतप्रशंसे	नीलाम्बरिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
इकारः				
इतः प्रत्यादेशात् ॥6.9॥	273	शिखरिणी	उपमा	उशेनिरागः, मध्यमावतिरागः
इदं किलाव्याजमनोहरं ॥1.18॥	27	वंशस्थम्	दृष्टान्त–उपमा–व्याजस्तुति–सन्देहलङ्कराः	वसन्तरागः, चपुतालः
इदमनन्यपरायणमन्यथा ॥3.20॥	132	द्रुतविलम्बितम्	उपमा–लाटानुप्रास–परिकराः	आनन्दभैरविरागः
इदमशिशिरैः॥3.14॥	123	हरिणी	काव्यलिङ्ग–स्वभावोक्ति–पर्यायोक्ति–अप्रस्तुतप्रशंसाः	आनन्दभैरविरागः
इदमुपनतमेवं ॥5.19॥	220	मालिनी	उपमा–सन्देह–काव्यलिङ्गानि	नीलाम्बरिरागः
इदमुपहितसूक्ष्मग्रन्थिना ॥1.19॥	29	मालिनी	उपमा	मोहन
ईषदपि चुम्बितानि ॥1.4॥	7	आर्या	परिकर–काव्यलिङ्गे	नाथनामक्रियारागः
उत्पक्ष्मणोर्नयनयोः॥4.15॥	183	वसन्ततिलका	परिकर–काव्यलिङ्गे	तोडिरागः, सावेरिरागः
उकारः				
उत्सृज्य कुसुमशयनं ॥3.23॥	136	आर्या	काव्यलिङ्ग–परिकर–अनुप्रास–संसृष्टि–सङ्कराः	जञ्झूटि
उदेति पूर्वं कुसुमं ॥7.30॥	364	वंशस्थम्	अन्योन्यम्	आरभिरागः
उद्गलितदर्भकबला ॥4.12॥	178	आर्या	उत्प्रेक्षा	आनन्दभैरविरागः
उन्नमितैकभ्रूलतमाननमस्याः	126	आर्या	उपमा–अर्थापत्ति–स्वभावोक्ति–सन्देह–	कल्याणिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
॥3.16॥			सङ्कर–अनुमानाः	
उपोढशब्दा ॥7.10॥	329	वंशस्थम्	विशेषोक्ति–काव्यलिङ्गे	केदारगौलरागः
एकारः				
एकैकमत्र दिवसे ॥6.12॥	280	वसन्ततिलकम्	काव्यलिङ्गम्	भैरविरागः
एवमाश्रमविरुद्ध-॥7.18॥	340	स्वागता	उपमा–अनुप्रासौ	केदारगौलरागः
एष त्वामभिनव-॥6.27॥	311	प्रहर्षिणी	उपमा–अनुप्रासौ	मोहनरागः
एषा कुसुमनिषण्णा ॥6.19॥	293	आर्या	समासोक्तिः	ब्याहाग्रागः
एषापि प्रियेण विना ॥4.16॥	185	गाथा	अन्तरन्यासः	नाथनामक्रियारागः
औकारः				
औत्सुक्यमात्रम-॥5.6॥	205	वसन्ततिलकम्	अप्रस्तुतप्रशंसा–काव्यलिङ्ग–विरोधाभास–उपमाः	वरालिरागः
ककारः				
कः पौरवे वसुमतीं ॥1.25॥	38	आर्या	अप्रस्तुतप्रशंसा–छेकवृत्यनुप्रास–परिकराः	नाटरागः
कथन्नुतं बन्धुर-॥6.13॥	282	वंशस्थम्	विभावना–विशेषोक्ति–समासोक्ति–अर्थान्तरन्यासाः	आनन्दभैरविरागः
का कथा बाणसन्धाने ॥3.1॥	103	अनुष्टुप्	समासोक्तिगर्भोत्प्रेक्षा–काव्यलिङ्गे	मोहनरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
का स्विदवकुण्ठनवती ॥5.13॥	213	आर्या	उपमा–काव्यलिङ्गे	हिन्दुस्थान् कापिरागः
कामं प्रत्यादिष्टां ॥5.31॥	242	आर्या	उत्प्रेक्षा–अनुमान–विभावनाः	घण्टारागः
कामं प्रिया न सुलभा ॥2.1॥	66	आर्या	अर्थान्तरन्यास–विभावना–श्रुत्यनुप्रास–अप्रस्तुतप्रशंसाः	घण्टारागः, आदितालः
कार्या सैकतलीनहंस- ॥6.17॥	289	शार्दूलविक्रीडितम्	उदात्त–स्वभावोक्ती	भैरविरागः
किं कृतकार्यद्वेषाद्धर्मं ॥5.18॥	219	आर्या	अर्थान्तरन्यासः	नाटरागः
किं तावद्व्रतिनाम् ॥5.9॥	208	शार्दूलविक्रीडितम्	छेक–वृत्ति–श्रुत्यनुप्रास–काव्यलिङ्गाः	भैरविरागः
किं शीतलैः ॥3.22॥	135	वसन्ततिलकम्	परिणाम–काव्यलिङ्ग–परिकर–वृत्यनुप्रासाः	हिन्दुस्थान् कापिरागः, आदितालः
कुतो धर्मक्रिया॥5.14॥	215	अनुष्टुप्	दृष्टान्त–प्रतिवस्तूपमे	केदारगौलरागः
कुमुदान्येव ॥5.28॥	236	आर्या	अप्रस्तुतप्रंशंसा–दृष्टान्त–अर्थान्तरन्यासाः	बेगडरागः
कुल्याम्भोभिः पवनचपलैः ॥1.15॥	21	मन्दाक्रान्ता	काव्यलिङ्ग–अनुमान–समुच्चय–स्वभावोक्ति–वृत्यनुप्रासाः	केदारगौलरागः, तोडिरागः
कृतं न कर्णार्पित-॥6.18॥	291	वंशस्थम्	उपमा–समुच्चयौ	तोडिरागः
कृताभिमर्शामनुमन्यमानः॥5.20॥	223	उपजातिः	उपमा–विषयानुप्रासौ	मोहनरागः
कृताश्शरव्यं हरिणा ॥6.29॥	314	वंशस्थम्	अर्थान्तरन्यास–परिसङ्ख्या–काव्यलिङ्गानि	भैरविरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
कृत्ययोर्भिन्नदेशत्वाद् ॥2.17॥	99	अनुष्युप्	उपमा	आनन्दभैरविरागः
कृष्णसारे ददच्चक्षुः ॥1.6॥	9	अनुष्टुप्	विशेषः	मोहनरागः
क्व वयं क्व परोक्षमन्मथो ॥2.18॥	101	वियोगिनी	निदर्शना – आक्षेपः	खमास्रागः
क्षामक्षामकपोलमाननमुरः ॥3.11॥	117	शार्दूलविक्रीडितम्	उपमा–अनुप्रास–स्वभावोक्ति–काव्यलिङ्गाः	भैरविरागः
क्षौमं केनचिदिन्दु-॥4.5॥	169	शार्दूलविक्रीडितम्	उपमा–अनुप्रास–अर्थापत्ति–स्वभावोक्ति–होतवः	केदरगालरागः
गकारः				
गच्छति पुरश्शरीरं ॥1.34॥	61	आर्या	अतिशयोक्तिः–वृत्यनुप्रास–उपमा–उत्प्रेक्षाः	पुन्नागवरालिरागः
गान्धर्वेण विवाहेन ॥3.24॥	137	अनुष्टुप्	अप्रस्तुतप्रशंसा	आरभिरागः
गाहन्तां महिषा ॥2.6॥	76	शार्दूलविक्रीडितम्	अतिशयोक्ति–स्वभावेक्ति–वृत्ति–श्रुत्यनुप्रास–क्रियासमुच्चय–प्रस्तुताङ्कुर–काव्यलिङ्गानि	पुन्नागवरालिरागः
ग्रीवाभङ्गाभिरामं ॥1.7॥	10	स्रग्धरा	स्वभावोक्तिः	खमास्रागः
चकारः				
चलापाङ्गां दृष्टिं ॥1.24॥	36	शिखरिणी	व्यतिरेक–भ्रान्तिमत्–स्वभावोक्ति–	आनन्दभैरविरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
			काव्यलिङ्ग–समासोक्ति–श्रुत्यनुप्रासाः	
चित्रे निवेश्य ॥2.9॥	83	वसन्ततिलकम्	उत्प्रेक्षा–अतिशयोक्ति–काव्यलिङ्गानि	तोडिरागः
चूतानां चिरनिर्गतापि ॥6.4॥	259	शार्दूलविक्रीडितम्	उत्प्रेक्षा–काव्यलिङ्ग–विशेषोक्तयः	आरभिरागः
जकारः				
जन्म यस्य पुरोर्वंशे ॥1.12॥	16	अनुष्टुप्	काव्यलिङ्गम्	सुरटिरागः
जाने तपसो वीर्यं ॥3.2॥	106	आर्या	अप्रस्तुतप्रशंसा–विशेषोक्ति–अतिशयोक्तयः	वरालिरागः, चापुतालः
ज्वलति चलितेन्धनो ॥6.31॥	317	आर्या	दृष्टान्त–अप्रस्तुतप्रशंसा–अर्थान्तरन्यासाः	आरभिरागः
तकारः				
तत्साधुकृतसन्धानं ॥1.11॥	15	अनुष्टुप्	छेकानुप्रास–वृत्यनुप्रासौ	आरभिरागः
तदेषा भवतः कान्ता ॥5.26॥	234	अनुष्टुप्	अर्थान्तरन्यासः	नाटरागः
तपति तनुगात्रि ॥3.18॥	128	आर्या	दृष्टान्त–प्रतिवस्तूपमा–व्यतिरेक–विरोधाभास–अनुप्रासाः	नाथनामक्रियारागः
तव कुसुमशरत्वं ॥3.3॥	106	मालिनी	काव्यलिङ्ग–रूपक–विरोधाभास–परिणामोपमा–छेकवृत्यनुप्रासाः	शहानरागः, आदितालः
तव न जाने हृदयं ॥3.17॥	128	आर्या	विरोधाभासः	नाथनामक्रियारागः
तव भवतु बिडौजाः ॥7.34॥	373	मालिनी	परिवृत्तिः	सौराष्ट्ररागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
तव सुचरितमङ्गुलीय ॥6.11॥	278	पुष्पिताग्रा	उपमा–अनुमान–समासोक्ति–काव्यलिङ्गानि	तोडिरागः, रूपकतालः
तवास्मि गीतरागेण ॥1.5॥	8	अनुष्टुप्	उपमा–काव्यलिङ्गे	केदाररागः
तस्याः पुष्पमयी ॥3.27॥	142	शार्दूलविक्रीडितम्	विभावना–सन्देह–सङ्कर–काव्यलिङ्गाः	मुखारिरागः
तीव्राघातप्रतिहत- ॥1.33॥	58	मन्दाक्रान्ता	सङ्कर–श्रुत्यनुप्रास–स्वभावोक्ति–उत्प्रेक्षा–अप्रस्तुतप्रशंसा–काव्यलिङ्ग–परिकराः	वसन्तरागः
तुरगखुरहतस्तथा हि ॥1.32॥	57	पुष्पिताग्रा	अप्रस्तुतप्रशंसा–वृत्यनुप्रास–उपमा–काव्यलिङ्गानि	वसन्तरागः, धन्यासिरागः
त्रिस्रोतसं वहति ॥7.6॥	324	वसन्ततिलकम्	उदात्तः	शङ्कराभरणरागः
त्वन्मतिः केवला ॥6.32॥	318	अनुष्टुप्	काव्यलिङ्गम्	कल्याणिरागः
त्वमर्हताम्प्राग्रसरः॥5.15॥	216	वंशस्थम्	उत्प्रेक्षा–अनुप्रास–काव्यलिङ्गानि	कल्याणिरागः
त्वमसि मया ॥6.3॥	257	आर्या	स्वभावोक्तिः	उशेनिरागः, मध्यमावतिरागः
दकारः				
दर्भाङ्कुरेण चरणः ॥2.12॥	86	वसन्ततिलकम्	विरोधाभास–विभावना–हेतु–व्याजोक्ति–स्वभावोक्ति–वृतिश्रुतिछेकानुप्रासाः	भैरविरागः
दर्शनसुखमनुभवतः ॥6.21॥	295	आर्याजातिः	उत्प्रेक्षा	आनन्दभैरविरागः
दिष्ट्या शकुन्तला ॥7.29॥	364	अनुष्टुप्	समुच्चयः	कल्याणिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
दुष्यन्तेनाहितं तेजो ॥4.4॥	162	अनुष्टुप्	उपमा	कल्याणिरागः
नकारः				
न खलु न खलु बाणः॥1.10॥	15	मालिनी	विषमोपमा	शङ्कराभरणरागः
न नमयितुमधिज्यमस्मि ॥2.3॥	70	पुष्पिताग्रा	काव्यलिङ्ग–उत्प्रेक्षा–श्रुत्यनुप्रास–स्मृतिमत्–पर्यायोक्ति–उपमाः	आनन्दभैरविरागः
नापेक्षितो गुरुजनो ॥5.16॥	217	गाथा	अर्थापत्तिः	मध्यमावतिरागः
नियमयसि ॥5.8॥	207	मालिनी	काव्यलिङ्ग–कारक–दीपक–व्यतिरेकाः	नाटकुरङ्गिरागः
नीवाराः शुकगर्भकोटर-॥1.14॥	20	शार्दूलविक्रीडितम्	काव्यलिङ्ग–अनुमान–स्वभावोक्तयः	केदरगौलरागः
नैतच्चित्रं ॥2.15॥	91	मन्दाक्रान्ता	उपमा–काव्यलिङ्ग–पर्यायोक्ति–दीपकाः	केदरगौलरागः
पकारः				
परिग्रहबहुत्वेऽपि ॥3.21॥	133	अनुष्टुप्	दीपक–रूपक–तुल्ययोगिता–अतिशयोक्ति–श्लेष–अनुप्रासाः	मोहनरागः
पातुं न प्रथमं व्यवस्यति ॥4.9॥	175	शार्दूलविक्रीडितम्	विशेषोक्ति–समासोक्ति–काव्यलिङ्गाः	आनन्दभैरविरागः
पुत्रस्य ते रणशिर- ॥7.26॥	360	वसन्ततिलकम्	उदात्त–रूपक–काव्यलिङ्गानि	भैरविरागः
पृष्टा जनेन समदुःखसुखेन ॥3.12॥	118	वसन्ततिलकम्	काव्यलिङ्ग–वृत्यनुप्रासौ	यदुकुलकाम्भोजिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
प्रजाः प्रजास्स्वा इव ॥5.5॥	202	उपेन्द्रवज्रा	उपमा–अनुप्रासयोः संसृष्टिः	आरभिरागः
प्रजागरात्खिलीभूतः ॥6.22॥	296	अनुष्टुप्	हेतु–अनुप्रासौ	मोहनरागः
प्रत्यादिष्टविशेष-॥6.6॥	264	शार्दूलविक्रीडितम्	उपमा–स्वभावोक्ति–परिकराः	तोडिरागः
प्रथमं सारङ्गाक्ष्या ॥6.7॥	265	आर्या	विभावना–विशेषोक्ति–अनुप्रास–उपमाः	पुन्नागवरालिरागः
प्रथमोपकृतं ॥7.1॥	320	वैतालीकम्	विभावना–विशेषोक्ति–सन्देह–सङ्कराः	शङ्कराभरणरागः
प्रलोभ्यवस्तु-॥7.16॥	338	वंशस्थम्	उपमा–काव्यलिङ्गे	नीलाम्बरिरागः
प्रवर्ततां प्रकृतिहिताय ॥7.35॥	375	रुचिरा	समुच्चयः	मध्यमावतिरागः
प्राणानामनिलेन ॥7.12॥	332	शार्दूलविक्रीडितम्	व्यतिरेक–विशेषोक्ति–काव्यलिङ्गानि	केदारगौलरागः
प्राहुर्द्वादशधा ॥7.27॥	361	शार्दूलविक्रीडितम्	उदात्त–काव्यलिङ्गे	आरभिरागः
बकारः				
बाष्पेण प्रतिषिद्धेऽपि ॥7.23॥	354	अनुष्टुप्	विरोधाभास–काव्यलिङ्ग–विभावनाः	तोडिरागः
भकारः				
भव हृदय साभिलाषं ॥1.28॥	51	आर्या	काव्यलिङ्गम्	भैरविरागः
भवनेषु रसाधिकेषु ॥7.20॥	343	मालाभरिणी	रूपक–अनुप्रासौ	आरभिरागः
भवन्ति नम्राः॥5.12॥	212	वंशस्थम्	अप्रस्तुतप्रशंसा–प्रतिवस्तूपमा–अर्थान्तरन्यास–अतिशयोक्ति–काव्यलिङ्गाः	आरभिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
भानुस्सकृद्युक्ततुरङ्ग ॥5.4॥	201	इन्द्रवज्रा	माला–प्रतिवस्तूपमा–उप्रस्तुतप्रशंसा–श्रुत्यनुप्रास–परिसङ्ख्याः	केदरगौलरागः
भूत्वा चिराय ॥4.20॥	192	वसन्ततिलकम्	माला–दीपक–काव्यलिङ्गानि	केदारगौलरागः
मकारः				
मनोरथाय नाशंसे ॥7.13॥	334	अनुष्टुप्	अर्थान्तरन्यास–अतिशयोक्ती	घण्टारागः, चापुतालः
मय्येव विस्मरण ॥5.23॥	230	वसन्ततिलकम्	उत्प्रेक्षा–काव्यलिङ्ग–अनुप्रासाः	तोडिरागः
महतस्तेजसो बीजं ॥7.15॥	337	अनुष्टुप्	उपमा–अनुप्रासौ	कल्याणिरागः
महाभागः कामं ॥5.10॥	209	शिखरिणी	उपमा – उत्प्रेक्षा	कल्याणिरागः
मानुषीषु कथं वा स्यात् ॥1.26॥	48	अनुष्टुप्	प्रतिवस्तूपमा–निदर्शने	वसन्तरागः, काम्भोजिरागः
मुक्तेषु रश्मिषु ॥1.8॥	12	वसन्ततिलकम्	स्वभावोक्ति–उत्प्रेक्षे	मोहनरागः
मुनिसुताप्रणय-॥6.8॥	268	द्रुतविलम्बितम्	अप्रस्तुतप्रशंसा–समुच्चय–काव्यलिङ्गानि	जञ्झूटिरागः
मुहुरङ्गुलिसंवृताधरोष्ठं ॥3.26॥	142	मालभारिणी	स्वभावोक्ति–काव्यलिङ्ग–श्रुतिवृत्यनुप्रासाः	मोहनरागः
मूढस्स्यामहमेषा ॥5.29॥	237	अनुष्टुप्		हुसेनिरागः
मेदश्छेदकृशोदरं लघु ॥2.5॥	75	शार्दूलविक्रीडितम्	काव्यलिङ्ग–वृत्यनुप्रास–समुच्चयाः	यदुकुलकाम्भोजिरागः
मोहान्मया सुतनु ॥7.25॥	356	वसन्ततिलकम्	विशेषोक्ति–व्यतिरेक–अनुप्रासाः	कल्याणिरागः, आदितालः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
यकारः				
यतो यतष्षट्चरणो-॥1.23॥	36	वंशस्थम्	विभावना	श्रीरागः
यथागजो नेति ॥7.31॥	365	उपजातिः	उपमा	केदरगौलरागः, तोडिरागः
यदालोके सूक्ष्मं ॥1.9॥	13	शिखरिणी	काव्यलिङ्गम्–पर्यायोक्ति–विरोधाभास–उत्प्रेक्षा–स्वभावोक्तयः	मोहनरागः
यदि यथा वदति ॥5.27॥	235	द्रुतविलम्बितम्	हेतु–काव्यलिङ्गे	मोहनरागः
यदुत्तिष्ठति वर्णेभ्यो ॥2.13॥	89	अनुष्टुप्	तुल्ययोगिता	कानडरागः
यद्यत्साधु न चित्रे ॥6.14॥	284	(पद्या) पथ्यावक्त्रम्	असम्भवम्	नाथनामक्रियारागः
ययातेरिव शर्मिष्ठा ॥4.7॥	173	अनुष्टुप्	उपमा	सुरटिरागः
यस्य त्वया ॥4.14॥	182	वसन्ततिलकम्	स्वभावोक्ति–काव्यलिङ्गे	तोडिरागः
या सृष्टिस्स्रष्टुराद्या ॥1.1॥	1	स्रग्धरा	अनुप्रास–स्वभावोक्ति–समासोक्तयः	ब्याहाग्रागः
यात्येकतोऽस्तशिखरं ॥4.2॥	156	वसन्ततिलकम्	समासोक्ति–तुल्ययोगिता–उत्प्रेक्षा–निदर्शनाः	भूपालरागः
यास्यत्यद्य शकुन्तलेति ॥4.6॥	171	शार्दूलविक्रीडितम्	व्यतिरेक–अनुप्रास–अर्थापत्ति–काव्यलिङ्गाः	यदुकुलकाम्भोजिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
येन येन वियुज्यन्ते ॥6.23॥	303	अनुष्टुप्	छेकानुप्रास–वृत्यनुप्रासौ	ब्याहाग्रागः
यो हनिष्यति वध्यं त्वां ॥6.28॥	313	अनुष्टुप्	दृष्टान्तः	नाटरागः
रकारः				
रथेनानुत्खात-॥7.33॥	370	शिखरिणी	स्वभावोक्ति–भाविककाव्यलिङ्गानि	कल्याणिरागः
रम्यं द्वेष्टि यथा ॥6.5॥	262	शार्दूलविक्रीडितम्	पर्यायोक्ति–काव्यलिङ्ग–समुच्चयाः	आनन्दभैरविरागः
रम्याणि वीक्ष्य ॥5.2॥	200	वसन्ततिलकम्	अप्रस्तुतप्रशंसा–अनुमान–विभावना–काव्यलिङ्गानि	सावेरिरागः
रम्यान्तरः कमलिनी-॥4.11॥	177	वसन्ततिलकम्	उपमा–परिकर–काव्यलिङ्गानि	सौराष्ट्रकरागः
रम्यास्तपोधनानां ॥1.13॥	18	आर्या	प्रस्तुताङ्कुर–पर्यायोक्ति–काव्यलिङ्ग–विरोधाभासाः	केदारगौलरागः
वकारः				
वल्मीकार्धनिमग्न- ॥7.11॥	330	शार्दूलविक्रीडितम्	श्लेष–उपमा–परिकराः	आरभिरागः
वसने परिधूसरे ॥7.21॥	351	मालाभरिणी	स्वभावोक्ति–काव्यलिङ्गे	मोहनरागः
वाचं न मिश्रयति ॥1.31॥	56	वसन्ततिलकम्	छेकानुप्रास–वृत्यनुप्रासौ	वसन्तरागः
विचिन्तयन्ती यमनन्यमानसा ॥4.1॥	149	वंशस्थम्	उपमा–काव्यलिङ्ग–श्लेष–छेक–वृत्यनुप्रासाः	मोहनरागः, नाटरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
विच्छित्तिशेषैः ॥7.5॥	323	उपजातिः	उदात्त–परिणाम–अनुप्रासाः	शङ्कराभरणरागः
वृथैव सङ्कल्प ॥3.6॥	108	उपजातिः		श्रीरागः
वैखानसं किमनया ॥1.27॥	50	वसन्ततिलकम्	वृत्यनुप्रास–सहोक्ति–परिकराः	पूरिकल्याणिरागः, रूपकतालः
व्यपदेशमाविलयितुं ॥5.21॥	225	आर्या	उपमा–समुच्चयौ	धनापरिरागः
शकारः				
शक्यमरविन्दसुरभिः ॥3.8॥	110	आर्या	समाहित–समासोक्ति–वृत्यनुप्रास–छेकानुप्रास–सङ्कराः	भैरविरागः
शमप्रधानेषु तपोधनेषु ॥2.7॥	78	उपजातिः	श्रुत्यनुप्रास–श्लोषोपमा–अनुभाव–काव्यलिङ्गानि	भैरविरागः
शममेष्यति मम शोकः ॥4.21॥	193	आर्या	अनुप्रास–काव्यलिङ्ग–परिकराः	मुखारिरागः
शान्तमिदमाश्रमपदं ॥1.16॥	23	आर्या	अर्थान्तरन्यास–अप्रस्तुतप्रशंसा–काव्यलिङ्गानि	धनापरिरागः
शापादसि ॥7.32॥	368	वसन्ततिलका	दृष्टान्तः	तोडिरागः
शुद्धान्तदुर्लभमिदं ॥1.17॥	24	आर्या	अप्रस्तुतप्रशंसा–निदर्शना–सङ्कराः	ब्याहाग्रागः
शुश्रूषस्व गुरून्कुरु ॥4.18॥	187	शार्दूलविक्रीडितम्	अप्रस्तुतप्रशंसा–काव्यलिङ्ग–रूपक–	तोडिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
			कारक–दीपकानि	
शैलानामवरोहतीव ॥7.8॥	326	शार्दूलविक्रीडितम्	उत्प्रेक्षा–काव्यलिङ्ग–स्वभावोक्ति–संसृष्टाः	भैरविरागः
सकारः				
संरोपितेऽप्यात्मनि ॥6.24॥	305	उपजातिः	उपमा–काव्यलिङ्गे	तोडिरागः
सख्युस्ते स किल ॥6.30॥	316	प्रहर्षिणी	दृष्टान्तः	केदारगौलरागः
सङ्कल्पितं प्रथममेव ॥4.13॥	180	वसन्ततिलकम्	समासोक्ति–तुल्ययोगिता–काव्यलिङ्गानि	केदारगौलरागः
सतीमपि ज्ञाति-॥5.17॥	218	वंशस्थम्	अप्रस्तुतप्रशंसा–काव्यलिङ्ग–अनुप्रासाः	मोहनरागः
सन्दष्टकुसुमशयनानि॥3.19॥	129	आर्या	काव्यलिङ्ग–परिकर–अनुप्रास–उपमाः	शङ्कराभरणरागः
सम्मीलन्ति न तावत् ॥3.7॥	110	आर्या	उत्प्रेक्षा	भूपालरागः
सरसिजमनुविद्धं ॥1.20॥	29	मालिनी	अर्थान्तरन्यास–उपमे	फरजुरागः, आदितालः
सहजं किल ॥6.1॥	245	आर्या	विरोधाभासः	भैरविरागः, कल्याणिरागः
सा निन्दन्ती स्वानि ॥5.30॥	240	शालिनी	क्रियासमुच्चयः	गीर्वाणिरागः, सावेरिरागः
साक्षात्प्रियामुपगताम् ॥6.16॥	288	वसन्ततिलका	निदर्शना	यदुकुलकाम्भोजिरागः
सायन्तने सवनकर्मणि ॥3.28॥	143	वसन्ततिलका	उपमा–काव्यलिङ्ग–छेकानुप्रास–वृत्यनुप्रासाः	पन्तुवरालिरागः
सिध्यन्ति कर्मसु ॥7.4॥	322	वसन्ततिलका	दृष्टान्त–अनुप्रास–अप्रस्तुतप्रशंसा	भैरविरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
सुतनु हृदयात् ॥7.24॥	355	हरिणी	अप्रस्तुतप्रशंसा–भ्रान्तिमत्–काव्यलिङ्ग–दृष्टान्ताः	आनन्दभैरविरागः
सुभगसलिलावगाहाः ॥1.3॥	6	आर्या	स्वभावोक्तिः	हिन्दुस्थान् कापिरागः, सुरटिरागः
सुरयुवतिसम्भवं किल ॥2.8॥	81	आर्या	उपमा	तोडिरागः
सुरसखस्य ॥7.3॥	322	द्रुतविलम्बितम्	तुल्ययोगिता–उपमा–अनुप्रासाः	शङ्कराभरणरागः
स्तनन्यस्तोशीरं प्रशिथिलम् ॥3.10॥	113	शिखरिणी	अप्रस्तुतप्रशंसा–व्यतिरेक–अनुमान–व्यतिरेक–विभावना–विशेषोक्ति–सन्देह–सङ्कर–संसृष्टि–छेकवृत्तिश्रुत्यनुप्रासाः	तोडिरागः
स्त्रीणामशिक्षित-॥5.22॥	229	वसन्ततिलका	अप्रस्तुतप्रशंसा–अर्थान्तरन्यास–व्यतिरेकाः	मोहनरागः
स्निग्धं वीक्षितमन्यतोऽपि ॥2.2॥	66	शार्दूलविक्रीडितम्	अर्थान्तरन्यास–उत्प्रेक्षा–स्वभावोक्ति–कारक–दीपकानि	नाथनामक्रियारागः, आदितालः
स्मर एव तापहेतुः॥3.13॥	120	आर्या	विरोधाभास–काव्यलिङ्ग–उपमा–वृत्यनुप्रासाः	मोहनरागः
स्मृतिभिन्नमोहतमसो ॥7.22॥	353	आर्या	निदर्शन–दृष्टान्तौ	तोडिरागः
स्रस्तान्सावतिमात्रलोहिततलौ	54	शार्दूलविक्रीडितम्	स्वभावोक्ति–अनुमान–काव्यलिङ्ग–	वसन्तरागः, मुखारिरागः

श्लोकाः	पृ.सं	छन्दः	अलङ्काराः	गेयरागः
॥1.30॥			अनुप्रासाः	
स्वप्नो नु माया नु ॥6.10॥	276	उपजातिः	अर्थान्तरन्यास–सन्देह–काव्यलिङ्गानि	उशेनिरागः, चापुतालः
स्वसुखनिरभिलाषः ॥5.7॥	206	मालिनी	समासोक्ति–स्वभावोक्ति–काव्यलिङ्ग–दृष्टान्त–आक्षेप–अनुप्रासाः	कल्याणिरागः, आदितालः
स्वायम्भुवान्मरीचेर्यः ॥7.9॥	328	अनुष्टुप्	छेकानुप्रास–वृत्यनुप्रासौ	केदरगौलरागः
स्विन्नाङ्गुलिविनिवेशो ॥6.15॥	286	आर्या	अनुमानम्	हिन्दुस्थान् कापिरागः

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

गुण्डेराव हर्कारे, अनुमुल वेङ्कटशेषकविः, अल्लंराजु रङ्गशायिकविः, अष्टकाल नरसिंहरामशर्मा, आणिविल्ल वेङ्कटशास्त्री, एलेश्वरोपाध्यायुलु, ओगेटि परीक्षिच्छर्मा, काशी कृष्णाचार्युलु, श्रीभाष्यं विजयसारथिः, कुण्टिमद्दि शेषशर्मा, गडियारं वेङ्कटशेषशास्त्री, गरिकपाटि मल्लावधानी, गोल्लापिन्नि वासुदेवशास्त्री, तेल्कपल्लि रामचन्द्रशास्त्री, दुव्वूरि वेङ्कटरमणशास्त्री, दोर्भल विश्वनाथशर्मा, दोर्भल प्रभाकरशर्मा, पञ्चाग्नुल आदिनारायणशास्त्री, पल्ले पूर्णप्रज्ञाचार्युलु, पिण्डिप्रोलु लक्ष्मणकविः, पुष्पगिरि तिम्मन्नः, पेराल भरतशर्मा, मण्ड कामेश्वरकविः, मण्डपाक पार्वतीश्वरशास्त्री, मल्लम्पल्लि शरभय्यशर्मा, मेडवरमु सुब्रह्मण्यशास्त्री, मेडेपल्लि वेङ्कटरमणाचार्युलु, विक्राल शेषाचार्युलु, वेदान्तदेशिकुलु, वेदान्तं कुमारस्वामी, सामवेदं राममूर्तिशर्मा, पुल्लेल श्रीरामचन्द्रुडु इत्यादयो महान्तो मूर्धन्याः तेलुगुदेशीयाः संस्कृतकवयः बहवो विलसन्ति। अमीषु चतुष्पञ्चान् विहाय अन्ये संस्कृतजगति अप्रसिद्धाः। अमीषां संस्कृतकृतयः तेलुगुलिप्या मुद्रिता इत्यनेन हेतुना कृतीस्तेषां तेलुगुदेशे एव प्रचुरं प्राचुर्यं लेभिरे।

एतादृशान् कवीन् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनामाध्यमेन प्रकाशनानि विदधाति। इयं परियोजना राष्ट्रियसंस्कृतसंस्थानमिति पूर्वनाम्नः केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। संस्कृत- अकाडमी - षष्ठ्यब्दग्रन्थमालापराख्यायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनायाः अन्तर्गतत्वेन प्रकाशयितुमनुमताः ग्रन्थाः।

1. रामकृष्णयुधिष्ठिरविजयचम्पूः
2. शतकद्वयम् (काशीशतकम, रामचन्द्रशतकम्), कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
3. तारकम्, कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
4. हरिकथामृतम्, कर्ता – ब्रह्मश्रीः अज्जाडादिभट्टनारायणदासः
5. अभिज्ञानशाकुन्तलम् , व्याख्याता – श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालः
6. आन्ध्रकाव्यकथाः, कर्ता – श्रीमान् सन्निधानं सूर्यनारायणशास्त्री
7. श्रीवेङ्कटेश्वरचम्पूः, कर्ता – श्रीमान् पेरुमाण्ड्ल आचार्यः
8. सप्तशतीसारसङ्ग्रहः, कर्ता दृ हालः, व्याख्याता – पेदकोमटि वेमभूपालः
9. विक्रमोर्वशीयम्, व्याख्याता – श्रीमान् मृत्युञ्जयनिश्शङ्कभूपालः
10. युधिष्ठिराश्वमेधचम्पूः, कर्ता – श्रीमान् वेङ्कटशास्त्री
11. रसेन्द्रमङ्गलम्, कर्ता – सिद्धनागार्जुनः
12. यादवराघवीयम्, कर्ता – वेङ्काटाध्वरिः, तेलुगु–आङ्ग्लव्याख्यासहितम्
13. श्रीनिवासचम्पूः, कर्ता – श्रीमान् तिरुवेङ्गलाचार्युलु, श्रीमान् रामकृष्णमाचार्युलु
14. सन्निधानं सूर्यनारायणशास्त्रिणां लघुकाव्यसङ्ग्रहः (कीरसन्देशः, त्रिवेणी, कादम्बरीकथासारः, वेङ्कटेश्वरवचनशतकम्, पूर्णपात्रम् , कचदेवयानीयम्)

दशलक्षमितां परियोजनां संस्कृतपरिषदे प्रदानाय अङ्गीकृतवद्भ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च नमोवाकान् वितरति संस्कृतपरिषत्परिवारः।

